पं०

भूमिका

सुखादिप्रत्यये हेतुरणुत्वाद्युगपन्न हि ।
अनेकैरिन्द्रियैर्बद्धं मनस्तस्मान्न चैकदा ॥ ५४ ॥
अनेकेषाञ्च ज्ञानानां सम्भवोऽस्ति कदाचन ।
अन्धकारस्तु न द्रव्यं तेजोऽभावः स ईरितः ॥ ५५ ॥
आरोपितं रूपमिति कन्दलीकारसंमतम् ।
द्रव्याश्रयी चागुणवानित्येतद्गुणलक्षणम् ॥ ५६ ॥
रूपं रसस्तथा गन्धः स्पर्शः संख्या तथैव च ।
परिमाणपृथक्त्वे तु संयोगश्च विभागकः ॥ ५७ ॥
परत्वमपरत्वञ्च बुद्धयः सुखमेव च ।
दुःखमिच्छा द्वेषयत्नौ मुनिकण्ठाद्विनिर्गताः ॥ ५८ ॥
...देन गुरुत्वञ्च द्रवत्वं स्नेह एव च ।
संस्कारश्च तथा धर्माधर्मौ शब्दः समुच्चिताः ॥ ५९ ॥
प्रसिद्धगुणभावत्वादेते नोक्तास्तु कण्ठतः ।
चक्षुर्मात्रग्राह्यगुणो रूपं नीलादिभेदतः ॥ ६० ॥
भवेत्सप्तविधं तत्र चित्रं नव्यैर्न मन्यते ।
रसनेन्द्रियग्राह्यस्तु गुणः स्याद्रससंज्ञकः ॥ ६१ ॥
मधुराम्लादिभेदेन षड्विधः परिकीर्तितः ॥
घ्राणग्राह्यो भवेद्गन्धोऽसुरभिः सुरभिर्द्विधा ॥ ६२ ॥
त्वगिन्द्रियग्राह्यगुणः स्पर्शः शीतादिभेदतः ।
त्रिविधस्तत्र रूपं स्याच्चाक्षुषे सहकारि तु ॥ ६३ ॥
रसनादौ रसादीनामेवं हेतुत्वमिष्यताम् ।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित् ॥ ६ ॥
पच्यन्ते वह्निसंयोगात्स्वतन्त्राः परमाणवः ।
पीलुपाकमते, नैवावयविष्वस्ति मध्यगः
दुर्घटस्तन्न मन्यते इतरेऽक्षपदानुगाः ४२ ॥
... हेतुः संख्याऽ... ॥

ज्ञानरूप
बुद्धिभेद
बुद्धिविभ
चतुर्धा
गुरु

१६२

१
१
३
६

इति गणेषु मात्रा ... ...क्रम् ॥ ४४ ॥
...

अप्राप्तिपूर्विका प्राप्तिः संयोगस्त्रिविधः स्मृतः ॥ ६९ ॥
श्येनशैलौ यथा तेषु प्रथमस्त्वेककर्मजः ।
भवेद्द्वितीय उभयकर्मजो मेषयोरिव ॥ ७० ॥
अङ्गुलीतरुसंयोगात्संयोगस्तरुहस्तयोः ।
तृतीयस्तत्प्रतिद्वन्द्वी विभागोऽपि गुणान्तरम् ॥ ७१ ॥
एवं विभजते तस्मादित्येवं हि प्रतीयते ॥
संयोगाभावतो नास्य चरितार्थत्वसंभवः ॥ ७२ ॥
संयोगवदमुष्यापि त्रैविध्यं स्वयमूह्यताम् ।
विभागजविभागस्तु द्विविधः परिकीर्तितः ।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ।
दैशिकं कालिकञ्चेति परत्वं द्विविधं मतम् ॥
तद्वदेवापरत्वं स्याद्, बुद्धिः साम्प्रतमुच्यते ।
कृत्स्नव्यवहृतेर्हेतुस्सा तावद्द्विविधा स्मृता ॥ ७५ ॥
संशयो निश्चयश्चेति कोटिद्वयकषन्तु यत् ।
अनिर्णयात्मकं स्थाणुः पुरुषो वेति जायते ॥ ७६ ॥
साधारणादिधर्माणां दर्शनात्संशयस्स तु ।
तद्विरुद्धो निर्णयः स्याज्ज्ञानं निर्धारणं परम् ॥ ७७ ॥
पुनः सा द्विविधा प्रोक्ता प्रमाप्रमेति भेदतः ।
यथार्थानुभवो यस्तु प्रमा सा द्विविधा भवेत् ॥ ७८ ॥
प्रत्यक्षमप्यनुमितिरिन्द्रियेभ्यश्च यद्भवेत् ।
तत्प्रत्यक्षं षड्विधं स्याच्चाक्षुषादिप्रभेदतः ॥ ७९ ॥
व्याप्तिज्ञानात्साहचर्यनियमाख्यात्तु यद्भवेत् ।
[illegible]ं सानुमितिः स्वार्था परार्थेति च भेदतः ॥ ८० ॥
[illegible]ऽन्त्या तु जायेत पञ्चावयवयोगतः ।
[illegible]तु त्रिविधमन्वयव्यतिरेकतः ॥ ८१ ॥
[illegible]विधो व्यभिचारादिभेदतः ।

॥ क्रमं न गु... ॥ ४० ॥

॥ ४१ ॥

...क्तम् ॥ ४२ ॥

लिङ्गाच्च...शेषाभस्य पारस्पर्यं ४३ ॥

इत्ये... गणेषु भा ... ...मुक्तम् ॥ ४४ ॥

...म भा

श्रीः ॥

वैशेषिकदर्शनसूत्रपाठः ।

श्रीगणेशाय नमः ।

अथातो धर्मं व्याख्यास्यामः ॥ १ ॥

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥ २ ॥

तद्वचनादाम्नायस्य प्रामाण्यम् ॥ ३ ॥

धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ॥ ४ ॥

पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ॥ ५ ॥

रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणाः [illegible] कर्म न गुणः ॥ ४० ॥

उत्क्षेप्याविशेषाभावेन च ॥ ४१ ॥

सयोग[illegible]व्यवत्वेन द्रव्यत्वमुक्तम् ॥ ४२ ॥

लिङ्गाच्च[illegible]शेषाभावेन च ॥ ४३ ॥

इत[illegible]गणेषु भावाद्गुणत्वमुक्तम् ॥ ४४ ॥

द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥

द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥

कर्म कर्मसाध्यं न विद्यते ॥ ११ ॥

न द्रव्यं कार्यं कारणं च भवति ॥ १२ ॥ वधति

उभयथा गुणाः ॥ १३ ॥

कार्यविरोधि कर्म ॥ १४ ॥

क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥ १५ ॥

द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् ॥ १६ ॥

एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥ १७ ॥

द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ॥ १८ ॥

तथा गुणः ॥ १९ ॥

संयोगविभागवेगानां कर्म समानम् ॥ २० ॥

न द्रव्याणां कर्म ॥ २१ ॥

संयोगानां द्रव्यम् ॥ २७ ॥

रूपाणां रूपम् ॥ २८ ॥

गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥ २९ ॥

संयोगविभागाश्च कर्मणाम् ॥ ३० ॥

कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ॥ ३१ ॥

इति प्रथमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

कारणाभावात् कार्य्याभावः ॥ ३२ ॥

न तु कार्य्याभावात् कारणाभावः ॥ ३३ ॥

सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३४ ॥

भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ॥ ३५ ॥

द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ॥ ३६ ॥

अन्यत्राऽन्त्येभ्यो विशेषेभ्यः ॥ ३७ ॥

सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ॥ ३८ ॥

द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ॥ ३९ ॥

गुणकर्मसु च भावान्न कर्म न गुणः ॥ ४० ॥

सामान्यविशेषाभावेन च ॥ ४१ ॥

अनेकद्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥ ४२ ॥

लिङ्गाच्चाविशेषाभावेन च ॥ ४३ ॥

तथा गुणेषु भावाद्गुणत्वमुक्तम् ॥ ४४ ॥

द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥

द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥

कर्म कर्मसाध्यं न विद्यते ॥ ११ ॥

न द्रव्यं कार्यं कारणं च भवति ॥ १२ ॥ वधति

उभयथा गुणाः ॥ १३ ॥

कार्यविरोधि कर्म ॥ १४ ॥

क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥ १५ ॥

द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् ॥ १६ ॥

एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥ १७ ॥

द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ॥ १८ ॥

तथा गुणः ॥ १९ ॥

संयोगविभागवेगानां कर्म समानम् ॥ २० ॥

न द्रव्याणां कर्म ॥ २१ ॥

संयोगानां द्रव्यम् ॥ २७ ॥

रूपाणां रूपम् ॥ २८ ॥

गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥ २९ ॥

संयोगविभागाश्च कर्मणाम् ॥ ३० ॥

कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ॥ ३१ ॥

इति प्रथमाध्यायस्य प्रथममाह्निकम् ॥

—:o:—

कारणाभावात् कार्य्याभावः ॥ ३२ ॥

न तु कार्य्याभावात् कारणाभावः ॥ ३३ ॥

सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३४ ॥

भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ॥ ३५ ॥

द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ॥ ३६ ॥

अन्यत्राऽन्त्येभ्यो विशेषेभ्यः ॥ ३७ ॥

सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ॥ ३८ ॥

द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ॥ ३९ ॥

गुणकर्मसु च भावान्न कर्म न गुणः ॥ ४० ॥

सामान्यविशेषाभावेन च ॥ ४१ ॥

सयो[illegible]द्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥ ४२ ॥

लिङ्गाच्चा[illegible]शेषाभावेन च ॥ ४३ ॥

[illegible] गणेषु भावाद्गुणत्वमुक्तम् ॥ ४४ ॥

सामान्यविशेषाभावेन च ॥ ४५ ॥

कर्मसु भावात् कर्मत्वमुक्तम् ॥ ४६ ॥

सामान्यविशेषाभावेन च ॥ ४७ ॥

सदिति लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको-
भावः ॥ ४८ ॥

इति प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥

—:o:—

रूपरसगन्धस्पर्शवती पृथिवी ॥ ४९ ॥

रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः ॥ ५० ॥

तेजो रूपस्पर्शवत् ॥ ५१ ॥

स्पर्शवान् वायुः ॥ ५२ ॥

त आकाशे न विद्यन्ते ॥ ५३ ॥

सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सा-
मान्यम् ॥ ५४ ॥

त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद् द्रवत्वमद्भिः
सामान्यम् ॥ ५५ ॥

विषाणी ककुद्मान् प्रान्तेबालधिः सास्नावान् इति
गोत्वे दृष्टं लिङ्गम् ॥५६ ॥

स्पर्शश्च वायोः ॥ ५७ ॥

च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ॥ ५८

अद्रव्यवत्त्वेन द्रव्यम् ॥ ५९ ॥

क्रियावत्त्वाद् गुणवत्त्वाच्च ॥ ६० ॥

अद्रव्यत्वेन नित्यत्वमुक्तम् ॥ ६१ ॥

वायोर्वायुसंमूर्च्छनं नानात्वलिङ्गम् ॥ ६२ ॥

वायुसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ ६३ ॥

सामान्यतो दृष्टाच्चाविशेषः ॥ ६४ ॥

तस्मादागमिकम् ॥ ६५ ॥

संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ॥ ६६ ॥

प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः ॥ ६७ ॥

निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ॥ ६८ ॥

तदलिङ्गमेकद्रव्यत्वात् कर्मणः ॥ ६९ ॥

कारणान्तरानुक्लृप्तिवैधर्म्याच्च ॥ ७० ॥

संयोगादभावः कर्मणः ॥ ७१ ॥

कारणगुणपूर्वकः कार्यगुणो दृष्टः ॥ ७२ ॥

कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ॥ ७३ ॥

परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः ॥ ७४ ॥

परिशेषाल्लिङ्गमाकाशस्य ॥ ७५ ॥

लिङ्गाच्चानित्यत्वे वायुना व्याख्याते ॥ ७६ ॥

तत्त्वम्भावेन ॥ ७७ ॥

शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च ॥ ७८ ॥

तदनुविधानादेकपृथक्त्वं चेति ॥ ७९ ॥

इति द्वितीयाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ॥ ८० ॥

व्यवस्थितः पृथिव्यां गन्धः ॥ ८१ ॥

एतेनोष्णता व्याख्याता ॥ ८२ ॥

तेजस उष्णता ॥ ८३ ॥

अप्सु शीतता ॥ ८४ ॥

अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि ॥ ८५ ॥

द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ८६ ॥

तत्त्वम्भावेन ॥ ८७ ॥

नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति ॥ ८८ ॥

इत इदमिति यतस्तद्दिश्यं लिङ्गम् ॥ ८९ ॥

द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ९० ॥

तत्त्वम्भावेन ॥ ९१ ॥

कार्य्यविशेषेण नानात्वम् ॥ ९२ ॥

आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची ॥ ९

तथा दक्षिणा प्रतीची उदीची च ॥ ९४ ॥

एतेन दिगन्तरालानि व्याख्यातानि ॥ ९५ ॥

सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशयः ॥ ९६ ॥

दृष्टञ्च दृष्टवत् ॥ ९७ ॥

यथादृष्टमयथादृष्टत्वाच्च ॥ ९८ ॥

विद्याऽविद्यातश्च संशयः ॥ ९९ ॥

श्रोत्रग्रहणो योऽर्थः स शब्दः ॥ १०० ॥

तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्य उभयथा दृष्टत्वा-
त् ॥ १०१ ॥

एकद्रव्यत्वान्न द्रव्यम् ॥ १०२ ॥

नापि कर्माऽचाक्षुषत्वात् ॥ १०३ ॥

गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् ॥ १०४ ॥

सतो लिङ्गाभावात् ॥ १०५ ॥

नित्यवैधर्म्यात् ॥ १०६ ॥

अनित्यश्चायं कारणतः ॥ १०७ ॥

न चासिद्धं विकारात् ॥ १०८ ॥

अभिव्यक्तौ दोषात् ॥ १०९ ॥

संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः ॥ ११० ॥

लिङ्गाच्चानित्यः शब्दः ॥ १११ ॥

द्वयोस्तु प्रवृत्त्योरभावात् ॥ ११२ ॥

प्रथमाशब्दात् ॥ ११३ ॥

सम्प्रतिपत्तिभावाच्च ॥ ११४ ॥

सन्दिग्धाः सति बहुत्वे ॥ ११५ ॥

संख्याभावः सामान्यतः ॥ ११६ ॥

इति द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥

प्रसिद्धा इन्द्रियार्थाः ॥ ११७ ॥

इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः ॥ ११८ ॥

सोऽनपदेशः ॥ ११९ ॥

कारणाज्ञानात् ॥ १२० ॥

कार्य्येषु ज्ञानात् ॥ १२१ ॥

अज्ञानाच्च ॥ १२२ ॥

अन्यदेव हेतुरित्यनपदेशः ॥ १२३ ॥

अर्थान्तरं ह्यर्थान्तरस्याऽनपदेशः ॥ १२४ ॥

संयोगि समवाय्येकार्थसमवायि विरोधि च ॥ १२५ ॥

कार्यं कार्यान्तरस्य ॥ १२६ ॥

विरोध्यभूतं भूतस्य ॥ १२७ ॥

भूतमभूतस्य ॥ १२८ ॥

भूतो भूतस्य ॥ १२९ ॥

प्रसिद्धिपूर्वकत्वादपदेशस्य ॥ १३० ॥

अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः ॥ १३१ ॥

यस्माद्विषाणी तस्मादश्वः ॥ १३२ ॥

यस्माद्विषाणी तस्माद्गौरिति चानैकान्तिकस्योदाहरणम् ॥ १३३ ॥

आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत् ॥ १३४ ॥

प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् ॥ १३५ ॥

इति तृतीयाध्यायस्य प्रथमाह्निकम् ॥

—:०:—

आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् ॥ १३६ ॥

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ १३७ ॥

प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम् ॥ १३८ ॥

प्राणाऽपाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि ॥ १३९ ॥

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ १४० ॥

यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ १४१ ॥

सामान्यतो दृष्टाच्चाविशेषः ॥ १४२ ॥

तस्मादागमिकः ॥ १४३ ॥

अहमिति शब्दस्य व्यतिरेकान्नागमिकम् ॥१४४॥

यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति१४५

दृष्टयात्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः ॥ १४६ ॥

देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः ॥ १४७ ॥

सन्दिग्धास्तूपचाराः ॥ १४८ ॥

अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः ॥ १४९ ॥

देवदत्तो गच्छतीत्युपचारादभिमानात्तावच्छरीरप्रत्यक्षोऽहङ्कारः ॥ १५० ॥

सन्दिग्धस्तूपचारः ॥ १५१ ॥

न तु शरीरविशेषाद्यज्ञदत्तविष्णुमित्रयोर्ज्ञानंविषयः १५२॥

अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ॥ १५३ ॥

सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ॥ १५४ ॥

व्यवस्थातो नाना ॥ १५५ ॥

शास्त्रसामर्थ्याच्च ॥ १५६ ॥

इति तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

सदकारणवन्नित्यम् ॥ १५७ ॥

तस्य कार्य्यं लिङ्गम् ॥ १५८ ॥

कारणाभावात् कार्य्याभावः ॥ १५९ ॥

अनित्य इति विशेषतः प्रतिषेधभावः ॥ १६० ॥

अविद्या ॥ १६१ ॥

महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः ॥ १६२ ॥

सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः ॥ १६३ ॥

अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः १६४

तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ॥ १६५ ॥

तस्याभावादव्यभिचारः ॥ १६६ ॥

सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वाऽपरत्वे कर्म च रूपद्रव्यसमवायात् चाक्षुषाणि ॥१६७॥

अरूपिष्वचाक्षुषाणि ॥ १६८ ॥

एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम १६९

इति चतुर्थाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

तत्पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम् ॥ १७० ॥

प्रत्यक्षाऽप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न

विद्यते ॥ १७१ ॥

गुणान्तराप्रादुर्भावाच्च न त्र्यात्मकम् ॥ १७२ ॥

अणुसंयोगस्त्वप्रतिषिद्धः ॥ १७३ ॥

तत्र शरीरं द्विविधं योनिजमयोनिजं च ॥ १७४ ॥

अनियतदिग्देशपूर्वकत्वात् ॥ १७५ ॥

धर्मविशेषाच्च ॥ १७६ ॥

समाख्याभावाच्च ॥ १७७ ॥

संज्ञाया आदित्वात् ॥ १७८ ॥

सन्त्ययोनिजाः ॥ १७९ ॥

वेदलिङ्गाच्च ॥ १८० ॥

इति चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥

आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥ १८१ ॥

तथा हस्तसंयोगाच्च मुसले कर्म ॥ १८२ ॥

अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥ १८३ ॥

तथात्मसंयोगो हस्तकर्मणि ॥ १८४ ॥

अभिघातान्मुसलसंयोगाद्धस्ते कर्म ॥ १८५ ॥

आत्मकर्म हस्तसंयोगाच्च ॥ १८६ ॥

संयोगाभावे गुरुत्वात् पतनम् ॥ १८७ ॥

नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ॥ १८८ ॥

प्रयत्नविशेषान्नोदनविशेषः ॥ १८९ ॥

नोदनविशेषादुदसनविशेषः ॥ १९० ॥

हस्तकर्मणा दारककर्म व्याख्यातम् ॥ १९१ ॥

तथा दग्धस्य विस्फोटने ॥ १९२ ॥

यत्नाभावे प्रसुप्तस्य चलनम् ॥ १९३ ॥

तृणे कर्म वायुसंयोगात् ॥ १९४ ॥

मणिगमनं सूच्यभिसर्पणमदृष्टकारणम् ॥ १९५ ॥

इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतुः ॥ १९६ ॥

नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च ॥ १९७ ॥

संस्काराभावे गुरुत्वात् पतनम् ॥ १९८ ॥

इति पञ्चमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १९९ ॥

तद्विशेषेणादृष्टकारितम् ॥ २०० ॥

अपां संयोगाभावे गुरुत्वात् पतनम् ॥ २०१ ॥

द्रवत्वात् स्यन्दनम् ॥ २०२ ॥

नाड्या वायुसंयोगादारोहणम् ॥ २०३ ॥

नोदनापीडनात् संयुक्तसंयोगाच्च ॥ २०४ ॥

वृक्षाभिसर्पणमित्यदृष्टकारितम् ॥ २०५ ॥

अपां सङ्घातो विलयनं च तेजःसंयोगात् ॥ २०६ ॥

तत्रावस्फूर्जथुर्लिङ्गम् ॥ २०७ ॥

वैदिकं च ॥ २०८ ॥

अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥ २०९ ॥

पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् ॥ २१० ॥

अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ॥ २११ ॥

हस्तकर्मणा मनसः कर्म व्याख्यातम् ॥ २१२ ॥

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे ॥ २१३ ॥

तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः संयोगः ॥ २१४ ॥

अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥ २१५ ॥

तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः ॥ २१६ ॥

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः ॥ २१७ ॥

तेजसो द्रव्यान्तरेणावरणाच्च ॥ २१८ ॥

दिक्कालावाकाशं च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥ २१९ ॥

एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २२० ॥

निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २२१ ॥

कारणं त्वसमवायिनो गुणाः ॥ २२२ ॥

गुणैर्दिग् व्याख्याता ॥ २२३ ॥

कारणेन कालः ॥२२४ ॥

इति पञ्चमाध्यायस्य द्वितीयमाह्निकम् ।

—:०:—

बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ २२५ ॥

ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २२६ ॥

बुद्धिपूर्वो ददातिः ॥ २२७ ॥

तथा प्रतिग्रहः ॥ २२८ ॥

आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ॥ २२९ ॥

तद्दुष्टभोजने न विद्यते ॥ २३० ॥

दुष्टं हिंसायाम् ॥ २३१ ॥

तस्य समभिव्याहारतो दोषः ॥ २३२ ॥

तददुष्टे न विद्यते ॥ २३३ ॥

पुनर्विशिष्टे प्रवृत्तिः ॥ २३४ ॥

समे हीने वा प्रवृत्तिः ॥ २३५ ॥

एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम् ॥ २३६ ॥

तथा विरुद्धानां त्यागः ॥ २३७ ॥

हीने परे त्यागः ॥ २३८ ॥

समे आत्मत्यागः परत्यागो वा ॥ २३९ ॥

अपां सङ्घातो विलयनं च तेजःसंयोगात् ॥ २०६ ॥

तत्रविस्फूर्जथुर्लिङ्गम् ॥ २०७ ॥

वैदिकं च ॥ २०८ ॥

अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥ २०९ ॥

पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् ॥ २१० ॥

अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ॥ २११ ॥

हस्तकर्मणा मनसः कर्म व्याख्यातम् ॥ २१२ ॥

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे ॥ २१३ ॥

तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः संयोगः ॥ २१४ ॥

अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥ २१५ ॥

तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः ॥ २१६ ॥

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः ॥ २१७ ॥

तेजसो द्रव्यान्तरेणावरणाच्च ॥ २१८ ॥

दिक्कालावाकाशं च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥ २१९ ॥

एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २२० ॥

निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २२१ ॥

कारणं त्वसमवायिनो गुणाः ॥ २२२ ॥

गुणैर्दिग् व्याख्याता ॥ २२३ ॥

कारणेन कालः ॥२२४ ॥

इति पञ्चमाध्यायस्य द्वितीयमाह्निकम् ।

—:०:—

बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ २२५ ॥

ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २२६ ॥

बुद्धिपूर्वो ददातिः ॥ २२७ ॥

तथा प्रतिग्रहः ॥ २२८ ॥

आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ॥ २२९ ॥

तद्दुष्टभोजने न विद्यते ॥ २३० ॥

दुष्टं हिंसायाम् ॥ २३१ ॥

तस्य समभिव्याहारतो दोषः ॥ २३२ ॥

तददुष्टे न विद्यते ॥ २३३ ॥

पुनर्विशिष्टे प्रवृत्तिः ॥ २३४ ॥

समे हीने वा प्रवृत्तिः ॥ २३५ ॥

एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम् ॥ २३६ ॥

तथा विरुद्धानां त्यागः ॥ २३७ ॥

हीने परे त्यागः ॥ २३८ ॥

समे आत्मत्यागः परत्यागो वा ॥ २३९ ॥

विशिष्टे आत्मत्याग इति ॥ २४० ॥

इति षष्ठाध्यायस्य प्रथममाह्निकम् ॥

—:o:—

दृष्टादृष्टप्रयोजनाना दृष्टाभावे प्रयोजनमभ्युदयाय १४१॥

अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमन्त्रकालनियमाश्चादृष्टाय ॥ २४२ ॥

चातुराश्रम्यमुपधा अनुपधाश्च ॥ २४३ ॥

भावदोष उपधाऽदोषोऽनुपधा ॥ २४४ ॥

यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ॥ २४५ ॥

अशुचीति शुचिप्रतिषेधः ॥ २४६ ॥

अर्थान्तरं च ॥ २४७ ॥

अयतस्य शुचि भोजनादभ्युदयो न विद्यते नियमाभावाद् विद्यते वाऽर्थान्तरत्वाद् यमस्य ॥ २४८ ॥

असति चाभावात् ॥ २४९ ॥

सुखाद्रागः ॥ २५० ॥

तन्मयत्वाच्च ॥ २५१ ॥

अदृष्टाच्च ॥ २५२ ॥

जातिविशेषाच्च ॥ २५३ ॥

इच्छाद्वेषपूर्विका धर्माऽधर्मप्रवृत्तिः ॥ २५४ ॥

तत्संयोगो विभागः ॥ २५५ ॥

आत्मकर्मसु मोक्षो व्याख्यातः २५६ ॥

इति षष्ठाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

उक्ता गुणाः ॥ २५७ ॥

पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च २५८

एतेन नित्येषु नित्यत्वमुक्तम् ॥ २५९ ॥

अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥ २६० ॥

अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥ २६१ ॥

कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ २६२ ॥

एकद्रव्यत्वात् ॥ २६३ ॥

अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥ २६४ ॥

कारणबहुत्वाच्च ॥ २६५ ॥

अतो विपरीतमणु ॥ २६६ ॥

अणु महदिति तस्मिन् विशेषभावात् विशेषाभावाच्च २६७

एककालत्वात् ॥ २६८ ॥

दृष्टान्ताच्च ॥ २६९ ॥

अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्या-
॥ २७० ॥

कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥ २७१ ॥

अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥२७२॥

एतेन दीर्घत्वह्रस्वत्वे व्याख्याते ॥ २७३ ॥

अनित्येऽनित्यम् ॥ २७४ ॥

नित्ये नित्यम् ॥ २७५ ॥

नित्यं परिमण्डलम् ॥ २७६ ॥

अविद्या च विद्यालिङ्गम् ॥ २७७ ॥

विभवान्महानाकाशस्तथा चात्मा ॥ २७८ ॥

तदभावादणु मनः ॥ २७९ ॥

गुणैर्दिग्व्याख्याता ॥ २८० ॥

कारणे कालः ॥ २८१ ॥

इति सप्तमाध्यायस्य प्रथममाह्निकम् ॥

रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् ॥२८२॥

तथा पृथक्त्वम् ॥ २८३ ॥

एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्या व्याख्यातः ॥ २८४ ॥

निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते॥२८५॥

भ्रान्तं तत् ॥ २८६ ॥

एकत्वाभावाद्भक्तिस्तु न विद्यते ॥ २८७ ॥

कार्य्यकारणयोरेकत्वैकपृथक्त्वाभावादेकत्वैकपृथक्त्वं न विद्यते ॥ २८८ ॥

एतदनित्ययोर्व्याख्यातम् ॥ २८९ ॥

अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः॥२९०॥

एतेन विभागो व्याख्यातः ॥ २९१ ॥

संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ २९२ ॥

कर्मभिः कर्माणि गुणैर्गुणा अणुत्वमहत्त्वाभ्यामिति २९३

युतसिद्ध्यभावात् कार्य्यकारणयोः संयोगविभागौ न विद्येते ॥ २९४ ॥

गुणत्वात् ॥ २९५ ॥

गुणोऽपि विभाव्यते ॥ २९६ ॥

निष्क्रियत्वात् ॥ २९७ ॥

असति नास्तीति च प्रयोगात् ॥ २९८ ॥

शब्दार्थावसम्बन्धौ ॥ २९९ ॥

संयोगिनो दण्डात् समवायिनो विशेषाच्च ॥ ३०० ॥

सामयिकः शब्दादर्थप्रत्ययः ॥ ३०१ ॥

एकदिक्काभ्यामेककालाभ्या सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च ॥ ३०२ ॥

कारणपरत्वात् कारणापरत्वाच्च ॥ ३०३ ॥

परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्या ख्याखयातः ॥ ३०४ ॥

कर्मभिः कर्माणि ॥ ३०५ ॥

गुणैर्गुणाः ॥ ३०६ ॥

इहेदमिति यतः कार्य्यकारणयोः स समवायः ॥३०७॥

द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यातः ॥ ३०८ ॥

तत्त्वम्भावेन ॥ ३०९ ॥

इति सप्तमाध्यायस्य द्वितीयमाह्निकम् ॥

——:०:——

द्रव्येषु ज्ञानं व्याख्यातम् ॥ ३१० ॥

तत्रात्मा मनश्चाप्रत्यक्षे ॥ ३११ ॥

ज्ञाननिर्देशे ज्ञाननिष्पत्तिविधिरुक्तः ॥ ३१२ ॥

गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम् ॥३१३॥

सामान्यविशेषेषु सामान्यविशेषाभावात्तदेव ज्ञानम् ॥ ३१४ ॥

सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु ॥ ३१५ ॥

द्रव्ये द्रव्यगुणकर्मापेक्षम् ॥ ३१६ ॥

गुणकर्मसु गुणकर्माभावाद्गुणकर्मापेक्षं न विद्यते ॥३१७॥

समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते ॥ ३१८ ॥

द्रव्येष्वनितरेतरकारणाः ॥ ३१९ ॥

कारणायौगपद्यात् कारणक्रमाच्च घटपटादिबुद्धीः क्रमो न हेतुफलभावात् ॥ ३२० ॥

इति अष्टमाध्यायस्य प्रथममाह्निकम् ॥

अयमेष त्वया कृतं भोजयैनमिति बुद्ध्यपेक्षम्॥ ३२१॥

दृष्टेषु भावाददृष्टेष्वभावात् ॥ ३२२ ॥

अर्थ इति द्रव्यगुणकर्मसु ॥ ३२३ ॥

द्रव्येषु पञ्चात्मकत्वं प्रतिषिद्धम् ॥ ३२४ ॥

भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः॥३२५॥

तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात् ॥ ३२६ ॥

इति अष्टमाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

क्रियागुणव्यपदेशाभावात् प्रागसत् ॥ ३२७ ॥

सदसत् ॥ ३२८ ॥

असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् ॥ ३२९ ॥

सच्चासत् ॥ ३३० ॥

यच्चान्यदसदतस्तदसत् ॥ ३३१ ॥

असदिति भूतप्रत्यक्षाभावात् भूतस्मृतेर्विरोधिप्रत्यक्षवत् ॥ ३३२ ॥

तथाऽभावे भावप्रत्यक्षत्वाच्च ॥ ३३३ ॥

एतेनाघटोऽगौरधर्मश्च व्याख्यातः ॥ ३३४ ॥

अभूतं नास्तीत्यनर्थान्तरम् ॥ ३३५ ॥

[illegible]स्ति घटो गेहे इति सतो घटस्य गेहसंसर्गप्र-[illegible]धः ॥ ३३६ ॥

[illegible]मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम्॥३३७॥

तथा द्रव्यान्तरेषु प्रत्यक्षम् ॥ ३३८ ॥

असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषाञ्च ॥३३९॥

तत्समवायात् कर्मगुणेषु ॥ ३४० ॥

आत्मसमवायादात्मगुणेषु ॥ ३४१ ॥

इति नवमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम् ॥ ३४२ ॥

अस्येदं कार्यकारणसम्बन्धश्चावयवाद्भवति ॥३४३॥

एतेन शाब्दं व्याख्यातम् ॥ ३४४ ॥

हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् ॥३४५॥

अस्येदमिति बुद्ध्यपेक्षितत्वात् ॥ ३४६ ॥

आत्मनः संयोगविशेषात् संस्काराच्च स्मृतिः ॥३४७॥

तथा स्वप्नः ॥ ३४८ ॥

स्वप्नान्तिकम् ॥ ३४९ ॥

धर्माच्च ॥ ३५० ॥

इन्द्रियदोषात् संस्कारदोषाच्चाविद्या ॥ ३५१ ॥

तद्दुष्टज्ञानम् ॥ ३५२ ॥

अदुष्टं विद्या ॥ ३५३ ॥

आर्षं सिद्धदर्शनं च धर्मेभ्यः ॥ ३५४ ॥

इति नवमाध्यायस्य द्वितीयमाह्निकम् ॥

इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ॥ ३५५ ॥

संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः ॥३५६॥

तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम् ॥ ३५७ ॥

अभूदित्यपि ॥ ३५८ ॥

सति च कार्यादर्शनात् ॥ ३५९ ॥

एकार्थसमवायिकारणान्तरेषु दृष्टत्वात् ॥ ३६० ॥

एकदेशे इत्येकस्मिन् शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ॥ ३६१ ॥

इति दशमाध्यायस्य प्रथममाह्निकम् ॥

कारणमिति द्रव्ये कार्यसमवायात् ॥ ३६२ ॥

संयोगाद्वा ॥ ३६३ ॥

कारणे समवायात् कर्माणि ॥ ३६४ ॥

तथा रूपे कारणैकार्थसमवायाच्च ॥ ३६५ ॥

कारणसमवायात् संयोगः पटस्य ॥ ३६६ ॥

कारणाकारणसमवायाच्च ॥ ३६७ ॥


...क्तसमवायादप्नैर्वैशेषिकम् ॥ ३६८ ॥

...दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ३६९

...नादाम्नायस्य प्रामाण्यमिति ॥ ३७० ॥

इति दशमाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तं च वैशेषिकदर्शनम् ॥



Bhagwata Chadraj

प्रशस्तपादभाष्यम् ।

(१) ग्रन्थप्रयोजनप्रकरणम् ।

(१)प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्मसङ्ग्रहः प्रवक्ष्यते महोदयः ॥

श्रीकृष्णाय नमः ।

(१) ग्रन्थप्रयोजनप्रकरणम्

(१)गुरून् पर्यायतो नत्वा विषमस्थलटिप्पणीम् ॥
कुर्वे प्रशस्तपादस्य यथामति समासतः ॥ १ ॥

शास्त्रारम्भे सदाचारपरिप्राप्ततया कायादिकृतं परापरगुरुनमस्कारं शिष्यशिक्षार्थमादौ निबध्नाति प्रणम्येति । हेतुं सर्वोत्पत्तिमतां निमित्तकारणभूतमीश्वरं भक्तिश्रद्धातिशयपूर्वकं नत्वाऽतः ईश्वरप्रणामादनु पश्चात् कापोतीं वृत्तिमनुतिष्ठन्तं कणादं मुनिं च प्रणम्य महोदयः महान् उदयो ज्ञानं यतः स पदार्थधर्मसंग्रहः पदार्थानां द्रव्यादीनां धर्माः साधर्म्यवैधर्म्यरूपास्तेषां सङ्ग्रहः सङ्कलय्य कथनं यत्र स तन्नामा भाष्यग्रन्थ इत्यर्थः, प्रवक्ष्यते प्रकृष्टो वक्ष्यत इत्यभिप्रायः । अत्र प्रेक्षावत्प्रवृत्त्यङ्गमनुबन्धचतुष्टयमपि सूचितं भाष्यकारैः । तथाहि पदार्थधर्मसङ्ग्रह इत्यनेनाभिधेयं द्रव्यगुणि, महोदय इत्यनेन ज्ञानरूपं प्रयोजनं, सङ्ग्रहपदार्थधर्मयो[illegible]धाचकभावस्तत्प्रतिपत्त्या महोदयेन सह साध्यसाधनभावश्च सत्व[illegible]न्धः, पदार्थधर्मज्ञानद्वारा निःश्रेयसेच्छुश्चाधिकारीति ।

यत[illegible] :अनेन भाष्येण 'अथातो धर्मं व्याख्यास्यामः' इति (१)प्रथमं सूत्रं [illegible] (यातम् । अग्रे सर्वत्र टिप्पण्यामस्मिन्नेव पुस्तके मुद्रितसूत्र[illegible]स्तां सङ्कलनाङ्को ग्राह्यः ।

(१)द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः । (२)तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव ॥

(२) उद्देशप्रकरणम् ।

(३)अथ के द्रव्यादयः पदार्थाः किञ्च तेषां सा-

---

(१)ननु पदार्थधर्मसङ्ग्रहरूपोऽयं ग्रन्थो महोदयहेतुरित्यनुपपन्नम्, शब्दानामर्थप्रतिपादनव्यतिरेकेण फलान्तराभावात् इत्याशङ्क्य पदार्थधर्मप्रतीतिहेतोः सङ्ग्रहस्य पारम्पर्येण महोदयहेतुत्वमित्याशयेनाह द्रव्येति । यस्य वस्तुनो यो भावस्तत्तस्य तत्त्वं, साधर्म्यवैधर्म्ये एव तत्त्वं तस्य ज्ञानं निःश्रेयसहेतुरित्यर्थः । केषां साधर्म्यवैधर्म्यतत्त्वपरिज्ञानं निःश्रेयसहेतुरित्यपेक्षायां द्रव्यादीनामिति । यद्वा पदार्थधर्मसङ्ग्रह इत्यत्र के पदार्थाः के च तेषां धर्माः ? इत्यत आह द्रव्येति । द्रव्यादयः षट् पदार्थाः साधर्म्यवैधर्म्यरूपा अनुवृत्तव्यावृत्तरूपाश्च धर्मा इत्यर्थः ।

(२) ननु यदि तत्त्वज्ञानं निःश्रेयसहेतुस्तर्हि धर्मो न कारणं ततश्च "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति सूत्रविरोध इत्यत आह तच्चेति । तन्निःश्रेयसं धर्मादेव भवति द्रव्यादितत्त्वज्ञानं धर्महेतुत्वान्निःश्रेयससाधनमिति भावः । केवलधर्मस्य निःश्रेयसाजनकतया धर्मे विशेषणमाहेश्वरेति । ईश्वरचोदना ईश्वरेच्छाविशेषः तेन अभिव्यक्तात्कार्यारम्भाभिमुखीकृताद्धर्मादेव निःश्रेयसं भवति इति यावत् । उदयनाचार्यास्तु ईश्वरनोदना वेदस्तत्प्रतिपादिताद्धर्मात् निःश्रेयसमिति भाष्यार्थं वदन्ति । तेषामयमाशयः शास्त्रेण पदार्थान् विविच्य श्रुतिस्मृतीतिहासपुराणोपदिष्टयोगविधिना दीर्घकालादरनैरन्तर्यसेवितान्निवृत्तिलक्षणात् तत्त्वज्ञानमुत्पद्यते यतोऽपवर्गान्मुक्तिर्भवतीति ।

एतेन (२)-(३)-(४) सूत्राणि व्याख्यातानि ।

(२) उद्देशप्रकरणम् ।

(३) एवं षटपदार्थज्ञानस्य पुरुषार्थोपायत्वमवगम्य तेषां

धर्म्यं वैधर्म्यञ्चेति ? ॥

(१)तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसञ्ज्ञयोक्तानि नवैवेति । तद्व्यतिरेकेणान्यस्य सञ्ज्ञानभिधानात् ॥

गुणाश्च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः (२)सप्तैवेत्येवं चतुर्विंशतिर्गुणाः ॥

(३)उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव

भेदजिज्ञासार्थं पृच्छति अथेति । कानि द्रव्याणि के गुणा इत्यादि योजनीयम् । धर्मिज्ञाने जातेऽवश्यं धर्मा ज्ञायन्त एवेत्यनियमात्, धर्मेषु पृथक् प्रश्नमाह किञ्च तेषामिति ।

(१) उत्तरयति तत्रेति । द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणं बोध्यम् । द्रव्यत्वं च कार्यसमवायिकारणतावच्छेदकतया सिद्धम् । सामान्येति । सामान्यसंज्ञा द्रव्यसंज्ञा विशेषसंज्ञा पृथिव्यादिसंज्ञा तयोक्तानि सूत्रकारेणेति शेषः । नवैवेति । तम आदीनामभावादिरूपत्वेन द्रव्यान्तरत्वस्य विरुद्धत्वात्, इदमेवाह तद्व्यतिरेकेणेति ।

अनेन (५)सूत्रं व्याख्यातम् ।

(२) सप्तैवेति । गुणादिलक्षणं तत्तत्प्रकरणे वक्ष्यते एवं चतुर्विंशतिगुणा इत्यर्थः । शौर्यौदार्यादीनामत्रैवान्तर्भावात् । स्वस[illegible] [illegible]पादकत्वरूपानुगतसंस्कारत्वस्य त्रिविधसंस्कारवृत्तित्वात्, [illegible] (७)[illegible]धारणानुगतादृष्टत्वजात्यभावाच्च न चतुर्विंशतित्वव्या[illegible] [illegible] ध्येयम् ।

[illegible] (६) सूत्रं व्याख्यातम् ।

[illegible]) अनेन भाष्येण (७) सूत्रं व्याख्यातम् ।

कर्माणि । गमनग्रहणाद्भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नमनादयो गमनविशेषा न जात्यन्तराणि ॥

सामान्यं द्विविधं परमपरं चानुवृत्तिप्रत्ययकारणम् । तत्र परं सत्ता महाविषयत्वात् सा चा(१)नुवृत्तेरेव हेतुत्वात् सामान्यमेव । (२)द्रव्यत्वाद्यपरमल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सद्विशेषाख्यामपि लभते ॥

(३)नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते खल्वत्यन्तव्यावृत्तिहेतुत्वाद्विशेषा एव ॥

---

(१) अनुवृत्तेरेवेति । द्रव्यत्वादिकन्तु स्वाश्रयस्य विजातीयेभ्योऽपि व्यावृत्तेरपि हेतुत्वात् विशेषोऽपीति । यद्यपि सत्ता सामान्यादिभ्यो व्यावर्तते तथापि तेभ्यः स्वाश्रयं व्यावर्तयितुं न शक्नोति तेषामपि स्वरूपसत्तासंबुद्धिसंवेद्यत्वादिति श्रीधराचार्याः । ननु सामान्यादिभ्यो व्यावर्तमानापि सत्ता यदि स्वाश्रयं ततो न व्यावर्तयेत् तर्हि द्रव्यत्वादिकमपि न व्यावर्तयेत् अविशेषात् इति चेन्न सत्ताया व्यक्तिस्वरूपमात्रव्यङ्ग्यतया व्यक्त्यैक्यनियमाभावात् इति किरणावलीकृतः ।

(२) द्रव्यत्वादीति । गुणत्वं कर्मत्वं चादिपदार्थः, तथा द्रव्यत्वाद्यपेक्षया पृथिवीत्वादि तदपेक्षया च घटत्वादिकपरं बोध्यम् ।

अत्र (३४) (३५) सूत्रे ।

(३) नित्यद्रव्येति । नित्यद्रव्येतरावृत्तित्वे सति नित्यत्वम् विशेषत्वम् । द्रव्यगुणकर्मसामान्येषु 'नित्यद्रव्यवृ अतिव्याप्तिवारणाय विशेषणम् । द्रव्यगुणकर्मसु द्रव्यवृ त्तिव्याप्तिवारणाय नित्यपदम् । विशेषा एवेति । न तु सां

(१)अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः ॥

(२)एवं धर्मैर्विना धर्मिणामुद्देशः कृतः ॥

(३) साधर्म्यवैधर्म्यप्रकरणम् ।

(३)षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेय-

न्यपि सर्वदा व्यावृत्तिमात्रहेतुत्वादिति शेषः ।

अत्र (३६) सूत्रम् ।

(१) अयुतेति । अयुताः प्राप्ताश्च ते सिद्धाश्चेत्ययुतसिद्धाः प्राप्ता एव सन्ति न वियुक्ता इत्यर्थः, तेषां सम्बन्धः प्राप्तिलक्षणः समवायः यथा तन्तुपटयोः । एतेन संयोगो व्यवच्छिन्नस्तस्याप्राप्तिपूर्वकत्वात् । तथा च नित्या प्राप्तिः समवाय इति लक्षणं सूचितम् । नित्यसंयोगानङ्गीकारान्न तत्रातिव्याप्तिः । प्राप्तिपदेन वाच्यवाचकरूपसम्बन्धो निवारितस्तदेव स्पष्टयति आधार्याधारभूतानामिति । स्वभावत आधार्याधाराणां न त्वागन्तुकेन धर्मेणेति तदर्थः । उक्तसम्बन्धश्चागन्तुक एवेति तद्व्युदासः । तत्र प्रमाणमाह इहेति । इह तन्तुषु पट इत्यादिप्रत्ययाः सम्बन्धं विनाऽनुपपद्यमानास्तं व्यवस्थापयन्तीत्यर्थः ।

अत्र (३०७) सूत्रम् ।

(२) अनुद्दिष्टेषु धर्मिषु धर्मनिर्वचनमयुक्तमिति धर्मोद्देशं प्रक्रमयितुं सङ्गतिं प्रदर्शयति एवमिति । एतावता ग्रन्थेनोद्देशप्रकरणं समाप्तमित्यर्थः । अस्य न सूत्रम् ।

(३) साधर्म्यवैधर्म्यप्रकरणम् ।

[illegible] यद्यपि धर्मा न षट्पदार्थातिरिक्ताः किन्तु अन्योन्या- [illegible] एव धर्मा धर्मिणश्च भवन्ति तथापि तेषां धर्मिरूपतया परि- [illegible] (७) [illegible]मुद्देशमाह षण्णामिति । अस्तित्वं स्वरूपवत्त्वम् । अभि- [illegible] [illegible]नयोग्यता ज्ञेयत्वं ज्ञानविषयता । न चैतान्यभावेपि [illegible] [illegible]तिभाष्यम् न हि तदपेक्षयैतानि वैधर्म्यं विवक्षितमपि तु [illegible]२) अपरेति । [illegible]म् ।

त्वानि। आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः। द्रव्यादीना पञ्चानां समवायित्वमनेकत्वं च। गुणादीनां पञ्चाना-मपि निर्गुणत्वनिष्क्रियत्वे। (१)द्रव्यादीनां त्रयाणा-पि सत्तासम्बन्धः सामान्यविशेषवत्त्वं स्वसमयार्थशब्दा-भिधेयत्वं धर्माधर्मकर्तृत्वं च। कार्यत्वानित्यत्वे कारण-वतामेव। (२)कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः। द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः। (३)सामा-

---

गुणादीनामित्यनेन (१६) (१७) (४०) (२७१) सूत्राणि व्याख्यातानि।

(१)द्रव्यादीनामिति। सत्तासम्बन्धः समवायलक्षणः। सामा-न्यविशेषा द्रव्यत्वादयस्तद्वत्त्वम्। स्वसमयो वैशेषिकसङ्केतितो यो-ऽर्थशब्दस्त्रिषु प्रसिद्धस्तदभिधेयत्वं, धर्माधर्मकर्तृत्वञ्च त्रयाणां साधर्म्यम्। यथा एकैव गौर्दानापहरणरूपकर्मभेदेन धर्माधर्म-योर्निमित्तमिति कन्दलीकारः। धर्मकर्तृत्वमधर्मकर्तृत्वं चेति सा-धर्म्यद्वयञ्चकारेण सूचितम् धर्मकर्तृत्वमधर्मं विहायाधर्मकर्तृत्वं धर्मं विहायेति आचार्याः।

अत्र (८) (३२३) (३८) सूत्राणि

(२) कारणत्वं चेति। पारिमाण्डल्यमणुपरिमाणम् आदिशब्देन द्व्यणुकपरिमाणं महत्परिमाणमन्त्यावयावपरिमाणमन्त्यशब्दमनः-परिमाणं परत्वापरत्वे द्विपृथक्त्वं च ग्राह्यमिति कन्दली। अन्त्या-वयविगतरूपरसगन्धस्पर्शपरिमाणानि द्वित्वाद्विपृथक्त्वपरत्वापर-त्वानि विनश्यदवस्थद्रव्ये संयोगविभागवेगकर्माणि अन्त्[illegible]शब्दः चरमः संस्कारो ज्ञानं चादिपदेन गृह्यते इति किरणावली।

इदञ्च साधर्म्यं भाष्यकारेण स्वतन्त्रमुक्तम्।

(३) सामान्यादीनां साधर्म्यमाह सामान्यादीनामिति। सत्त्वं सत्ताविरहः। बुद्धिलक्षणत्वं बुद्धिमात्रममीषां ल[illegible] तु द्रव्यादौ तत्कार्यमिवान्यदपि प्रमाणमित्यर्थः। अनु[illegible]व्यावृ-त्तिबुद्धिरिहेतिबुद्धिरित्येव सामान्यादित्रये प्रमा[illegible]न तु सां

न्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति ॥

(१)पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्मन्यारम्भकत्वं गुणवत्त्वं कार्यकारणाविरोधित्वमन्त्यविशेषवत्त्वम् । अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः । पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वा(२)परजातिमत्त्वे । क्षितिजलज्योतिरनिलमनसां

कार्यत्वं कारणानपेक्षस्वभावत्वम् । अकारणत्वं समवाय्यसमवायित्वाभावः न तु निमित्तकारणत्वाभावः बुद्धिनिमित्तत्वाभ्युपगमात् । असामान्यविशेषवत्त्वमपरजातिराहित्यमित्यर्थः । सामान्यादिष्वनवस्थानान्नापरं सामान्यम् । कथं तर्हि तेषु प्रत्ययानुवृत्तिरिति चेत्, अनेकव्यक्तिसमवायोपाधिवशात् विशेषेष्वप्येकशब्दप्रवृत्तिरत्यन्तव्यावृत्तिबुद्धिजनकत्वस्य सर्वत्र सम्भवादिति कन्दली । अर्थेति । स्वसङ्केतितार्थशब्दानभिधेयत्वमित्यर्थः ।

अत्र (३४) (४१) (४३) (४५) (४७) (३०७) सूत्राणि ।

(१) द्रव्याणामेव विशिष्य साधर्म्यं निरूपयति पृथिव्यादीनामिति । द्रव्यत्वयोग इति । अनेन द्रव्याणामितरभेदलक्षणमुक्तम् । स्वात्मन्यारम्भकत्वं स्वसमवेतकार्यजनकत्वमित्यर्थः । कार्येति । द्रव्यजातीयं शब्दकर्मादिवत् कार्यकारणयोरन्यतरेण न विरुध्यते । यथा [illegible]ब्दो गुणः कार्यशब्देन नाश्यते कर्म चोत्तरसंयोगेन यथा वान्त्यः [illegible]न्त्येन नैवं द्रव्यं तस्य क्वचित्समवायिकारणनाशेन क्वचित्[illegible](७)[illegible]यिकारणनाशेन नाशादित्यर्थः ।

[illegible] (९) (१०) (१२) (१५) (१८) सूत्रेषु व्याख्यातम् । अना[illegible] (?)तिभाष्यं स्वतन्त्रम् ।

[illegible](२) अपरेति । सा च पृथित्वादिः तत्समवायः पृथिव्यादावित्य-

(१)क्रियावत्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानि । (२)आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वं च । पृथिव्यादीनां पञ्चानामपि (३)भूतत्वेन्द्रियप्रकृतित्वं बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि । चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे(४) । (५)त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वानि । द्वयोर्गुरुत्वं

र्थः । संस्कारवत्ता चैतेषामिति आचार्याः । न सूत्रम् ।

(१) क्रियावत्त्वं क्रियावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वम् तेन नोत्पन्नविनष्टेऽतिव्याप्तिः । एवमग्रेऽपि ।

इदन्तु (१९९) सूत्रात् (२०५) पर्यन्तं (२१०) (२११) (२१२) (१९७) (३०२) सूत्रेष्वपि द्रष्टव्यम् ।

(२) आकाशेति । सर्वगतत्वं सर्वमूर्तसंयोगित्वं न तु सर्वत्र गमनमाकाशादीनां निष्क्रियत्वात् । परममहत्त्वमियत्तानवच्छिन्नपरिमाणवत्त्वम् । सर्वेति । सर्वेषां संयोगिनां मूर्तानां संयोगेन समाना आकाशादयो देशास्तेषां भावस्तत्त्वम् । पूर्वमाकाशादयो सर्वमूर्तेषु वर्तन्त इत्युक्तम् सम्प्रति त एवाकाशादिषु वर्त्तन्ते इत्यपौनरुक्तम् । पूर्वं संयोगमात्रं मूर्तद्रव्यैः सहोक्तमत्राधारत्वमिति कन्दलीकाराः ।

अत्र (२७८) (२८०) (२८१) सूत्राणि ।

(३) भूतत्वेति । तत्तु संस्कारत्वान्यबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमद्विशेषगुणवत्त्वमित्यर्थः । इन्द्रियप्रकृतित्वमिन्द्रियोपादानत्वम् तच्च नभसोऽवच्छिन्नानवच्छिन्नभेदकल्पनयोपपादनीयमिति किरणावली । बाह्येति । बाह्यैकैकेन्द्रियेण चक्षुरादिना ग्राह्ये विशेषगुणा रूपादयस्तद्वत्ता पृथिव्यादीनामित्यर्थः । अ[illegible] ग्राह्यत्वस्यैतेषु सत्त्वादेकैकेत्यसिद्धमतो बाह्यपदम् इति कन्द[illegible]

अत्र (३२५) (३२६)सूत्रे व्याख्याते ।

(४) अत्र (४९) (५०) (५१) (५२) (२३) सूत्राणि व्याख्या[illegible]

(५) त्रयाणामिति । अत्र प्रत्यक्षं बाह्येन्द्रियविषयं ग्राह्यम्

रसवत्त्वं च(१) । भूतात्मनां वैशेषिकगुणवत्त्वम् । क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम्(२)। (३)आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् । दिक्कालयोः (४)पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां निमित्तकारणत्वम् च । क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः ।

(५)एवं सर्वत्र साधर्म्यं विपर्ययाद्वैधर्म्यं च वाच्य-

त्मन्यतिव्याप्त्यापत्तेः ।

एतत् (४९) (५०) (५१) (५४) (५५) सूत्रेषु व्याख्यातम् ।

(१) अत्र (४९) (५०) (१८७) (१९८) (२०१) सूत्राणि द्रष्टव्यानि ।

(२) चतुर्दशेति । ते च यथा—

स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारण्येते चतुर्दश ॥
स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।

अत्र (४९) (५०) (५४) (८४) (१३९) (१५५) (१५६) (१६७) (१८७) (१९७) (१९८) (१९९) (२०१) (२०२) (२०३) (२०४) (२०६) (२०९) (२२६) (२७८) (३४७) सूत्राणिं द्रष्टव्यानि ।

(३) आकाशात्मनामिति । पृथिव्यादीनान्निरासायैकदेशवृत्तीति । आकाशजीवात्मनामव्याप्यवृत्तयो ये विशेषगुणाः शब्दज्ञानादयस्तेषामाशुतरविनाशित्वस्वरूपज्ञानाय क्षणिकपदम् । अर्थस्तु स्पष्टः । स्वतन्त्रं भाष्यम् ।

[illegible] (४)पञ्चेति । संख्यादिसामान्यगुणवत्त्वमित्यर्थः । अत्र (७९) [illegible]७) (८८) (९१) (२८०) (२८१) (३०३) (५४) (५५) । सूत्राणि क्रमेण [illegible] द्रष्टव्यानि ।

[illegible] (५) एवमिति । अनेन न्यायेन सर्वत्र यत्साधर्म्यं तदेव विपर्ययाद्वैधर्म्यमितरस्य, यदेव च वैधर्म्यन्तद्विपर्ययात्साधर्म्यमन्यस्य वा-

मिति द्रव्यासङ्करः ।

(४) पृथिवीनिरूपणप्रकरणम् ।

(१)इहेदानीमेकैकशो वैधर्म्यमुच्यते ।

(२)पृथिवीत्वाभिसम्बन्धात् पृथिवी । रूपरसग-

व्यमित्यर्थः । अत्राचार्याः—साधर्म्यविपर्ययोऽन्यस्मात्साधर्म्यं वैधर्म्यविपर्ययाद्वैधर्म्यञ्च स्वयमूहित्वा वाच्यमध्यापकेन, ग्राह्यञ्च शिष्यैरिति। तद्यथा–गन्धवती पृथिवीति वैधर्म्यं वक्ष्यति। तद्विपर्ययान्निर्गन्धत्वमवादीनां साधर्म्यमुक्तम्, जलभूम्योर्गुरुत्वं रसवत्त्वञ्च साधर्म्यन्तद्विपर्ययादितरेषां वैधर्म्यम्, विपर्ययस्त्वितरेषां तेजआदीनां साधर्म्यमगुरुत्वं नीरसत्वञ्च । एवमात्मानं विहाय परार्थत्वमचेतनत्वं च मनो विहायानन्तःकरणत्वमनष्टगुणवत्त्वञ्च । अम्भो विहाय निःस्नेहत्वमक्लेदत्वञ्च । तेजो विहायानुष्णत्वमदाहकत्वम् । जलज्योतिरनिलानामपाकजस्पर्शवत्त्वम् । जलज्योतिषोरपाकजरूपवत्त्वम् । दिक्कालमनसां वैशेषिकगुणविरहः । वाय्वाकाशदिक्कालमनसामतीन्द्रियत्वम् । आत्ममनसोः शरीरावच्छेदेन वृत्तिलाभः । वाय्वादीनां नीरूपत्वम् । आकाशादीनां स्पर्शशून्यत्वम् । कालादीनामभूतत्वमित्यादीत्यर्थान्तरमाहुः ।

अत्र (१३) (१४) (२१९) सूत्राणि वैधर्म्यपराणि द्रष्टव्यानि ।

(१) इहेति । अनेन पूर्वं द्वयोर्बहूनां परस्परापेक्षया वैधर्म्योक्तेरनन्तरमेकैकशस्तन्निरूपणे अवसरसङ्गतिः सूचिता ।

इदं भाष्यं स्वतन्त्रम् ।

(४) पृथिवीनिरूपणप्रकरणम् ।

(२) पृथिवीत्वेति । पृथिवीत्वं जातिविशेषस्तेनाभिमतः संबन्धः समवायस्तस्मात, न, तु एकार्थसमवायसंयुक्तसमवाया[illegible]रित्यर्थः । नन्विदं लक्षणमनुपपन्नम् स्वरूपतः सिद्धस्य पृथिवीपदा[illegible]र्थस्य लक्षणकरणे प्रयोजनाभावात्, अप्रसिद्धस्य चाश्रयासिद्ध[illegible] व्यवहारेतरभेदान्यतरसाधनफलकलक्षणस्य सुतराम्, इति चे[illegible] सत्यम् स्वरूपतोऽवगतस्यापि व्यवहारविशेषप्रातिपादनार्थं सामा[illegible]

न्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-
गुरुत्वद्रवत्वसंस्कार १४वती। एते च गुणविनिवेशाधिकारे
रूपादयो गुणविशेषाः सिद्धाः । चाक्षुषवचनात् सप्त
सङ्ख्यादयः । पतनोपदेशाद्गुरुत्वम् । अद्भिः सामा-
न्यवचनाद् द्रवत्वम् । उत्तरकर्मवचनात् संस्कारः ।

(१)क्षिताविव गन्धः । रूपमनेकप्रकारं शुक्लादि ।
रसः षड्विधो मधुरादिः । गन्धो द्विविधः सुरभिरसुर-
भिश्च । स्पर्शोऽस्या अनुष्णाशीतत्वे सति पाकजः ।

न्यतः प्रसिद्धस्य विशेषावगमार्थञ्च लक्षणप्रवृत्तेः । गन्धसहितचतु-
र्दशगुणवत्त्वं पृथिव्या इतरेभ्यो वैधर्म्यमित्याह रूपेत्यादिना । एवम-
ग्रेपि । एते चेति । गुणविनिवेशाधिकारे-गुणानां द्रव्येषु विनिवेशो
यत्र तस्मिन्द्वितीयाध्याये इत्यर्थः । तथाच-रूपरसगन्धस्पर्शवती
पृथिवीत्यादि (४९) (८१) सूत्रद्वयेन रूपादिस्पर्शान्ता गुणाः पृथिव्यां
सिद्धा इति भावः । एवमग्रेप्यन्वयः । चाक्षुषेति । संख्याः परि-
माणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यस-
मवायाच्चाक्षुषाणीति (१६७) सूत्रे चाक्षुषवचनमित्यर्थः । पतनेति ।
संयोगविभागप्रयत्नवेगाभावे गुरुत्वात्पतनमिति (१८७) पतने गुरु-
त्वस्य हेतोरुद्देशात् पृथिव्यां गुरुत्वं सिद्धमिति भावः ।
अद्भिरिति । सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्व-
मद्भिः सामान्यमिति(५४) अद्भिः सामान्यवचनसूत्रम् । उत्तरेति ।
नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथो-
[illegible]त्तरमुत्तरं चेत्यादि (१९६) (१९७) (१९८) (१९९) सूत्रेषु इषुकर्मो-
[illegible]द्देशेन पार्थिवद्रव्यस्योत्तरकर्मणि संस्कारः कारणतयोक्तोऽतः सोपि
[illegible]सिद्ध इत्यर्थः ।

(१)पृथिवीत्वव्यवस्थापकान् गुणविशेषानाकृष्य दर्शयति क्षि-
ताववेति ।

सा तु द्विविधा—नित्या चानित्या च। (१)परमाणुलक्षणा नित्या। कार्यलक्षणा त्वनित्या। सा च स्थैर्याद्यवयवसन्निवेशविशिष्टाऽपरजातिबहुत्वोपेता शयनासनाद्यनेकोपकारकरी च। त्रिविधं चास्याः कार्यम्—शरीरेन्द्रियविषयसंज्ञकम्। शरीरं द्विविधम्—योनिजमयोनिजं(२) च।

तत्रायोनिजमनपेक्ष्य शुक्रशोणितं (३)देवर्षीणां

अत्र (८०) सूत्रम्।

अनुष्णाशीतत्वे सतीति विशेषणं पृथिवीस्पर्शस्वरूपज्ञानार्थं नतु लक्षणघटकं पाकजत्वमात्रस्य लक्षणत्वात्।

अत्र (२६२) सूत्रम्।

(१)परमाणुलक्षणेति। परमाणुस्वभावपृथिवीसत्त्वे किं मानमिति चेत्, अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वान्महत्परिमाणतारतम्यवदिति अनुमानं विद्धि, यत्रेदं विश्रान्तं स परमाणुरिति भावः। कार्यलक्षणपृथिव्या अनित्यत्ववत् धर्मान्तरं प्रदर्शयन्नाह साचेति। स्थैर्यं निविडता। आदिना शिथिलतादिर्ग्राह्यः। अवयवानां सन्निवेशोऽवयवसंयोगविभागविशेषः। स्थैर्यादिभिरवयवसंनिवेशैर्विशिष्टा अपरजातिबहुत्वोपेता घटत्वादिजातिभूयस्त्वयुक्तेत्यर्थः। भावमात्रसृष्टेरदृष्टकारित्वात्पृथ्व्या अर्थक्रियां पुरुषादृष्टोपकारिणीमाह शयनासनेति।

अत्र (१५७)(१५८)(१५९)(१६०)(१६१)(१७६)(२७७) सूत्राणि।

(२)अयोनिजञ्चेति। शुक्रशोणितसन्निपातो योनिस्तत्सम्भूतं योनिजन्तद्भिन्नमयोनिजमित्यर्थः।

अत्र (१७०) (१७४) सूत्राणि।

(३)तत्केषामित्यत आह देवर्षीणामिति। शुक्रशोणिताद्युपादानकारणाभावात्कथं कार्यमत आह धर्मविशेषसहितेभ्य इति। तथाच

शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तद्द्विविधं—जरायुजमण्डजं च। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्।

इन्द्रियं गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं(१) घ्राणम्।

विषयस्तु द्व्यणुकादिक्रमेणारब्धस्त्रिविधो—मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः—प्राकारेष्टकादयो मृत्प्रकाराः। पाषाणा—उपलमणिवज्रादयः। स्थावरास्तृणौषधिवृक्षलतावतानवनस्पतय इति।

परमाणव एव देहोत्पादे कारणं न शुक्रशोणितसङ्घातः क्रियाविभागादिन्यायेन तयोर्विनाशे सत्युत्पन्नपाकजैः परमाणुभिरारम्भात् तेषाञ्च न कश्चिद्विशेषः पार्थिवत्वाविशेषात् जातिनियमे त्वदृष्टमेव हेतुरिति न धर्मविशेषानुगृहीताणुभ्योऽयोनिजदेहोत्पत्तिरनुपपन्ना इति कन्दलीकारः। अधर्मविशेषसहितेभ्य इति। इदमिहलोकप्रसिद्धमेवेति भावः। मृगाणामिति। उपलक्षणञ्चतुष्पदमात्राणाम्। पक्षीति। इदमपि मत्स्याद्युपलक्षकम्।

(१७६) सूत्रात्(१८०)सूत्रपर्यन्तमयोनिजशरीरे प्रमाणसूत्राणि।

(१)आरब्धमिति। विशिष्टोत्पादाद्घ्राणमेव गन्धव्यञ्जकं नान्य इत्यर्थः। एवमग्रेऽपि। वृक्षेति। सफलपुष्पा वृक्षाः। लताः प्रसिद्धाः। वितानाविटपा केतक्यादयः। वनस्पतय औदुम्बरादयः।

अत्र (३२५) (१७०) सूत्रे।

(५) जलनिरूपणप्रकरणम् ।

(१)अप्त्वाभिसम्बन्धादापः । रूपरसस्पर्शद्रवत्व-स्नेहसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वसंस्कार१४वत्यः । पूर्ववदेषां सिद्धिः । शुक्लमधुरशीता एव रूपरसस्पर्शाः । स्नेहोऽम्भस्येव सांसिद्धिकं च द्रवत्वम् ।

ताश्च पूर्ववद् द्विविधाः नित्यानित्यभावात् । तासां तु कार्यं त्रिविधं—शरीरेन्द्रियविषयसञ्ज्ञकम् । तत्र शरीरमयोनिजमेव वरुणलोके (२)पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् ।

---

(५) जलनिरूपणम् ।

(१) आप इति । अत्रापि पूर्ववत् लक्षणार्थोऽवसेयः एवमग्रे । पूर्ववदिति । सूत्रकारवचनेनैषां सिद्धिः पृथिवीवद्बोध्येत्यर्थः । तथाच सूत्रं रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्चेति(५०) । एवं चाक्षुषवचनात्संख्यादयोऽपि अत्र ग्राह्याः । पतनोपदेशोत्तरकर्मवचनाद्गुरुत्वसंस्कारौ एवमग्रे । एवं गुणवत्त्वेन द्रव्यत्वे सिद्धे भवादिव्यावृत्तिहेतून् गुणानाह शुक्लेति । एवमग्रे ।

अत्र (५०) (८४) (१६८) (१९७) (२०१) (२०२) (२०३) (२०४) (२०६) (२०९) सूत्राणि ।

(२) जलस्वभावत्वाविशेषादपां जलबुद्बुदप्रायं शरीरं कथं व्यवहारोचितोपभोगसमर्थं भवेदत आह पार्थिवावयवेति । तथ[illegible] ऽवयवानां निमित्तकारणत्वेन द्रवत्वप्रतिरोधाद्बुद्बुदप्रायं [illegible] रन्तेषां न भवतीत्यर्थः । एवमग्रेपीति ।

अत्र (१५७)सूत्रात् (१६१) सूत्रान्तं, (१७०) (१७५) (१[illegible] (१७७) (१७८) (१७९) (१८०) (२७६) (२७७) सूत्राणि च द्रष्टव्या[illegible]

इन्द्रियं सर्वप्राणिनां रसव्यञ्जकं विजात्यनभिभूतैर्जलावयवैरारब्धं रसनम् । विषयस्तु सरित्समुद्रहिमकरकादिः(१) ।

(६) तेजोनिरूपणप्रकरणम् ।

तेजस्त्वाभिसम्बन्धात् तेजः । रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कार-११वत् । (२)पूर्ववदेषां सिद्धिः । तत्र शुक्लं भास्वरं च रूपम् । उष्ण एव स्पर्शः ।

तदपि द्विविधमणुकार्यभावात् । कार्यं च शरीरादित्रयम् । शरीरमयोनिजमेवादित्यलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् ।

इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमन्यावयवानभिभूतैस्तेजोवयवैरारब्धं चक्षुः ।

विषयसञ्ज्ञकं चतुर्विधम्—भौमं दिव्यमुदर्यमाकरजञ्च । तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलनस्वभावं पचनदहनस्वेदनादिसमर्थम् । दिव्यमबिन्धनं सौरविद्युदादि ।

---

(१) अत्र (३२६) (२०६) (१७०) सूत्राणि ।

(६) तेजोनिरूपणम् ।

(२) पूर्ववदिति । तेजो रूपस्पर्शवदिति(५१) सूत्रम् । भास्वर-[illegible] । कदाचिल्लोहितादिप्रतीतिरौपाधिकी तद्धीनस्य शुक्लताप्रती-[illegible] प्रदीपप्रभाचान्द्रसौराद्यालोकवदित्यर्थः । उष्ण एवेति । एवका-[illegible] पृथिव्युदकवायुभ्यो वैधर्म्योक्तिः ।

भुक्तस्याहारस्य रसादिपरिणामार्थमुदर्यम् । आकरजं च सुवर्णादि(१) । तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति ।

(७) वायुनिरूपणप्रकरणम् ।

(२)वायुत्वाभिसम्बन्धाद्वायुः । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कार९वान् ।

अत्र (५५) (८३) (१६७) (१९७) (२०६) सूत्राणि ।

(१)सुवर्णादीति । यदि सुवर्णन्तैजसन्तर्हि कथं तत्र गन्धरसाद्युपलब्धिरत आह तत्रेति । प्राणिनामदृष्टवशात्तत्र पार्थिवभागोपष्टम्भादनुद्भूतरूपस्पर्शं पिण्डीभावयोग्यं सुवर्णाद्यारभ्यते तथाच पार्थिवद्रव्यसमवेतानां गन्धादीनामुपलब्धिरिति । सुवर्णस्य तैजसत्वस्थापनप्रकारस्तु—रूपवत्तया त्रितयान्तर्भूतमिदं न जलं सांसिद्धिकद्रवत्वशैत्ययोरभावात्स्नेहाविनाभूतद्रव्यान्तरासङ्ग्रहाच्च । न च नैमित्तिकद्रवत्ववत्त्वात्पार्थिवम्, विपक्षे बाधकाभावात् । न च निमित्ताद् द्रव्यान्तरे द्रवत्वोपपात्तिं किञ्चिद्विरुणद्धि । न चोर्ध्वज्वलनादिवज्जातिनियतमेतत्, एकदेशवृत्तित्वात् । न च तद्विशेषनियतं, सर्पिरादीनां भिन्नजातीयत्वात् । तस्मात्तत्तद्भोगहेतुनियताद्दृष्टसहकार्यग्निसंयोगजन्यं द्रवत्वमुत्पद्यमानं कस्पवन्न पार्थिवत्वादिव्यवस्थाहेतुः । एवम् असति विरोध्यन्तरे पार्थिवरूपपरावृत्तिरग्निसंयोगेन दृश्यते नतु ध्मायमानसुवर्णादेरिति जलवदपार्थिवत्वमवधार्यते । प्रयोगश्च सुवर्णं न पार्थिवम् अत्यन्तानलसंयोगेऽप्यपरावर्तमानरूपवत्त्वाज्जलवत् । तैजसं चैतत् पार्थिवाप्यान्यत्वे सति रूपवत्त्वात्सौर्यालोकवदित्यादिः किरणावल्यादौ विस्तरेण द्रष्टव्यः। तदपीत्यारभ्य उपलब्धिरित्यन्तं (१५७) सूत्रात् (१६१) सूत्रान्तं, (२७६) (२७७) (१७०) (१८६) सू[illegible] च क्रमशो व्याख्यातानि ।

(७)वायुनिरूपणप्रकरणम् ।

(२) प्रत्यक्षं पृथिव्यादित्रयं व्याख्यायाप्रत्यक्षद्रव्यव्याख्याव

स्पर्शोऽस्यानुष्णाशीतत्वे सत्यपाकजः, गुणविनिवेशात् सिद्धः । अरूपिष्वचाक्षुषवचनात् सप्त संख्यादयः । तृणकर्मवचनात् संस्कारः ।

(१)स चायं द्विविधोऽणुकार्यभावात् । तत्र कार्यलक्षणश्चतुर्विधः—शरीरमिन्द्रियं विषयः प्राण इति ।

तत्रायोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्(२) ।

इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवै(३)रारब्धं सर्वशरीरव्यापि त्वगिन्द्रियम् ।

नित्यानित्योभयस्वभावद्रव्यनिरूपणस्य प्रकृतत्वाद्वायुं व्याचष्टे वायुत्वेति । व्याख्या पूर्ववत् । गुणविनिवेशादिति,—"स्पर्शवान् वायुः" इति (५२) सूत्रं सूचयति । चाक्षुषेति । अरूपिष्वचाक्षुषाणि(१६८) सूत्रं । संख्यादीनीत्यर्थः । तृणे कर्म वायुसंयोगा(१९४)दित्येतैः,—सूत्रैः स्पर्शादयः संस्कारान्ता वायौ सिद्धा इत्यर्थः ।

(१)सचेति । चोऽप्यर्थे । तथाच न केवलं पृथिव्यादयो द्विविधाः किन्त्वयमपीत्यर्थः ।

अत्र (१५७) सूत्रात् (१६१) सूत्रपर्यन्तं, (५९) (६०) (६१) (१७०) (२७६) (२७७) सूत्राणि च द्रष्टव्यानि ।

(२)अत्र (१७५) सूत्रात् (१८०) पर्यन्तं सूत्राणि ।

(३)आरब्धमिति । ननु त्वगिन्द्रियस्य वायवीयत्वे किं मानम् ? चेत्, इदं वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद् अङ्गसलिलशैत्याभिव्यञ्जकसमीरणवदिति अनुमानमेव विद्धि । अत्र (३२६) सूत्रम् ।

विषयस्तूपलभ्य(१)मानस्पर्शाधिष्ठानभूतः स्पर्श-शब्दधृतिकम्पलिङ्गस्तिर्यग्गमनस्वभावो मेघादिप्रेरणधा-रणादिसमर्थः । (२)तस्याप्रत्यक्षस्यापि नानात्वं सम्मूर्च्छनेनानुमीयते । सम्मूर्च्छनं पुनः समानज-

---

(१)उपलभ्यमानेति। प्रत्यक्षस्पर्शाश्रयो वायुर्न स्वतोऽध्यक्ष इति भावः। वायुर्वातीति स्पार्शनप्रत्यक्षात्स प्रत्यक्ष इत्यपरे। तन्न स्पर्श-स्यैव प्रत्यक्षाद्वायुर्वातीति ज्ञानन्त्वभ्यासपाटवातिशयाद्यात्याद्यनपेक्षं स्पार्शनमनुमानमेव चक्षुषा वृक्षादिगतक्रियोपलब्धिवत्। स्पार्शनप्रत्य-क्षो वायुरुपलभ्यमानस्पर्शाधिष्ठानत्वात् घटवदित्यनुमानं तु शशादौ पशुत्वेन शृङ्गानुमानवदाश्रयासिद्धम्। वायुर्न स्पार्शनप्रत्यक्षविषयो चाक्षुषत्वाभावात्, यन्नैवं तन्नैवं घटवदिति सत्प्रातिपाक्षितश्चेत्य-साधकमेवेति न वायुः प्रत्यक्ष इति सिद्धम्। लिङ्ग इति। अत्रायं प्रयोगः—योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः स कचिदाश्रितः स्प-र्शत्वात् पृथिवीस्पर्शवत् १ असति रूपवद्द्रव्याभिघाते योऽयं पर्णादि-शब्दसमूहः स स्पर्शवद्वेगवद्द्रव्यसंयोगजः अविभज्यमानावयव-द्रव्यसम्बन्धित्वे सति शब्दसमूहत्वात् दण्डाभिहतभेरीशब्दसमू-हवत् २ नभसि तृणादिधृतिः स्पर्शवद्द्रव्यसंयोगहेतुका अस्मदा-द्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत् ३ वृक्षादिकम्प उक्त-विधद्रव्यसंयोगजो विलक्षणकम्पत्वात् नदीपूराहतकाशादिकम्प-वत् ४,-इत्येतैरनुमानैस्तादृशस्पर्शादीनां पृथिव्याद्यनाधेयतयाऽति-रिक्ततदाश्रयद्रव्यस्य वायोः सिद्धिरित्यर्थः। न चैतैरनुमानैः प्रतिलि-ङ्गं द्रव्यान्तरासिद्धिः कुतो न स्यादिति वाच्यम् स्पर्शानुमितद्रव्य-कार्यत्वेन शब्दादीनामुपपत्तौ द्रव्यान्तरकल्पनावैयर्थ्यात्। मेघादी-ति। आदिना विमानयानपात्रपांसुपटलादिपरिग्रहः। धे[illegible] दीत्यत्र स्पर्शाभिव्यक्तिदीपनिर्वापणादिरादिपदार्थो बोध्यः। स्व[illegible]

अत्र (५७) (५८) (६४) सूत्राणि।

(२)अनुमीयमानेषु आकाशादिषु एकानैकत्वोपलब्ध्या सं[illegible] व्युदासायाह तस्याप्रत्यक्षस्य नानात्वमिति। अनुमीयत इति। स्वा[illegible]

र्वयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः । सोऽपि सा-
वयविनोर्वाय्वोरूर्ध्वगमनेनानुमीयते तदपि तृणादिगम-
नेनेति । प्राणोऽन्तःशरीरे रसमलधातूनां (१)प्रेरणा-
दिहेतुरेकः सन् क्रियाभेदादपानादिसञ्ज्ञां लभते ।

(८)सृष्टिसंहारप्रकरणम् ।

(२)इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहार-
विधिरुच्यते । ब्राह्मेण मानेन वर्षशतान्ते वर्तमानस्य

दूयूर्ध्वगमनं स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यम् अनूर्ध्वगमनशीलस्य प्रयत्नाद्यसम्भवे सत्यूर्ध्वगमनत्वात् ज्वलदग्निप्रेरिततूलादूयूर्ध्वगम-नवदित्यनुमितेन तृणाद्यूर्ध्वगमनेन वायुरूर्ध्वगतिमान् तृणाद्यूर्ध्वगम-नासमवायिकारणसंयोगाश्रयत्वात् तदसमवायिकारणसंयोगा-श्रयज्वलदग्निवत् इति वायोरूर्ध्वगतेः सिद्धौ वाय्वोरूर्ध्वगमन-मन्योन्याहतिपूर्वकं प्रयत्नाद्यसम्भवे ऊर्ध्वगतिमत्त्वात् परस्पराभि-हतनदीजलपूरवत्, इत्यनुमानेनान्योन्यं वायूनां सन्निपातेन-संमू-र्च्छनेन वायोर्नानात्वं सिद्धमिति भावः ।

अत्र (१६३) (६२) (६३) सूत्राणि ।

(१)प्रेरणादीति । धारणविकारौ आदिपदग्राह्यौ । क्रियेति । मुखनासाभ्यां निष्क्रमणप्रवेशनाभ्यां प्राणः, अधोनयनादपानः, समं नयनात्समानः, ऊर्ध्वं नयनादुदानः, नाडीषु वितननात् व्यान,-इति क्रियाभेदात्संज्ञाभेदा भवन्ति न तु संज्ञाभेदात् संज्ञी भिद्यत इति भावः ।

[illegible] सन्त्रामिदम्भाष्यम् ।

(८)सृष्टिसंहारप्रकरणम् ।

[illegible] (२)ग्रन्थविस्तारभयात् समानन्यायेनैकत्र पृथिव्याद्युत्पत्तिविना-[illegible] रूपयति चतुर्णामिति । पृथिव्यादयः शरीरादीनारभमाणा [illegible] रपेक्षन्त एव तच्च केनाप्यधिष्ठितमेव वृत्तिं लभते अनधि-

ब्रह्मणोऽपवर्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः, तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाशः, ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माधर्मसंस्कारानुविद्धा आत्मानस्तावन्तमेव कालम् ।

ष्ठानेऽचैतन्यानुपपत्तिः प्रवृत्त्यनुपपत्तिर्वा अचेतनप्रवृत्तेः पराधिष्ठानकार्यत्वनियमात्, । अधिष्ठातृत्वं च नास्मदादीनामनभिज्ञत्वात् इतरस्य प्रयोजनाभावादिति व्यग्रान् अन्तेवासिनः समाश्वासयन्नाह चतुर्णामिति इत्याचार्याः । विधिरिति । द्व्यणुकादिक्रमेण सृष्टिः क्रियाविभागादिन्यायेनापरमाण्वन्तः प्रलयश्च कथ्यत इत्यर्थः । ब्राह्मेणेति ।

मानवस्य तु वर्षस्य दैवमेकं दिनं भवेत् ।
तद्द्वादशसहस्राणि चतुर्युगमुदीरितम् ॥
चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते ।
रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना ॥

इति ब्राह्ममानम् । उपनिबन्धकानामिति । आरम्भका[illegible]
त्यर्थः । सर्वात्मेति । आत्मगतानामात्मसमवेतानाम् अ[illegible]
वृत्तिनिरोधे शक्तिप्रतिबन्धेऽनागतशरीराद्यनुत्पत्तिः, उत्पन्नसं[illegible]
च महेश्वरसञ्जिहीर्षात्माणुसंयोगेभ्यः कर्माणि तेभ्यश्च [illegible]
न्द्रियकारणीभूताणुषु विभागास्ततः पूर्वसंयोगनिवृत्तौ [illegible]

(१)ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति ।

तदनन्तरं (२)तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति ।

न्द्रियाणां द्व्यणुकादिनाशक्रमेण यावत्परमाणुर्विनाशो भवतीत्यर्थः । उत्तरस्मिन्निति । जले तिष्ठति पृथिव्याः, तेजसि तिष्ठति जलस्येत्येवमुत्तरोत्तरस्मिन् विद्यमाने पूर्वपूर्वविनाश इति भावः । तावन्तमिति । ब्रह्मशतवर्षपर्यन्तमित्यर्थः । आत्मान इति दिगाद्युपलक्षणं तेषामपि नित्यत्वात् ।

अत्र (६६) (६७) (१९९) (२१०) (२९१) सूत्राणि पृथिवीकर्महेतुबोधकानि विभागस्य कर्मादिजन्यत्वप्रतिपादकानि च द्रष्टव्यानि ।

(१)अर्थप्रतिपादनमात्रस्य विवक्षितत्वात्पूर्वं वक्तुमुचितस्यापि सर्गस्य पश्चान्निर्देशमाह ततः पुनरिति । सृष्टिसंहारयोरनादित्वप्रथमतां प्रतिपादयितुमपूर्वं संहारप्रक्रमनिर्देश इति आचार्याः । सृष्टिसंहारयोरनादित्वमित्याचार्याशयः । भूतये-निष्पत्तये । वृत्तिलब्धाः-लब्धवृत्तयो ये अदृष्टविशेषास्तदपेक्षेभ्य आत्माणुसंयोगेभ्यः क्रियाद्विन्यायेन द्व्यणुकादिक्रमेणोत्पन्नो वायुर्नभसि भृशं कम्पमान आस्ते, [illegible] रानुत्पत्तेरप्रतिहतवेगत्वात् पवनजातिनियतत्वाच्च तिर्य- [illegible] भावस्येति शेषः ।

[illegible] (२१०) (२९०) (३६३) सूत्राणि ।

[illegible] स्मिन्नेवेति । स्पर्शवद्वेगवत्तया गुरुत्वप्रतिबन्धकत्वादाधार- [illegible] ः । पोप्लूयमानः-प्रतिबन्धकाभावात् सर्वत्र प्लवमान इति

ब्रह्मणोऽपवर्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः, तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाशः, ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माधर्मसंस्कारानुविद्धा आत्मानस्तावन्तमेव कालम् ।

ष्ठानेऽचैतन्यानुपपत्तिः प्रवृत्त्यनुपपत्तिर्वा अचेतनप्रवृत्तेः पराधिष्ठानकार्यत्वनियमात्,। अधिष्ठातृत्वं च नास्मदादीनामनभिज्ञत्वादीश्वरस्य प्रयोजनाभावादिति व्यग्रान् अन्तेवासिनः समाश्वासयन्नाह चतुर्णामिति इत्याचार्याः । विधिरिति । द्व्यणुकादिक्रमेण सृष्टिः क्रियाविभागादिन्यायेनापरमाण्वन्तः प्रलयश्च कथ्यत इत्यर्थः । ब्राह्मेणेति ।

> मानवस्य तु वर्षस्य दैवमेकं दिनं भवेत् ।
> तद्द्वादशसहस्राणि चतुर्युगमुदीरितम् ॥
> चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते ।
> रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना ॥

इति ब्राह्ममानम् । उपनिबन्धकानामिति । आरम्भका[illegible]त्यर्थः । सर्वात्मेति । आत्मगतानामात्मसमवेतानाम् अ[illegible] वृत्तिनिरोधे शक्तिप्रतिबन्धेऽनागतशरीराद्यनुत्पत्तिः, उत्पन्नसं[illegible] च महेश्वरसञ्जिहीर्षात्माणुसंयोगेभ्यः कर्माणि तेभ्यश्च श[illegible]न्द्रियकारणीभूताणुषु विभागास्ततः पूर्वसंयोगनिवृत्तौ श[illegible]

(१)ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानास्तिष्ठति।

तदनन्तरं (२)तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति।

न्द्रियाणां द्व्यणुकादिनाशक्रमेण यावत्परमाणुर्विनाशो भवतीत्यर्थः। उत्तरस्मिन्निति। जले तिष्ठति पृथिव्याः, तेजसि तिष्ठति जलस्येत्येवमुत्तरोत्तरास्मिन् विद्यमाने पूर्वपूर्वविनाश इति भावः। तावन्तमिति। ब्रह्मशतवर्षपर्यन्तमित्यर्थः। आत्मान इति दिगाद्युपलक्षणं तेषामपि नित्यत्वात्।

अत्र (६६) (६७) (१९९) (२१०) (२९१) सूत्राणि पृथिवीकर्महेतुबोधकानि विभागस्य कर्मादिजन्यत्वप्रतिपादकानि च द्रष्टव्यानि।

(१)अर्थप्रतिपादनमात्रस्य विवक्षितत्वात्पूर्वं वक्तुमुचितस्यापि सर्गस्य पश्चान्निर्देशमाह ततः पुनरिति। सृष्टिसंहारयोरनादित्वप्रथमतां प्रतिपादयितुम्पूर्वं संहारप्रक्रमनिर्देश इति आचार्याः। सृष्टिसंहारयोरनादित्वमाचार्याशयः। भूतये—निष्पत्तये। वृत्तिलब्धाः—लब्धवृत्तयो ये अदृष्टविशेषास्तदपेक्षेभ्य आत्माणुसंयोगेभ्यः क्रियाद्विन्यायेन द्व्यणुकादिक्रमेणोत्पन्नो वायुर्नभसि भृशं कम्पमान आस्ते, [illegible]रानुत्पत्तेरप्रतिहतवेगत्वात् पवनजातिनियतत्वाच्च तिर्य-[illegible]भावस्येति शेषः।

[illegible] (२१०) (२९०) (३६३) सूत्राणि।

[illegible]स्मिन्नेवेति। स्पर्शवद्वेगवत्तया गुरुत्वप्रतिबन्धकत्वादाधार[illegible]ः। पोप्लूयमानः—प्रतिबन्धकाभावात् सर्वत्र प्लवमान इति

तदनन्तरं तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो महापृथिवी (१)संहताऽवतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिः केनाचिदनभिभूतत्वा(२)द्देदीप्यमानस्तिष्ठति।

(३)एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्माऽतिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो व-

---

भावः।

(१)संहता—निबिडावयवा अविशीर्णतयेत्यर्थः।
अत्र (२९०) (३६३) सूत्रे।

(२) देदीप्यमानो—अनभिभवादतिशयेन दीप्यमान इति भावः। अत्र (१९९) (३६३) (२९०) (२१०) सूत्राणि द्रष्टव्यानि।

(३) एवमिति। अभिध्यानेति। अभिध्यानञ्च सङ्कल्पस्तन्मात्रात् न तु कुलालादिवत् व्यापारात्कायस्येत्यर्थः। अण्डमिति। पार्थिवाणुसाहित्येन तैजसपरमाणूत्पन्नत्वादस्य हिरण्मयत्वं [illegible] तम्। विनियुङ्क्ते इति। महेश्वर इति शेषः। विदि[illegible] एतावदस्य कर्मफलमिति ज्ञात्वेत्यर्थः। सुतानिति [illegible] प्रत्येकमन्वयः। मानसान् प्रजापतीन्दक्षादीन्, मनून् [illegible] षादीन्, देवानादित्यादीन्, ऋषीन् गौतमादीन्, पितॄन् [illegible]

र्णानन्यानि चोच्चावचानि च सृष्ट्वाऽऽशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयतीति ।)

(९)आकाशप्रकरणम् ।

(१)आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः सञ्ज्ञा भवन्ति । आकाशः कालो दिगिति ।

तत्राकाशस्य गुणाः शब्दसंख्यापरिमाणपृथक्त्व-

हनादीन्, गणान् कूष्माण्डादीन्, गणशब्दस्य प्रत्येकं वाऽन्वयः । आशयेति । फलज्ञानपर्यन्तमाशेरत इत्याशयाः कर्मज्ञानवासनारूपाः तदनुरूपैर्धर्मज्ञानादिभिः संयोजयति मात्रयाऽप्यन्यथा न करोतीत्यर्थः । धर्मादिभिरधर्मादीनामपि ग्रहणमत्र बोध्यम् । तदेवं प्रबन्धेन परमेश्वराधिष्ठितैः पृथिव्यादिपरमाणुभिर्विश्वमारभ्यत इति वदताऽन्तेवासिनां सर्वे आक्षेपाः परिहृतास्तथाहि अदृष्टापेक्षया सृष्टेर्विचित्रता, मानससृष्ट्याऽऽद्यव्यवहारः परमेश्वराधिष्ठानेनाचैतन्यप्रवृत्तिचैतन्यप्रवृत्तिनियमौ चेति । ननु ईश्वरसद्भावे सर्वमिदं सम्भवेत्तत्रैव किं मानमिति चेत् शरीरानपेक्षोत्पत्तिमद् बुद्धिपूर्वकं कारणवत्वात्, यत्कारणवत्तद्बुद्धिपूर्वकं यथा रथः, तथा चैतत्तस्माद्बुद्धिपूर्वकमिति पञ्चावयवोपपन्नमनुमानमागमश्चेति । अत्र किरणावल्यादौ विस्तरो द्रष्टव्यः ।

स्वतन्त्रमिदम्भाष्यम् ।

(९ आकाशप्रकरणम् ।

[illegible] सयो[illegible]त आकाशादित्रयमेकग्रन्थेनाहाकाशेति । अपरजात्य[illegible]नेकाशग्[illegible] व्यक्त्यभेद आकाशत्वादिजातिबाधक इत्यर्थः । संज्ञा य[illegible]शे [illegible]ाह्निकया निमित्तं विना साङ्केतिकं नाम तेषामिति [illegible]हणादित्य[illegible]काशे द्रव्यत्वव्यवस्थापकगुणान्प्रदर्शयति तत्रेति ।

[illegible] समव[illegible]) (७७) (७८) (७९) (२७८) सूत्राणि ।

संयोगाविभागाः । (१)शब्दः प्रत्यक्षत्वे सत्यकारणगुण-पूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः । बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्य-त्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगु-

---

(१)नन्वाकाशसद्भावे किं प्रमाणम्? इहायं पक्षी प्राप्त इति नियतदे-शाधिकरणप्रत्यक्षप्रतीतिरेव मानमिति, न युक्तमरूपद्रव्यस्य चाक्षुवि-षत्वाभावात् अधिकरणप्रत्ययस्तु विततालोकमण्डलं विना न किञ्चि-द्विषयीकरोतीति तत्सद्भावे परिशेषानुमानमुपन्यस्यन् शब्दस्यान्य-द्रव्यगुणत्वं प्रतिषेधति शब्द इति । अत्रायं प्रयोगः—शब्दो न स्प-र्शवद्विशेषगुणः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात् सुखवत् । परमाणुरूपादौ व्यभिचारवारणाय सत्यन्तम् । पिठरपाकानभ्युप-गमान्न तद्विशेषगुणैर्विरोधः । हेत्वन्तरमयावद्द्रव्यभावित्वादिति । यावद्द्रव्यं शब्दो न भवति शङ्खाद्याश्रयसत्त्वे एव तद्विनाशात् । अ-त्रापि परमाणुरूपादौ व्यभिचारनिरासार्थं प्रत्यक्षत्वे सतीत्यनुवर्त-नीयम् । पूर्ववत्प्रयोगो द्रष्टव्यः। अनयोस्तर्कमाहाश्रयादन्यत्रोपलब्धे-रिति । आश्रयाभिमताच्छङ्खादेरन्यत्र कर्णशष्कुल्यवच्छिन्ने नभस्यु-पलब्धेः । यदि शङ्खाश्रयः शब्दः स्यात् तत्पिधाने नोपलभ्येत कर्ण-विवरपिधान इव सर्वदैवाप्राप्तेः, अप्राप्तग्रहणे च सर्वत्र सर्वदा सर्वैः सर्वशब्दोपलब्धिप्रसङ्ग इत्याचार्याः । हेत्वन्तरमाह आश्रयाद-न्यत्रोपलब्धेरिति कन्दलीकाराः । नात्मगुण इति । शब्दो नात्मगु-णः बाह्येन्द्रियप्रत्यक्षाद्रूपवत् । न च स्वरूपासिद्धोऽयमिति वाच्यम् श्रोत्रं बाह्येन्द्रियं प्रतिनियतविषयत्वाच्चक्षुर्वदिति तात्पर्यात् । हेत्व-न्तरमाह आत्मान्तरग्राह्यत्वादिति । आत्मगुणास्तु
एव गृह्यन्ते यथा सुखादयः नैवं शब्दः । इदं कुतः? अ
न्यसमवायात्–ग्राहकासमवायादित्यर्थः । इदमप्यसिद्ध
रेणेत्याचार्याः । रूपादिवच्छब्दो नात्मगुण आत्मन्य
ति हेत्वन्तरमिति कन्दली । अहङ्कारेणेति । विभक्त

णः । श्रोत्रग्राह्यत्वाद्वैशेषिकगुणभावाच्च न दिक्कालमन-
साम् । परिशेषाद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् ।

(१)शब्दलिङ्गाविशेषादेकत्वं सिद्धम् । तदनुवि-
धानादेकपृथक्त्वम् । विभववचनात् परममहत्परिमाणम् ।
शब्दकारणत्ववचनात् संयोगविभागाविति । अतो गु-
णवत्त्वादनाश्रितत्वाच्च द्रव्यम् । समानासमानजातीय-
कारणाभावाच्च नित्यम्, सर्वप्राणिनां च शब्दोपलब्धौ

णस्य ग्रहणाच्चेत्यर्थः, य आत्मगुणः सोऽहङ्कारसमानाधिकरणो
गृह्यते यथा सुख्यहमिति नैवं शब्दस्य ग्रहणम् अतो नात्मगुण इति
भावः । श्रोत्रेति । शब्दो न दिक्कालमनोगुणः श्रोत्रग्राह्यत्वात् । अत्र
श्रोत्रेत्युपलक्षणं ग्राह्यत्वादित्येव हेतुर्गन्धवदिति दृष्टान्तः । एवं
शब्दो न दिक्कालमनोगुणः विशेषगुणभावात्सुखवदिति प्रयोगः
परिशेषादिति । शब्दो द्रव्यसमवेतो गुणत्वाद्रूपवदित्यनेन द्रव्य-
समवेतत्वे सिद्धे पूर्वोक्तानुमानैः क्लृप्तद्रव्यानाश्रितत्वे च सिद्धे
शब्द आकाशद्रव्यगुणः गुणत्वे सति पृथिव्याद्यष्टद्रव्यानाश्रितत्वा-
दित्यनेन परिशेषानुमानेनाकाशसिद्धिरिति भावः ।

अत्र (७२) (७३) (७४) सूत्राणि ।

(१)शब्दलिङ्गेति । अत्र परिशेषाल्लिङ्गमाकाशस्येत्यादि (७५)
(७७) (७८)सूत्राणि । तथाच सर्वत्राविशिष्टस्सन् एकः शब्द आकाश-
लिङ्गमिति आकाशमप्येकमित्यर्थः । तदन्विति । अत्र (७९) सूत्रम् ।
विभवेति । विभवान्महानाकाश इति (२७८) सूत्रम् । शब्दे-
[illegible] संयोगाद्विभागाच्छब्दाच्च शब्दस्य निष्पत्तिरिति (२१०)
[illegible]नेकाशगुणं शब्दं प्रति संयोगविभागयोः कारणत्वमुक्तं
[illegible]शे तयोः सिद्धिरित्यर्थः । गुणवत्त्वादित्यत्र घटोऽना-
[illegible]हणादित्यत्र च परमाणुर्दृष्टान्तो बोध्यः । समानेति । समानजा-
[illegible] समवायिकारणमसमानजातीयमसमवायिकारणं निमित्त-

संयोगाद्विभागाः । (१)शब्दः प्रत्यक्षत्वे सत्यकारणगुण-
पूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न
स्पर्शवद्विशेषगुणः । बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्य-
त्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगु-

---

(१)नन्वाकाशसद्भावे किं प्रमाणम्? इहायं पक्षी प्राप्त इति नियतदे-
शाधिकरणप्रत्यक्षप्रतीतिरेव मानमिति, न युक्तमरूपद्रव्यस्य चाक्षुषि-
त्वाभावात् अधिकरणप्रत्ययस्तु विततालोकमण्डलं विना न किञ्चि-
द्विषयीकरोतीति तत्सद्भावे पारिशेषानुमानमुपन्यस्यञ् शब्दस्यान्य-
द्रव्यगुणत्वं प्रतिषेधति शब्द इति । अत्रायं प्रयोगः–शब्दो न स्प-
र्शवद्विशेषगुणः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात् सुखवत् ।
परमाणुरूपादौ व्यभिचारवारणाय सत्यन्तम् । पिठरपाकानभ्युप-
गमान्न तद्विशेषगुणैर्विरोधः । हेत्वन्तरमयावद्द्रव्यभावित्वादिति ।
यावद्द्रव्यं शब्दो न भवति शङ्खाद्याश्रयसत्त्वे एव तद्विनाशात् । अ-
त्रापि परमाणुरूपादौ व्यभिचारनिरासार्थं प्रत्यक्षत्वे सतीत्यनुवर्त-
नीयम् । पूर्ववत्प्रयोगो द्रष्टव्यः । अनयोस्तर्कमाहाश्रयादन्यत्रोपलब्धे-
रिति । आश्रयाभिमताच्छङ्खादेरन्यत्र कर्णशष्कुल्यवच्छिन्ने नभस्यु-
पलब्धेः । यदि शङ्खाश्रयः शब्दः स्यात् तत्पिधाने नोपलभ्येत कर्ण-
विवरापिधान इव सर्वदैवाप्राप्तेः, अप्राप्तग्रहणे च सर्वत्र सर्वदा सर्वैः
सर्वशब्दोपलब्धिप्रसङ्ग इत्याचार्याः । हेत्वन्तरमाह आश्रयाद-
न्यत्रोपलब्धेरिति कन्दलीकाराः । नात्मगुण इति । शब्दो नात्मगु-
णः बाह्येन्द्रियप्रत्यक्षाद्रूपवत् । न च स्वरूपासिद्धोऽयमिति वाच्यम्
श्रोत्रं बाह्येन्द्रियं प्रतिनियतविषयत्वाच्चक्षुरादिवदिति तासरासात् । हेत्व-
न्तरमाह आत्मान्तरग्राह्यत्वादिति । आत्मगुणास्तु
एव गृह्यन्ते यथा सुखादयः नैवं शब्दः । इदं कुतः? अ
न्यसमवायात्–ग्राहकासमवायादित्यर्थः । इदमप्यसिद्ध
रेणेत्याचार्याः । रूपादिवच्छब्दो नात्मगुण आत्मन्य
ति हेत्वन्तरमिति कन्दली । अहङ्कारेणेति । विभक्त

णः। श्रोत्रग्राह्यत्वाद्वैशेषिकगुणभावाच्च न दिक्कालमनसाम्। परिशेषाद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम्।

(१)शब्दलिङ्गाविशेषादेकत्वं सिद्धम्। तदनुविधानादेकपृथक्त्वम्। विभववचनात् परममहत्परिमाणम्। शब्दकारणत्ववचनात् संयोगविभागाविति। अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम्। समानासमानजातीयकारणाभावाच्च नित्यम्, सर्वप्राणिनां च शब्दोपलब्धौ

णस्य ग्रहणाच्चेत्यर्थः, य आत्मगुणः सोऽहङ्कारसमानाधिकरणो गृह्यते यथा सुख्यहमिति नैवं शब्दस्य ग्रहणम् अतो नात्मगुण इति भावः। श्रोत्रेति। शब्दो न दिक्कालमनोगुणः श्रोत्रग्राह्यत्वात्। अत्र श्रोत्रेत्युपलक्षणं ग्राह्यत्वादित्येव हेतुर्गन्धवदिति दृष्टान्तः। एवं शब्दो न दिक्कालमनोगुणः विशेषगुणभावात्सुखवदिति प्रयोगः परिशेषादिति। शब्दो द्रव्यसमवेतो गुणत्वाद्रूपवदित्यनेन द्रव्यसमवेतत्वे सिद्धे पूर्वोक्तानुमानैः क्लृप्तद्रव्यानाश्रितत्वे च सिद्धे शब्द आकाशद्रव्यगुणः गुणत्वे सति पृथिव्याद्यष्टद्रव्यानाश्रितत्वादित्यनेन परिशेषानुमानेनाकाशसिद्धिरिति भावः।

अत्र (७२) (७३) (७४) सूत्राणि।

(१)शब्दलिङ्गेति। अत्र परिशेषाल्लिङ्गमाकाशस्येत्यादि (७५) (७७) (७८)सूत्राणि। तथाच सर्वत्राविशिष्टस्सन् एकः शब्द आकाशलिङ्गमिति आकाशमप्येकमित्यर्थः। तदन्विति। अत्र (७९) सूत्रम्। विभवेति। विभवान्महानाकाश इति (२७८) सूत्रम्। शब्दे-[illegible] संयोगाद्विभागाच्छब्दाच्च शब्दस्य निष्पत्तिरिति (२१०) सूत्र[illegible]नेकाशगुणं शब्दं प्रति संयोगविभागयोः कारणत्वमुक्तं य[illegible]शे तयोः सिद्धिरित्यर्थः। गुणवत्त्वादित्यत्र घटोऽना-[illegible]हणादित्यत्र च परमाणुर्दृष्टान्तो बोध्यः। समानेति। समानजा-[illegible] समवायिकारणमसमानजातीयमसमवायिकारणं निमित्त-

निमित्तं श्रोत्रभावेन । श्रोत्रं पुनः श्रवणविवरसञ्ज्ञको नभोदेशः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धस्त-स्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद्बाधिर्यमिति ॥

(१०)कालप्रकरणम् ।

(१) कालः परापरव्यतिकरयौगपद्यायौगपद्यचि-रक्षिप्रप्रत्ययलिङ्गम् । तेषा विषयेषु पूर्वप्रत्ययविलक्षणा-

---

कारणं च तेषामभावान्नित्यमित्यर्थः । श्रोत्रभावेनेति । अन्यथा सर्वेषां सर्वशब्दोपलब्धिराकाशस्य सर्वत्राविशेषात्स्यादिति । उपनि-बद्ध इति । तथा चाकाशस्य व्यापकत्वेऽपि न सर्वत्र शब्दो-पलब्धिः प्राण्यदृष्टवशेन कर्णशष्कुल्यधिष्ठितस्यैव तस्येन्द्रियत्वात् शरीरावच्छेदेनात्मनो ज्ञातृत्वादित्यभिप्रायः । उपनिबन्धकमदृष्टन्त-दभावाद्बाधिरस्य न शब्दोपलब्धिरित्यर्थः ।

(१०)कालप्रकरणम् ।

अत्र (७६) (१००) सूत्रे द्रष्टव्ये ।

(१)काललक्षणमाह काल इति । परापरेति भावप्रधानो निर्देशः । तयोर्व्यतिकरः दिक्कृतपरत्वापरत्वविपरीते परत्वापरत्वे इत्य-र्थः । ते यौगपद्यादिप्रत्ययाश्च काललिङ्गमिति भावः । अत्रायं प्रयोगप्रकारः—स्थविरादौ परत्वं सूर्यपरिस्पन्दप्रकर्षबुद्धिजन्यं तद-नुविधायित्वात्पटकुविन्दवत् । ते च सूर्यपरिस्पन्दाः स्थविरदेहप्र-त्यासत्तिमपेक्षन्ते स्वभावतोऽप्रत्यासन्नत्वे सति तदवच्छेदकत्वात् पटावच्छेदकमहारजनरागवत् । सा च प्रत्यासत्तिः द्रव्यकृताऽन्यप्र-कारासम्भवे सति प्रत्यासत्तित्वात् पटे महारजनप्रत्यासत्तिवत् त-दभावे सन्निकर्षविप्रकर्षयोरसम्भवेनापेक्षणीयानुपपत्तौ पर[illegible] नुत्पत्त्या तद्व्यवहारविलोपः स्यात् । तच्च द्रव्यं कालाख्यमित[illegible] विशिष्टपरत्वाद्यनुमेयत्वाद्यन्नैवं तन्नैवं यथा पृथिवीति । एतेना[illegible] दि लिङ्गतया व्याख्यातं बोध्यम् । ननु कालस्याप्रत्यक्षतया [illegible] परादिप्रत्ययानां व्याप्त्यभावात् कुतो लिङ्गत्वमत आह तेष[illegible]

नामुत्पत्तावन्यनिमित्ताभावाद्यदत्र निमित्तं स कालः। सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात्। क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुः।

(१)तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः ५। काललिङ्गाविशेषादेकत्वं सिद्धम्। तदनुविधानात् पृथक्त्वम्। कारणे काल इतिवचनात् परममहत्परिमाणम्। कारणपरत्वादिवचनात् संयोगः। तद्विनाशकत्वाद्विभाग इति। तस्या(२)काशवद्द्रव्यत्वनित्यत्वे सिद्धे

तेषां युगपदादिप्रत्ययानां विषयेषु द्रव्यादिषु पूर्वप्रत्ययविलक्षणानां द्रव्यादिप्रत्ययविलक्षणानामुत्पत्तौ अन्यस्य निमित्तस्याभावात्, कालं विनेति शेषः। द्रव्यादिषु युगपज्जायन्त इत्यादिप्रत्ययानां निमित्तं विनोत्पत्त्यभावात्तन्निमित्तं काल इति भावः। तद्व्यपदेशादिति। तेन कालेनोत्पत्त्यादीनां व्यपदेशात् उत्पत्तिकालो विनाशकाल-इत्यादिव्यवहारात् कालस्य तत्र हेतुतेत्यर्थः। अत्र (८७ सूत्रम्)

(१)आकाशादिव्यावृत्तिहेतुविशेषगुणाभावमाविष्कर्तुं तस्य सामान्यगुणानाह तस्येति। काललिङ्गेति। काललिङ्गानां युगपदादिप्रत्ययानामविशेषादेकत्वं कालस्येत्यर्थः। कारणे काल इति। कारणे कालाख्या इति (८८) सूत्रम्। अनेनास्य व्यापकत्वं लभ्यते। कारणपरत्वादिति। कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे [illegible](३०३) सूत्रात्तस्य संयोग इत्यर्थः। अत्र (८७) (७९) सूत्राणि [illegible]नेयानि।

[illegible](२)आकाशवदिति। आकाशवद्गुणवत्त्वादनाश्रितत्वाच्च द्रव्य[illegible]त्वे कालस्याप्यूह्ये इति भावः। ननु कालस्यैकत्वे कथमती[illegible]व्यवहार अत आह काललिङ्गेति। काललिङ्गं परापरादिप्रत्यया-

काललिङ्गाविशेषादञ्जसैकत्वेऽपि सर्वकार्याणामारम्भक्रि-
याभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा
नानात्वोपचार इति ॥

(११)दिक्प्रकरणम् ।

दिक् (१)पूर्वापरादिप्रत्ययलिङ्गा । मूर्तद्रव्यमव-
धिं कृत्वा मूर्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन प-
श्चिमेनोत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण उ-
त्तरपूर्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भव-
न्ति सा दिगिति, अन्यनिमित्तासम्भवात् ।

स्तेषामञ्जसा मुख्यया वृत्त्यैकत्वेऽपि कालस्य नानात्वोपचारान्नाना-
त्वव्यपदेश इति भावः । कुतः ? इत्यत आह सर्वेति । आरम्भ उपक्र-
मः । अभिनिर्वृत्तिः परिसमाप्तिः । स्थितिः स्वरूपावस्थानम् । नि-
रोधो विनाशः । अन्यत्स्पष्टम् ।

अत्र (८६) (८७) सूत्रे ।

(११)दिक्प्रकरणम् ।

(१)पूर्वेति । पूर्वमपरमित्यादिप्रत्ययो लिङ्गं यस्याः सा दिगित्य-
र्थः । अमूर्तस्यावधित्वं पूर्वादिप्रत्ययविषयत्वं चानवच्छिन्नपरिमाण-
त्वान्न सम्भवत्यत उक्तं मूर्तद्रव्यमवधिं कृत्वेति । मूर्तद्रव्येष्वेव य-
तः इदमस्मात्पूर्वेणेत्यादिप्रत्यया भवन्ति सा दिगित्यर्थः । ननु तादृ-
शप्रतीतिबलात्किमपि निमित्तमन्यत्स्यात्कुतो दिगेवेत्याशङ्क्याह
अन्यनिमित्तासम्भवादिति । तथाचायं प्रयोगः–दिगितरेभ्यो भिद्यते
उपाध्युपनयनद्वारा पूर्वापरादिप्रत्ययहेतुत्वात् यन्नैवं तन्नैवं य[illegible]
थिवीत्वादि । उपाध्युपनयनद्वारा तादृशप्रत्ययहेतुत्वं च क्रिय[illegible]
पाध्यादिनिबन्धनव्यपदेशहेतुकालादौ न सम्भवति । प्रत्य[illegible]
प्रथमचरमादित्यसंयोगनिमित्त एव, न च द्रव्यान्तरवर्तिनो [illegible]
स्य द्रव्यान्तरसंक्रमणं विना विशिष्टप्रत्ययोत्पादकत्वं, ततो [illegible]

तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः ५ (१)कालवदेते सिद्धाः । दिग्लिङ्गाविशेषादञ्जसैकत्वेऽपि दिशः परममहर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं मेरुं प्रदक्षिणमावर्तमानस्य भगवतः सवितुर्ये संयोगाविशेषाः लोकपालपरिगृहीतदिक्प्रदेशाना(२)मन्वर्थाः प्राच्यादिभेदेन दशविधाः सञ्ज्ञाः कृताः अतो भक्त्या दश दिशः सिद्धाः । तासामेव देवतापरिग्रहात् पुनर्दश सञ्ज्ञा भवन्ति-माहेन्द्री वैश्वानरी याम्या नैर्ऋती वारुणी वायव्या कौबेरी ऐशानी ब्राह्मी नागी चेति ॥

विभुना द्रव्यान्तरेण सा च दिगेवेति किरणावल्यादौ विस्तरोऽनुसन्धेयः ।

अत्र (८९) सूत्रम् ।

(१)कालवदिति । काललिङ्गाविशेषादेकत्वादिवद्दिग्लिङ्गाविशेषादेकत्वादिसिद्धिरित्यर्थः ।

अत्र (९१) (७९) (२८०) (३०३) सूत्राणि ।

(२)अन्वर्था इति । अनुगतोऽर्थो यासामिति अन्वर्थाः । केषामर्थस्तास्वनुगतः ? लोकपालैरिन्द्रादिभिः परिगृहीतानां दिक्प्रदेशानां सवितुर्ये संयोगविभागास्तेषामित्यध्या-
[illegible]र्थ तथा च प्रथममस्यामञ्चति सवितेति प्राचीत्यादिव्यवहा-
[illegible]नेभ्यः । किमर्थं ताः संज्ञा अत आह श्रुतीति । न प्रतीचीशि-
[illegible] यीतेति श्रौतः, आयुष्यं प्राङ्मुखो भुंक्ते इत्यादिः स्मार्तः, पूर्वे
[illegible]हचक्षिणमवलोकयेत्यादिर्लौकिकश्च व्यवहारो बोध्यः ।

[illegible]त (९२) (९३) (९४) (९५) सूत्राणि ।

षादात्मकार्यत्वात् तेनात्मा समधिगम्यते। (१)शरीरसम-
वायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्ति-
निवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्या-
धिष्ठाताऽनुमीयते, प्राणादिभिश्चेति। कथं? शरीरपरिगृहीते

थात्वे व्यासंगो न स्यात् करणान्तरापेक्षायां च संज्ञाभेदमात्रम्।
अथ करणतयाऽनुमितमेव ज्ञानाश्रयतयाप्यनुमास्यते अत आह स्वयं
करणभावाच्चेति। सिद्धे हि चैतन्याश्रये कर्तरि करणं मनोऽनुमीयते
तथाच धर्मिग्राहकप्रमाणबाध इति आचार्याः। कन्दलीकृतस्तु इतोपि
ज्ञानं मनोगुणो न भवति तस्य स्वयं करणत्वादित्याह स्वयंकरण-
भावाच्चेति। मनो न चेतनं करणत्वात् घटवदिति वदन्ति। परिशे-
षादिति। प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणतयाऽऽत्मकार्यत्वा-
त्पृथिव्याद्यसमवायित्वे सति कार्यत्वादित्यर्थः। तेन—ज्ञानेनात्मा सम-
धिगम्यतेऽनुमीयते। तत्प्रयोगश्च—ज्ञानं पृथिव्याद्यतिरिक्तद्रव्याश्रितं
तदनाश्रितत्वे सति कार्यत्वात् यन्न पृथिव्याद्यतिरिक्तद्रव्याश्रितं
तत्तदनाश्रितत्वे सति कार्यमपि न भवति यथा गन्धादिरिति।

अत्र (१३५) सूत्रं।

(१)आत्मसिद्धौ प्रमाणान्तरमाह शरीरेति। शरीरतदवयवसम-
वायिन्यावेव प्रवृत्तिनिवृत्ती प्रायेण भवत इति तत्स्वरूपपरं विशे-
षणम्। जलप्रवाहपतितमृतशरीरप्रवृत्तिनिवृत्तिव्यवच्छेदार्थं हिता-
हितेति द्वितीयं विशेषणम्, बुद्धिपूर्वकचेष्टेति तदर्थः। अत्रायं प्रयो-
गः—शरीरं प्रयत्नवदधिष्ठितं विशिष्टक्रियत्वाद्रथवदिति। हिताहि-
तप्राप्तिपरिहारसमर्था चेष्टा प्रयत्नपूर्विका विशिष्टक्रियात्वाद्रथ-
क्रियावदिति वा॥

अत्र (११८) (११९) (१२०) (१२१) (१३४) सूत्राणि।

हेत्वन्तरमाह प्राणादिभिश्चेति। अनेन प्राणापाननिमेषोन्मेषजी-
वनमनोगतीन्द्रियविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गा-
नीति सूत्रोक्तसमस्तलिङ्गपरिग्रहः। प्रश्नपूर्वकं प्राणापानादीनां
लिङ्गत्वं दर्शयति कथं शरीरपरिगृहीतेति। शरीरसहचारिणि

वायौ विकृतकर्मदर्शनाद्भस्त्राध्मापयितेव, निमेषोन्मेषकर्मणा नियतेन दारुयन्त्रप्रयोक्तेव, देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् गृहपतिरिव, अभिमतविषयग्राहककरणसम्बन्धनिमित्तेन मनःकर्मणा गृहकोणेषु पेलकप्रेरक इव दारकः, नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी कश्चिदेको विज्ञायते। सुखदुःखे-

---

प्राणापानाख्ये वायौ विकृतमूर्ध्वाधोगमनरूपं यत्कर्म तद्दर्शनात् भस्त्राध्मापयितेव तत्प्रेरक आत्माऽनुमीयत इत्यर्थः। प्रयोगस्तु—जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितं संमूर्छनाभावे सति विकृतक्रियपवनाश्रयत्वात् भस्त्रादिवदिति। निमेषेति। शरीरं प्रयत्नवदधिष्ठितमिच्छाधीननिमेषोन्मेषवदवयवयोगित्वाद्दारुयन्त्रवदित्यनुमानेन निमेषोन्मेषकर्मणा दारुयन्त्रप्रयोक्तेव विग्रहस्य प्रयत्नवानात्माऽनुमीयत इत्यर्थः। जीवनलिङ्गकमनुमानमाह—देहस्येति। अनुमानं तु—शरीरवृद्ध्यादि प्रयत्नवत्कृतं वृद्धिक्षतसंरोहणवत्वात् गृहवृद्ध्यादिवत् इति। मनोगतिलिङ्गकमनुमानमुपन्यस्यति—अभिमतेत्यादिना। विषयग्राहककरणसम्बन्धश्चक्षुरादिमनःसम्बन्धस्तन्निमित्तेनेत्यर्थः। पेलको जतुगोलकः। मनः प्रयत्नवत्प्रेर्यमभिमतविषयसम्बन्धनिमित्तक्रियाश्रयत्वाद्दारकहस्तगतपेलकवत् इत्यनुमानरीतिः। वाय्वादिप्रेरितस्यानभिमतेनापि सम्बन्धो भवतीति प्रयत्नवानात्मा सिध्यति। नयनविषयेति। इदमत्राभिप्रेतम्—कस्यचिदिष्टफलस्य रूपं दृष्ट्वा तत्सहचरितपूर्वानुभूतरस-
[illegible]रणात् तत्रेच्छा भवति ततः प्रयत्न आत्ममनःसंयोगापेक्षो [illegible]ानेन्द्रिये विकारम् जनयति, दन्तोदकसंप्लवानुमितस्स वि-
[illegible]र इन्द्रियचैतन्ये न स्यात् नियतचक्षूरसनाभ्यां रूपरसयोः [illegible]हचर्यप्रतीतौ रूपदर्शनेन रससमरणासम्भवात्, तथा-
तादृग्विकारादिन्द्रियव्यतिरिक्तः कोऽप्युभयदर्शी सिध्य-

च्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते। ते च न शरीरेन्द्रियगुणाः, कस्मात्? अहङ्कारेणैकवाक्यताभावात् प्रदेशवृत्तित्वादयावद्द्रव्यभावित्वाद् बाह्येन्द्रियाप्रत्यक्षत्वाच्च तथाऽहंशब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति।

तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः १४। (१)आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। धर्माधर्मावात्मान्तरगुणानामकारणत्ववचनात्। संस्कारः स्मृत्यु-

---

ति यो रूपं दृष्ट्वा रसं स्मरति, शरीरस्योपचयापचयाभ्यामन्यत्वेनान्यदाऽस्मरणप्रसङ्गान्नोभयदर्शितेति। प्रदेशेति। अत्रेदमनुमानम्—सुखादयो न शरीरेन्द्रियविषयगुणाः अव्याप्यवृत्तित्वात्, अयावद्द्रव्यभावित्वाच्च यन्नैवं तन्नैवं यथा रूपादय इति, तथा सुखादयो न शरीरेन्द्रियगुणा बाह्येन्द्रियाप्रत्यक्षत्वात् इति च व्यतिरेक्यनुमानम्। द्विविधाः शरीरेन्द्रियगुणाः केचिदप्रत्यक्षाः यथा गुरुत्वादि केचिद्बाह्येन्द्रियग्राह्या यथा रूपादि। सुखादयस्तु नैवम् अतो न तद्गुणाः परिशेषात्तैरात्माऽनुमीयत इति भावः। अहंशब्देनापीति। अनुमीयत इति सम्बन्धः। लोके वेदे च प्रयुज्यमानोऽहंशब्दो न तावन्निरभिधेयः किन्त्वात्मवाचक इत्यर्थः। ननु पृथिव्यादिवाचको भविष्यतीत्यत आह पृथिव्यादिशब्देति। अहंशब्दस्य पृथिव्यादिवाचकैः शब्दैः सह सामानाधिकरण्याभावान्न तद्वाचकतेत्यर्थः अन्यथा द्रव्यं पृथिवीतिवत् अहं पृथिवीत्यपि प्रयोगः स्यात्।

अत्र (१३९)सूत्रात्–(१५३)पर्यन्तं सूत्राणि द्रष्टव्यानि। ा-

(१)आत्मलिङ्गाधिकार इत्यनेन प्राणापानादि सूत्रं(१३९) लक्ष्या-ति। आत्मान्तरगुणानामकारणत्ववचनादिति (२२९)सूत्रम्। एतेन धर्माधर्मयोरात्मगुणत्वं कथितमन्यथा तयोः सुखादिसाधर्म्यकथने

त्पत्तौ कारणवचनात् । व्यवस्थावचनात् सङ्ख्या पृथक्त्वमप्यत एव । तथा चात्मेतिवचनात् परममहत्परिमाणम् । सन्निकर्षजत्वात् सुखादीनां संयोगः । तद्विनाशकत्वाद्विभाग इति ।

(१३) मनःप्रकरणम् ।

(१) मनस्त्वयोगान्मनः । सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनु-

---

नारम्भकत्वसमर्थनं न स्यात् । स्मृत्युत्पत्ताविति । आत्ममनसोः संयोगविशेषात्संस्काराच्च स्मृतिः (३४७)सूत्रम् । व्यवस्थेति । नानात्मानो व्यवस्थातः इत्यादि(१५५) (१५६)सूत्राभ्यामात्मनानात्वप्रतिपादनाद्बहुत्वसंख्याऽऽत्मनि सिद्धेत्यर्थः । अतएव–उक्तवचनादेव संख्यानुविधायित्वात्पृथक्त्वस्येत्यर्थः । तथाचात्मेति । विभवान्महानाकाशस्तथा चात्मेति (२७८)सूत्रादाकाशवदात्मनोऽपि विभुत्वात्परममहत्परिमाणम् सिद्धमित्यर्थः । सन्निकर्षजत्वादिति । सुखाद्यात्मगुणानां मनःसंयोगजत्वादात्मनि संयोगः व्यधिकरणस्यासमवायिकारणत्वाभावादिति भावः । तद्विनाशकत्वादिति । आत्ममनसोर्नित्यत्वेनाश्रयविनाशस्य तद्धेतुत्वासम्भवाद्विभागोऽप्यात्मन्यङ्गीकार्य इत्यर्थः ।

(१३) मनःप्रकरणम् ।

(१) प्रधानतया प्रथममात्मानमुक्त्वाऽनन्तरं मनोनिरूपणार्थमाह मनस्त्वयोगादिति । पूर्ववद्व्याख्यानम् । समानगुणकार्येषु घटादिषु घटत्वादिवत् तथाभूतेषु मनःस्वपि मनस्त्वजातिरित्यभिप्रायः । मनःसद्भावे प्रमाणं दर्शयति—सत्यप्यात्मेन्द्रियेति । आत्मनः सर्वैन्द्रियैर्युगपत्सम्बन्धे इन्द्रियाणाञ्चार्थसंनिकर्षे सत्यपि एकप्रतीतिकाले नान्यत्र सुखादय इति करणान्तरमनुमीयत इत्यर्थः । आत्मेन्द्रियार्थसंनिकर्षाः कार्योत्पत्तौ कार-

मीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनात् बाह्येन्द्रियै-रगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम् ।

तस्य गुणाः—संख्यापरिमाणपृथक्त्वसंयोगविभा-गपरत्वापरत्वसंस्काराः। (१)प्रयत्नज्ञानायौगपद्यवचनात् प्रतिशरीरमेकत्वं सिद्धम् । पृथक्त्वमप्यत एव । तद-भाववचनादणुपरिमाणम् । अपसर्पणोपसर्पणवचनात् संयोगविभागौ । मूर्तत्वात् परत्वापरत्वे संस्कारश्च ।

णान्तरसापेक्षाः सत्यपि सद्भावे कार्यानुत्पादकत्वात् तन्त्वादि-वत् इतिप्रयोगः । प्रमाणान्तरमाह–श्रोत्राद्यव्यापारे स्मृ-त्युत्पत्तिदर्शनादिति । स्मृतिरिन्द्रियजा ज्ञानत्वाद्गन्धादिज्ञानव-त् इतिप्रयोगः, न च श्रोत्रादीन्यत्र करणानि बधिरादीनां तदभा-वेऽपि स्मृतिदर्शनात् यदस्याः करणन्तन्मन इति । बाह्येन्द्रियै-रिति । सुखादिप्रतीतिरिन्द्रियजा अपरोक्षप्रतीतित्वाद्रूपादिप्रती-तिवत् इत्यत्रानुमानप्रयोगो द्रष्टव्यः ।

अत्र (१३६)सूत्रम् ।

(१)प्रयत्नेत्यादि । अनेन मनसि एकत्वसंख्यासूचिता । तथा च सूत्रम्—प्रयत्नायौगपद्याज् ज्ञानायौगपद्याच्चैकम्(१३८) । मनो-बहुत्वे ह्यात्ममनःसंयोगानां बहुत्वाद्युगपज्ज्ञानानि प्रयत्नाश्च भवे-युरिति भावः । अत एवेति । संख्यानुविधानादेव पृथक्त्वमपीति भावः । तदभाववचनादिति । तदभावादणु मनः(२७९) इति सूत्र-म् । नित्यद्रव्ये विभवाभावस्याणुपरिमाणत्वाव्यभिचारात् युग-पज्ज्ञानानुपपत्त्यैव च विभवाभाव इत्यभिप्रायः । अपसर्पणे-ति । अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगा-श्चादृष्टकारितानीति (२१५)सूत्रेण मनसः पूर्वदेहादपसर्पणं शरीरान्तरे चोपसर्पणं चादृष्टकारितमित्युक्तं ततश्चास्य संयो-गविभागौ सिद्धौ । मूर्तत्वादिति । विभुत्वाभावान्मूर्तत्वन्ते-

अस्पर्शवत्त्वाद्द्रव्यानारम्भकत्वम् । क्रियावत्त्वान्मूर्तत्वम् । साधारणविग्रहवत्त्वप्रसङ्गादज्ञत्वम् । करणभावात् परार्थम् । गुणवत्त्वाद्द्रव्यम् । प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति ॥

इतिप्रशस्तपादभाष्ये
द्रव्यपदार्थः ॥

न घटादिवत् परत्वापरत्ववेगाः सिद्धा इत्यर्थः । अस्पर्शवत्त्वादिति । अस्पर्शवत्त्वं च देहान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादात्मवदस्य सिद्ध्यति तस्मात्सजातीयद्रव्यानारम्भकत्वं चेत्यर्थः । साधारणेति । यदि मनो ज्ञं स्याच्छरीरमिदं साधारणमुपभोगस्थानं भवेत्, नचैवम् एकाभिप्रायेणैव तस्य प्रवृत्तिनिवृत्तिदर्शनात् । परार्थं-परोपभोगसाधनं चक्षुर्वदित्यर्थः । गुणवत्त्वादिति । पृथिव्यावदिति दृष्टान्तो योज्यः ॥

अत्र (६०२) (६९) (१३८)सूत्राणि ।

इति प्रशस्तपादभाष्यविवरणे
द्रव्यपदार्थः ।

अथ गुणपदार्थनिरूपणम् ।

(१)साधर्म्यप्रकरणम् ।

(१)रूपादीनां गुणानां सर्वेषा गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम् ॥

रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगा मूर्तगुणाः ॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशद्बा अ-मूर्तगुणाः ॥

संख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणाः ॥

अथ गुणपदार्थः ।

(१)साधर्म्यप्रकरणम् ।

(१) साधर्म्यवैधर्म्याभ्यां द्रव्यं निरूप्य सम्प्रति ताभ्यां गुणान्निरूपयति रूपादीनामिति । सर्वेषामित्यनेन साधर्म्यं गुणानामित्यनेन चेतरवैधर्म्यं सूचितम् । अप्रधानवाचकगुणशब्दस्य न गुणत्वसम्बन्ध इति रूपादीनामिति गुणविशेषणम् । इदमेव च गुणानां लक्षणं,–गुण इतरेभ्यो भिन्नः, गुण इति व्यवहर्तव्यो वा गुणत्वाभिसम्बन्धात यन्नैवं तन्नैवं यथाद्रव्यमिति तत्प्रयोजनात् । द्रव्याश्रितत्वमिति । इदं च धर्ममात्रवर्णनं न वैधर्म्यं कर्मादावतिव्याप्तेः । निर्गुणत्वमिति । इद मपि तथा । एकं रूपमणुः शब्दः इति[illegible] तिस्त्वौपचारिकी, संख्यादि न रूपाद्याश्रयं गुणत्वाद्रूपवदिति ।

अत्र (३१७) (२२०) (२७०) (२७१) (२७२) (१६) (२८४) (२[illegible] (२८६) (२९२) (२९३) (२९५) (२९६) (२९७) (३०४) (३०६)सूत्र द्रष्टव्याणि ।

संयोगविभागाद्वित्वद्वि(१)पृथक्त्वादयोऽनेकाश्रिताः॥

(२)शेषास्त्वेकैकद्रव्यवृत्तयः ॥

रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुः-खेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा (३)वैशेषिकगुणाः॥

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगाः (४)सामान्यगुणाः ॥

शब्दस्पर्शरूपरसगन्धा बाह्यैकेन्द्रियग्राह्याः ॥

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगा द्वीन्द्रियग्राह्याः ॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरणग्राह्याः॥

गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः ॥

---

(१)द्विपृथक्त्वादय इति । त्रित्वत्रिपृथक्त्वादिरादिपदग्राह्यः । अत्र (२५)सूत्रम् ।

(२)शेषा इति । रूपरसगन्धस्पर्शैकत्वैकपृथक्त्वपरिमाणपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारबुद्ध्यादिशब्दान्ता इत्यर्थः ।

(३)वैशेषिकगुणा इति । विशेष एव वैशेषिकं तस्य गुणाः स्वाश्रयव्यवच्छेदोचितावान्तरसामान्यविशेषवन्त इत्यर्थः । रूपादयो भास्वरत्वादिना स्वाश्रयं व्यवच्छिन्दन्तीति भावः । नैमित्तिकद्रवत्वेऽतिव्याप्तिवारणाय सांसिद्धिकपदम् ।

(४)सामान्यगुणा इति । स्वाश्रयसाधर्म्यगुणा न स्वाश्रयविशेषत्वा इत्यर्थः । सांसिद्धिकेऽप्रसक्तिवारणाय नैमित्तिकपदम् ।

यःशब्देति । अत्र (३२५) (३२६) (१००)सूत्राणि ।

प' द्वीन्द्रियेति । अत्र (१६७)सूत्रम् ।

अन्तःकरणग्राह्या इत्यत्र (१६६)सूत्रं द्रष्टव्यम् ।

(१)अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथ-क्त्वगुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः ॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा (२)अकारणगुणपूर्वकाः ॥

(३)बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाश-ब्दतूलपरिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वापा-कजाः संयोगजाः ॥

संयोगविभागवेगाः (४)कर्मजाः ॥

शब्दोत्तरविभागौ (५)विभागजौ ॥

---

(१)अपाकजेति । अस्य द्रव्यत्वमित्यत्राप्यन्वयः । कारणेति । स्वाश्रयसमवायिकारणगुणपूर्वका इत्यर्थः पटादौ तन्त्वादिरूपद-र्शनात् । इदं स्वरूपकथनमात्रमकारणगुणपूर्वकनैमित्तिकद्रवत्ववे-गयोरकारणगुणपूर्वकत्वदर्शनात् ।

अत्र (२६२)सूत्रम् ।

(२)अकारणेति । नित्यगुणत्वादित्यर्थः ।

(३)बुद्धिसुखेति।बुद्ध्याद्यात्मगुणा आत्ममनःसंयोगजा शब्दो भेर्या-काशसंयोगजस्तूलपरिमाणं प्रचयाख्यसंयोगजमुत्तरसंयोगस्संयोग-जस्संयोगो नैमित्तिकं द्रवत्वं वह्निसंयोगजं परत्वापरत्वे दिक्कालपिण्ड-संयोगजे पार्थिवपरमाणुरूपरसगन्धस्पर्शा वह्निसंयोगजा इति भावः ।

अत्र (१३४) (११०) (२९०) (३०२) (२१३) सूत्राणि ।

(४)कर्मजा इति । अत्र संयोगविभागावाद्यौ, वेगश्चावेगवद्द्र-व्यारब्धवृत्तिर्ग्राह्यः ।

अत्र (३०) (२०) (२९०) (२९१) (१९७)सूत्राणि ।

(५)विभागजाविति । अत्र शब्द आद्यो ग्राह्यः द्वितीयस्य श-ब्दजन्यत्वात् ।

अत्र (२९१) (११०)सूत्रे ।

परत्वापरत्वद्वित्वद्विपृथक्त्वादयो (१)बुद्ध्यपेक्षाः ॥

रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाः (२)समानजात्यारम्भकाः ॥

सुखदुःखेच्छाद्वेषप्रयत्नाश्चा(३)समानजात्यारम्भकाः॥

संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराः (४)समानासमानजात्यारम्भकाः ॥

बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः (५)स्वाश्रयसमवेतारम्भकाः ॥

---

(१)बुद्ध्यपेक्षा इति। अपेक्षाबुद्धिजन्या इत्यर्थः।पूर्ववदादिपदार्थः।
अत्र ३०२सूत्रम्।

(२)समानजात्यारम्भका इति । अत्रारम्भकत्वं कारणत्वमात्रं विवक्षितं न त्वसमवायिकारणत्वमन्यथा विजातीयपाकजानां निमित्तकारणस्योष्णस्पर्शस्य व्यवच्छेदोऽसङ्गतः स्यादिति। ननु तर्हि कथं रूपादीनां ज्ञानकारणता? तद्व्यतिरेकेणात्र साधर्म्यस्य विवक्षितत्वात्।

अत्र २६२ ११० २८सूत्राणि।

(३)असमानेति।सुखमिच्छां जनयति दुःखं द्वेषन्तौ प्रयत्नं स च क्रियामिति विजातीयारम्भकत्वमेषामित्यर्थः। पुत्रसुखात्पितुः कथं सजातीयं सुखमिति तु न चोद्यम्।तत्र लैङ्गिकतत्प्रतीतेरेव हेतुत्वात्।

(४)समानासमानेति।संयोगाद्द्रव्यादि विभागाच्छब्दः संख्यया [परिमा]णं गुरुत्वात् पतनं द्रवत्वात्स्यन्दनं स्नेहात् सङ्ग्रह उष्णस्पर्शत्वात्पाकजाः ज्ञानादिच्छा धर्मात्सुखं अधर्माद्दुःखं संस्कारात्क्रियास्मृती इति विजातीयवर्गः। सजातीयस्तु प्रसिद्ध एव।

अत्र ११० २९० २९१ २७ २९सूत्राणि।

(५)स्वाश्रयेति। अत्र ११० ३४७ २५० २५४सूत्राणि।

रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः (१)परत्रारम्भकाः॥

संयोगविभागसंख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तू(२)भयत्रारम्भकाः ॥

(३)गुरुत्वद्रवत्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः ॥

रूपरसगन्धा(४)नुष्णस्पर्शसंख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायिकारणत्वम् ॥

---

(१)परत्रेति। अत्र २४२सूत्रम्।

(२)उभयत्रेति। स्वाश्रयेऽन्यत्र चेत्यर्थः। तन्तुसंयोगस्तेषु पटं, विषयेन्द्रियसंयोगश्चात्मनि ज्ञानं, वंशदलाकाशविभागः स्वाश्रये आकाशे शब्दं वंशदलद्वयविभागश्चाकाशे शब्दम्, अवयवसंख्याऽवयविन्येकत्वं स्वाश्रये च द्वित्वादिसंख्याम्, अवयवैकपृथक्त्वमवयविन्येकपृथक्त्वं स्वाश्रये द्विपृथक्त्वादिकं, कारणगतगुरुत्वद्रवत्ववेगाः कार्ये तान् स्वाश्रयेषु क्रियां, धर्माधर्मावात्मनि सुखदुःखेऽन्यत्राग्न्यादौ ज्वलनादिक्रियां यथास्वं जनयन्तीत्यर्थः।

(३) गुरुत्वेत्यादि। गुरुत्वात्पतनं द्रवत्वात्स्यन्दनं वेगादिषाद्युत्तरकर्माणि प्रयत्नाच्छरीरादिक्रिया धर्माधर्माभ्यामग्न्यादिक्रिया संयोगविशेषान्नोदनाभिघातरूपादिष्वादिक्रिया भवतीति भावः। वेगपदं स्थितिस्थापकस्याप्युपलक्षकम्।

अत्र १९८ १८७ १९७ १८९ १९० १८१ १८२ १८५ १८६ १९४ १९५तथा१९९ सूत्रात् २०५ सूत्रान्तं,२११ २१५ सूत्राणि च द्रष्टव्यानि।

(४)अनुष्णेति। उष्णस्पर्शस्य पाकजोत्पत्तौ निमित्तत्वात्तद्व्यानुष्णेति स्पर्शविशेषणम्। अत्र रूपरसगन्धानुष्णस्पर्शपरि[illegible] स्नेहानां समवाय्येकार्थसमवायात्, शब्दस्य समवायिकारणस[illegible] वायात्, संख्यापृथक्त्वयोश्च उभयथापि असमवायिकारण[illegible] बोध्यम्। अत्र १९ २२२ ३६५ सूत्राणि।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाना (१)निमित्तकारणत्वम् ॥

संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा(२) कारणत्वम् ॥

परत्वापरत्वाद्वित्वद्विपृथक्त्वादीनामकारणत्वम् ॥

संयोगविभागशब्दात्मविशेषगुणाना (३)प्रदेशवृत्तित्वम् ॥

(४)शेषाणामाश्रयव्यापित्वम् ॥

अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वसांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम् ॥

---

(१) निमित्तेति । निमित्तकारणत्वमेवैतेषां नासमवायित्वमित्यग्रे वक्ष्यते । अत्र १९सूत्रम् ।

(२)उभयथेति । असमवायिकारणत्वं निमित्तकारणत्वञ्चेत्यर्थः । यथा भेरीदण्डसंयोगः शब्दे निमित्तं भेर्याकाशसंयोगेऽसमवायी, वंशदलविभागः शब्दे निमित्तं वंशदलाकाशविभागेऽसमवायी च, उष्णस्पर्शः पाकजे निमित्तं उष्णस्पर्शेऽसमवायी, गुरुत्वमभिघातनादिक्रियायां निमित्तं पतनगुरुत्वयोरसमवायि च, द्रवत्वं सङ्ग्रहे निमित्तं द्रव्यत्वस्पन्दनयोरसमवायि, वेगो वेगगमनयोरसमवायी अभिघाते च निमित्तमित्यर्थः । अत्र १९ सूत्रम् ।

[३]प्रदेशवृत्तित्वमिति । अव्याप्यवृत्तित्वमित्यर्थः ।

[४]शेषाणामिति । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकपरत्वापरत्वानामित्यर्थः । आश्रयव्यापित्वं व्याप्यवृत्तित्वमिति यावत् । यावद्द्रव्यभावित्वमिति । आश्रयनाशादेवैषां विनाशो नान्यथेत्यर्थः । पाकजरूपादयस्सत्येवाश्रये नश्यन्तीत्यपाकजपदम् ।

शेषाणामयावद्द्रव्यभावित्वं चेति ॥

(१)रूपादीनां सर्वेषां गुणानां प्रत्येकमपरसामान्यसम्बन्धाद्रूपादिसञ्ज्ञा भवन्ति ॥

(२) रूपप्रकरणम् ।

(२)तत्र रूपं चक्षुर्ग्राह्यम् । पृथिव्युदकज्वलनवृत्ति द्रव्याद्युपलम्भकं नयनसहकारि शुक्लाद्यनेकप्रकारं सलिलादिपरमाणुषु नित्यं पार्थिवपरमाणुष्वग्निसंयोगविरोधि सर्वकार्यद्रव्येषु कारणगुणपूर्वकमाश्रयविनाशादेव विनश्यतीति ॥

---

[१]सम्प्रति गुणानां परस्परवैधर्म्यप्रतिपादनायाह रूपादीनामिति। रूपादिगुणानामेकैकं प्रत्यपरजातेः रूपत्वादिकायाः सम्बन्धाद्रूपादिसंज्ञा–रूपमिति रस इति संज्ञा भवन्ति । रूपत्वाद्यपरसामान्यनिमित्ता रूपादिसंज्ञा रूपादीनां प्रत्येकं वैधर्म्यमित्यर्थः । नीलपीतादिभेदेषु रूपं रूपमिति प्रत्ययानुवृत्त्या रूपत्वसामान्यसिद्धिरित्यन्यत्र विस्तरः ।

(२)रूपप्रकरणम् ।

[२]सर्वपदार्थाभिव्यक्तिनिमित्तं रूपमादौ निरूपयति तत्र रूपमिति। तत्र गुणेषु मध्ये। गुणत्वे सति चक्षुर्मात्रग्राह्यत्वं रूपस्य लक्षणमित्यर्थः। रूपत्वादिवारणाय विशेषणम्। संख्यादिनिरासाय मात्रपदम्। आश्रयमाह पृथिवीति। अर्थक्रियाश्चाह द्रव्यादीति। यस्मिन्नाश्रये वर्तते तस्य द्रव्यस्य तद्गतगुणकर्मसामान्यानाञ्चोपलम्भकमित्यर्थः। गुणाश्चात्र संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगा ग्राह्याः। करणोपकारित्वमाह नयनेति। सलिलादीति। आदिपदेन तेजःपरमाणुपरिग्रहः। अग्निसंयोगेति अग्निसंयोगः पार्थिवपरमाणुरूपस्योत्पादको विनाशकश्चेति द्रष्ट

(३) रसप्रकरणम् ।

रसो रसनग्राह्यः । पृथिव्युदकवृत्तिः जीवनपुष्टि(१)-बलारोग्यनिमित्तम् रसनसहकारी मधुराम्ललवणतिक्त-कटुकषायभेदभिन्नः । अस्यापि नित्यानित्यत्वनिष्पत्तयो रूपवत् ॥

(४) गन्धप्रकरणम् ।

गन्धो घ्राणग्राह्यः । पृथिवीवृत्तिः घ्राणसहकारी सुरभिरसुरभिश्च । अस्यापि पूर्ववदुत्पत्त्यादयो(२) व्याख्याताः ॥

(५) स्पर्शप्रकरणम् ।

स्पर्शस्त्वगिन्द्रियग्राह्यः । क्षित्युदकज्वलनपव-

व्यम् । आश्रयविनाशादेवेति । न तु पिठरपाकवादिनामिवाग्निसंयोगादपीत्येवकारार्थः । अत्र ३२६ १६४ ४९ ५० ५१ १६२ २५९ २६० २५८ २६१ २६२२६३ सूत्राणि ।

(३)रसप्रकरणम् ।

[१]पुष्टिरिति । शरीरावयवोपचय इत्यर्थः । रसनसहकारीति । रससमवेतरासनप्रत्यक्षे सहकारिकारणमिति भावः । रूपवदिति । रसोपि पार्थिवपरमाणुषु अग्निसंयोगादुत्पत्तिविनाशवान् जलपरमाणुषु नित्यः,कार्ये कारणगुणपूर्वक,आश्रयनाशान्नश्यति चेत्यर्थः । अत्र १६५ ३२६ ४९ ५० तथा २५८ सूत्रात् २६३ सूत्रान्तं द्रष्टव्यम् ।

(४)गन्धप्रकरणम् ।

[२]उत्पत्यादय इति । गन्धस्य नित्यत्वाभावात्तद्विहायोत्पत्त्यादय इत्युक्तम् । पूर्ववदिति । रसवदित्यर्थः । अन्यत्सुगमम् । अत्र १६५ ३२५ ४९ ८१ तथा २५८ सूत्रात् २६३ सूत्रान्तं च द्रष्टव्यम ।

(५)स्पर्शप्रकरणम् ।

नवृत्तिः त्वक्सहकारी (१)रूपानुविधायी शीतोष्णानुष्णाशीतभेदात् त्रिविधः। अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत् ॥

(६) पाकजप्रकरणम् ।

(२)पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानम्। घटादेरामद्रव्यस्याग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते तेभ्यो विभागाः विभागेभ्यः संयोगविनाशाः संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति। तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षा(३)च्छ्यामादीनां विनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते। तदन-

---

[१]रूपानुविधायीति। रूपव्यापक इत्यर्थः रूपवति नियमेन स्पर्शसद्भावात्। पूर्ववदिति। रसवदित्यर्थः गन्धे नित्यत्वाभावात्। अत्र१६५ ३२६ ४९ ५० ५१ ५२तथा२५८सूत्रात्२६३सूत्रान्तं च द्रष्टव्यम्।

(६)पाकजप्रकरणम्।

[२]पार्थिवपरमाणुरूपादीनामुत्पत्तिविनाशौ दर्शयन् पाकजप्रक्रियान्तेषामाह पार्थिवेति। पृथिव्याः कार्यरूपायाः इमे कारणं परमाणवः पार्थिवपरमाणवः तेषां पाकजोत्पत्तिविधिः कथ्यत इति शेषः। पीलुपाकवादेन तद्दर्शयति घटादेरित्यादिना रूपाद्युत्पत्तिरित्यन्तेन। शरावादिरादिपदार्थः। अभिघातान्नोदनाद्वेति। तदाख्यसंयोगविशेषादित्यर्थः। घटादिसंयुक्तोदकपरमाणुनिवृत्त्यर्थन्तदारम्भकेषु इति। घटाद्यारम्भकेष्वित्यर्थः। कार्यद्रव्यं द्व्यणुकरूपमित्यर्थः।

अत्र १९९ २९० ३२८ दृष्टान्तभाष्यतासूत्राणि।

[३]श्यामादीनामिति। रसगंधस्पर्शा आदिपदेन ग्राह्याः। पाकजा इति। रूपादय इति शेषः। अत्र परमाणुषु पाकजोत्पत्तौ पूर्वरूपवि-

न्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगात् द्व्यणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते। तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः। न च कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति सर्वावयवेष्वन्तर्बहिश्च वर्तमानस्याग्निना व्याप्त्यभावाद् अणुप्रवेशादपि च व्याप्तिर्न सम्भवति कार्यद्रव्यविनाशादिति॥

नाशे रूपान्तरोत्पत्तिः अवयविनाशे च पूर्वरूपनाशः प्रमाणम्। विनाशोत्पत्तिकारणौ वह्निसंयोगौ च भिन्नौ तन्तुरूपादिविनाशोत्पादयोर्भिन्नकारणवतोः प्रत्यक्षदर्शनात् इत्यादिकं विस्तरेण कन्दल्यादौ द्रष्टव्यम्। द्व्यणुकादिप्रक्रमेणेति। द्वाभ्यां परमाणुभ्यां द्व्यणुकं त्रिभिस्तैस्त्र्यणुकमित्यादि क्रमेणेत्यर्थः। एतदाशयेनैव मुक्तावल्यादौ क्षणप्रक्रिया विश्वनाथादिभिः प्रदर्शिता तत्रैव द्रष्टव्या। पिठरपाकवादिमतेनाशंक्य समाधत्ते न चेति। वर्तमानस्य द्रव्यस्येति शेषः। प्राप्त्यभावादिति। तथा च बहिःस्थिताग्निना सर्वावयवसम्बद्धावयविव्यापकस्य संयोगस्याभावात् कार्यरूपाद्युत्पत्तिविनाशयोरकलसरन्तर्वर्तिनामपाकजत्वप्रसङ्गादिति भावः। ननु घटाद्यवयविनां सच्छिद्रतया तत्र तेजोवयवानां सूक्ष्माणां प्रवेशेन प्राप्तिसंभवात्कथं कार्यद्रव्ये न रूपाद्युत्पाद इति आशंक्याह अणिवति। इदमत्र तात्पर्यम्। निरन्तरेषु घटाद्यवयविषु तदवयवविभागं विना तेजःपरमाणूनामपि प्रवेशो न संभवतीति व्यतिभिद्यमानेषु अवयवेषु क्रियाविभागादिक्रमेण द्रव्यारंभकसंयोगविनाशादवश्यं द्रव्यविनाशो वाच्य इति कुतस्तस्याणुप्रवेशशङ्केति।

अत्र २६२ १९९ २९० २६२ २६३ १५९ सूत्राणि।

(७) संख्याप्रकरणम् ।

(१) एकादिव्यवहारहेतुः संख्या । सा पुनरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः ।

अनेकद्रव्या तु द्वित्वादिका परार्धान्ता । तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद् विनाश इति । कथम् ? यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्संयुक्तसमवेतसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्सम्बन्धज्ञानेभ्य एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते तदा तामपेक्ष्यैकत्वाभ्यां

---

(७) संख्याप्रकरणम् ।

(१) उद्देशक्रमप्राप्तां संख्यामाह एकेति । एकं द्वे त्रीणीति व्यवहारो विशेषणकृतः विशिष्टव्यवहारत्वात् दण्डीति व्यवहारवत् इत्यनुमानेन तादृशव्यवहारविशेषणतया संख्यासिद्धिरित्यर्थः । गणितव्यवहारासाधारणकारणत्वं संख्यात्वमिति भावः । अत्र (२८२) सूत्रम् । न चायं रूपादिविषयः तद्विलक्षणत्वात् । नापि निर्विषयः व्याघातादित्यादिकमधिकं किरणावल्यादौ द्रष्टव्यम् । निष्पत्तिरिति । उत्पत्तिरित्यर्थः न तु एकैकगुणसमुच्चयमात्रं द्वित्वादीति भावः तत्संयुक्तेति । चक्षुः संयुक्तेत्यर्थः । संयुक्तयोः समानजातीययोर्घटयोरसमानजातीययोर्घटपटयोर्वा प्रत्येकं समवेतं यदेकत्वं गुणस्तत्समवेतं यदेकत्वसामान्यमेकत्वनिष्ठमेकत्वत्वरूपमपरसामान्यं तस्य विशेषणस्य ज्ञानोत्पत्तौ जातायामित्यर्थः विशेष्यज्ञाने विशेषणज्ञानस्य हेतुत्वात् । बुद्धिरिति । एकत्वत्वसामान्यविशिष्टैकत्वगुणस-

स्वाश्रययोर्द्वित्वमारभ्यते ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते तस्माद् द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता द्वित्वसामान्यतत्सम्बन्धतज्ज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः। तत इदानीमपेक्षाबुद्धिविनाशाद्द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणं द्वित्वगुणतज्ज्ञानसम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः। तदनन्तरं द्वे द्रव्ये इति द्रव्य-

---

मूहालम्बनरूपा एका बुद्धिरिति भावः इयमेवापेक्षाबुद्धिः। तामिति। बुद्धिमित्यर्थः। द्वित्वमारभ्यते इति। तस्या द्वित्वोत्पादकत्वं चापेक्षाबुद्धिर्द्वित्वोत्पादिका व्यञ्जकत्वानुपपत्तौ तेनानुविधीयमानत्वाच्छब्दं प्रति संयोगविभागवदित्यनुमानेन द्रष्टव्यम्। अत्र स्वाश्रयौ समवायिहेतू एकत्वगुणावसमवायिनौ अनेकविषया बुद्धिश्च निमित्तमिति बोध्यम्। द्वित्वसामान्यज्ञानमिति। द्वित्वत्वसामान्यविषयकं विशेषणज्ञानमित्यर्थः। विनश्यत्तेति। विनाशहेतुसांनिध्यमित्यर्थः। एवमुत्पद्यमानतोत्पत्तिकारणसामीप्यं बोध्यम्। इत्येकः काल इति। द्वित्वसामान्यज्ञानमपेक्षाबुद्धिविनाशकं गुणबुद्ध्युत्पादकञ्चेति उत्पादकविनाशयोरैक्यादेकः कालः इति भावः। तत इदानीमिति। मुक्तिदशायामन्त्यतत्त्वज्ञाननाशस्य शरीरविनाशहेतुकस्य सर्वसिद्धस्य दृष्टत्वान्निमित्तकारणादपि गुणनाशोऽभ्युपगन्तव्य इति अपेक्षाबुद्धिविनाशस्य द्वित्वनाशहेतुतोक्ता, एवं बुद्धेर्बुद्ध्यन्तराविरोधात्। द्वित्वगुणज्ञानं तत्सामान्यबुद्धिविनाशकत्वेनोक्तम् तयोश्च यौगपद्यात्तयोर्विनश्यत्तायौगपद्यमिति भावः। द्वित्वगुणतज्ज्ञानसम्बन्धेभ्य इति। उक्तद्वित्वगुणज्ञानं द्रव्यज्ञानस्यापि हेतुरिति गुणबुद्ध्युत्पाद एवैकस्योत्पद्यमानताऽपरस्य विनश्यत्तेत्यत्यत्रैवेत्येकः काल इति भावः। तदनन्तरमिति। द्वे द्रव्ये इति ज्ञानोत्पत्तौ पूर्वोक्तद्वित्वगुणतज्ज्ञानस-

(७) संख्याप्रकरणम् ।

(१) एकादिव्यवहारहेतुः संख्या । सा पुनरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः ।

अनेकद्रव्या तु द्वित्वादिका परार्धान्ता । तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद् विनाश इति । कथम् ? यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्संयुक्तसमवेतसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्सम्बन्धज्ञानेभ्य एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते तदा तामपेक्ष्यैकत्वाभ्यां

---

(७) संख्याप्रकरणम् ।

(१) उद्देशक्रमप्राप्तां संख्यामाह एकेति । एकं द्वे त्रीणीति व्यवहारो विशेषणकृतः विशिष्टव्यवहारत्वात् दण्डीति व्यवहारवत् इत्यनुमानेन तादृशव्यवहारविशेषणतया संख्यासिद्धिरित्यर्थः । गणितव्यवहारासाधारणकारणत्वं संख्यात्वमिति भावः । अत्र (२८२) सूत्रम् । न चायं रूपादिविषयः तद्विलक्षणत्वात् । नापि निर्विषयः व्याघातादित्यादिकमधिकं किरणावल्यादौ द्रष्टव्यम् । निष्पत्तिरिति । उत्पत्तिरित्यर्थः न तु एकैकगुणसमुच्चयमात्रं द्वित्वादीति भावः । तत्संयुक्तेति । चक्षुः संयुक्तेत्यर्थः । संयुक्तयोः समानजातीययोर्घटयोरसमानजातीययोर्घटपटयोर्वा प्रत्येकं समवेतं यदेकत्वं गुणस्तत्समवेतं यदेकत्वसामान्यमेकत्वनिष्ठमेकत्वत्वरूपमपरसामान्यं तस्य विशेषणस्य ज्ञानोत्पत्तौ जातायामित्यर्थः विशेष्यज्ञाने विशेषणज्ञानस्य हेतुत्वात् । बुद्धिरिति । एकत्वत्वसामान्यविशिष्टैकत्वगुणस-

स्वाश्रययोर्द्वित्वमारभ्यते ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते तस्माद् द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता द्वित्वसामान्यतत्सम्बन्धतज्ज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः। तत इदानीमपेक्षाबुद्धिविनाशाद्द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणं द्वित्वगुणतज्ज्ञानसम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः। तदनन्तरं द्वे द्रव्ये इति द्रव्य-

---

मूहालम्बनरूपा एका बुद्धिरिति भावः इयमेवापेक्षाबुद्धिः। तामिति। बुद्धिमित्यर्थः। द्वित्वमारभ्यते इति। तस्या द्वित्वोत्पादकत्वं चापेक्षाबुद्धिर्द्वित्वोत्पादिका व्यञ्जकत्वानुपपत्तौ तेनानुविधीयमानत्वाच्छब्दं प्रति संयोगविभागवदित्यनुमानेन द्रष्टव्यम्। अत्र स्वाश्रयौ समवायिहेतू एकत्वगुणावसमवायिनौ अनेकविषया बुद्धिश्च निमित्तमिति बोध्यम्। द्वित्वसामान्यज्ञानमिति। द्वित्वत्वसामान्यविषयकं विशेषणज्ञानमित्यर्थः। विनश्यत्तेति। विनाशहेतुसांनिध्यमित्यर्थः। एवमुत्पद्यमानतोत्पत्तिकारणसामीप्यं बोध्यम्। इत्येकः काल इति। द्वित्वसामान्यज्ञानमपेक्षाबुद्धिविनाशकं गुणबुद्ध्युत्पादकश्चेति उत्पादकविनाशयोरैक्यादेकः कालः इति भावः। तत इदानीमिति। मुक्तिदशायामन्त्यतत्त्वज्ञाननाशस्य शरीरविनाशहेतुकस्य सर्वसिद्धस्य दृष्टत्वान्निमित्तकारणादपि गुणनाशोऽभ्युपगन्तव्य इति अपेक्षाबुद्धिविनाशस्य द्वित्वनाशहेतुतोक्ता, एवं बुद्धेर्बुद्ध्यन्तराविरोधात्। द्वित्वगुणज्ञानन्तत्सामान्यबुद्धिविनाशकत्वेनोक्तम् तयोश्च यौगपद्यात्तयोर्विनश्यत्तायौगपद्यमिति भावः। द्वित्वगुणतज्ज्ञानसम्बन्धेभ्य इति। उक्तद्वित्वगुणज्ञानं द्रव्यज्ञानस्यापि हेतुरिति गुणबुद्ध्युत्पाद एवैकस्योत्पद्यमानताऽपरस्य विनश्यत्तेत्यप्यत्रैवेत्येकः काल इति भावः। तदनन्तरमिति। द्वे द्रव्ये इति ज्ञानोत्पत्तौ पूर्वोक्तद्वित्वगुणतज्ज्ञानस-

ज्ञानस्योत्पादः द्वित्वस्य विनाशः द्वित्वगुणबुद्धेर्विनश्यत्ता, द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः तदनन्तरं द्रव्यज्ञानाद् द्वित्वगुणबुद्धेर्विनाशो द्रव्यबुद्धेरपि संस्कारात् ।

(१)एतेन त्रित्वाद्युत्पत्तिरपि व्याख्याता। एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाच्च

म्बन्धेभ्यो द्वित्वस्य नाशो, गुणबुद्धेर्विनश्यत्ता द्रव्यज्ञानात्संस्कारस्योत्पद्यमानता चेत्येकः कालः। तत्र च द्रव्यबुद्धिरेव संस्कारस्योत्पादिका गुणबुद्धिविनाशिका चेति तयोरुत्पद्यमानता विनश्यत्ता च बोध्या। ततः किमत आह तदनन्तरं द्रव्यज्ञानाद्द्वित्वगुणबुद्धेर्विनाश इति । संस्कारस्योत्पाद इत्यपि द्रष्टव्यम् ।

[१]एतेनेति।अपिना विनाशोऽपीत्यर्थः। त्रित्वाद्युत्पत्तिविनाशप्रकारमाह एकत्वेभ्य इत्यादि विनाश इत्यन्तम्। अक्षरार्थः पूर्ववत्। अत्रायं प्रक्रियाप्रकारसङ्क्षेपः—पूर्वमिन्द्रियसंनिकर्षस्तस्मादेकत्वसामान्यबुद्धिस्ततोऽपेक्षाबुद्धिस्ततो द्वित्वं तस्माद्द्वित्वसामान्यज्ञानं तस्माद्द्वित्वगुणज्ञानं ततो द्रव्यज्ञानं ततः संस्कार इत्युत्पादक्रमः। विनाशक्रमस्तु—अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालं विनाशः, अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमकालं, द्वित्वसामान्यज्ञानस्य द्वित्वगुणज्ञानात्, द्वित्वस्यापेक्षाबुद्धिविनाशात् द्रव्यबुद्धिसमकालं, गुणबुद्धेर्द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं, द्रव्यबुद्धेस्तदनन्तरं संस्कारादिति। प्रमाणन्तु संस्कारे—द्वित्वविशिष्टद्रव्यस्मरणं, गुणज्ञाने द्रव्यबुद्धिः, सामान्यज्ञाने गुणबुद्धिरित्याद्यूहनीयम्। एतेन शतसंख्याद्युत्पत्तिर्दर्शिता तथाहि एकैकगुणेषु प्रत्येकमनुभूतेषु क्रमिकसंस्काराणामन्त्यगुणानुभवोत्तरं शतव्यवहारप्रवर्तकादृष्टविशेषाद्युगपदभिव्यक्तावनेकविषयैकस्मरणोत्पादे सत्यनुभवस्मरणरूपाभ्यामपेक्षाबुद्धिभ्यां स्वाश्रयेषु शतसंख्योत्पद्यते सर्वद्रव्यसंस्कारसाचिव्यायास्तस्या

विनाश इति । क्वचिच्चाश्रयविनाशादिति । कथम् ? यदैकत्वाधारावयवे कर्मोत्पद्यते तदैवैकत्वसामान्यज्ञानमुत्पद्यते कर्मणा चावयवान्तराद्विभागः क्रियते अपेक्षाबुद्धेश्चोत्पत्तिः । ततो यस्मिन्नेव काले विभागात् संयोगविनाशस्तस्मिन्नेव काले द्वित्वमुत्पद्यते संयोगविनाशाद् द्रव्यविनाशः सामान्यबुद्धेश्चोत्पत्तिः । ततो यस्मिन्नेव काले सामान्यज्ञानादपेक्षाबुद्धेर्विनाशः तस्मिन्नेव काले आश्रयविनाशाद् द्वित्वविनाश इति शोभनमेतद्विधानम् बध्यघातकपक्षे, सहानवस्थानलक्षणे तु विरोधे द्रव्यज्ञानानुत्पत्तिप्रस-

---

अन्त्यद्रव्यसंयुक्तेन्द्रियजज्ञानविषयत्वात् प्रत्यक्षतेति । नियतविनाशहेतुमभिधाय साधारणमाह क्वचिदिति । प्रश्नपूर्वकं नाशप्रक्रियामाह कथं यदैकत्वेति । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियासमकालमेकत्वसामान्यज्ञानचिन्तायामियमत्र प्रक्रिया-पूर्वमवयवकर्मसामान्यज्ञाने ततो विभागापेक्षाबुद्धी १ ततः संयोगनाशद्वित्वोत्पत्ती द्रव्यनाशद्वित्वसामान्यज्ञाने २ ताभ्यां द्वित्वनाशापेक्षाबुद्धिनाशाविति यथाक्रममवसेयम् । उपलक्षणमेतत् कर्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामित्यपि द्रष्टव्यम् । नन्वत्रोत्तरोत्तरज्ञानस्य पूर्वपूर्वज्ञाननाशकत्वं पाकजपूर्वापररूपादीनामिव सहानवस्थानलक्षणविरोधपक्षेऽग्निसंयोगपाकजादीनामिव वध्यघातकपक्षे वेति शङ्कायामाह शोभनमेतद्विधानं वध्यघातकपक्ष इति । एतद्विधानमेष द्वित्वप्रकारः । द्वितीयं ज्ञानमुत्पद्य क्षणान्तरे पूर्वं विज्ञानं नाशयतीति वध्यघातकपक्षे शोभनं युक्तमित्यर्थः । सहानवस्थानलक्षणे तु विरोधे—एकस्य ज्ञानस्योत्पत्तिरपरस्य नाश इति पक्षे द्वे द्रव्ये इति ज्ञानं न स्यादित्यभिप्रायः । तदेव प्रश्नपूर्वकं व्युत्पाद-

ङ्गः । कथम् ? गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद् द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति द्रव्यज्ञानस्यानुत्पत्तिप्रसङ्ग इति ।

लैङ्गिकवज्ज्ञानमात्रादिति(१)चेत्स्यान्मतम्—यथाऽभूतं भूतस्येत्यत्र लिङ्गाभावेऽपि ज्ञानमात्रादनुमानम् तथा गुणविनाशेऽपि गुणबुद्धिमात्रात् द्रव्यप्रत्ययः स्यादिति । न । विशेष्यज्ञानत्वात् । न हि विशेष्यज्ञानं सारूप्याद्विशेषणसम्बन्धमन्तरेण भवितुमर्हति । तथा चाह सूत्रकारः—"समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते" [अ०८ आ०१ सू०९]

यति कथमिति । तथा च द्वित्वकाल एवापेक्षाबुद्धिविनाशात्, गुणबुद्धिकाले चापेक्षाबुद्ध्यभावेन द्वित्वनाशात् कथं द्वे द्रव्ये इति बुद्धिः ? विशेषणादिज्ञानपूर्वकत्वाद्विशिष्टबुद्धेरिति भावः ।

[१]स्यान्मतमिति,—लैङ्गिकवदित्यस्य व्याख्यानम् । मतं स्याच्छङ्कितुः परस्येत्यर्थः । अभूतमिति(१२७)वैशेषिकं सूत्रम् । यथा आशुतरविनाशितयाऽविद्यमानमपि शब्दबुद्ध्यादिलिङ्गं विद्यमानवीणात्मादिलिङ्गानुमापकं ज्ञानमात्राद्भवति तथा गुणबुद्धिकाले द्वित्वनाशेऽपि तज्ज्ञानमुक्तविशिष्टबुद्धिजनकं स्यादित्येष आक्षेप्तुराशयः स्यादिति भावः । परिहरति नेति । विवृणोति न हीति । सारूप्याद्विशेष्यस्वरूपानुरञ्जकत्वाद्विशेषणस्य तत्सम्बन्धज्ञानमन्तरेण विशेष्यज्ञानं कथं स्यादित्यर्थः । अत्रार्थे सूत्रकारं प्रमाणयति तथाहीति । समवायिन इति (३१८) सूत्रम् । समवेताच्छ्वैत्यगुणाच्छ्वैत्यबुद्धेः श्वेते द्रव्ये श्वेतं द्रव्यमिति बुद्धिर्भवति । ते विशेषणविशेष्यज्ञाने कार्यकारणस्वभावे इति सूत्राक्षरार्थः । अत्र समवायिन इति सम्बन्धस्य, श्वैत्यादिति विशेषणस्य, श्वैत्यबुद्धेरिति च ज्ञानस्य

इति । न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यते तस्माद्विष-
मोऽयमुपन्यासः । न आशूत्पत्तेः यथा शब्दवदाकाश-
मित्यत्र त्रीणि ज्ञानान्याशूत्पद्यन्ते तथा द्वित्वादि-
ज्ञानोत्पत्तावित्यदोषः । बध्यघातकपक्षेऽपि समानो दोष
इति चेत् स्यान्मतम्—ननु बध्यघातकपक्षेऽपि तर्हि द्र-
व्यज्ञानानुत्पत्तिप्रसङ्गः । कथम् ? द्वित्वसामान्यबुद्धि-
समकालं संस्कारादपेक्षाबुद्धिविनाशादिति । न समू-

कारणत्वमुक्तम् । श्वेते बुद्धिरिति च श्वेतद्रव्यविषया बुद्धिः फलम् ।
लैङ्गिकस्यास्माद्भेदमाह नत्विति । अभेदेन—सारूप्येण । नहि भवति
शब्दः शब्दवती वा वीणेति, किन्तूपलभ्यमानः शब्दो वीणाकार्यः
एवंभूतशब्दत्वादिति साध्यसाधनभेदेन वैयधिकरण्येनेति विष-
मोऽयं लैङ्गिकवदिति दृष्टान्तोपन्यास इति भावः । एवं बुद्धावपि
बोध्यम् । द्वे द्रव्ये इति—ज्ञानतुल्यो नायं दृष्टान्त इति तात्पर्यम् । ननु
यदि द्वित्वरूपं विशेषणं नष्टं तर्हि श्यामोऽयं कुम्भ आसीदितिवद्
द्वितयमासीदिति स्यान्न त्विदानीं द्वयं त्रयमिति, तथा द्वे द्रव्ये इ-
त्यत्र यथा द्रव्यप्रतिभास एवमुपसर्जनं द्वित्वमपि भासतेऽविद्य-
मानस्य च तस्य कथं प्रतिभासस्तस्मादविनष्टमेव द्वित्वं विशेष्य-
ज्ञानालम्बनं वक्तव्यमिति शङ्काद्वयं मनसि कृत्वाह नाशूत्पत्तेरिति ।
तत्रानुरूपं दृष्टान्तमाह यथेति । तथा च यथाशब्दवदाकाशमित्यत्र
त्रयाणां शब्दाकाशशब्दविशिष्टज्ञानानामाशूत्पादात्क्रमस्याग्रहणेन
युगपत्प्रतिभासाभिमानस्तथा द्वित्वगुणद्रव्यज्ञानयोः शीघ्रमुत्पादात्
क्रमाग्रहणे द्वित्वद्रव्ययोरेकस्मिन्नेव ज्ञाने प्रतिभास इति हृदयम् ।
शङ्कते वध्यघातकेति । शङ्कातात्पर्यं स्थापयति स्यान्मतमिति । वध्य-
घातकपक्षे गुणबुद्धिसमकालं द्वित्वनाशे द्रव्यज्ञानानुत्पत्तिरित्यत्रो-
पपत्तिं दर्शयति कथं द्वित्वेति । अत्रापि सहानवस्थानपक्षवत् अपे-
क्षाबुद्धेर्द्वित्वसामान्यज्ञानकालेऽनवस्थानं गुणबुद्धिसमकालं गुण-

हज्ञानस्य संस्कारहेतुत्वात्—समूहज्ञानमेव संस्कारकारणं नालोचनज्ञानमित्यदोषः । ज्ञानयौगपद्यप्रसङ्ग इति चेत् स्यान्मतम्-ननु ज्ञानानां वध्यघातकविरोधे ज्ञानयौगपद्यप्रसङ्ग इति । न अविनश्यतोरवस्थानप्रतिषेधात् । ज्ञानायौगपद्यवचनेन ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानं प्रतिषिध्यते नहि वध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति ॥

(८) परिमाणप्रकरणम् ।

(१)परिमाणं मानव्यवहारकारणम् । तच्चतुर्विधम्—

नाशात् द्रव्यज्ञानानुत्पत्तिश्च ज्ञानवत् संस्कारस्यापि पूर्वज्ञाननाशकत्वादित्यर्थः । समाधानं नेति । समाधानं विवृणोति समूहज्ञानमेवेति । तथा च गुणविशिष्टद्रव्यज्ञानात्मकसमूहज्ञानस्यैव संस्कारजनकता नालोचनज्ञानस्य निर्विकल्पात्मकापेक्षाज्ञानस्येत्यदोष इत्यर्थः । विशिष्टस्मरणमेव विशिष्टज्ञानस्य संस्कारहेतुत्वे प्रमाणमित्याचार्याः । ननु यदि ज्ञानमुत्पद्य पूर्वं ज्ञानं नाशयतीति तदा सहावस्थानमनयोः प्राप्तं ततश्च ज्ञानायौगपद्यादिति सूत्रविरोध इति शङ्कते ज्ञानेति । शङ्काभिप्रायमाह नन्विति । वध्यघातकरूपविरोधइत्यर्थः । समाधत्ते नेति । प्रतिषेधादिति । प्रयत्नज्ञानायौगपद्यादिति सूत्रेणेति भावः । तदेवाह ज्ञानायौगपद्यवचनेनेति । युगपदुत्पत्तौ प्रतिशरीरमेकत्वमणुत्वं च मनसो न स्यादिति व्यासङ्गानुपपत्तिः। अविनश्यदवस्थयोश्च ज्ञानयोरवस्थाने वध्यवघातकलक्षणो विरोधो न स्यादिति तदेवात्र प्रतिषिद्ध्यते नान्यत् प्रमाणाभावादिति भावः ।

[८]परिमाणप्रकरणम् ।

[१] क्रमप्राप्तं परिमाणं निरूपयति परिमाणमिति । मानव्यवहारकारणं गुणः परिमाणमिति तल्लक्षणम् । ननु द्रव्याग्रहे परिमा-

अणु महद्दीर्घं ह्रस्वं चेति।

(१)तत्र महद् द्विविधं—नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम् अनित्यं त्र्यणुकादावेव। तथा चाण्वपि द्विविधं—नित्यमनित्यं च। नित्यं परमाणुमनस्सु तत्तु पारिमाण्डल्यम्। अनित्यं द्व्यणुक एव। कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावा-

---

णाग्रहात् द्रव्यस्वरूपादतिरिक्तं परिमाणं कुतोऽङ्गीकृतवानाचार्य इति चेत् एकतराप्रतीतावन्यतरप्रत्यय एवाङ्गीकारबीजम्। यदि च घटादिस्वरूपं परिमाणं स्यान्महदानयेत्युक्ते घटमात्रमानयेत् घटमानयेत्युक्तं च यत्किञ्चिन्महदानयेत्, तथा च प्रेष्यप्रेषकसंप्रतिपत्ती विरुद्ध्येयातां घटशब्दाद् घटनिश्चय इव परिमाणनिश्चयोऽपि स्यात् परिमाणसन्देहवत् घटसन्देहोपि स्यादिति परिमाणाङ्गीकारे तर्कोपि बोध्य इत्यलं विस्तरेण। विभजते तच्चतुर्विधमिति। चतुरस्रादिकन्त्ववयवसंस्थानविशेषो न परिमाणान्तरमिति चतुर्विधत्वाव्याहतिः। अत्र (२६४) (२७२) सूत्रे।

[१]ननु यथा द्व्यणुकपरिमाणादपकृष्टपरमाणुपरिमाणं भिन्नमेवं घटादिपरिमाणादन्यदेव प्रकर्षपर्यन्तप्राप्तमाकाशादिपरिमाणं दीर्घं ह्रस्वञ्च स्यादिति षड्विधत्वसम्भवे कथं चातुर्विध्यमत आह तत्रेति। त्र्यणुकादावेवेति। एवकारेण द्व्यणुकानित्यद्रव्यव्यवच्छेदः। परमाणुमनःस्विति। उत्पत्तिविनाशकारणाभावादिति शेषः। पारिमाण्डल्यमिति। सर्वापकृष्टं परिमाणमितीयं संज्ञा नैयायिकाम्। द्व्यणुक एवेति। अणुपरिमाणप्रभेद एव परमाणुपरिमाणं महत्परिमाणप्रभेदश्च परममहत्परिमाणमन्यथा परमशब्देन विशेषणायोगात्, यत्परिमाणं रूपसहायं स्वाश्रयं प्रत्यक्षयति तत्र महदिति यच्च नो प्रत्यक्षयति तत्राण्विति व्यवहार इति तात्पर्यम्। ननु द्व्यणुक एवेत्ययुक्तं कुवलयामलकबिल्वादिषु परस्परापेक्षयाणुव्यवहारदर्शनादत आह कुवलयेति। महत्वोत्पत्तौ कारणसद्भावेन चाक्षुषत्वान्यथानुपपत्त्या

भावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः । दीर्घत्वह्रस्वत्वे चोत्पाद्यमहदणुत्वैकार्थसमवेते । समिदिक्षुवंशादिष्वञ्जसा दीर्घेष्वपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तो ह्रस्वत्वव्यवहारः ।

अनित्यं चतुर्विधमपि संख्या-परिमाण-प्रचययोनि ।

तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु ब-

च कुवलये तत्त्वतो महत्त्वे व्यवस्थिते आमलकप्रकर्षभावाभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः स च द्व्यणुकेष्यस्तीतिसादृश्यादौपचारिकी प्रवृत्तिरिति तात्पर्यम् । उभाभ्यां भज्यत इति भक्तिः भक्तिश्च प्रकर्षभावाभावः महत्परिमाणाभाव इति यावत् । तामपेक्ष्य भवतीति भाक्तशब्दार्थः । दीर्घत्वह्रस्वत्वयोर्विशेषमाह दीर्घत्वह्रस्वत्व इति । उत्पाद्ये च ते महत्त्वाणुत्वे चेति ताभ्यामेकस्मिन्नर्थे समवेते । यत्रोत्पाद्यं महत्त्वं द्व्यणुकादौ तत्र तादृशं दीर्घत्वं, यत्र चोत्पाद्यमणुत्वं द्व्यणुके तत्रोत्पाद्यं ह्रस्वत्वमित्यर्थः । ननूत्पाद्याणुत्वह्रस्वत्वयोर्व्याप्तिस्वीकारे कथं वंशाद्यपेक्षयेक्ष्वादौ ह्रस्वत्वव्यवहार इत्याशंक्याह समिदिक्ष्विति । अञ्जसा परमार्थतः । दीर्घत्वोत्पत्तौ कारणोपपत्तेर्वंशे यो दीर्घत्वस्य प्रकर्षभावः दीर्घातिशययोगित्वं तदभाव इक्षौ तमपेक्ष्येक्ष्वादौ ह्रस्वत्वव्यवहारो भाक्तः । स हि मुख्ये ह्रस्वेऽप्यस्तीत्युभाभ्यां भज्यत इति भक्तिस्तत्कृत इति भावः । एवं समिध्यपि बोध्यम् । कस्माद्दीर्घव्यवहारस्तत्र न गौण इति चेत् उत्पत्तिकारणासम्भवात् । सर्वत्रैवंसति भाक्तो ह्रस्वत्वव्यवहारः स्यादिति तु न शङ्कनीयं मुख्याभावे गौणस्य सम्भवादित्यन्यत्र विस्तरः ।

अत्र २७४ २७९ २७९ २८० १८१ २७५ २७६, २६७ १६८ २६९ सूत्राणि द्रष्टव्यानि ।

एवं विभागमाश्रयं च निरूप्य कारणं निरूपयति । अनित्यश्चतुर्विधमपीति ।

हुत्वसङ्ख्या तैरारब्धे कार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति ।

द्विबहुभिर्महद्भिश्चारब्धे कार्यद्रव्ये कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वम् । समानसङ्ख्यैश्चारब्धेऽतिशयदर्शनात् ।

संख्याकारणं परिमाणमुदाहरति तत्रेति । द्व्यणुकेष्वस्मदादीनामपेक्षाबुद्ध्यभावादाहेश्वरेति । बुद्धिरपेक्षाबुद्धिः तामपेक्ष्योत्पन्ना द्वाभ्यां द्वाभ्यां परमाणुभ्यामुत्पन्नानि द्व्यणुकानि परमाणुद्व्यणुकानि तेषु बहुत्वसंख्या तैर्द्व्यणुकैरारब्धे त्र्यणुकादिकार्यद्रव्ये रूपाद्युत्पत्तिकाल एव महत्त्वं दीर्घत्वं च करोतीत्यर्थः । किं पुनरत्र प्रमाणं संख्यैव महत्त्वं करोति ? इति चेत् परिशेषानुमानमेव । तथा च प्रयोगः—त्र्यणुकपरिमाणं बहुत्वसंख्याकार्यं परिमाणप्रचयासम्भवे सति कार्यमहत्त्वात् यन्न बहुत्वकार्यं न तदेवं यथा द्व्यणुकपरिमाणं तूलकपरिमाणं वा । विपक्षे कारणानुपपत्तौ कार्यानुत्पत्तिप्रसङ्ग एव बाधकम् । न तावद्द्व्यणुकगतरूपादीनां तत्कारणत्वसम्भवस्तेषां कार्ये समानजातीयगुणारम्भकत्वात् । द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणारम्भकत्वे परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणारम्भकत्वनियमात् त्र्यणुकस्याणुतरत्वापत्त्या महत्त्वानुपपत्तिरिति बहुत्वसंख्यैव महत्त्वं करोतीत्यप्रतिहतम् ।

एवं सति बहुत्वमेवास्तु सर्वत्र महत्त्वकारणं न महत्त्वमतमाह द्विबहुभिरिति । द्वौ च बहवश्च तैर्महद्भिरारब्धे कार्यद्रव्ये कारणमहत्त्वे च कारणमहत्त्वानि च तान्येव महत्त्वमारभन्ते न बहुत्वं समानसंख्यैरारब्धयोर्द्रव्ययोः स्थूलारब्धे महत्त्वातिशयदर्शनात्, संख्यायाः कारणत्वे कार्यविशेषो न स्यात् तस्या अविशेषादिति भावः । यत्र द्वाभ्यामप्रचिताभ्यामारम्भस्तत्र बहुत्वप्रचययोरसम्भव एव । समानमहत्त्वैरल्पसंख्यैरारब्धमपेक्ष्य संख्यात एवातिशयदर्शनात् संख्याया अपि कारणत्वमित्येकस्य द्वयोर्वा यथा स-

प्रचयश्च तूलपिण्डयोर्वर्तमानः पिण्डारम्भकावयवप्रशिथिलसंयोगानपेक्षमाण इतरेतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभते न बहुत्वमहत्त्वानि । समानसङ्ख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात् ।

द्वित्वसङ्ख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते । महत्त्ववत् त्र्यणुकादौ कारणबहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः । अणुत्ववत् द्व्यणुके द्वित्वसङ्ख्यातो ह्रस्वत्वस्योत्पत्तिः ।

म्भवं कारणत्वं सुधीभिर्विभावनीयम् ।

प्रचयहेतुकमाह प्रचयश्चेति । शिथिलाख्यो द्रव्यारम्भकः संयोगविशेषः द्वितूलकद्रव्यारम्भकयोस्तूलपिण्डयोर्वर्तमानः प्रत्येकं पिण्डयोरारम्भकान्प्रशिथिलानवयवसंयोगानपेक्षमाणः परस्परपिण्डयोरवयवानां परस्परसंयोगानपेक्षमाणो वा द्वितूलकं महत्त्वं जनयति न बहुत्वमहत्त्वानि बहुत्वस्य तत्राभावात् महत्त्वस्य सतोपि प्रचयापेक्षत्वादन्यथा गुरुत्वस्य तुल्यतया मूलभूतानां त्र्यणुकादीनान्तुल्यसङ्ख्यतया च परिमाणातिशयानुपपत्तिरित्यर्थः । तत्रोपपत्तिमाह समानेति । अयमाशयः । संख्यायाः कारणत्वे समसंख्यैस्त्रिभिः प्रशिथिलैर्निविडैश्च संयोगैरारब्धद्रव्ययोः प्रशिथिलसंयोगारब्धे निविडसंयोगारब्धापेक्षया महत्त्वातिशयो न दृश्येत । एवं महत्त्वस्यापि हेतुत्वेऽप्रचितारब्धापेक्षया प्रचितारब्धे परिमाणातिशयो न स्यादिति ।

अणुत्वोत्पत्तिमाह द्वित्वसंख्या चेति । द्व्यणुकद्रव्यत्वेन परिमाणस्य सर्वथा स्वीकार्यतया महत्त्व कारणाभावेन पूर्वयुक्त्या परमाणुपरिमाणस्य चाकारणत्वात् संख्यैव द्व्यणुकाणुपरिमाणे कारणमित्यर्थः । दीर्घत्वोत्पत्तिमाह महत्त्ववदिति । यथा महत्त्वस्य कारणबहुत्वात्समानजातीयात् कारणमहत्त्वात्प्रचयाच्चोत्पत्तिस्तथा दीर्घत्वस्येत्यर्थः । इमामेव ह्रस्वत्वेऽतिदिशति अणुत्ववदिति ।

अथ त्र्यणुकादिषु वर्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः, द्व्यणुकेषु चाणुत्वह्रस्वत्वयोरिति?

तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः महत्सु दीर्घमानीयतां दीर्घेषु च महदानीयतामिति विशिष्टव्यवहारदर्शनादिति । अणुत्वह्रस्वत्वयोस्तु परस्परतो विशेषस्तद्दर्शिनां प्रत्यक्ष इति ।

तच्चतुर्विधमपि परिमाणमुत्पाद्यमाश्रयविनाशादेव विनश्यतीति ॥

(९) पृथक्त्वप्रकरणम् ।

पृथक्त्वमपोद्धारव्यवहारकारणम् । तत्पुनरेकद्रव्य-

दीर्घत्वह्रस्वत्वयोर्महत्त्वाणुत्वान्तर्भावाभिप्रायेण क्रमशः शङ्कते अथेति ।

तथैवोत्तरयति तत्रेति । अभेदे निर्धारणानुपपत्त्या दीर्घेषु महदानीयतामिति प्रत्ययो न स्यात् इति भावः । तद्दर्शिनामिति । योगिनामित्यर्थः । अस्माकं भाकव्यवहारापौनरुक्त्यान्यथानुपपत्तिस्तद्भेदे प्रमाणमिति तुशब्दार्थः ।

उत्पत्तिमुक्त्वा नाशमाह तदिति । नित्यपरिमाणव्यावृत्तये उत्पाद्यमित्युक्तम् । आश्रये सत्यपि शरीरादौ परिमाणनिवृत्तिरिति प्राभाकरमतदूषणायैवकारः विनाशे परिमाणान्तरोत्पत्तौ च हेत्वभावात् इति आलोचनीयम् ।

अत्र २६५ २६६ २७३ सूत्राणि ।

(९) पृथक्त्वप्रकरणम् ।

पृथक्त्वमाह पृथक्त्वमिति । अवधिव्यङ्ग्यत्वे सति एकमात्रवृत्तिवृत्त्यनेकमात्रवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं पृथक्त्वमित्यर्थः । तत्र प्रमाणं चात्रेदमस्मात् पृथगित्यबाधितं प्रत्यक्षमेव । नन्वि-

मनेकद्रव्यं च । तस्य तु नित्यानित्यत्वनिष्पत्तयः सङ्ख्यया व्याख्याताः ।

एतावांस्तु विशेषः—एकत्वादिवदेकपृथक्त्वादिष्वपरसामान्याभावः सङ्ख्यया तु विशिष्यते तद्विशिष्टव्यवहारदर्शनादिति ॥

इतरेतराभावेनैव सामंजस्येऽन्यथासिद्धेर्न गुणान्तरं पृथक्त्वमिति चेन्न पृथक्त्वस्यावधिनिरूप्यत्वादन्योन्याभावस्य च प्रतियोगिनिरूप्यत्वात् इदमस्मात् पृथगिदमिदं नेति प्रतीतिभेददर्शनात् । विधिप्रत्ययविषयत्वायोगान्नान्योन्याभावः पृथक्त्वमिति कन्दलीकाराः । अधिकं किरणावल्यादौ द्रष्टव्यम् । अक्षरार्थस्तु एतस्मादिदं पृथगित्यादिज्ञानं अभिधानञ्च अपवृज्यापेक्ष्य य उद्धारो निर्धारणं स अपोद्धारः स चासौ व्यवहारश्च तस्य कारणं पृथक्त्वमिति । तत्पुनरिति । एकद्रव्यवृत्तिपरिमाणात् अस्यानेकद्रव्यवृत्तित्वविशेषद्योतनार्थस्तु पुनःशब्दः । तथाच परिमाणमेकद्रव्यम् एकपृथक्त्वम्पुनरेकद्रव्यमनेकद्रव्यं चेति विशेष इति भावः । व्याख्याता इति । तथाच यथैकद्रव्यगतैकत्वं परमाणुषु नित्यं कार्ये कारणगुणपूर्वकमाश्रयनाशनाश्यञ्च तथैकद्रव्यगतैकपृथक्त्वमपि। यथा चानेकद्रव्या द्वित्वादिका संख्याऽनेकगुणालम्बनापेक्षाबुद्धिजन्या तद्विनाशनाश्या क्वचिदाश्रयनाशनाश्या च तथा ऽनेकद्रव्यगतद्विपृथक्त्वादिकमपीति संख्यावन्नित्यानित्यत्वे पृथक्त्वस्य न परिमाणवदिति भावः ।

एवं पृथक्त्वस्य संख्यासाधर्म्यमुक्त्वा वैधर्म्यमाह एतावास्तिवति । यथा संख्यात्वपरसामान्यापेक्ष्यैकत्वद्वित्वादिकमपरसामान्यं तथा पृथक्त्वपरसामान्यापेक्ष्यैकपृथक्त्वादिकमपरसामान्यं नास्तीति भावः । कथं तर्ह्यनेकेष्वेकपृथक्त्वादिष्ववान्तरप्रत्ययस्तत्राह संख्ययेति । एकत्र द्रव्ये वर्तमानं पृथक्त्वमेकार्थसमवेतयैकत्वसंख्यया विशिष्यते तद्विशेषश्चावान्तरव्यवहारविशेषः

(१०) संयोगप्रकरणम्।

संयोगः संयुक्तप्रत्ययनिमित्तम्। स च द्रव्यगुणकर्महेतुः। द्रव्यारम्भे निरपेक्षः—तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्चेति वचनात्। गुणकर्मारम्भे तु सापेक्षः—

अनुवृत्तिप्रत्ययश्च पृथक्त्वसामान्यकृत एवेति भावः। द्विपृथक्त्वादौ पृथक्त्वजातेरन्याऽवान्तरजातिर्नास्ति प्रतीतिवैलक्षण्यं द्वित्वादिघटितमेवेति भाष्यस्वरसः। द्विपृथक्त्वादाववान्तरजातिर्वर्तत एव द्वित्वत्वादिजातिस्तु न वर्तते तद्विशिष्टबुद्धेर्द्वित्वादिगुणाधीनतयैवोपपत्तेरित्याचार्याः।

अत्र २८४ सूत्रम्।

(१०) संयोगप्रकरणम्।

संयोगमाह संयोग इति। इदमनेन संयुक्तमिति सार्वजनीनबुद्धेः रूपादिप्रतीतिविलक्षणत्वात्तन्निमित्तः संयोगो गुण इति संयोगे प्रत्यक्षं प्रमाणं दर्शितम्। द्रव्यासमवायिकारणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं च लक्षणम्। कार्यद्वारा तर्कमाह स चेति। अवयवसंयोगो द्रव्ये, आत्ममनस्संयोगो बुद्ध्यादौ भेर्याकाशसंयोगश्च शब्दे गुणे, प्रयत्नवदात्महस्तसंयोगो हस्तक्रियायां हेतुरित्यादिकं स्वयं वेदितव्यम्। तथाच संयोगाभावे द्रव्यगुणकर्माणि न स्युः कारणाभावात् भावे वा सर्वदा भवेयुः द्रव्यादीनां पूर्वसिद्धानां सदा तुल्यरूपत्वात्क्षणभङ्गपरिणामवादयोरपास्तत्वादिति तर्को दर्शित इति भावः। द्रव्यारम्भकत्वमाह द्रव्यारम्भ इति। पटे उत्पादयितव्ये तन्तवः संयोगार्थं कारणान्तरमपेक्षन्ते तस्मिन् सति न किञ्चिदिति कारणान्तरानपेक्षस्तन्तुसंयोगः पटोत्पत्तौ कारणमिति भावः। अत्र सूत्रकारसम्मतिमाह तथेति। तथा चात्र भवतीति वर्तमानप्रतीतिहेतुत्वेनाभिधीयमानेषु तन्तुषु संयुक्तेषु अनपेक्षशब्दप्रयोगात्संयोगो द्रव्यारम्भेऽनपेक्ष इति तात्पर्यम्। सापेक्षेभ्य इति चानुत्पन्ने संयोगे भविष्यत्तामादाय तन्तुषु प्रयोगो द्रष्टव्यः। गुणकर्मारम्भे संयोगस्य सापेक्षत्वमेव नानपेक्षत्वमि-

संयुक्तसमवायादग्नेर्वैशेषिकमिति वचनात् ।

अथ कथंलक्षणः कतिविधश्चेति ?

अप्राप्तयोः प्राप्तिः संयोगः । स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः संयोगजश्च । तत्रान्यतरकर्मजः—क्रियावता निष्क्रियस्य यथा स्थाणोः श्येनेन विभूनां च मूर्तैः । उभयकर्मजो—विरुद्धदिक्क्रिययोः सन्निपातः यथा मल्लयोर्मेषयोर्वा । संयोगजस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य वा निष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः संयोगः ।

त्यत्र सूत्रकारं संवादयति संयुक्तसमवायादिति । अस्यार्थः 'पार्थिवपरमाणुसंयुक्ते वह्नौ समवायादग्निगतमुष्णत्वं पाकजरूपादिनिमित्तं भवतीति । तथा च स्वानुत्पादकौष्ण्यापेक्षत्वात्संयोगोऽत्र सापेक्ष एव गुणोत्पादक इति भावः । एवं क्रियायामपि नोदनाभिघातौ स्पर्शवेगादिसापेक्षौ संयोगाविति ध्येयम् ।

अत्र ३६३ ३६६ ३६७ ३६८ २७ २९ सूत्राणि,१८१ सूत्रात् १८६ पर्यन्तं,१९० १९४ १९७ १९९ २०३ २०४ २०६ २१३ सूत्राणि च द्रष्टव्यानि ।

अथेति प्रश्ने । उत्तरमप्राप्तयोरिति । अप्राप्तयोरिति समवायव्यावृत्तिः जातः सम्बद्धश्चेति एककालत्वात् । विद्यमानयोरप्राप्तयोः संश्लेषस्संयोग इति यावत् । अन्यतरकर्मज इति । संयोग इति शेषः । क्रियावता द्रव्येण निष्क्रियस्य द्रव्यस्य संयोगोऽन्यतरकर्मज इत्यर्थः । निष्क्रियत्वोक्तिश्च विवक्षितसंयोगहेतुकर्माभिप्रायेणाऽन्यथाऽग्रे मन्दं गच्छतोऽपरेण तत्पृष्ठमनुधावताऽन्यतरकर्मजन्ये संयोगेऽतिप्रसङ्गापातात् । मूर्तैरित्यादितृतीयान्तानां संयोग इत्यत्रान्वयः । विरुद्धेति । विरुद्धयोर्दिशोः क्रिया ययोर्द्रव्ययोस्ते विरुद्धदिक्क्रिये तयोः संनिपातः उभयकर्मजः संयोगः प्रत्येकमन्यत्र द्वयोरपि सामर्थ्यावधारणात् । कारणाकारणेति । कारणमत्र स-

स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति । एकस्मा-
त् तावत् तन्तुवीरणसंयोगात् द्वितन्तुकवीरणसंयोगः ।
द्वाभ्यां तन्त्वाकाशसंयोगाभ्यामेको द्वितन्तुकाकाशसंयो-
गः । बहुभ्यश्च तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः ।

एकस्माच्च द्वयोरुत्पत्तिः । कथम् ? यदा पार्थि-
वाप्ययोरण्वोः संयोगे सत्यन्येन पार्थिवेन पार्थिवस्यान्ये-
नाप्येन चाप्यस्य युगपत्संयोगौ भवतस्तदा ताभ्यां
संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते । ततो
यस्मिन् काले द्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्यु-
त्पत्तिः तस्मिन्नेव काले इतरेतरकारणाकारणगतात्

मवायिकारणमकारणं च तद्भिन्नं ग्राह्यम् । तच्चोदाहरणे व्यक्ती-
भविष्यति ।

स चेति । तथा च संयोगजः संयोगस्त्रिविध इत्यर्थः ।
प्रथममाह एकस्मादिति । वीरणसंयुक्ततन्तोस्तन्त्वन्तरसंयोगा-
दुत्पन्नस्य द्वितन्तुकद्रव्यस्य निष्क्रियस्य समवायिकारणभूतैकतन्तु-
संयोगिना वीरणेन संयोगः पूर्वादेकस्मात्तन्तुवीरणसंयोगाज्जायते
स च कारणाकारणतन्तुवीरणसंयोगपूर्वकः कार्याकार्यद्वितन्तुकवी-
रणसमवेतश्चेति भावः । द्वितीयमाह द्वाभ्यामिति । द्वितन्तुकद्रव्या-
काशसंयोगे द्वितन्तुककारणयोस्तन्त्वोराकाशसंयोगावेव हेतू नान्य-
दिति भावः । तृतीयमाह बहुभ्यश्चेति ।

एकस्मात्संयोगाद्द्वयोस्संयोगयोरुत्पत्तिः कथमिति प्रश्ने
उत्तरमाह यदेति । अन्येन पार्थिवेनेति । अणुनेति शेषः ।
एवमग्रेपि । आरभ्येते इति । समानजातीयसंयोगस्य द्रव्या-
न्तरोत्पत्तिहेतुकत्वादित्यर्थः । पार्थिवाप्यद्व्यणुकद्वयोत्पत्तिकार-
णोक्तविधसंयोगद्वयाद्युगपत्संयोगयोरुत्पत्तिमाह तत इति । इत-

संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते। किं कारणम्? कारणसंयोगिना ह्यकारणेन कार्यमवश्यं संयुज्यते इति न्यायः। अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाप्येनाणुना सम्बध्यते आप्यमपि द्व्यणुकं कारणसंयोगिना पार्थिवेनेति। अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्धयोः कथं परस्परतः सम्बन्ध इति? तयोरपि संयोगजाभ्यां संयोगाभ्यां सम्बन्ध इति।

रेतरेति। इतरस्य पार्थिवद्व्यणुकस्य कारणं पार्थिवः परमाणुरकारणमाप्यः परमाणुः, तथेतरस्याऽऽप्यद्व्यणुकस्य कारणमाप्यः परमाणुरकारणं पार्थिवः परमाणुस्तयोर्गतात्समवेतात् इतरस्य पार्थिवपरमाणोः कार्यं पार्थिवद्व्यणुकमकार्यमाप्यः परमाणुस्तथेतरस्याप्यपरमाणोः कार्यमाप्यद्व्यणुकमकार्यं पार्थिवपरमाणुस्तद्गतौ-तत्समवेतौ—पार्थिवपरमाण्वाप्यद्व्यणुकसंयोग एकः आप्यपरमाणु-पार्थिवद्व्यणुकसंयोगश्चापरो युगपज्जायत इत्यर्थः। पार्थिवाप्ययोर्द्व्यणुकयोर्विजातीयपरमाणुसंयोगे प्रमाणं पृच्छति किंकारणमिति। न्याय इति। अनुमानन्तत्र प्रमाणमित्यर्थः तत्प्रयोगश्च—पार्थिवद्व्यणुकमाप्यपरमाणुसंयोगि तदकार्यत्वे सति तत्संयोगिकार्यत्वात् यथा तुरीसंयुक्तकार्यः पटस्तुर्येति। एवमग्रेपि। दृष्टान्तोपनयौ हृदि निधाय निगमनमाह अत इति। पृच्छति अथेति। द्व्यणुकयोः पार्थिवाप्ययोः कथं सम्बन्ध इत्यन्वयः। पार्थिवद्व्यणुकस्य स्वकीयाकारणेनाऽऽप्यद्व्यणुकहेतुनाऽऽप्यपरमाणुना सम्बद्धस्य, एवमाप्यद्व्यणुकस्यापि स्वकीयाकारणपार्थिवद्व्यणुकहेतुपार्थिवपरमाणुसम्बद्धस्य कथं सम्बन्ध इति प्रश्नार्थः। उत्तरयति तयोरिति। पार्थिवद्व्यणुकस्याप्येन परमाणुना यः संयोगजसंयोगो यश्चाप्यद्व्यणुकस्य पार्थिवपरमाणुना संयोगजसंयोगस्ताभ्यां द्व्यणुकयोः परस्परसंयोगो जायते कारणसंयोगिनेत्यादिपूर्वोक्तन्यायादिति भावः।

(१)नास्त्यजः संयोगो नित्यपरिमण्डलवत् पृथगनभिधानात्। यथा चतुर्विधं परिमाणमुत्पाद्यमुक्त्वाऽऽह नित्यं परिमण्डलमित्येवमन्यतरकर्मजादिसंयोगमुत्पाद्यमुक्त्वा पृथङ्नित्यं ब्रूयान्न त्वेवमब्रवीत् तस्मान्नास्त्यजः संयोगः। परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोगः। विभूनां तु परस्परतः संयोगो नास्ति युतसिद्ध्यभावात्। सा पुनर्द्वयोरन्यतरस्य वा पृ-

---

(१)नित्यसंयोगस्य तुरीयस्य सत्त्वात्त्रिविध एव संयोग इति तुच्छमित्यपरमतप्रतिषेधायाऽऽह नास्तीति। नित्यपरमाणुवदिति व्यतिरेकिदृष्टान्तः। हेतुमाह पृथगनभिधानादिति। सर्वज्ञेन मुनिनेति शेषः। विवृणोति यथेति संयोग इत्यन्तम्। ननु नित्यत्वादप्राप्त्यभावाच्च परमाण्वाकाशसंयोगोपि नित्य एव कणादेन तु भ्रान्तेः पुरुषधर्मत्वान्नोक्त इत्याशङ्क्याह परमाणुभिरिति। प्रदेशवृत्तिरव्याप्यवृत्तिः अन्यतरकर्मजस्संयोगस्तथाच यथा महतो न्यग्रोधस्य मूलाग्रावयवव्यापिन एकस्य मूलादग्रमग्राच्च मूलं गच्छता पुरुषेण संयोग अन्यतरकर्मजस्तथा व्यापिनोऽप्याकाशस्य परमाणुना संयोगः परमाणुकर्मजस्तस्याव्याप्यवृत्तित्वादिति न परमाण्वाकाशसंयोगो नित्य इति भावः। नन्वाकाशममूर्तकालसंयुक्तं मूर्तद्रव्यसंयोगित्वात् शरीरवदिति अनुमानेन विभूनामपि संयोगः स्यात् न चासौ कर्मजस्तेषामक्रियत्वान्नापि संयोगजस्तेषां निरवयवत्वादत आह विभूनामिति। संयोगव्यापकयुतसिद्ध्यभावात्, आकाशादौ व्याप्यस्य संयोगस्याभाव इत्यर्थः। अनुमानन्तूभयपक्षतुल्यत्वादसाधनम् यथाऽनेन संयोगस्तथा विभागोऽपि विभूनां स्यात् उक्तहेतुदृष्टान्तयोः सत्त्वात् तत्तु न सम्भवति संयोगविभागयोरेकस्य नित्यत्वेनान्यतरस्यासम्भवादिति द्वयोरप्यसिद्धिः परस्परप्रतिबन्धादिति भावः। युतसिद्धिमाह सा पुनरिति। द्वयोः सम्बन्धिनोरन्यतरस्य वा सम्बन्धि-

संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते। किं कारणम्? कारणसंयोगिना ह्यकारणेन कार्यमवश्यं संयुज्यते इति न्यायः। अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाप्येनाणुना सम्बध्यते आप्यमपि द्व्यणुकं कारणसंयोगिना पार्थिवेनेति। अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्धयोः कथं परस्परतः सम्बन्ध इति? तयोरपि संयोगजाभ्यां संयोगाभ्यां सम्बन्ध इति।

रेतरेति। इतरस्य पार्थिवद्व्यणुकस्य कारणं पार्थिवः परमाणुरकारणमाप्यः परमाणुः, तथेतरस्याऽऽप्यद्व्यणुकस्य कारणमाप्यः परमाणुरकारणं पार्थिवः परमाणुस्तयोर्गतात्समवेतात् इतरस्य पार्थिवपरमाणोः कार्यं पार्थिवद्व्यणुकमकार्यमाप्यः परमाणुस्तथेतरस्याप्यपरमाणोः कार्यमाप्यद्व्यणुकमकार्यं पार्थिवपरमाणुस्तद्गतौ-तत्समवेतौ–पार्थिवपरमाण्वाप्यद्व्यणुकसंयोग एकः आप्यपरमाणुपार्थिवद्व्यणुकसंयोगश्चापरो युगपज्जायत इत्यर्थः। पार्थिवाप्ययोर्द्व्यणुकयोर्विजातीयपरमाणुसंयोगे प्रमाणं पृच्छति किंकारणमिति। न्याय इति। अनुमानन्तत्र प्रमाणमित्यर्थः तत्प्रयोगश्च–पार्थिवद्व्यणुकमाप्यपरमाणुसंयोगि तदकार्यत्वे सति तत्संयोगिकार्यत्वात् यथा तुरीसंयुक्तकार्यः पटस्तुर्येति। एवमग्रेऽपि। दृष्टान्तोपनयौ हृदि निधाय निगमनमाह अत इति। पृच्छति अथेति। द्व्यणुकयोः पार्थिवाप्ययोः कथं सम्बन्ध इत्यन्वयः। पार्थिवद्व्यणुकस्य स्वकीयाकारणेनाऽऽप्यद्व्यणुकहेतुनाऽऽप्यपरमाणुना सम्बद्धस्य, एवमाप्यद्व्यणुकस्यापि स्वकीयाकारणपार्थिवद्व्यणुकहेतुपार्थिवपरमाणुसम्बद्धस्य कथं सम्बन्ध इति प्रश्नार्थः। उत्तरयति तयोरिति। पार्थिवद्व्यणुकस्याप्येन परमाणुना यः संयोगजस्संयोगो यश्चाप्यद्व्यणुकस्य पार्थिवपरमाणुना संयोगजसंयोगस्ताभ्यां द्व्यणुकयोः परस्परसंयोगो जायते कारणसंयोगिनेत्यादिपूर्वोक्तन्यायादिति भावः।

(१)नास्त्यजः संयोगो नित्यपरिमण्डलवत् पृथगन-
भिधानात् । यथा चतुर्विधं परिमाणमुत्पाद्यमुक्त्वाऽऽह
नित्यं परिमण्डलमित्येवमन्यतरकर्मजादिसंयोगमुत्पाद्य-
मुक्त्वा पृथङ्नित्यं ब्रूयान्न त्वेवमब्रवीत् तस्मान्नास्त्यजः
संयोगः । परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतर-
कर्मजः संयोगः । विभूनां तु परस्परतः संयोगो ना-
स्ति युतासिद्ध्यभावात् । सा पुनर्द्वयोरन्यतरस्य वा पृ-

---

(१)नित्यसंयोगस्य तुरीयस्य सत्त्वात्त्रिविध एव संयोग इति
तुच्छमित्यपरमतप्रतिषेधायाऽऽह नास्तीति । नित्यपरमाणुवदिति
व्यतिरेकिदृष्टान्तः । हेतुमाह पृथगनभिधानादिति । सर्वज्ञेन मुनिनेति
शेषः । विवृणोति यथेति संयोग इत्यन्तम् । ननु नित्यत्वादप्राप्त्यभा-
वाच्च परमाण्वाकाशसंयोगोपि नित्य एव कणादेन तु भ्रान्तेः पुरुष-
धर्मत्वान्नोक्त इत्याशङ्क्याह परमाणुभिरिति । प्रदेशवृत्तिरव्याप्यवृत्तिः
अन्यतरकर्मजस्संयोगस्तथाच यथा महतो न्यग्रोधस्य मूलाग्रावयव-
व्यापिन एकस्य मूलादग्रमग्राच्च मूलं गच्छता पुरुषेण संयोग अन्यत-
रकर्मजस्तथा व्यापिनोऽप्याकाशस्य परमाणुना संयोगः परमाणुकर्म-
जस्तस्याव्याप्यवृत्तित्वादिति न परमाण्वाकाशसंयोगो नित्य इति
भावः । नन्वाकाशममूर्तकालसंयुक्तं मूर्तद्रव्यसंयोगित्वात् शरीरव-
दिति अनुमानेन विभूनामपि संयोगः स्यात् न चासौ; कर्मजस्ते-
षामक्रियत्वान्नापि संयोगजस्तेषां निरवयवत्वादत आह विभूनामि-
ति । संयोगव्यापकयुतसिद्ध्यभावात्, आकाशादौ व्याप्यस्य संयो-
गस्याभाव इत्यर्थः । अनुमानन्तूभयपक्षतुल्यत्वादसाधनम् यथाऽने-
न संयोगस्तथा विभागोऽपि विभूनां स्यात् उक्तहेतुदृष्टान्तयोः सत्त्वा-
त् तत्तु न सम्भवति संयोगविभागयोरेकस्य नित्यत्वेनान्यतरस्या-
सम्भवादिति द्वयोरप्ययुतसिद्धिः परस्परप्रतिबन्धादिति भावः । युत-
सिद्धिमाह सा पुनरिति । द्वयोः सम्बन्धिनोरन्यतरस्य वा सम्बन्धि-

थग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं चेति ।

(१)विनाशस्तु सर्वस्य संयोगस्यैकार्थसमवेताद्विभागात्, क्वचिदाश्रयविनाशादपि । कथम् ? यदा तन्त्वोः संयोगे सत्यन्यतरतन्त्वारम्भके अंशौ कर्मोत्पद्यते तेन कर्मणा अंश्वन्तराद्विभागः क्रियते विभागाच्च तन्त्वारम्भकसंयोगविनाशः संयोगविनाशात् तन्तुविनाशस्तद्विनाशे तदाश्रितस्य तन्त्वन्तरसंयोगस्य विनाश इति ॥

(११) विभागप्रकरणम् ।

(२)विभागो विभक्तप्रत्ययनिमित्तम् । शब्दविभागहेतुश्च ।

नः पृथग्गतिमत्त्वं विभागहेतुक्रियासम्बन्धः, युताश्रयाश्रयित्वं परस्परपरिहारेण पृथगाश्रयाश्रयित्वं च युतसिद्धिरित्यर्थः । पूर्वा नित्यानामपराऽनित्यानामिति कन्दलीकारः । अप्राप्तयोर्विद्यमानत्वेति उभयसाधारणम् लक्षणम् । इयम् विभूनामुत्तरकाले प्राप्तिकारणाभावान्नास्तीत्याचार्याः ।

(१)उत्पादं निरूप्य विनाशमाह विनाशस्त्विति । सर्वस्य त्रिविधस्य । ययोः संयोगस्तयोरेव वर्त्तमानाद्विरोधिगुणाद्विभागान्नाश इत्यर्थः । विनाशकान्तरमाह क्वचिदिति । स्पष्टयति कथमित्यादिना । अवयवक्रियाविभागादिन्यायेन द्रव्यनाशे तदाश्रितरूपादिवत्संयोगोपि विनश्यतीत्यर्थः । अत्र २९० सूत्रम् ।

(११) विभागप्रकरणम् ।

(२)संयोगपूर्वकत्वाद्विभागस्य तदनन्तरं विभागमाह विभाग इति । स्वजनककर्मोत्पत्त्यधिकरणक्षणाव्यवहितोत्पत्तिकवृत्तिगुणत्वसाक्षा-

(१)प्राप्तिपूर्विकाऽप्राप्तिर्विभागः । स च त्रिविधः—अन्यतरकर्मज उभयकर्मजो विभागजश्च विभाग इति । तत्रान्यतरकर्मजोभयकर्मजौ संयोगवत् । विभागजस्तु द्विविधः कारणविभागात् कारणाकारणविभागाच्च ।

(२)तत्र कारणविभागात् तावत्-कार्याविष्टे कारणे

व्याप्यजातिमत्त्वं विभागत्वम् । अक्षरार्थस्तु पूर्ववत् । शब्दश्चेति प्रमाणकथनम् । संयोगाभावो विभाग इति केचित् । तन्नासति विभागे कस्मात्संयोगाभावः स्यात् । कर्मणेति चेत् कर्मणो गुणविनाशेऽसामर्थ्यात् गुणानामेव तत्सामर्थ्यस्य दृष्टत्वात् संयोगाभावेन सर्वानुभवसिद्धविभक्तप्रत्ययापलापस्य कर्तुमशक्यत्वाच्च तथा च गुणान्तरमवश्यं कल्पनीयम् । अधिकं कणादरहस्यादौ द्रष्टव्यम् । कार्येण कारणानुमानमाह शब्दविभागहेतुश्चेति । प्रयोगश्च-पाट्यमानवंशदलशब्दः संयोगादिभिन्नहेतुकः संयोगाद्यनुपपत्तावुपजायमानत्वात् अवयविरूपवत् इत्यन्वयी । यन्नैवं तन्नैवं यथा संयोगजः शब्द इति व्यतिरेकी वा । विभागकार्यत्वं च वक्ष्यते ।

अत्र २९१ ११० सूत्रे द्रष्टव्ये ।

(१)लक्षणमाह प्राप्तिपूर्विकेति । न प्राप्तिरप्राप्तिः । प्राप्तिविरोधी गुण इत्यर्थः । ननु प्राप्त्या संयोगेन सहाऽस्य देशकृतः कालकृतः स्वरूपकृतो वा विरोधः स चानुपपन्न अत आह प्राप्तिपूर्विकेति । तथा च प्राप्तेर्वध्यताविभागस्य घातकत्वमनेन दर्शितम्, तेन संयोगविघातको गुणो विभाग इत्याचार्याः । भेदमाह स चेति । संयोगवदिति । स्थाणुश्येनमल्लादूयुदाहरणमन्यतरोभयकर्मजं पूर्ववद्बोध्यमित्यर्थः । तृतीये विशेषमाह विभागजास्त्विति । संयोगजः संयोगः कारणाकारणसंयोगपूर्वक एकविध एव विभागजविभागस्तु कारणमात्रविभागपूर्वकः कारणाकारणविभागपूर्वकश्चेति द्विविध इत्यर्थः ।

(२)तत्र प्रथममाह तत्रेति । तावदिति । विभागः कथ्यते इति शेषः । कार्येणाविष्टे व्याप्ते कारणे कर्मोत्पन्नं सत् यदा तस्य अव-

कर्मोत्पन्नं यदा तस्यावयवान्तराद्विभागं करोति न तदा-ऽऽकाशादिदेशात् यदा त्वाकाशादिदेशाद्विभागं करोति न तदावयवान्तरादिति स्थितिः । अतोऽवयवकर्मावयवान्तरादेव विभागमारभते ततो विभागाच्च द्रव्यारम्भकसंयोगविनाशः तस्मिन् विनष्टे कारणाभावात् कार्याभाव इत्यवयविविनाशः तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागमार-

---

यवस्यावयवान्तराद्विभागं द्रव्यारम्भकसंयोगविनाशकं करोति तदा द्रव्यानारम्भकादाकाशादिदेशाद्विभागं न करोति, यदा ताद्दगाकाशादिदेशाद्विभागं करोति न तदाऽवयवान्तराद् द्रव्यारम्भकाद्विभागं जनयतीति नियम इति भाष्यार्थः । तथा च द्रव्यारम्भकसंयोगाविरोधिविभागजनकं कर्म न द्रव्यारम्भकसंयोगविरोधिविभागजनकं यत्त्वेवं न तदविरोधिविभागजनकमिति विकसत्कमलकुड्मलदलादौ तद्दर्शनादिति भावः । ईदृङ्नियमे किमायातमत आहात इति । अवयवकर्म–कर्मविशेषः । द्रव्यारम्भकसंयोगविरोधिनमवयवान्तराद्विभागं करोति न तदविरोधिनमित्येवकारार्थः । विभागविशेषाद्द्रव्यारम्भकसंयोगविनाशस्तन्नाशे कारणाभावात्कार्याभाव इत्यवयविनाशः । नन्वेवमपि विभागजविभागः कथमायातः ? अत आह तदेति । ननूत्पन्नमात्रः कारणयोर्वर्तमानो विभागः कार्यसंयुक्तादाकाशादिदेशाद्विभागं कथं जनयेदत आह कार्यविनाशेति । अयमभिप्रायः–विभागेन विभागजननेऽवश्यं किञ्चिदपेक्षणीयम् अन्यथाऽनपेक्ष्य विभागजनने कर्मत्वापत्तेः । तस्मात्कार्यविनाशविशिष्टं कालं स्वतन्त्रमवयवं वाऽपेक्ष्य पूर्वोक्तो विभागः सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागं जनयतीति । कारणयोर्वर्तमानो विभागः सक्रियस्यैव विभागं करोतीत्यत्रोपपत्तिमाह न

भते न निष्क्रियस्य कारणाभावादुत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्गः। न तु तदवयवकर्माकाशादिदेशाद्विभागं करोति तदारम्भकालातीतत्वात्। प्रदेशान्तरसंयोगं तु करोत्येव अकृतसंयोगस्य कर्मणः कालात्ययाभावादिति।

(१)कारणाकारणविभागादपि कथम्? यदा हस्ते कर्मोत्पन्नमवयवान्तराद् विभागमकुर्वदाकाशादिदेशेभ्यो वि-

---

निष्क्रियस्येति। विभागेन विभागजनने कर्मणो निमित्तत्वात्तदभावान्न निष्क्रियस्य विभाग इत्यर्थः। उपपत्त्यन्तरमाह उत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्ग इति। उत्तरसंयोगो हि क्रियानिवृत्तेः कारणं स च विभागजविभागात्पूर्वसंयोगनिवृत्तौ स्यात् नहि पूर्वस्मिन् संयोगे सत्युत्तरसंयोगोत्पत्तिः संभवति। यदि च पूर्वमेव क्रिया निवर्तेत कारणाभावादुत्तरसंयोगानुत्पत्तौ कर्मणोऽनुपभोग्यत्वमपुरुषार्थत्वं च प्रसज्येतेति तात्पर्यम्। ननु तावत्कालं कर्मणोऽभ्युपगमे तदेवोत्तरं विभागमारभतां कृतं विभागेनेत्यत आह नत्विति। हेतुमाह तदेति। कर्मण एष स्वभावो यत् तदसमवायिकारणतया विभागमारभमाणं स्वोत्पत्त्यनन्तरक्षण एवारभते न क्षणान्तरे स च तस्य विभागारम्भककालो द्वितीयविभागोत्पत्तिक्षणेऽतीत इति न तस्मादस्योत्पत्तिरिति भावः। नन्वेवमुत्तरसंयोगमपि बहुक्षणव्यवधानान्न जनयेदत आह प्रदेशान्तरसंयोगमिति। उत्तरसंयोगे कर्तव्ये पूर्वसंयोगः प्रतिबन्धकः नहि क्रिया प्राप्तापरित्यागेनाप्राप्तप्राप्तये समर्था ततस्तदभाव काल एव संयोगारम्भकालः स च नातीत इति तमारभत एवेत्यर्थः। इतिशब्दः कारणमात्रविभागप्रकरणसमाप्तिसूचकः।

(१)कारणाकारणविभागजविभागं प्रश्नपूर्वकं व्युत्पादयति कारणाकारणेति। यदेति। कुतश्चित्कारणाद्धस्ते कर्मोत्पन्नं तस्य हस्तस्यावयवान्तराद्विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्यान्य-

भागानारभ्य प्रदेशान्तरे संयोगानारभते तदा ते का-
रणाकारणविभागाः कर्म यां दिशं प्रति कार्यारम्भाभि-
मुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते, तदनन्तरं
कारणाकारणसंयोगाच्च कार्याकार्यसंयोगानिति । यदि
कारणविभागानन्तरं कार्यविभागोत्पत्तिः कारणसंयोगा-
नन्तरं कार्यसंयोगोत्पत्तिः । नन्वेवमवयवावयविनोर्युत-
सिद्धिदोषप्रसङ्गः इति । न । युतसिद्ध्यपरिज्ञानात् । सा

प्रदेशैस्सह यदा संयोगं करोति तदा ते शरीरकारणस्य हस्तस्या-
कारणानामाकाशादिदेशानां च विभागाः, कर्म यस्यां दिशि कार्य-
करणाभिमुखमुत्तरसंयोगजनकं तां दिशमपेक्ष्य हस्तकार्यस्य शरी-
रस्याकार्याणामाकाशादिदेशानां विभागानारभन्ते दृश्यते हि
कुड्यादिदेशाद्धस्तस्य विभागे शरीरस्य विभागो भवतीति न चायं
शरीरक्रियाकार्यस्तदानीं शरीरस्याक्रियत्वात् नापि हस्तक्रियाका-
र्यो व्यधिकरणकर्मणो विभागहेतुत्वादर्शनात् । अतः कारणाका-
रणविभागस्तस्य कारणं कल्प्यत इत्यर्थः । अत्र समस्तविभुद्रव्य-
वाचकमादिपदम् अन्यथा विभागानिति बहुवचनमसङ्गतं स्यात् ।
प्रसङ्गतः प्राप्तं विभागजविभागानन्तरभाविनं संयोगजसंयोगमुक्त-
मपि स्मारयति तदनन्तरमिति । विभागजविभागानन्तरं शरीर-
कारणस्य हस्तस्याकारणानामाकाशादिदेशानां कर्मजात्संयोगात्
हस्तकार्यस्य शरीरस्य निष्क्रियस्याकार्याणामाकाशादिदेशानां
संयोगानारभन्ते, न हस्तकर्म तस्य स्वाश्रयदेशान्तरप्राप्तिहेतुत्वा-
दिति भावः । अत्र शङ्कते यदीति प्रसङ्ग इतीत्यन्तेन । यदि हस्ताश्रितं
शरीरं तदा हस्ते गच्छति तदपि सहैव गच्छेत् तथासति च संयो-
गविभागक्रमो न स्यात्, क्रमेण चेदनयोः संयोगविभागौ न तदा ह-
स्तगमने देहगमनमिति तस्य स्वातन्त्र्यप्रसक्तिरिति शङ्कार्थः । प-
रिहरति नेति । त्वया युतसिद्धिर्न ज्ञातेति भावः । सा का इत्यत

पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वमियन्तु नित्यानाम्
अनित्यानां तु युतेष्वाश्रयेषु समवायोः युतसिद्धिरिति ।
त्वगिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति युतेष्वाश्रयेषु
समवायोऽस्तीति परस्परेण संयोगः सिद्धः। अण्वाकाश-
योस्त्वाश्रयान्तराभावेऽप्यन्यतरस्य पृथग्गतिमत्त्वात् सं-
योगविभागौ सिद्धौ । तन्तुपटयोरनित्ययोराश्रयान्तराभा-
वात् परस्परतः संयोगविभागाभाव इति । दिगादीनान्तु
पृथग्गतिमत्त्वाभावादिति परस्परेण संयोगविभागाभाव
इति ।

आह सेति । द्वयोरेकस्य वा परस्परसंयोगविभागहेतुकर्मसमवाय-
योग्यता नित्यानामेव युतसिद्धिः द्वयोः परमाण्वोराकाशपरमाण्वो-
रन्यतरस्य च पृथग्गमनदर्शनात् । द्वयोरन्यतरस्य वा परस्परप-
रिहारेणान्यत्राश्रये समवायोऽनित्यानां युतसिद्धिः अनित्यानां
द्वयोः शकुन्याकाशयोरन्यतरस्य च शकुनेः पृथगाश्रयाश्रयित्वरूप-
समवायदर्शनात् । अनित्यानां पृथग्गतिमत्त्वं कुतो नेत्यत आह
त्वगिन्द्रियेति । तथा च तयोः पृथग्गमनाभावादयुतसिद्धता स्या-
त्, ततश्चैतयोः युतसिद्धिप्रयुक्तः परस्परसंयोगो न स्यात् इति
भावः । प्रथमयुतसिद्धिलक्षणप्रयोजनमाह अण्वाकाशयोरिति
उक्तमेवार्थं दृढयितुमन्वयं प्रदर्श्य द्विविधयुतसिद्ध्यभावे संयोगवि-
भागाभाव इत्यत्र व्यतिरेकं दर्शयति तन्तुपटयोरिति । विभूनान्तु द्व-
योरन्यतरस्य वा पृथग्गमनाभावान्न संयोगोऽतश्च न विभागः
किन्तु स्वरूपस्थितिमात्रमित्याह दिगादीनामिति । इतीत्युत्तरसमाप्तौ
हस्ते गच्छति शरीरं न गच्छतीत्येतावता न युतसिद्धिर्यदि तु हस्त-
शरीरयोः पृथगाश्रयाश्रयित्वं स्यात् तदा भवेदनयोर्युतसिद्धता त-
तु नास्ति शरीरस्य हस्ते समवेतत्वादित्युत्तरार्थः ।

(१)विनाशस्तु सर्वस्य विभागस्य क्षणिकत्वादुत्तरसंयोगावधिसद्भावात् क्षणिक इति। न तु संयोगवद्ययोरेव विभागस्तयोरेव संयोगाद्विनाशो भवति। कस्मात् ? संयुक्तप्रत्ययवद्विभक्तप्रत्ययानुवृत्त्यभावात्। तस्मादुत्तरसंयोगावधिसद्भावात् क्षणिक इति।

---

(१)एवं विभागोत्पत्तिमभिधाय तद्विनाशं व्युत्पादयति विनाशस्त्विति। सर्वस्येति त्रिविधस्येत्यर्थः। विभागस्याशुतरविनाशित्वे हेतुमाहोत्तरसंयोगावधिसद्भावादिति। उत्तरसंयोगोऽवधिः सीमा तस्य सद्भावात्क्षणिको विभाग इत्यर्थः। अयं कारको हेतुः। ज्ञापकमाह क्षणिकत्वादिति। उत्तरसंयोगावधेराशुतरविनाशस्य प्रत्यक्षसिद्धत्वादित्यर्थ इति आचार्याः। आशुतरविनाश्युत्तरसंयोगो विभागस्यावधिरिति कुतस्तत्राह नत्विति। विभागाधारयोर्द्रव्ययोः पुनः संयोगेन विभागविनाशे तस्य चिरकालस्थायित्वं स्यादित्यर्थः। नन्वेवं सति किमनिष्टं स्यादिति प्रश्नपूर्वकं समाधत्ते संयुक्तप्रत्ययवदिति। यथा संयुक्तप्रत्ययश्चिरस्थायी नैवं स्वाश्रयस्य देशान्तरसंयोगे भूते विभक्तप्रत्ययानुवृत्तिरतस्तस्य संयोगमात्रेणैव निवृत्तिरिति भावः। उपसंहरति तस्मादिति। इदमत्र तात्पर्यम्—संयोगप्रत्यभिज्ञाया जागरूकत्वात् संयोगश्चिरमनुवर्तते एव नहि यस्य कस्यचिद्विभागात् संयोगो विनश्यति अवयवसंयोगविनाशे द्रव्यानुत्पादप्रसङ्गात् नोदनाद्यनुपपत्तेश्च, तस्माद्ययोः संयोगस्तयोरेव विभागात्तत्याश्रये तस्य विनाश इति स्थितिः। विभागस्य प्रत्ययानुवृत्त्यभावाच्चिरकालस्थायित्वमनुपपन्नं किमपि निवर्तकमिष्यते। न च कर्मैवास्य निवर्तकमुत्तरविभागानुत्पत्तिप्रसङ्गात्तस्मादुत्तरसंयोगादेवास्य विनाशः नहि उत्तरसंयोगे च संयुक्तप्रत्ययवद्विभक्तप्रत्ययानुवृत्तिस्तस्मात्क्षणिक इति। अधिकं किरणावल्यादौ द्रष्टव्यम्।

(१)क्वचिच्चाश्रयविनाशादेव विनश्यतीति। कथम्? यदा द्वितन्तुककारणावयवे अंशौ कर्मोत्पन्नमंश्वन्तराद्विभागमारभते तदैव तन्त्वन्तरेऽपि कर्मोत्पद्यते विभागाच्च तन्त्वारम्भकसंयोगविनाशः तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः। ततो यस्मिन्नेव काले विभागात् तन्तुसंयोगविनाशः तस्मिन्नेव काले संयोगविनाशात् तन्तुविनाशस्तस्मिन् विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति। एवं तर्ह्युत्तरविभागानुत्पत्तिप्रसङ्गः कारणविभागाभावात् ततः, प्रदेशान्तरसंयोगवति संयोगाभाव इत्यतो विरोधिगुणासम्भवात् कर्मणश्चिरकालावस्थायित्वं नित्यद्रव्यसमवेतस्य च नि-

---

(१)एवं साधारणं विनाशकमुक्त्वाऽसाधारणमाह क्वचिदिति।
प्रश्नपूर्वकं तदेव व्युत्पादयति यदेति। द्वितन्तुकपटकारणं तन्तुस्तद-
वयवैशौ कर्मोत्पन्नमंश्वन्तरस्यांशोर्विभागमारभते तदैव तन्त्वन्तरेपि
कर्म विभागाच्च तन्त्वारम्भकसंयोगविनाशः तन्तुकर्मणा तन्त्वन्तरा-
द्विभागश्चेत्येकः कालः। ततो यदा विभागात्तन्तुसंयोगविनाशः त-
दैवांश्वोः संयोगविनाशात्तन्तुविनाशस्तन्नाशे तदाश्रितस्य त-
न्त्वन्तरविभागस्य विनाश इत्याश्रयनाशाद्विभागविनाश इत्यर्थः।
पुनः शङ्कते एवं तर्हीति। कारणविभागः द्रव्यनाशविशिष्टकालं स्व-
तन्त्रं वाऽवयवमपेक्ष्योत्तरविभागं करोति इति प्राक् सिद्धान्तितम् स
चाश्रयविनाशादपेक्षाकारणमप्राप्यैव विनष्ट इति कारणाभावादुत्तर-
विभागानुत्पत्तिः प्रसज्यत इत्यर्थः। ततः किमत आह तत
इति। उत्तरविभागोत्पत्त्या पूर्वसंयोगनिवृत्तौ उत्तरसंयोगः स्या-
त् प्रतिबन्धकपूर्वसंयोगसद्भावे उत्तरसंयोगो नोत्पद्यत इत्यर्थः।

त्यत्वमिति दोषः । कथम् ? यदाप्यद्व्यणुकारम्भकपरमाणौ कर्मोत्पन्नमण्वन्तराद्विभागं करोति तदैवाण्वन्तरेऽपि कर्म ततो यस्मिन्नेव काले विभागाद् द्रव्यारम्भकसंयोगविनाशः तदैवाण्वन्तरकर्मणा द्व्यणुकाण्वोर्विभागः क्रियते ततो यस्मिन्नेव काले विभागात् द्व्यणुकाणुसंयोगस्य विनाशः तस्मिन्नेव काले संयोगविनाशात् द्व्यणुकस्य विनाशः तस्मिन् विनष्टे तदाश्रितस्य द्व्यणुकाणुविभागस्य विनाशः । ततश्च विरोधिगुणासम्भवान्नित्यद्रव्यसमवेतकर्मणो नित्यत्वमिति । तन्त्वंश्वन्तराद्विभागाद्विभाग इत्यदोषः । आश्रयविनाशात्तन्त्वोरेव विभागो विनष्टो न तन्त्वंश्वन्तरविभाग इति एतस्मादुत्तरो विभागो जायते

ततोऽपि किमत आह अत इति । उत्तरसंयोगस्य विनाशकस्याभावाद्यावदाश्रयविनाशं कर्मावतिष्ठेतेत्यर्थः । एतच्चानिष्टं प्रमाणबाधितत्वात् । नित्यत्वमपि कर्मणः स्यादित्याह नित्यद्रव्येति । तदेव प्रश्नपूर्वकं व्युत्पादयति कथं यदेति नित्यत्वमित्यन्तेन । अण्वन्तरादारम्भकसंयोगिनः । अण्वन्तरेऽनारम्भकसंयोगिनि । द्व्यणुकारम्भकपरमाणुकर्मणा द्रव्यारम्भकसंयोगविरोधिविभागोत्पादसमकालमनारम्भककर्मचिन्तनादेतल्लभ्यत इति सङ्क्षेपः । अक्षरार्थः स्पष्टः । परिहरति तन्त्वंश्वन्तरेति । विभाग उत्तरो विभागः, इत्यतो हेतोः कर्मणः कालान्तरावस्थायित्वमित्यदोष इत्यर्थः । एतद्विशदयति आश्रयेति । यदा तन्तौ वर्तमानेन कर्मणा तन्त्वन्तराद्विभागः क्रियते तदा तदवयवादंशोरपि विभागः क्रियते अङ्गुलिकर्मणा कुड्यविभागसमकालं कुड्यावयवविभागवत्, स च विभागो विनाशकाभावादस्त्येव तस्मादुत्तरो विभागः संजायते अ-

अङ्गुल्याकाशविभागाच्छरीराकाशविभागवत् तस्मिन्नेव काले कर्म संयोगं कृत्वा विनश्यतीत्यदोषः ।

(१)अथवा अंश्वन्तरविभागोत्पत्तिसमकालं तस्मिन्नेव तन्तौ कर्मोत्पद्यते ततोंऽश्वन्तरविभागात् तन्त्वारम्भकसंयोगविनाशः तन्तुकर्मणा च तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः । ततः संयोगविनाशात् तन्तुविनाशः तद्विनाशाच्च तदाश्रितयोर्विभागकर्मणोर्युगपद्विनाशः ।

(२)तन्तुवीरणयोर्वा संयोगे सति द्रव्यानुत्पत्तौ पूर्वोक्तेन विधानेनाश्रयविनाशसंयोगाभ्यां तन्तुवीरणविभागवि-

---

ङ्गुल्याकाशविभागाच्छरीराकाशविभागवदिति भावः । तस्मिन्नेवेति । उत्तरविभागकाल इत्यर्थः तथाच पूर्वसंयोगरूपप्रतिबन्धकाभावे तन्तुसमवेतं कर्मोत्तरसंयोगं कृत्वा विनश्यतीत्यदोष इति परिहारार्थः ।

(१)प्रकारान्तरेणाश्रयनाशाद्विभागनाशमाहाथवेति । तथा चास्मिन्पक्षे यत्रैवावयवे क्रियाविभाग आरब्धस्तस्यैवावयवक्रियाविभागादिन्यायेन विनाशात् सह कर्मणा विभागविनाश इति भावः । अक्षरार्थः स्पष्टः ।

(२)एवमुत्तरसंयोगादाश्रयनाशाच्च प्रत्येकं विभागनाशं व्युत्पाद्य द्वाभ्यां समुच्चिताभ्यां तमाह तन्तुवीरणयोर्वेति । पूर्वोक्तेन विधानेनेति । तन्त्वारम्भकांशौ कर्मोत्पत्तिसमकालं वीरणे कर्म ततोंऽशुक्रिययांश्वन्तराद्विभागो वीरणकर्मणा च तस्य विभज्यमानावयवेन तन्तुनाऽऽकाशदेशेन च समं विभागः ततोंऽशुविभागादंशुसंयोगनाशो वीरणविभागाच्च तन्तुवीरणसंयोगस्याकाशवीरणसंयोगस्य च विनाशः ततोंऽशुसंयोगविनाशात्तन्तुविनाशो वीरणस्य चोत्तरसंयोगोऽत उत्तरसंयोगाश्रयनाशाभ्यां तन्तुवीरणविभागनाश इति पूर्वोक्तप्रक्रियाऽत्र द्रष्टव्येत्यर्थः ।

नाश इति ॥

(१२) परत्वापरत्वप्रकरणम् ।

(१)परत्वमपरत्वं च परापराभिधानप्रत्ययनिमित्तम् । तत्तु द्विविधं (२)दिक्कृतं कालकृतं च । तत्र दिक्कृतं दिग्विशेषप्रत्यायकम् । कालकृतं च वयोभेदप्रत्यायकम् ।

तत्र दिक्कृतस्योत्पत्तिरभिधीयते । कथम्? (३)एकस्यां

अत्र (२९१) सूत्रं प्रकरणसमाप्तिपर्यन्तं द्रष्टव्यम् ।

(१२)परत्वापरत्वप्रकरणम् ।

(१)परस्परानुविद्धव्यवहारकारणतया व्युत्पत्तिवैशद्यार्थं संक्षेपार्थं चैकग्रन्थेन परत्वापरत्वं व्युत्पादयति परत्वमपरत्वञ्चेति । यथासंख्यं परापराभिधानयोः परापरप्रत्यययोश्च निमित्तं विशेषणं । यद्विशिष्टे द्रव्ये परमित्यभिधानं प्रत्ययो वा तत्परत्वम् यद्विशिष्टे द्रव्येऽपरमित्यभिधानं प्रत्ययो वा तदपरत्वमिति लक्षणं प्रमाणं च बोध्यम् । ननु दैशिकयोस्तयोः किं प्रमाणं परापरबुद्ध्योः संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वाभ्यामन्यथासिद्धेरिति चेत् न तथासति प्रमातर्यपि तद्व्यवहारप्रसङ्गात् भवति हि काशी मत्तः परेति धीर्न तु काशीतोऽहं पर इति । यथा भेर्याकाशसंयोग आकाश एव शब्दं जनयति न भेर्याम् तथा संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वाऽविशेषेपि कारणशक्तिनियमात्प्रमेय एव परत्वापरत्वयोरुत्पादो न प्रमातरीति संक्षेपः । अत्र (३०२) सूत्रम् ।

(२)कारणभेदाद्भेदमाह दिक्कृतं कालकृतं चेति । दिक्पिण्डसंयोगकृतं दिक्कृतं कालपिण्डसंयोगकृतं कालकृतञ्चेत्यर्थः । कार्यभेद उक्तभेदनिमित्तमित्याह दिक्कृतं दिग्विशेषप्रत्यायकं कालकृतं वयोभेदप्रत्यायकमिति ।

(३)तयोर्दिक्कृतपरत्वापरत्वोत्पत्तिमाह एकस्यामिति । एकस्यां दिशि प्राच्यामवस्थितयोः पिण्डयोर्मध्ये एकस्य द्रष्टुः

द्विश्यवस्थितयोः पिण्डयोः संयुक्तसंयोगबहुत्वभावे सत्ये-
कस्य द्रष्टुः सन्निकृष्टमवधिं कृत्वा एतस्माद्विप्रकृष्टो-
ऽयमिति परत्वाधारेऽसन्निकृष्टा बुद्धिरुत्पद्यते। ततस्ता-
मपेक्ष्य परेण दिक्प्रदेशेन संयोगात् परत्वस्योत्पत्तिः।
तथा विप्रकृष्टं चावधिं कृत्वा एतस्मात् सन्निकृष्टोऽयमि-
त्यपरत्वाधारे इतरस्मिन् सन्निकृष्टा बुद्धिरुत्पद्यते। त-
तस्तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः।

(१)कालकृतयोरपि कथम्? वर्तमानकालयोरनियत-

संयुक्तेन भूप्रदेशेन सहापरस्य प्रदेशस्य संयोगः तेनापि सम-
मपरस्येति संयुक्तसंयोगानां बहुत्वे सत्यल्पसंयोगवन्तं पिण्डं
संनिकृष्टमवधिं कृत्वैतस्मात् पिण्डाद्विप्रकृष्टोऽयमिति संयोगभूयस्त्व-
वति भविष्यतः परत्वस्याधारे पिण्डे विप्रकृष्टा बुद्धिरुदेति ततस्तां
बुद्धिमपेक्ष्य परेण संयोगभूयस्त्ववता दिक्प्रदेशेन संयोगादसमवा-
यिकारणाद्विप्रकृष्टे पिंडे समवायिकारणे परत्वोत्पत्तिरित्यर्थः। एवं
द्रष्टुः स्वशरीरापेक्षया संयुक्तसंयोगभूयस्त्ववन्तं विप्रकृष्टमवधिं
कृत्वेतरत्र संयुक्तसंयोगाल्पीयस्त्वयुक्ते सनिकृष्टा बुद्धिरुदेति तां
निमित्तीकृत्यापरेण संयुक्तसंयोगाल्पीयस्त्वविशिष्टेन दिक्प्रदेशेन सह
संयोगादसमवायिनः संनिकृष्टपिण्डे समवायिन्यपरत्वोत्पत्तिर्बोध्या।
अत्र एकदिङ्नियमान्न सर्वत्र, एकद्रष्टृनियमान्न सर्वथा, अपेक्षाबु-
द्धिनियमान्न सर्वदा परत्वाद्युत्पाद इत्यवधेयम्। सनिकृष्टत्वविप्र-
कृष्टत्वयोरपेक्षाबुद्धिविशेषयोश्च स्वकारणत उत्पत्तेः स्वप्रमाणात्प्र-
तीतेश्च परस्परानपेक्षत्वान्नेतरेतराश्रयदोष इत्याचार्याः।

(१)एवं समवाय्यसमवायिनिमित्तेभ्यः पिण्डदिक्पिण्डसंयोगा-
पेक्षाबुद्धिभ्यः दिक्कृतपरत्वापरत्वोत्पत्तिमुक्त्वा कालकृतयोस्तयो-
रुत्पत्तिमाह कालकृतयोरपीति। कथमित्याक्षेपे। समाधानमाह व-
र्तमानकालयोरिति। अवर्तमानस्य समवायित्वेऽवधित्वमसम्भवी-

नाश इति ॥

(१२) परत्वापरत्वप्रकरणम् ।

(१)परत्वमपरत्वं च परापराभिधानप्रत्ययनिमित्तम् । तत्तु द्विविधं (२)दिक्कृतं कालकृतं च । तत्र दिक्कृतं दिग्विशेषप्रत्यायकम् । कालकृतं च वयोभेदप्रत्यायकम् ।

तत्र दिक्कृतस्योत्पत्तिरभिधीयते। कथम्? (३)एकस्यां

अत्र (२९१) सूत्रं प्रकरणसमाप्तिपर्यन्तं द्रष्टव्यम् ।

(१२)परत्वापरत्वप्रकरणम् ।

(१)परस्परानुविद्धव्यवहारकारणतया व्युत्पत्तिवैशद्यार्थं संक्षेपार्थं चैकग्रन्थेन परत्वापरत्वं व्युत्पादयति परत्वमपरत्वञ्चेति । यथासंख्यं परापराभिधानयोः परापरप्रत्यययोश्च निमित्तं विशेषणं । यद्विशिष्टे द्रव्ये परमित्यभिधानं प्रत्ययो वा तत्परत्वम् यद्विशिष्टे द्रव्येऽपरमित्यभिधानं प्रत्ययो वा तदपरत्वमिति लक्षणं प्रमाणं च बोध्यम् । ननु दैशिकयोस्तयोः किं प्रमाणं परापरबुद्ध्योः संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वाभ्यामन्यथासिद्धेरिति चेत् न तथासति प्रमातर्यपि तद्व्यवहारप्रसङ्गात् भवति हि काशी मत्तः परेति धीर्न तु काशीतोऽहं पर इति । यथा भेर्याकाशसंयोग आकाश एव शब्दं जनयति न भेर्याम् तथा संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वाऽविशेषेपि कारणशक्तिनियमात्प्रमेय एव परत्वापरत्वयोरुत्पादो न प्रमातरीति संक्षेपः । अत्र (३०२) सूत्रम् ।

(२)कारणभेदाद्भेदमाह दिक्कृतं कालकृतं चेति । दिक्पिण्डसंयोगकृतं दिक्कृतं कालपिण्डसंयोगकृतं कालकृतञ्चेत्यर्थः । कार्यभेद उक्तभेदनिमित्तमित्याह दिक्कृतं दिग्विशेषप्रत्यायकं कालकृतं वयोभेदप्रत्यायकमिति ।

(३)तयोर्दिक्कृतपरत्वापरत्वोत्पत्तिमाह एकस्यामिति । एकस्यां दिशि प्राच्यामवस्थितयोः पिण्डयोर्मध्ये एकस्य द्रष्टुः

दिश्यवस्थितयोः पिण्डयोः संयुक्तसंयोगबह्वल्पभावे सत्येकस्य द्रष्टुः सन्निकृष्टमवधिं कृत्वा एतस्माद्विप्रकृष्टोऽयमिति परत्वाधारेऽसन्निकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्य परेण दिक्प्रदेशेन संयोगात् परत्वस्योत्पत्तिः। तथा विप्रकृष्टं चात्रावधिं कृत्वा एतस्मात् सन्निकृष्टोऽयमित्यपरत्वाधारे इतरस्मिन् सन्निकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः।

(१)कालकृतयोरपि कथम्? वर्तमानकालयोरनियत-

संयुक्तेन भूप्रदेशेन सहापरस्य प्रदेशस्य संयोगः तेनापि समसंयुक्तेन ... मपरस्येति संयुक्तसंयोगानां बहुत्वे सत्यल्पसंयोगवन्तं पिण्डं संनिकृष्टमवधिं कृत्वैतस्मात् पिण्डाद्विप्रकृष्टोऽयमिति संयोगभूयस्त्ववति भविष्यतः परत्वस्याधारे पिण्डे विप्रकृष्टा बुद्धिरुदेति ततस्तां बुद्धिमपेक्ष्य परेण संयोगभूयस्त्ववता दिक्प्रदेशेन संयोगादसमवायिकारणाद्विप्रकृष्टे पिंडे समवायिकारणे परत्वोत्पत्तिरित्यर्थः। एवं द्रष्टुः स्वशरीरापेक्षया संयुक्तसंयोगभूयस्त्ववन्तं विप्रकृष्टमवधिं कृत्वेतरत्र संयुक्तसंयोगाल्पीयस्त्वयुक्ते सन्निकृष्टा बुद्धिरुदेति तां निमित्तीकृत्यापरेण संयुक्तसंयोगाल्पीयस्त्वविशिष्टेन दिक्प्रदेशेन सह संयोगादसमवायिनः संनिकृष्टपिण्डे समवायिन्यपरत्वोत्पत्तिर्बोध्या। अत्र एकदिङ्नियमान्न सर्वत्र, एकद्रष्टृनियमान्न सर्वथा, अपेक्षाबुद्धिनियमान्न सर्वदा परत्वाद्युत्पाद इत्यवधेयम्। सन्निकृष्टत्वविप्रकृष्टत्वयोरपेक्षाबुद्धिविशेषयोश्च स्वकारणत उत्पत्तेः स्वप्रमाणात्प्रतीतेश्च परस्परानपेक्षत्वान्नेतरेतराश्रयदोष इत्याचार्याः।

(१)एवं समवाय्यसमवायिनिमित्तेभ्यः पिण्डदिक्पिण्डसंयोगापेक्षाबुद्धिभ्यः दिक्कृतपरत्वापरत्वोत्पत्तिमुक्त्वा कालकृतयोस्तयोरुत्पत्तिमाह कालकृतयोरपीति। कथमित्याक्षेपे। समाधानमाह वर्तमानकालयोरिति। अवर्तमानस्य समवायित्वेऽवधित्वमसम्भवी-

दिग्देशसंयुक्तयोर्युवस्थविरयो रूढश्मश्रुकार्कश्यवलिप-लितादिसान्निध्ये सत्येकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थ-विरे विप्रकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्य परेण का-लप्रदेशेन संयोगात् परत्वस्योत्पत्तिः । स्थविरं चावधिं कृत्वा यूनि सन्निकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्याप-रेण कालप्रदेशेन संयोगादपरत्वस्योत्पत्तिरिति ।

(१)विनाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यनाशात् । अपे-क्षाबुद्धिविनाशात् तावदुत्पन्ने परत्वे यस्मिन् काले

ति वर्तमानयोरित्युक्तम् । दिक्कृतव्यवच्छेदायानियतादिग्देशेति । तथा चानियतदिग्देशयोरेकदिगवस्थितयोर्भिन्नदिगवस्थितयोर्वा युवस्थविरयो रूढश्मश्रुकार्कश्यवलिपलितानां कालविप्रकर्षलिङ्गा-नां सांनिध्ये सत्येकस्य द्रष्टुर्युवानं रूढश्मश्रुकार्कश्याद्यभावानु-मितमल्पोत्पत्तिकालमवधिं कृत्वा रूढश्मश्रुवलिपलितादियुक्ते स्थ-विरे विप्रकृष्टा बुद्धिरुत्पद्यते तां बुद्धिमपेक्ष्य परेणादित्यपरिवर्तन-भूयस्त्ववता कालप्रदेशेन संयोगादसमवायिकारणात् तस्मिन्स्थ-विरे समवायिनि परत्वस्योत्पत्तिः । स्थविरं चावधिं कृत्वा यूनि सं-निकृष्टा बुद्धिरुत्पद्यते तां बुद्धिमपेक्ष्यापरेणाल्पादित्यपरिवर्तनोप-लक्षितेन कालप्रदेशेन संयोगादसमवायिकारणात् यूनि समवा-यिनि अपरत्वस्योत्पत्तिरित्यर्थः । पलितादीत्यत्र परिमाणसाम-र्थ्योऽनतीन्द्रियापाटवविशेषा आदिपदग्राह्याः । बहुतरतपनपरि-स्पन्दान्तरितजन्मत्वं विप्रकृष्टत्वम् अल्पतरतमोपहवहनव्यवहितज-न्मत्वं सनिकृष्टत्वं चात्र बोध्यम् इति किरणावली (अत्र ३०३ सूत्रम्)

(१)एवमुत्पत्तिं निरूप्य विनाशमाह विनाशस्त्विति । स च—

अपेक्षाबुद्धिसंयोगद्रव्यसंयोगनाशनात् ।

पृथक् द्वाभ्यां च सर्वेभ्यो विनाशः सप्तधाऽनयोः ॥

इत्युक्तरीत्या सप्तविधो ज्ञेयः । तत्रापेक्षाबुद्धिविनाशहेतुकन्तमा-

सामान्यबुद्धिरुत्पन्ना भवति ततोऽपेक्षाबुद्धेर्विनश्यत्ता सामान्यज्ञानतत्सम्बन्धेभ्यः परत्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । ततोऽपेक्षाबुद्धेर्विनाशो गुणबुद्धेश्चोत्पत्तिः ततोऽपेक्षाबुद्धिविनाशाद्गुणस्य विनश्यत्ता गुणज्ञानतत्सम्बन्धेभ्यो द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः । ततो द्रव्यबुद्धेरुत्पत्तिर्गुणस्य विनाश इति ।

संयोगविनाशादपि कथम् ? (१)अपेक्षाबुद्धिसमकालमेव परत्वाधारे कर्मोत्पद्यते तेन कर्मणा दिक्पिण्डविभागः क्रियते अपेक्षाबुद्धितः परत्वस्योत्पत्तिरित्येकः कालः । ततः सामान्यबुद्धेरुत्पत्तिः दिक्पिण्डसंयोगस्य च विनाशः ततो यस्मिन् काले गुणबुद्धिरुत्पद्यते त-

---

ह्यपेक्षाबुद्धिविनाशात्तावदिति । तावच्छब्दः क्रमे । यस्मिन्नेव क्षणे परत्वोत्पादानन्तरं परत्वसामान्यज्ञानं जायते तदेवापेक्षाबुद्धिविनाशहेतुत्वानिश्चयम् । परत्वसामान्यतज्ज्ञानपरत्वगुणसम्बन्धेभ्यश्च परत्वगुणबुद्धिरित्येकः क्षणः । परत्वसामान्यज्ञानस्यापेक्षाबुद्धिनाशकारणता गुणबुद्ध्युत्पत्तिहेतुता चेति सामान्यज्ञानोत्पादकाल एवापेक्षाबुद्धेर्विनश्यता गुणबुद्धेश्चोत्पद्यमानतेति भावः । ततोऽन्यक्षणेऽपेक्षाबुद्धेर्विनाशः परत्वगुणबुद्ध्युत्पादश्च तत अपेक्षाबुद्धिनाशात् गुणस्य विनश्यत्ता गुणतज्ज्ञानतत्सम्बन्धेभ्यश्च द्रव्यबुद्धेरुत्पद्यमानतेत्यपरः क्षणः । युगपदुद्भूतापेक्षाबुद्धिनाशगुणबुद्ध्युत्पादाभ्यां गुणविनाशद्रव्यबुद्धिहेतुभ्यां गुणस्यापि विनश्यत्ता द्रव्यबुद्धेरुत्पद्यमानता च युगपदेवेत्यत्र बोध्यम् । ततः परत्वविशिष्टद्रव्यबुद्धिः परत्वगुणविनाशश्चेति ।

(१)द्वितीयमाहापेक्षाबुद्धिसमकालमिति । अत्रेयं प्रक्रिया–अपेक्षा-

स्मिन्नेव काले दिक्पिण्डसंयोगविनाशाद्गुणस्य विनाशः।

द्रव्यविनाशादपि कथम्? (१)परत्वाधारावयवे कर्मोत्पन्नं यस्मिन्नेव कालेऽवयवान्तराद्विभागं करोति तस्मिन्नेव कालेऽपेक्षाबुद्धिरुत्पद्यते ततो विभागाद्यस्मिन्नेव काले संयोगविनाशः तस्मिन्नेव काले परत्वमुत्पद्यते ततः संयोगविनाशाद् द्रव्यविनाशः तद्विनाशाच्च तदाश्रितस्य गुणस्य विनाशः।

द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्? (२)यदा परत्वाधारावयवे कर्मोत्पद्यते तदैवापेक्षाबुद्धिरुत्पद्यते कर्मणा चाऽवयवान्तराद्विभागः क्रियते परत्वस्योत्पत्तिरित्येकः कालः। ततो यस्मिन्नेव कालेऽवयवविभागाद् द्रव्यारम्भकसंयोगविनाशस्तस्मिन्नेव काले

बुद्धिकर्मणी—परत्वोत्पत्तिदिक्पिण्डविभागौ १ परत्वसामान्यबुद्धिर्दिक्पिण्डसंयोगविनाशौ २। सामान्यबुद्धेरपेक्षाबुद्धिविनाशगुणबुध्युत्पादौ दिक्पिण्डसंयोगनाशात् परत्वनाश इति। अपेक्षाबुद्धिनाशस्तु परत्वनाशसमसमयभावित्वात् न तदुत्पादक इति बोध्यम्।

(१)तृतीयमाह परत्वाधारावयवे इति। परत्वाधारावयवक्रियाजन्यविभागसमकालमपेक्षाबुद्धिचिन्तने इयं प्रक्रिया—पिण्डावयवविभागापेक्षाबुद्धी, संयोगनाशपरत्वोत्पादौ, १ द्रव्यनाशपरत्वसामान्यज्ञाने २ परत्वनाशगुणबुद्धी इति।

(२)द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशेन चतुर्थीं विधामाह यदा परत्वाधारावयव इति। पिण्डावयवकर्मसमकालमपेक्षाबुद्ध्युत्पत्तिचिन्तने एतल्लभ्यते। तथाहि परत्वाधारावयवकर्मापेक्षाबुद्धी, अवयवान्तरविभागपरत्वोत्पत्ती १ आरम्भकसंयोगनाशसामान्यज्ञा-

सामान्यबुद्धिरुत्पद्यते तदनन्तरं संयोगविनाशाद् द्रव्यविनाशः सामान्यबुद्धेश्चापेक्षाबुद्धिविनाश इत्येकः कालः । ततो द्रव्यापेक्षाबुद्ध्योर्विनाशात् परत्वस्य विनाशः ।

द्रव्यसंयोगविनाशादपि कथम् ? (१)यदा परत्वाधारावयवे कर्मोत्पन्नमवयवान्तराद्विभागं करोति तस्मिन्नेव काले पिण्डकर्मापेक्षाबुद्ध्योर्युगपदुत्पत्तिः ततो यस्मिन्नेव काले परत्वस्योत्पत्तिस्तस्मिन्नेव काले विभागाद् द्रव्यारम्भकसंयोगविनाशः पिण्डकर्मणा दिक्पिण्डस्य च विभागः क्रियते इत्येकः कालः । ततो यस्मिन्नेव काले सामान्यबुद्धिरुत्पद्यते तस्मिन्नेव काले द्रव्यारम्भकसंयोगविनाशात् पिण्डविनाशः पिण्डविनाशाच्च पिण्डसंयोगविनाशः ततो गुणबुद्धिसमकालं पिण्डदिक्पिण्डसंयोगविनाशात् परत्वस्य नाशः ।

ने द्रव्यनाशापेक्षाबुद्धिनाशौ २ अथ परत्वस्य नाश इति३ ।

(१)द्रव्यसंयोगविनाशाभ्यां पञ्चमीं विधामाह यदेति । पिण्डावयवकर्मापेक्षाबुद्धियौगपद्यचिन्तनपक्षे हीयं प्रक्रिया–अवयवविभागपिण्डकर्मापेक्षाबुद्धयः अवयवसंयोगनाशदिक्पिण्डविभागपरत्वोत्पत्तयः १ द्रव्यनाशदिक्पिण्डसंयोगनाशपरत्वसामान्यबुद्धयः २ अथ ताभ्यां नाशाभ्यां परत्वनाशः ३ । सामान्यबुद्धेर्गुणबुद्ध्युत्पाद अपेक्षाबुद्धेश्च विनाश इति । अत एवास्य न परत्वनाशकता तदानीमपि सामान्यबुद्धेरुत्पादकस्य सत्त्वात् इति बोध्यम् ।

संयोगापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्? (१)यदा परत्वमुत्पद्यते तदा परत्वाधारे कर्म ततो यस्मिन्नेव काले परत्वसामान्यबुद्धिरुत्पद्यते तस्मिन्नेव काले पिण्डकर्मणा दिक्पिण्डविभागः क्रियते ततः सामान्यबुद्धितोऽपेक्षाबुद्धिविनाशो विभागाच्च दिक्पिण्डसंयोगविनाश इत्येकः कालः। ततः संयोगापेक्षाबुद्धिविनाशात् परत्वस्य विनाशः।

त्रयाणां समवाय्यसमवायिनिमित्तकारणानां युगपद् विनाशादपि कथम्? (२)यदापेक्षाबुद्धिरुत्पद्यते तदा पिण्डावयवे कर्म ततो यस्मिन्नेव काले कर्मणाऽवयवान्तराद्विभागः क्रियतेऽपेक्षाबुद्धेः परत्वस्य चोत्पत्तिस्तस्मिन्नेव काले पिण्डेऽपि कर्म ततोऽवयवविभागात् पिण्डारम्भकसंयोगविनाशः पिण्डकर्मणा च दिक्पिण्डविभागः क्रियते सामान्यबुद्धेश्चोत्पत्तिरित्येकः कालः।

---

(१)संयोगनाशापेक्षाबुद्धिनाशाभ्यां षष्ठीमाह यदा परत्वमुत्पद्यत इति। परत्वोत्पादकाले पिण्डकर्मचिन्तनादेतल्लभ्यते तथाहि परत्वोत्पत्तिपिण्डकर्मणी सामान्यज्ञानदिक्पिण्डविभागौ अपेक्षाबुद्धिनाशदिक्पिण्डसंयोगनाशौ १ ततः परत्वस्य नाश इति २।

(२)समवाय्यसमवायिनिमित्तानां युगपद्विनाशेन सप्तमीं विधामाह यदाऽपेक्षाबुद्धिरिति। परत्वोत्पत्त्यवयवविभागोत्पत्तिसमकालं पिण्डकर्मचिन्तनयैतल्लभ्यम्। तथाहि अपेक्षाबुद्ध्यवयवकर्मभ्यां परत्वावयवविभागौ स्वकारणात्पिण्डकर्म १ परत्वसामान्यज्ञानमवयवसंयोगनाशः दिक्पिण्डविभागश्च २ ततोऽपेक्षाबुद्धिवि-

ततः संयोगविनाशात् पिण्डविनाशः विभागाच्च दिक्-पिण्डसंयोगविनाशः सामान्यज्ञानादपेक्षाबुद्धेर्विनाश इत्येतत् सर्वं युगपत्त्रयाणां समवाय्यसमवायिनिमित्तकारणानां विनाशात् परत्वस्य विनाश इति ॥

(१३)बुद्धिप्रकरणम्।

(१)बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः।

नाशद्रव्यनाशदिक्पिण्डसंयोगनाशाः तेभ्यः परत्वनाश इति। परत्वस्येत्यपरत्वस्योपलक्षणार्थम् तत्रापि इयं रीतिर्विभाव्येति भावः।

स्वतन्त्रं भाष्यम्।

(१३) बुद्धिप्रकरणम्।

(१)बुद्धिजे परत्वापरत्वे निरूप्य प्रसङ्गाद्बुद्धिं निरूपयति बुद्धिरिति। इच्छासाक्षात्कारणाऽऽत्मविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं बुद्धित्वमित्यर्थः। यद्यपि बुद्धिर्ज्ञानमित्येतावतैव स्वरूपं यस्मिन्सति जानामीत्यनुव्यवसायो भवति सा बुद्धिरिति तथापि बुद्ध्यादिशब्दानां केचिद्भेदमाहुस्तन्निरासाय पर्यायोत्कीर्तनम्। सांख्या हि—"प्रकृतेः प्रथमपरिणामं महदाख्यमन्तःकरणविशेषं बुद्धिमाहुः। बुद्धेर्विषयाकारः परिणामविशेषो घटपट—इत्यादिज्ञानमाचक्षते। आदर्शरूपायां स्वच्छायां बुद्धौ वर्तमानेन ज्ञानेन चितिशक्तेः पुरुषस्य भेदाग्रहात्तद्दभिमानमुपलब्धिं प्रचक्षते। सुखादयश्च परिणामविशेषा एवेति" तदनेन निरस्तमित्यर्थः। अन्तःकरणन्तु वैशेषिके मन एव, तदधिकविजातीयमहदाख्यान्तःकरणे प्रमाणाभावात्। विषयहानोपादानानुगुणमुत्पादव्ययशीलमेकन्तदधिकरणञ्चापरं यस्य तदुत्पादात्प्रवृत्तिनिवृत्ती स्याताम् इत्युभयं प्रत्यात्ममनुभूयते न प्रकारान्तरम्। बुद्धिवृत्तिश्च परामिमता तदन्याऽनन्या वा? आद्ये वृत्तिवृत्तिमतोरैकान्तिकतादात्म्यन्तदभिमतं न स्यात्। द्वितीये बुद्धेरेकत्वेन तद्वृत्तीनामप्येकत्वात् त्रिचतुरादिप्रत्ययो दुर्लभः। तदुक्तम्—"वृत्तीनां वा नानात्वे बुद्धेरपि नानात्वादेकत्वव्याघात इति" अलं प्रपञ्चितेन।

(१)सा चानेकप्रकाराऽर्थानन्त्यात्प्रत्यर्थनियतत्वाच्च ॥

(२)तस्याः सत्यप्यनेकविधत्वे समासतो द्वे विधे—विद्या चाविद्या चेति। तत्राविद्या चतुर्विधा संशयविप-

(१)विषयतस्तद्भेदमाह सा चेति। अर्थानन्त्येऽपि बुद्धेरनेकविधत्वे किमायातन्तत्राह प्रत्यर्थनियतत्वाच्चेति। तथाच प्रतिविषयमस्मदादिबुद्धीनां नियतत्वेनार्थानामनन्ततया बुद्धिरपि अनन्तेति भावः।

(२)कारणतस्तमाहतस्या इति। विद्येति। विशेष्यावृत्त्यप्रकारकं ज्ञानं विद्या तद्विपरीतं मिथ्याज्ञानमविद्येत्यर्थः। पश्चादुद्दिष्टामपि अविद्यां प्रतिपादनमात्रस्य विवक्षितत्वात्प्रथममाहेति श्रीधरः। विद्यापूर्वकत्वादविद्यायाः पश्चादुक्ताया अपि लघुप्रतिपत्तिकत्वात्प्रथमं विभागमाह तत्रेतीति आचार्याः। अथ संशयं निर्णयश्चान्तरा संशयात्प्रच्युतस्य निर्णयं चाप्राप्तस्य प्रमाणानामनुग्राहक ऊहापरनामा प्रसङ्गात्मा तर्को दृश्यते स कथं न गणितः? न चायं संशयः एककोटिकत्वात्, नापि निर्णयोऽयथार्थत्वात्, सत्यज्ञानरूपत्वादेव चास्यानध्यवसायरूपता स्वप्नरूपता च निवृत्ता, तदनङ्गीरे परस्यानिष्टापादनरूपः प्रसङ्गोऽपि न स्यादिति चेत्

अत्र कन्दलीकाराः—किं परपक्षाभावप्रतीतिस्तर्कः किं वा स्वपक्षसम्भावना? आद्ये प्रमाणमेवेदं यद्ययमात्मोत्पत्तिधर्मकस्तदैकस्यानेकशरीरादिसंयोगलक्षणस्संसारस्तदात्यन्तिकविमोक्षरूप अपवर्गोपि न स्यात् अनुत्पत्तिधर्मके तु ज्ञातरि स्यातां संसारापवर्गावित्यनुत्पत्तिधर्मकेणानेन भवितव्यमिति तर्के ज्ञातुरनित्यत्वे संसारापवर्गयोरसम्भव इति ज्ञानं यद्यप्रमाणं नातो विपक्षाभावसिद्धिः अप्रमाणेनासिद्धौ प्रवृत्त्यभावात्। अथ सिद्ध्यति विपक्षाभावो नेदमप्रमाणं ततश्चास्य प्रत्यक्षादावन्तर्भावः तेन विना साधनाभावादिति। द्वितीयेऽस्योत्पत्तौ किं कारणम्? न तावत्स्वपक्षसाधकं प्रमाणं तस्याप्रवृत्तेः। तर्केण विवेचिते विषये स्वपक्षसाधकप्रमाणं प्रवर्तते तदेव तस्य कारणं चेदन्योन्याश्रयः। विपक्षाभावप्रतीतिरस्य कारणमिति चेत् तल्लिङ्गकमनुमानमेवेति तत्रैवान्तर्भावः। अन्ये-

र्ययानध्यवसायस्वप्नलक्षणा ॥

(१४) संशयप्रकरणम् ।

(१)संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किंस्विदित्युभया-

---

तु संशयप्रभेद एवायमनवधारणात्मकत्वादित्याहुः । आचार्यास्तवास्य विपर्ययभेदमंगीकृत्यापि तर्कमनङ्गीकुर्वतां तार्किकाणां तुरगारूढस्य तुरगविस्मरणमिवायुक्तं तर्कविस्मरणमिति भाष्यकारमधिचिक्षिपुरिति अलं विस्तरेण । अत्र ३५१ ३५२ ३५३ ३४८ ९६ सूत्राणि द्रष्टव्यानि ।

(१४) संशयप्रकरणम् ।

(१)उद्देशक्रमानुसारेण संशयमाह संशयस्तावदिति । कथ्यत इति शेषः । तावच्छब्दः क्रमे । प्रसिद्धाः पूर्वं प्रतीताः अनेके विशेषाः असाधारणधर्माः वक्रकोटरादयः शिरःपाण्यादयश्च ययोः स्थाणुपुरुषयोस्तयोः सादृश्यमात्रस्य साधारणधर्मस्योच्चैस्तरत्वादेः क्वचिद्धर्मिणि दर्शनात् उभयोः स्थाणुपुरुषयोर्विशेषाणां वक्रकोटरादीनां शिरआदीनां च पूर्वप्रतीतानां स्मरणादधर्माच्च किंस्विदिति उभयावलम्बी विरोध्युभयप्रकारवद्धर्मावलम्बी विमर्षः विरुद्धनानार्थावमर्षः संशय इत्यक्षरार्थः । प्रसिद्धेत्यादिकारणवचनम् । मात्रपदेन विशेषाणामनुपलम्भो गम्यते । अधर्मादित्यनेन संशयाख्याऽविद्या पुरुषस्यानिष्टेति सूचितम् । तथाचैकस्मिन् धर्मिणि विरोधिनानाधर्मप्रकारकं ज्ञानं संशय इति संक्षेपः । स चायं समानधर्मजन्मा विप्रतिपत्तिजन्मा च । उपसर्जनीभूतनिषेधकोटिः समानधर्मजन्मा समानस्योर्ध्वत्वादेः स्थाणुत्वपुरुषत्वोभयस्मारकत्वेन तत्प्राधान्यम् । विप्रतिपत्तिजन्मा तु कोटिचतुष्टयप्रधानः—शब्दो नित्य एव नानित्योऽनित्य एव न नित्य इत्यादौ तद्दर्शनात् । संशयत्वं न जातिः चाक्षुषत्वादिना साङ्कर्यात् । मानस एव सर्वत्र संशयो विद्युत्संपाते धर्मिणि दृष्टेऽन्धकारेऽपि कोटिस्मृतिमतः संशयदर्शनात्तथाच संशयत्वं जातिरेवेति केचित् । अनवधारणात्मकः प्रत्ययः

वलम्बी विमर्षः संशयः । स च द्विविधः—अन्तर्बहिश्च ।

(१)अन्तस्तावत्—आदेशिकस्य सम्यङ्मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति किन्नु सम्यङ्मिथ्या वेति ।

बहिर्द्विविधः—प्रत्यक्षविषये चाप्रत्यक्षविषये च । (२)तत्राप्रत्यक्षविषये तावत्—साधारणलिङ्गदर्शनादुभयविशेषाऽनुस्मरणादधर्माच्च संशयो भवति । यथाऽटव्यां विषाणमात्रदर्शनाद्गौर्गवयो वेति ।

प्रत्यक्षविषयेऽपि (३)स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्य-

संशय इति कन्दलीकाराः । नन्वनवधारणात्मकस्य विषयावधारणात्मकं प्रत्ययत्वमनुपपन्नम् इति चेन्न उभयसम्भवात् । सामान्यविशिष्टधर्म्युपलम्भेन धर्मविशेषानुपलम्भेन च जायमानः सामान्यतो धर्मिणमवधारयन् स्थाणुर्वा पुरुषो वेति संशयः विशेषानवधारणात्मकोपि स्यात् सामग्रीवैलक्षण्येन कार्यवैलक्षण्यादिति न कोपि दोषः । अवान्तरभेदमाह स चेति । ज्ञातृधर्मनिमित्तकोऽन्तःसंशयो ज्ञेयधर्मनिमित्तको बहिरिति भावः ।

(१) आद्यमाह अन्तस्तावदिति । आदेशिकस्य ज्योतिर्विदोऽविपर्यस्ततया किञ्चित् सम्यक् अप्रतीततया किञ्चिन्मिथ्या चादिश्य पुनर्ग्रहसञ्चारादि त्रिषु कालेष्वादिशतोऽन्तःसंशयो भवति यदेतन्मम नैमित्तिकं ज्ञानमभूत् तत् किं सत्यमसत्यं वेति ।

(२) द्विविधबहिःसंशयमध्येऽप्रत्यक्षविषयन्तमाह तत्रेति । साधारणधर्मदर्शनादुभयसाधारणचतुःपदमात्रलिङ्गदर्शनात् । उभयेति । गोगवयरूपविशेषानुस्मरणात् । उदाहरति यथेति वाटान्तरितस्य पिण्डस्याऽप्रत्यक्षस्य सामान्येन विषाणमात्रदर्शनानुमितस्य संशयविषयत्वादप्रत्यक्षविषयोऽयं संशय इत्यर्थः ।

(३)प्रत्यक्षविषये तमाह स्थाणुपुरुषयोरिति । वक्रादीति । आ-

दर्शनात् वक्रादिविशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावुभयविशेषानुस्मरणादुभयत्राकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किं नु खल्वयं स्थाणुः स्यात्पुरुषो वेति ॥

(१५) विपर्ययप्रकरणम् ।

(१)विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवति । प्रत्यक्षविषये तावत्—(२)प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहतेन्द्रियस्यायथार्थालोचनात् असन्निहि-

---

दिपदेन शिरःपाण्यादिपरिग्रहः । तथाच स्थाणुधर्मस्य वक्रकोटरादेः पुरुषधर्मस्य शिरआदेर्विशेषस्याऽनुपलब्धितः स्थाणुत्वाभिव्यक्तिहेतुवक्रकोटरादीनां पुरुषत्वाभिव्यक्तिहेतुशिरआदीनाञ्चानुपलम्भात् स्थाणुत्वपुरुषत्वयोरनभिव्यक्तौ उभयविशेषाणां प्रत्येकं स्थाणुपुरुषयोरुपलब्धानां विशेषाणामनुस्मरणादुभयत्र स्थाणौ पुरुषे वोर्ध्वतासाधारण्येनाकृष्णमाणस्यात्मनो ज्ञानं नावध्रियत इति भावः ।

अत्र ९६ ९७ ९८ ९९ सूत्राणि द्रष्टव्यानि ।

(१५) विपर्ययप्रकरणम् ।

(१)क्रमप्राप्तं विपर्ययमाह विपर्ययोपीति । संशयानध्यवसायभिन्नत्वे सति जागरावस्थामिथ्याज्ञानं विपर्यय इत्यर्थः । संशयवदयमपि प्रत्यक्षानुमानविषय एवेत्यपेरर्थः ।

(२)प्रत्यक्षविषयं विपर्ययमाह प्रसिद्धेति । प्रसिद्धाः पूर्वं प्रतीताः अनेके विशेषाः सास्नादयः केसरादयश्च ययोस्तयोर्गवाश्वयोर्मध्येऽतस्मिन्नश्वे गवि तदिति–प्रत्ययोऽश्व इति ज्ञानं विपर्यय इत्यर्थः । ननु अत्र गवादौ विशेषप्रतीतिर्भवति न वा ? आद्ये न विपर्ययः, विपर्यये कथं तदुपरमः स्यादत आह अयथार्थालोचनादिति । यथा गौः सास्नादिमती तथा-

तद्विषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादधर्माच्चातस्मिंस्तदिति प्रत्ययो विपर्ययः। यथा गव्येवाश्व इति। असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भवति यथा व्यपगतघनपटलमचलजलनिधिसदृशमम्बरमञ्जनचूर्णपुञ्जश्यामं शार्वरं तम इति।

(१)अनुमानविषयेऽपि—बाष्पादिभिर्धूमाभिमतैर्व-

ऽग्रहणादित्यर्थः। अनेन विशेषानुपलम्भस्य हेतुता दर्शिता। संनिहितपिण्डे गोत्वाग्रहणेऽसन्निहिताश्वत्वग्रहणे च हेतुमाह पित्तेति। एतेन वातपित्तश्लेष्मादिदोषाणामसंनिहितप्रतिभासे सन्निहितार्थाप्रतिभासे च सामर्थ्यं समर्थितम्। नन्वेवं सर्वं सर्वत्र भासेत नियमहेतोरभावादित्यत्राहासंनिहितेत्यादि–संयोगादित्यन्तेन हेतुना। अयमर्थः—गोपिण्डसंयुक्तमिन्द्रियं गोत्वमगृह्णदपि तं पिण्डं गोसादृश्यविशिष्टं गृह्णाति सांशत्वाद्वस्तुनः। सादृश्यग्रहणेन चाश्वविषयः संस्कारः प्रबुद्धोऽश्वस्मृतिजनने प्राप्ते मनोदोषादिन्द्रियसंयुक्ते गव्यश्वसादृश्यानुरोधादनुभवाकारामश्वप्रतीतिं करोतीति न सर्वत्र सर्वावभासप्रसङ्गः सादृश्यसंस्कारयोः प्रतिनियमहेतुत्वात्। अतएवेयं गुरुमते इन्द्रियजा भ्रान्तिः सिद्धान्तितेत्यन्यत्र विस्तरः। अर्थादिति पूर्ववत्। उदाहरति यथेति। उदाहरणान्तरमाह असत्यपीति। गगनदर्शनकौतुकेनोर्ध्वमनुप्रेषिताः नयनरश्मयो दूरगमनान्मदवेगाः सूर्यरश्मिभिः प्रतिहताः स्वगोलकगुणं नीलिमानं देशान्तरे आभासयन्तो जलधरपुञ्जनिर्मुक्तनिस्तरङ्गमहोदधिकल्पमाकाशमिति प्रत्यक्षमिव रूपज्ञानमप्रत्यक्षे नभसि जनयन्तीत्यत्र तद्गुणानुविधानप्रतीतिनियम एव कामलादिदूषितनेत्रस्य पीतशङ्खज्ञान इव प्रमाणम्। एवं रात्रितमःपुञ्जमञ्जनपुञ्जश्याममिति ज्ञानन्तेजोभावे आरोपितरूपमात्रविषयमप्रत्यक्षमपि प्रत्यक्षमिव भातीति चोदाहरणान्तरमूह्यम्।

(१) अनुमानविषयं विपर्ययमाह अनुमानविषयेपीति। स्पष्टम्।

ह्यनुमानं गत्र्यविषाणदर्शनाच्च गौरिति।

(१)त्रयीदर्शनविपरीतेषु शाक्यादिदर्शनेष्विदं श्रेय इति मिथ्याप्रत्ययः, विपर्ययः शरीरेन्द्रियमनस्स्वात्माभिमानः, कृतकेषु नित्यत्वदर्शनं, कारणवैकल्ये कार्योत्पत्तिज्ञानं, हितमुपदिशत्स्वहितमिति ज्ञानम्, अहितमुपदिशत्सु हितमिति ज्ञानम्॥

(१) अत्यन्तदुर्दर्शनाभ्यासाच्च विपर्ययो भवतीत्याह त्रयीदर्शनेति। दृश्यते स्वर्गापवर्गसाधनभूतोर्थोऽनयेति दर्शनं वेदत्रय्येव दर्शनं त्रयीदर्शनं तद्विपरीतेषु बौद्धादिदर्शनेषु इदं श्रेय इति उपदेशो मिथ्याप्रत्ययस्तेषां कैश्चिदेव म्लेच्छापसदैः परिग्रहात् प्रमाणविरुद्धार्थाभिधानाच्चेत्यर्थः। एवमनात्मसु शरीरादिषु आत्मत्वाभिमानो विपर्ययः तद्व्यतिरिक्तस्य ज्ञातुः प्रतिपादनात्। विपर्ययपदस्य सर्वत्राग्रेऽन्वयः। कृतकेषु वेदेषु नित्यत्वाभिमानो मीमांसकानां विपर्ययः। कारणवैकल्ये धर्माधर्मयोरभावे कार्योत्पत्तिज्ञानं सुखदुःखादिवैचित्र्यज्ञानं लौकायतिकानां विपर्ययः। अहिंसादिहितोपदेष्टृषु अहितमिति, प्राणिहिंसादिकं श्रेयसे इत्यहितोपदेष्टृषु हितमिति ज्ञानं च विपर्यय इति भावः। अत्र ३५१ सूत्रम्।

अत्र विपर्ययो नास्ति कारणाभावात् इन्द्रियाणां यथार्थज्ञानजननस्वाभाव्याच्च किन्तु इदमिति अनुभवात्मकं रजतमिति दोषजं स्मरणात्मकं ज्ञानद्वयमिति केचित्। तन्न यदि रजतज्ञानं न शुक्तिविषयं किन्तु रजतस्मरणं तदा तस्मिन् ज्ञाने रजतार्थी पूर्वानुभूते एव रजते प्रवर्तेत न शुक्तौ स्मृतेरनुभवदेशे प्रवर्तकत्वस्य दृष्टत्वात्। तथा प्रवृत्त्युत्तरं नेदं रजतमिति बाधोपि न स्यात् शुक्तिरजतभेदग्रहाभावात् तादात्म्यानध्यवसायाच्चेति कृतं विस्तरेण।

(१६) अनध्यवसायप्रकरणम्।

(१)अनध्यवसायोऽपि प्रत्यक्षानुमानविषय एव सञ्जायते।

(२)तत्र प्रत्यक्षविषये तावत्—प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासङ्गादर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः। यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति। तत्र सत्ता-द्रव्यत्वपृथिवीत्ववृक्षत्वरूपवत्त्वादिशाखाद्यपेक्षोऽध्यवसायो भवति। पनसत्वमपि पनसेष्वनुवृत्तमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव केवलं तूपदेशाभावाद्विशेषसंज्ञाप्रतिपत्तिर्न भवति।

---

(१६) अनध्यवसायप्रकरणम्।

(१) तृतीयामविद्यामाहानध्यवसायोपीति। विपर्ययवदयमपि द्विविध इत्यपिशब्दार्थः। अनुपलब्धसपक्षविपक्षसंस्पर्शस्य धर्मस्य दर्शनात् विशेषत उपलब्धानुपलब्धकोटिकं ज्ञानमनध्यवसायः संशयस्तु उपलब्धसपक्षविपक्षसंस्पर्शदर्शनात् उपलब्धाव्यवस्थित-कोटिविषय उत्पद्यत इति तन्निरास इति आचार्याः।

(२) तत्र प्रथममाह प्रत्यक्षविषये तावदिति। प्रसिद्धार्थाः पूर्वं ज्ञाता अर्थाः अप्रसिद्धार्था अज्ञातार्थास्तेषु वा व्यासङ्गात् विषयान्तरा-क्षिप्तत्वादर्थित्वाद्विशेषप्रतीत्यर्थित्वाद्वा किमित्य लोचनमात्रमनध्य-वसाय इत्यक्षरार्थः। आचार्यस्य त्वज्ञानर्थित्वाद्वेति पाठः संमतः, विशेषनिश्चयाभावे सतीति अर्थकरणात्। प्रसिद्धार्थानध्यवसा-योदाहरणं—"प्रसिद्धे राजनि गते कोपि पथानेन गत"इत्यादि सुस्प-ष्टमेवेति भाष्यकारैर्न धृतम्। अप्रसिद्धार्थे त्वाह यथेति। विशे-षसंज्ञाप्रतिपत्तिर्न भवतीति निश्चयनिषेधेनानिश्चयात्मकता दर्शि-ता न निश्चयाभावमात्रं विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात्। सामान्येन हि सत्त्वादिना निमित्तेन द्रव्यमित्यादिसंज्ञाऽत्र प्रवर्तत इति निश्चितमेवाविशेषात् का पुनरसौ प्रसिद्धा अप्रसिद्धा चेत्य-नध्यवसाय इत्याचार्याः।

(१)अनुमानविषयेऽपि—नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् को नु खल्वयं प्राणी स्यादित्यनध्यवसायो भवति ॥

(१७) स्वप्नप्रकरणम् ।

(२)उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत् स्वप्नज्ञानम् । कथम्?यदा

---

(१) द्वितीयमाहानुमानविषयेऽपीति । नारिकेलद्वीपे गवामभावात् तत्रत्यो लोकोऽप्रसिद्धगोजातीयः देशान्तरस्थवने सास्नामात्रदर्शनात् सामान्यतः पिण्डमात्रमनुमाय जातिविशेषविषये को नु स्वल्वत्र प्राणी स्यादित्यनवधारयतीति भावः। अस्य चानवधारणात्मकत्वेपि कारणस्वरूपादिभेदान्न संशयताऽप्रतीतविशेषविषयत्वेनापि अस्य सम्भवादुभयविशेषानुस्मरणजसंशयतो भेद एवेति कन्दलीकाराः ।

इदं स्वतन्त्रं भाष्यम् । संशयसूत्रीयासाधारणधर्मदर्शनस्य अनध्यवसायहेतुत्वात्संशयसूत्रं वा द्रष्टव्यम् ।

(१७) स्वप्नप्रकरणम् ।

(२) स्वप्नाख्यां तुरीयामविद्यामाहोपरतेन्द्रियग्रामस्येति । इन्द्रियद्वारेणेति । यत्र असत्यपि चक्षुरादिव्यापारे चक्षुषावश्यममुमर्थं पश्यामीमं श्रोत्रेण शृणोमीत्यनुव्यवसायः तत् स्वप्नज्ञानम् इत्याचार्याः । विपर्ययव्यवच्छेदायोपरतेन्द्रियग्रामेति । नियतकोटिकत्वात् संशयानध्यवसाययोरनुभवनमिति च स्मृतेर्व्यावृत्तिः। यद्यपि कदाचित्स्वप्नज्ञानमपि यथार्थमेव भवति तथापि इन्द्रियद्वारकता तत्रायथार्थैवेति प्रतिपादनायेन्द्रियद्वारेणेति । इन्द्रियग्रामोपरमाय प्रलीनमनस्कस्येति । तमेव प्रकारं प्रश्नपूर्वकमाह कथमिति । शरीरव्यापारो गमनागमनादिः । क्रियाप्रबन्धः क्रियासन्तानादिः । आख्यायते पुरुष इति शेषः । तस्मिन् मनसि इत्य-

बुद्धिपूर्वादात्मनः शरीरव्यापारादहनि खिन्नानां प्राणिनां निशि विश्रमार्थमाहारपरिणामार्थं वाऽदृष्टकारितप्रयत्नापेक्षादात्मान्तःकरणसम्बन्धान्मनसि क्रियाप्रबन्धादन्तर्हृदये निरिन्द्रिये आत्मप्रदेशे निश्चलं मनस्तिष्ठति तदा प्रलीनमनस्क इत्याख्यायते, प्रलीने च तस्मिन्नुपरतेन्द्रियग्रामो भवति, तस्यामवस्थायां प्रबन्धेन प्राणापानसन्तानप्रवृत्तावात्ममनःसंयोगविशेषात् स्वापाख्यात् संस्काराच्चेन्द्रियद्वारेणैवासत्सु विषयेषु प्रत्यक्षाकारं स्वप्नज्ञानमुत्पद्यते।

(१)तत्तु त्रिविधम्। संस्कारपाटवाद्धातुदोषाददृष्टाच्च।

(२)तत्र संस्कारपाटवात् तावत्—कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते।

(३)धातुदोषाद्वातप्रकृतिस्तद्दूषितो वा आकाशगमनादीन् पश्यति। पित्तप्रकृतिः पित्तदूषितो वाऽग्निप्रवेश-

---

र्थः। तस्यामवस्थायां प्रलीनमनोवस्थायां प्रबन्धेन बाहुल्येन प्राणापानसन्तानप्रवृत्तौ प्राणापानवायुसन्ताननिर्गमप्रवेशलक्षणायां प्रवृत्तौ सम्भवन्त्यामिति भावः। संस्कारात्पूर्वानुभूतविषयादित्यर्थः।

(१)विभजते तत्तु इति। विभागे हेतुमाह संस्कारेत्यादि।

(२)संस्कारजं स्वप्नज्ञानमाह तत्रेति। यमर्थं कामिनीमरातिं वा।

(३)धातुदोषजमाह धातुदोषादिति। धातवोऽसृङ्मांसादयः शरीरधारणात्तेषां दोषात् वातादिदूषितत्वाद्विपर्ययो भवतीत्याह

कनकपर्वतादीन् पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्रतरणहिमपर्वतादीन् पश्यति ।

(१)यत्स्वयमनुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यच्छुभावेदकं गजारोहणच्छत्रलाभादि तत्सर्वं संस्कारधर्माभ्यां भवति विपरीतं च तैलाभ्यञ्जनखरोष्ट्रारोहणादि तत्सर्वमधर्मसंस्काराभ्यां भवति । अत्यन्ताप्रसिद्धार्थेष्वदृष्टादेवेति । स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति तथाप्यतीतस्य ज्ञानप्रबन्धस्य प्रत्यवेक्षणात् स्मृतिरेवेति भवत्येषा चतुर्विधाऽविद्येति ॥

वातप्रकृतिरिति । आकाशगमनादीत्यादिपदेन भूकम्पादिग्रहणम् । पर्वतादीनित्यत्र दिग्दाहादिरादिपदार्थः ।

(१) तृतीयमदृष्टजं स्वप्नमाह यदिति । अनुभूतेषु प्राप्तेष्वननुभूतेष्वप्राप्तेषु वा प्रसिद्धेष्विह जन्मनि प्रतीतेषु अप्रसिद्धेष्विह जन्मन्यप्रतीतेषु यत् गजारोहणादि शुभावेदकं स्वप्नं दृश्यते तत्संस्कारधर्माभ्यां भवतीत्यर्थः । पर्वतारोहण–पायसभक्षणादिरादिपदार्थः । खरोष्ट्रारोहणादीति । अत्र अन्धकारपात–पङ्कमज्जनादि चादिपदग्राह्यम् । अत्यन्ताप्रसिद्धार्थेष्वादित्यविगलनादिषु ज्ञानमदृष्टादेवाननुभूतेषु संस्काराभावात् । यद्यपि संस्कारादिभिस्समारोपितबाह्यस्वरूपः स्वप्नप्रत्ययो मिथ्याज्ञानमिति न विपर्ययतो भेदस्तथापि अवस्थाविशेषभावित्वात् पृथगुक्तः । ननु स्वप्नदृष्टमपि स्वप्नेऽनुसन्धीयत एव तच्च पूर्वानुभूतस्य स्वप्नस्य अन्ते भवतीति स्वप्नान्तिकमुच्यते तत्राप्युपरतेन्द्रियस्येत्यादि स्वप्नलक्षणं वर्तत एवेति आशङ्क्याह स्वप्नान्तिकमिति । तथा च स्मृतौ तस्या अन्तर्भावादनुभवनपदेन स्वप्नलक्षणस्यातिव्याप्त्यभावाच्चेति सर्वमनवद्यम् ।

अत्र ३४८ ३४९ ३५० सूत्राणि ।

(१८) प्रत्यक्षप्रकरणम् ।

(१)विद्यापि चतुर्विधा। प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा ॥

(२)तत्राक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम्। अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्छ्रोत्रमनांसि षट् । तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते । द्रव्ये तावद् त्रिविधे महत्यनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्निकर्षाद् धर्मादि-

---

(१८) प्रत्यक्षप्रकरणम् ।

(१)क्रमप्राप्तां विद्यामाह विद्यापीति । अविद्यैव न किन्तु विद्यापि चतुर्विधेत्यपेरर्थः। विद्यासामान्यलक्षणमुक्तम् । प्रत्यक्षस्य सर्ववादिसिद्धत्वात्पूर्वं निर्देशः अनुमानस्य तत्पूर्वकत्वात् तत्पश्चात् स्मृतेः प्रत्यक्षानुमितेषु भावात्तदनन्तरं आर्षस्य लोकोत्तरपुरुषापेक्षितत्वात् अन्ते निर्देशश्च बोध्यः। अत्र १३५ ३४२ २४७ ३६४ सूत्राणि द्रष्टव्यानि ।

(२)तत्र प्रत्यक्षमाह तत्रेति । इत्यन्तं लक्षणम् । प्रत्यक्षमिति लक्ष्यनिर्देशः । प्रतीत्य प्राप्य । समस्तेन्द्रियावरोधार्था वीप्सा अन्यथा बाह्येन्द्रियजमेव प्रत्यक्षमिति स्यात् । कुगतिप्रादय इति प्रादिसमासः । अव्ययीभावे हि परवल्लिङ्गतायां प्रत्यक्षा बुद्धिः प्रत्यक्षः प्रत्यय इति न स्यात् । अक्षशब्दस्य द्यूतपाशाद्यनेकार्थविरुढत्वाद्विशिनष्टि अक्षाणीति । सांख्यबौद्धादिमते एकादश पञ्च चेन्द्रियाणि तन्निरासाय षडिति । असद्विषयस्मृतावतिव्याप्तिवारणाय प्रत्यक्षस्य विषयं दर्शयति तद्धीति । हिशब्दोऽवधारणे तत्प्रत्यक्षं द्रव्यादिषु चतुर्ष्वेव न विशेषसमवाययोरित्यर्थः । द्रव्यस्य प्राधान्यात् प्रथमं तत्प्रत्यक्षमाह द्रव्ये इति । त्रिविधे पृथिव्यप्तेजोरूपे महति द्रव्ये प्रत्यक्षं कुतो भवतीत्यत्राह अनेकद्रव्यवत्वेति । महतीत्यनेन महत्त्वस्य प्रत्यक्षकारणतोक्ता अकारणत्वे तत्प्रकर्षानुविधानानुपपत्तेः । अनेकद्रव्यवत्त्वं भूयोवयवाश्रितत्वम् । तस्यावयवभूयस्त्वप्रकर्षाप्रकर्षाभ्यामवयविनि स्फुटत्वास्फुटत्वातिशयानतिशयदर्शनात् कारणता । रूपप्रकाश उद्भूतसमाख्यातो रूपस्य धर्मः यदभावाज्जलस्थ-

सामग्न्ये च स्वरूपालोचनमात्रम्। सामान्यविशेषद्रव्य-गुणकर्मविशेषणापेक्षादात्ममनःसन्निकर्षात् प्रत्यक्षमुत्पद्यते सद् द्रव्यं पृथिवी विषाणी शुक्ला गौर्गच्छतीति।

(१) रूपरसगन्धस्पर्शेष्वनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षान्नियतेन्द्रियनिमित्तमुत्पद्यते। शब्दस्य

तेजसोऽप्रत्यक्षमिति श्रीधराचार्याः। प्रकाश आलोक इति उदयनाचार्याः। सत्यपि महत्त्वेऽनेकद्रव्यवत्त्वे च वायोरनुपलंभाद्रूपप्रकाशोपि हेतुरुक्तः। चतुष्टयसन्निकर्षात् आत्मा मनो बहिरिन्द्रियं ग्राह्यद्रव्यञ्चेति चतुष्टयसन्निकर्षात् आत्मा मनसा मन इन्द्रियेण इन्द्रियमर्थेन संयुज्यत इति चतुष्टयसंयोगात् कारणकलापाद्धर्माधर्मादिकालादीनां समग्राणां भावे सति स्वरूपालोचनं निर्विकल्पकं प्रत्यक्षमुत्पद्यत इत्यग्रे सम्बन्धः। सर्वस्यैव ज्ञानस्य सुखदुःखादिप्रयोजनकत्वाद्देशकालादिनियमेनोत्पत्तेश्च धर्माधर्मदिकालादिजन्यत्वमुक्तम्। आत्मनः संयोगादिव्यतिरेकेण प्रत्यक्षाभावाच्चतुष्टयसन्निकर्षस्य हेतुता चोक्तेत्यवधेयम्। स्वलक्षणान्वयव्यतिरेकानुविधायिप्रतिभासं निर्विकल्पकमेव वस्तुन्यभ्रान्तत्वात्प्रत्यक्षं न सविकल्पकं वासनाधीनोत्पत्तिकस्य तस्य वस्त्वननुरोधप्रतिभासस्य केशादिज्ञानवद्वस्तुनि भ्रान्तत्वादिति सौगतमतमपाकर्तुमाह सामान्येति। सामान्यादीन्येव विशेषणान्यपेक्षते य आत्ममनःसन्निकर्षः तस्मात्सद् द्रव्यमिति-सामान्यविशिष्टं पृथिवीति-पृथिवीत्वविशेषविशिष्टं विषाणीति-द्रव्यविशिष्टं शुक्लो गौरिति-गुणविशिष्टं गच्छतीति-कर्मविशिष्टं प्रत्यक्षं स्यात्। घटोयमित्यादिज्ञाने विच्छन्नः कम्बुग्रीवात्मा सर्वतो व्यावृत्तः पदार्थः प्रतीयत इति कथं सविकल्पकस्य न प्रमाणतेति भावः। क्षणभङ्गवादविस्तरस्त्वत्र कन्दल्यादौ द्रष्टव्यः। अत्र १६२ १३४ ३१५ ३१६ सूत्राणि।

(१) द्रव्यप्रत्यक्षमाख्याय गुणप्रत्यक्षमाह रूपेति। अनेकद्रव्यसमवायादनेकद्रव्यवद्द्रव्यसमवायान्महत्त्ववद्द्रव्यसमवायात् स्वगतो विशेषो रूपादौ रूपत्वादिस्तस्मात्सामान्यविशेषात् स्वाश्रयसन्नि-

(१)त्रयसन्निकर्षाच्छोत्रसमवेतस्य तेनैवोपलब्धिः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगकर्मणां (२)प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणम्। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः (३)संयोगादुपलब्धिः। (४)भावद्रव्यत्वगुणत्वकर्मत्वादीनामुपलभ्याधारसमवेतानामाश्रयग्राहकैरिन्द्रियैर्ग्रहणमित्येतदस्मदादीनां प्रत्यक्षम्।

कर्षात् रूपाद्याश्रयग्राहकेन्द्रियसन्निकर्षाच्च नियतेन्द्रियनिमित्ते रूपादौ चक्षुरादिनियतेन्द्रियनिमित्तं ज्ञानमुत्पद्यत इत्यर्थः। स्वगतविशेषाणां हेतुत्वाद्रूपादिष्विन्द्रियव्यवस्थाऽन्यथोपद्रवः स्याद्विशेषाभावात् इति श्रीधरः। अत्र ३१३ १६४ १६५ सूत्राणि द्रष्टव्यानि।

(१)त्रयसन्निकर्षादिति। आत्ममनःश्रोत्रसन्निकर्षादित्यर्थः। तेनैव श्रोत्रेणैवोपलब्धिः प्रत्यक्षशब्दस्येत्यन्वयः। अत्र१०० ३१३सूत्रे द्रष्टव्ये।

(२)प्रत्यक्षद्रव्यसमवायात्प्रत्यक्षयोग्यद्रव्यसमवायादित्यर्थः। गच्छति द्रव्ये संयोगविभागातिरिक्तानुपलब्ध्या न कर्मणः प्रत्यक्षतेति, चलतीति–प्रत्ययस्तु संयोगविभागक्रियालम्बन इति केचित्। तन्न यद्यप्रत्यक्षं कर्म संयोगविभागाभ्यामनुमीयते तदान्यत्रापि सर्वत्र ताभ्यां कर्मानुमानं भवेत्। न च मूलादग्रं गच्छति शाखामृगे तरौ संयोगविभागाद्यधिकरणे चलतीति प्रत्ययो भवतीति कर्म प्रत्यक्षमेवेति॥ अत्र १६७ ३१३ सूत्रे।

(३)संयोगादिति। आत्मसमवेतानां तेषां संयुक्तसमवायात्संनिकर्षाद्ग्रहणमित्यर्थः। अत्र १३४ ३१३ सूत्रे।

(४)भावेति। भावः सत्ता। उपलभ्याधारसमवेतानामित्यनेनापि पूर्ववत् आश्रययोग्यतान्तर्भूतयोग्यत्वं सूचितम्। तत्र संयोगाद् द्रव्यस्य संयुक्तसमवायाद्गुणादेः संयुक्तसमवेतसमवायाद्गुणत्वादेः समवायाच्छब्दस्य समवेतसमवायाच्छब्दत्वस्य सम्बद्धविशेषणतया चाभावस्य ग्रहणमिति षोढा सन्निकर्षः। संयुक्तसमवेतविशेषणत्वा-

अस्मद्विशिष्टानां तु (१)योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मान्तराकाशदिक्कालपरमाणुवायुमनस्सु तत्समवेतगुणकर्मसामान्यविशेषेषु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते। (२)वियुक्तानां पुनश्चतुष्टयसन्निकर्षाद्योगजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते।

दिना रूपादौ रसाद्यभावादिग्रहणानि च संस्वद्धविशेषणतायामेवान्तर्भूतानीति न षोढात्वव्याघात इति ध्येयम्। अत्र२१४ १६९सूत्रे।

(१)अस्मद्विशिष्टानामित्यस्य विवरणं योगिनामिति। योगिनस्तु युक्तवियुक्तभेदेन द्विविधास्तयोर्युक्तानान्तु समाधिस्थानां योगजधर्मसहकृतेनान्तःकरणेन स्वात्मनि आत्मान्तरे वाऽऽकाशे दिशि काले चतुर्विधपरमाणुषु मनःसु तत्समवेतेषु गुणादिषु समवाये चाविपर्यस्तं स्वरूपदर्शनं भवतीत्यर्थः। इन्द्रियेभ्यः प्रत्याकृष्य साक्षात्कर्तव्येष्टवस्तुनि मनो निधायाप्रवर्तमानचिन्तासन्तानाः युक्ताः वियुक्तास्त्वत्यन्ताभ्यासेन परमवशीकारमापन्ना विगतावरणाः सर्वतः प्रद्योतमानमानसाः निरवशेषिताभ्यासा इति तयोर्भेद इत्याचार्याः। यद्यप्यस्मदादीनामपि कदाचिद्विगलितशरीरादिमिश्रीभावः क्षणमात्रमीदृक्प्रत्ययस्तथापि बलवदविद्यासंस्कारमध्यपतितमेतद्विज्ञानं प्रतिपक्षकक्षाप्रवेशेन वशीकृतदेहमज्ञानकलापकवलितायां चित्तभूमौ भूमाविव कलमबीजं संस्काराङ्कुराय न कल्पत इत्यसत्कल्पतया उपेक्षितमिति सुधीभिर्विभावनीयम्। अत्र ३३७ ३३८ सूत्रे।

(२)वियुक्तानामाह वियुक्तानां पुनरिति। अभिमुखीभूतनिखिलविषयसमूहानामप्रतिहतकारणगणानान्तेषाञ्चतुष्टयसंनिकर्षादात्ममनइन्द्रियार्थसंनिकर्षाद्योगजधर्मानुग्रहसहकारितात् तत्सामर्थ्यात् सूक्ष्मेषु मनःपरमाण्वादिषु व्यवहितेषु नागभुवनादिषु विप्रकृष्टेषु ब्रह्मभुवनादिषु प्रत्यक्षमुत्पद्यतेऽज्ञानमित्यर्थः। अत्र३३९ ३४० ३४१सूत्राणि।

(१)तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणं प्रमेया द्रव्यादयः पदार्थाः प्रमाताऽऽत्मा प्रमितिर्द्रव्यादिविषयं ज्ञानम् । सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षं प्रमाणम् अस्मिन्नान्य-

---

(१)ननु प्रत्यक्षं प्रमाकरणविशेषे प्रसिद्धम् तत्किमत्र प्रमाणं किञ्चास्य फलमित्याशङ्क्य प्रमाणफलयोर्विभागमाह तत्रेति । सामान्यं सत्ताद्रव्यत्वगुणत्वादिकं विशेषा व्यक्तयः तेषु स्वरूपालोचनमात्रं स्वरूपग्रहणमात्रं विकल्परहितं प्रमाणं प्रमायां साधकतमत्वात् ।तत्त्वं च तस्मिन् सति प्रमितेस्तोः प्रमा भवत्येवेत्यतिशयः । प्रमातरि प्रमेये च सति भवति प्रमा न तु भवत्येवेति, प्रमाणे तु निर्विकल्पके विशेषणज्ञानादिस्वरूपे विशेष्यज्ञानादिरूपा प्रमा भवत्येवेत्यतिशयः । पदार्था इति । द्रव्यादयश्चत्वारः पदार्थाः प्रमितिविषयाः प्रमितौ जातायां तेषु हानोपादानव्यवहारो भवतीत्यर्थः । प्रमातात्मेति बोधाश्रयत्वात् इति शेषः । प्रमितिर्द्रव्यादिविषयं ज्ञानं यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणं तदा द्रव्यादिविषयं विशिष्टज्ञानं प्रमितिरित्यर्थः । सामान्येति । यदा तु निर्विकल्पकं सामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीत्यात्मकत्वात्तदा तदुत्पत्तौ अविभक्तं केवलं ज्ञानानपेक्षमालोचनमालोच्यतेऽनेनेत्यालोचनमिन्द्रियार्थसन्निकर्षस्तन्मात्रं सामान्यविशेषज्ञानोत्पत्तौ प्रमाणमित्यर्थः । विशेष्यज्ञानोत्पत्तावपि इन्द्रियार्थसन्निकर्षः प्रमाणं भवत्येव प्रमाहेतुत्वात्किन्तु विशेषणज्ञानसहकृतमेव न केवलं सामान्यविशेषज्ञानोत्पत्तौ तु ज्ञानानपेक्षमिति विशेषोऽत्र बोध्यः । अत्रोपपत्तिमाह अस्मिन्निति । सामान्यविशेषज्ञाने नान्यत्प्रमाणं ज्ञानरूपन्तस्याफलरूपत्वाज्ज्ञानफलत्वाभावात्, विशेष्यज्ञानं प्रकारज्ञानफलं तत्तु न ज्ञानान्तरफलम् अनवस्थाप्रसङ्गादतो विशेषणज्ञाने इन्द्रियार्थसन्निकर्षमात्रं प्रमाणमिति भावः । एतावता निर्विकल्पके फले इन्द्रियार्थसन्निकर्षः प्रमाणं विशेष्यज्ञाने च सामान्यविशेषज्ञानात्मकं निर्विकल्पकञ्च प्रमाणमित्युक्तं सम्प्रति हानोपादानादिबुद्धेः फलत्वे

त्प्रमाणान्तरमस्ति अफलरूपत्वात् । अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणं प्रमेया द्रव्यादयः पदार्थाः प्रमाताऽऽत्मा प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति ॥

(१९) अनुमानप्रकरणम् ।

(१)लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकम् । लिङ्गं पुनः—

विशेष्यज्ञानं प्रमाणमित्याहाथवेति । चतुष्टयपदमुपलक्षणं द्वयसन्निकर्षात्त्रयसंनिकर्षादपि बोध्यम् । अवितथपदेन संशयविपर्ययव्यवच्छेदः । अव्यपदेश्यं शब्दाजन्यम् । सन्निहितेऽर्थे चक्षुर्व्यापारानन्तरं शब्दश्रवणाद्यद्गौरिति ज्ञानं तत्राक्षमपि कारणम् अन्यथा रेखोपरेखादिविशेषप्रतीतिर्न स्यात्, न च तत्प्रत्यक्षं शब्दस्यैव तत्र साधकतमत्वादिन्द्रियस्य सहकारितामात्रत्वात् तद्व्यवच्छेदार्थमव्यपदेश्यमिति । उक्तप्रत्यक्षफलमाह प्रमितिरिति । गुणदर्शनमुपादेयत्वज्ञानं दोषदर्शनं हेयत्वज्ञानं माध्यस्थदर्शनं न हेयं नोपादेयमिति उदासीनताज्ञानमित्यर्थः ।

(१९)अनुमानप्रकरणम् ।

(१)उद्देशक्रमानुरोधेन प्रत्यक्षान्ते अनुमानं व्याख्यातुमारभते लिङ्गदर्शनादिति । लिङ्गदर्शनात् लिङ्गज्ञानात् सम्यक् जायमानं लैङ्गिकमिति वाक्यार्थः । संशब्देन संशयविपर्ययस्मृतिव्यवच्छेदः । संशयविपर्ययौ तावद्यथाभूतार्थपरिच्छेदकौ न भवतः स्मृतिरप्यनुभवपारतन्त्र्यान्न परिच्छेदिकेति भावः । यद्यप्यनुमानपदं भावकरणोभयवाचकमपि प्रमाणत्वेन करणस्वरूपमेवात्र व्युत्पादयितुमाभिमतम् तथापि करणस्य कारकविशेषतया तस्य च क्रियासम्बन्धोपहितसम्मततयाऽनुमितिक्रियास्वरूपोपदर्शनेनैतदुपदर्शितं भवतीति भावप्रधानमेव व्याख्यातवान्भाष्यकार इत्याचार्याः । लिङ्गलक्षणमाह लिङ्गं पुनरिति । निरुपाधिकसाध्यसम्बन्धशालि लिङ्गमिति लोकप्रसिद्धमेवेत्यर्थः ।

(१)यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥
(२)विपरीतमतो यत्‌ स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥

(३)यदनुमेयेनार्थेन देशविशेषे कालविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यत्र सर्वस्मिन्नेकदेशे वा प्रसिद्धमनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसदेव तदप्रसिद्धार्थस्यानुमापकं लिङ्गं भवतीति ॥

---

(१) अनुमेयेन प्रतिपिपादयिषितधर्मविशिष्टधर्मिणा सम्बद्धं समवेतं तदन्विते साध्यधर्मान्विते सपक्षे प्रसिद्धं तदभावे अनुमेयाभावे अनुमेयविपर्यये विपक्षे च यन्नास्त्येव तल्लिङ्गमनुमापकमनुकमितिरूपप्रमाकरणमिति कारिकार्थः । यत्पदोपात्तवाक्यत्रयेण पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वरूपरूपत्रयवैशिष्ट्यं लिङ्गताप्रयोजकं सूचितम् । अत्र ३४२ सूत्रम् ।

(२)लिङ्गानन्तरं प्रसङ्गसङ्गत्या लिङ्गाभासलक्षणं संज्ञाविशेषपूर्वकमाह विपरीतमिति । अत उक्तलक्षणलिङ्गात्‌ यदेकेन द्वितयेन वाशब्दात्त्रितयेन च लिङ्गलक्षणेन विपरीतं रहितं तत् विरुद्धमसिद्धं सन्दिग्धञ्चेति विशेषसंज्ञाविशिष्टम् अलिङ्गमनुमेयाप्रतिपादकमिति कणादमतमित्यर्थः । अत्रैकस्मिन्नपि दूषणे दृष्टे यथायोगं बहूनि दूषणानि सम्भवन्ति । सभाजिज्ञासायां समस्तोद्भावनमन्यथैकस्यैवेत्याचार्याः । अत्र १३१ सूत्रम् ।

(३)प्रथमसङ्ग्रहश्लोकार्थं भाष्यकार आह यदनुमेयेनेति । यावति देशे काले वा दृष्टान्तधर्मिणि लिङ्गस्य साध्यधर्मेणाविनाभावो निदर्शितः तावत्येव तत्र साध्यधर्मिणि प्रतीयमानस्य गमकं लिङ्गमिति प्रतिपादनाय देशविशेषे कालविशेषे वा सहचरितमिति । सर्वसपक्षव्यापकवत् सपक्षैकदेशवृत्तेरपि हेतुत्वार्थं सर्वस्मिन्नेकदेशे

(१)यत्तु यथोक्तात् त्रिरूपाल्लिङ्गादेकेन धर्मेण द्वाभ्यां वा विपरीतं तदनुमेयस्याधिगमे लिङ्गं न भवतीत्येतदेवाह सूत्रकारः—"अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चेति"॥

षा प्रसिद्धमित्युक्तम् । तथा सर्वविपक्षव्यापक इव तदेकदेशवृत्तेरप्यहेतुत्वबोधार्थं सर्वस्मिन्नसदेवेत्युक्तम् । अत्र ३४२ सूत्रम् ।

(१)द्वितीयं विवृणोति यत्त्विति । एकेन धर्मेणेति । यथा शब्दोऽनित्यः प्रमेयत्वादित्यत्र प्रमेयत्वं हेतुः धर्मद्वयसद्भावेऽपि विपक्षसत्त्वरूपैकलिङ्गलक्षणविपरीतः सन्दिग्धानैकान्तिकः । द्वाभ्यां यथा शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वं पक्षवृत्त्यपि न सपक्षवृत्ति नापि विपक्षव्यावृत्तमिति धर्मद्वयविपरीतो विरुद्धहेतुः । असिद्धस्तु एकेन द्वाभ्यां त्रिभिश्च विपरीतो भवति । तत्र प्रथमो यथा अनित्यः शब्दः सामान्यवत्त्वे सति चाक्षुषत्वादिति । अस्य सपक्षे घटादौ सत्त्वेऽपि विपक्षात्सामान्यादेर्व्यावृत्तावपि शब्दावृत्तित्वात् पक्षहीनता । द्वितीयो यथा शब्दोऽनित्यः अप्रमेयत्वादिति । अस्य विपक्षव्यावृत्तत्वेपि न पक्षसपक्षसत्त्वमिति द्विहीनता । तृतीयो यथा अनित्यः शब्दोऽकार्यत्वादिति । अस्य न शब्दघटादिवृत्तिता नाप्यात्मव्यावृत्तत्वमिति त्रिरूपहीनता । ननु यथोक्तरूपत्रयसम्पत्तिमात्रेण गमकत्वे कालात्ययापदिष्टप्रकरणसमयोरतिव्याप्तमिदं लक्षणमिति चेदत्र केचित्—तयोरनैकान्तिकेऽन्तर्भावात् सन्दिग्धविपक्षे साध्यधर्मिणि प्रकरणसमस्य निश्चितविपक्षे च कालात्ययापदिष्टस्य वृत्तेः । तथाहि शब्दे नित्यानित्यधर्मानुपलम्भात्तदुभयसंशये निर्णयायोपदिष्टस्य प्रकरणसमस्य सम्भवत्प्रतिपक्षे धर्मिणि वर्तमानस्यैकस्मिन् अन्ते नैयत्याभावेनानैकान्तिकता । एवं प्रत्यक्षनिर्णीतोष्णे वह्नौ विपक्षे कृतकत्वस्य भावात् कालात्ययापदिष्टोऽप्यनैकान्तिक एवेति । वस्तुतस्तु तयोर्यदनुमेयेन सम्बद्धमित्यनेनैव निरासात् अनुमेयाभासाश्रयत्वादिति कन्दलीकाराः । अत एवास्वरसादाह सूत्रकार इति आचार्याः । अपदिश्यतेऽनेनेत्यपदेशो हेतुर्नापदेशोऽनपदेशः अहेतुस्तद्विरोधी हेत्वाभास इत्यर्थः । को-

(१)यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥
(२)विपरीतमतो यत् स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥

(३)यदनुमेयेनार्थेन देशविशेषे कालविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यत्र सर्वस्मिन्नेकदेशे वा प्रसिद्धमनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसदेव तदप्रसिद्धार्थस्यानुमापकं लिङ्गं भवतीति ॥

---

(१) अनुमेयेन प्रतिपिपादयिषितधर्मविशिष्टधर्मिणा सम्बद्धं समवेतं तदन्विते साध्यधर्मान्विते सपक्षे प्रसिद्धं तदभावे अनुमेयाभावे अनुमेयविपर्यये विपक्षे च यन्नास्त्येव तल्लिङ्गमनुमापकमनुमितिरूपप्रमाकरणमिति कारिकार्थः । यत्पदोपात्तवाक्यत्रयेण पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वरूपरूपत्रयवैशिष्ट्यं लिङ्गताप्रयोजकं सूचितम् । अत्र ३४२ सूत्रम् ।

(२)लिङ्गानन्तरं प्रसङ्गसङ्गत्या लिङ्गाभासलक्षणं संज्ञाविशेषपूर्वकमाह विपरीतमिति । अत उक्तलक्षणलिङ्गात् यदेकेन द्वितयेन वाशब्दात्त्रितयेन च लिङ्गलक्षणेन विपरीतं रहितं तत् विरुद्धमसिद्धं सन्दिग्धञ्चेति विशेषसंज्ञाविशिष्टम् अलिङ्गमनुमेयाप्रतिपादकमिति कणादमतमित्यर्थः । अत्रैकस्मिन्नपि दूषणे दृष्टे यथायोगं बहूनि दूषणानि सम्भवन्ति । सभाजिज्ञासायां समस्तोद्भावनमन्यथैकस्यैवेत्याचार्याः । अत्र १३१ सूत्रम् ।

(३)प्रथमसङ्ग्रहश्लोकार्थं भाष्यकार आह यदनुमेयेनेति । यावति देशे काले वा दृष्टान्तधर्मिणि लिङ्गस्य साध्यधर्मेणाविनाभावो निदर्शितः तावत्येव तत्र साध्यधर्मिणि प्रतीयमानस्य गमकं लिङ्गमिति प्रतिपादनाय देशविशेषे कालविशेषे वा सहचरितमिति । सर्वसपक्षव्यापकवत् सपक्षैकदेशवृत्तेरपि हेतुत्वार्थं सर्वस्मिन्नेकदेशे

(१)यत्तु यथोक्तात् त्रिरूपाल्लिङ्गादेकेन धर्मेण द्वाभ्यां वा विपरीतं तदनुमेयस्याधिगमे लिङ्गं न भवतीत्येतदेवाह सूत्रकारः—"अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चेति" ॥

धा प्रसिद्धमित्युक्तम् । तथा सर्वविपक्षव्यापक इव तदेकदेशवृत्तेरप्य-हेतुत्वबोधार्थं सर्वस्मिन्नसदेवेत्युक्तम् । अत्र ३४२ सूत्रम् ।

(१)द्वितीयं विवृणोति यत्त्विति । एकेन धर्मेणेति । यथा शब्दोऽनित्यः प्रमेयत्वादित्यत्र प्रमेयत्वं हेतुः धर्मद्वयसद्भावेऽपि विपक्षसत्त्व-रूपैकलिङ्गलक्षणविपरीतः सन्दिग्धानैकान्तिकः । द्वाभ्यां यथा शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वं पक्षवृत्त्यपि न सपक्षवृत्ति नापि विपक्षव्यावृत्तमिति धर्मद्वयविपरीतो विरुद्धहेतुः । असिद्धस्तु एकेन द्वाभ्यां त्रिभिश्च विपरीतो भवति । तत्र प्रथमो यथा अनित्यः शब्दः सामान्यवत्त्वे सति चाक्षुषत्वादिति । अस्य सपक्षे घटादौ सत्त्वेऽपि विपक्षात्सामान्याद्व्यावृत्तावपि शब्दावृत्तित्वात् एकहीनता । द्वितीयो यथा शब्दोऽनित्यः अप्रमेयत्वादिति । अस्य विपक्ष-व्यावृत्तत्वेपि न पक्षसपक्षसत्त्वमिति द्विहीनता । तृतीयो यथा अनित्यः शब्दोऽकार्यत्वादिति ।' अस्य न शब्दघटादिवृत्तिता नाप्यात्म-व्यावृत्तत्वमिति त्रिरूपहीनता । ननु यथोक्तरूपत्रयसम्पत्तिमात्रेण गमकत्वे कालात्ययापदिष्टप्रकरणसमयोरतिव्याप्तमिदं लक्षण-मिति चेदत्र केचित्—तयोरनैकान्तिकेऽन्तर्भावात् सन्दिग्धविपक्षे साध्यधर्मिणि प्रकरणसमस्य निश्चितविपक्षे च कालात्ययापदिष्टस्य वृत्तेः । तथाहि शब्दे नित्यानित्यधर्मानुपलम्भात्तदुभयसंशये निर्णयायोपदिष्टस्य प्रकरणसमस्य सम्भवत्प्रतिपक्षे धर्मिणि वर्तमानस्यैकस्मिन् अन्ते नैयत्याभावेनानैकान्तिकता । एवं प्रत्यक्षनिर्णीतोष्णे वह्नौ विपक्षे कृतकत्वस्य भावात् कालात्ययापदिष्टोप्यनैकान्तिक एवेति । वस्तुतस्तु तयोर्यदनुमेयेन सम्बद्धमित्यनेनैव निरासात् अनुमेयाभासाश्रयत्वादिति कन्दलीकाराः । अत एवास्वरसादाह सूत्रकार इति आचार्याः । अपदिश्यतेऽनेनेत्यपदेशो हेतुर्नापदेशोऽनपदेशः अहेतुस्तद्विरोधी हेत्वाभास इत्यर्थः । को-

(१)विधिस्तु यत्र धूमस्तत्राग्निरग्न्यभावे धूमोऽपि न भवतीति। एवं (२)प्रसिद्धसमयस्यासन्दिग्धधूमदर्शनात् साहचर्यानुस्मरणात् तदनन्तरमग्न्यध्यवसायो भवतीति।

साधत आहाप्रसिद्ध इति। अनेन विरुद्धासाधारणयोः सङ्ग्रहः। असन्निति। पक्षेऽसन्नसिद्धोऽपि तथेत्यर्थः। सन्दिग्ध इत्यनेनानैकान्तिकपरिग्रहः। चकारादनपदेशस्य च पुनरावर्तनादन्योऽपि कालात्ययापदिष्टप्रकरणसमरूपो हेत्वाभास इति सूचितम्। पटुतरप्रत्यक्षाद्यबाधितमेव हि साध्यं प्रायशः साधनार्हमिति लोकप्रसिद्धत्वाद् व्यक्तमनभिधानम्। अप्रसिद्धपदेन सङ्ग्रहो न पुनरभावादिति वक्ष्यत इति न कोपि दोष इति ध्येयम्। ननु तथापि लक्ष्यतावच्छेदकाक्रान्ते केवलान्वयिनि लिङ्गे तदभावे चेत्यादेः केवलव्यतिरेकिणि च प्रसिद्धं च तदन्विते इत्यादेर्लक्षणैकदेशस्यान्वयव्यतिरेकिमात्रगामिनोऽसत्त्वादव्याप्तिरिति चेत् न अस्य व्यस्तसमस्तलक्षणरूपत्वात्। तथाच तदन्वित इत्यन्तमन्वयिनो नास्त्येवेति व्यतिरेकिणो समस्तं चान्वयव्यतिरेकिणः साध्यसाधनत्वं च सामान्यलक्षणं त्रयाणामिति न कोपि दोष इति आचार्याः। विस्तरश्च तद्ग्रन्थे एव द्रष्टव्यः। अत्र १३१ सूत्रं द्रष्टव्यम्।

(१)यथोक्तमपि लिङ्गमगृहीतव्याप्तिकस्य ग्रहणेपि वा विस्मृतव्याप्तिकस्य न गमकमत आह विधिस्त्विति। अविनाभावग्रहणप्रकारस्त्वित्यर्थः अनेन भूयोदर्शनसहकृतावन्वयव्यतिरेकावेव तद्ग्रहणोपाय इति सूचितम्। अत्र ३४४ सूत्रम्।

(२)प्रसिद्धसमयस्य प्रसिद्धाविनाभावस्येत्यर्थः। असन्दिग्धधूमदर्शनादित्यनेन पक्षधर्मताज्ञाने, साहचर्यानुस्मरणात् इत्यनेन स्मरणात्मकव्याप्तिज्ञाने च हेतुता दर्शिता। प्रथमलिङ्गदर्शनं दृष्टान्ते द्वितीयलिङ्गदर्शनं पक्षेऽनन्तरं च अग्न्यध्यवसाये तत्परामर्शे तृतीयलिङ्गदर्शनमित्यनुमितौ लिङ्गदर्शनत्रयस्य कारणतेति आचार्याः। विनश्यदवस्थस्य द्वितीयलिङ्गदर्शनस्य परामर्शहेतुत्वेपि यत्र दृष्टमात्र एव वह्निनिवृत्तौ धूमोऽपि निवृत्तः कालान्तरजिज्ञासावशा-

(१)एवं सर्वत्र देशकालाविनाभूतमितरस्य लिङ्गम् । शास्त्रे

त् परामृश्यते तत्र द्वयोरपि लिङ्गदर्शनयोरतीतत्वात् परामर्शज्ञानं प्रति साहचर्यानुस्मरणमेव कारणम् । यस्तु सर्वथा परामर्शं नेच्छति तेनोपनयो नेष्टव्यः इति । लिङ्गदर्शनव्याप्तिस्मरणाभ्यामेवोपपत्तौ न द्वितीयलिङ्गपरामर्शस्य हेतुता नाप्युभयवैयर्थ्यम् अवयवान्तराप्रतिपादितपक्षधर्मत्वस्य प्रतिपादनाय परार्थानुमाने तदुपयोगादिति कन्दलीकाराः । अविनाभावस्तु व्याप्त्यपरपर्यायोऽव्यभिचरितः सम्बन्धः । ननु व्यभिचारः साध्यात्यन्ताभावसामानाधिकरण्यं तदभावश्चाव्यभिचारः कथं केवलान्वयिनि स्यात् तत्र साध्यात्यन्ताभावस्यैवाप्रसिद्धेरिति चेन्न केवलान्वयिनि सम्बन्धमात्रस्यैव व्याप्तित्वात् । न चैवमननुगमः अननुगतस्यैवानुमितिजनकत्वात् । अनुमितित्वावच्छिन्नं प्रति पक्षधर्मताज्ञानस्यैव जनकत्वात् तद्विशिष्टे व्याप्तिविशेषस्य प्रयोजकत्वात् । अविनाभावसम्बन्धो वा व्याप्तिः, कार्त्स्न्येन सम्बन्धो वेत्यादयस्तु पूर्वपक्षव्याप्तयः शङ्करमिश्रेणैव परास्ता इति तत्रैव विस्तरो द्रष्टव्यः । वस्तुतस्त्वनौपाधिकसम्बन्ध एव व्याप्तिः । अनौपाधिकत्वं च यावत्साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यम् । साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं वा व्याप्तिः । उपाधिस्तु "साधने सोपाधिः साध्ये निरुपाधिः" इत्युक्तदिशा साध्यव्यापकः साधनाव्यापकश्च बोध्यः, यथा धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोगः । केवलसाध्याव्यापकोपाध्यव्याप्तिवारणादिकन्तु उपस्कारव्याख्यायामेवास्माभिः प्रपञ्चितमिति नेह वितन्यते । उपाधिविभागादिप्रकारस्तु किरणावल्यादौ द्रष्टव्यः । अत्र ३४२सूत्रं द्रष्टव्यम् ।

(१)एवं सिद्धवद्धूमानुमानं व्युत्पाद्यान्यत्रानुमानेऽप्यतिदिशति एवमिति । एवं धूमानुमानवत् सर्वत्र सर्वानुमाने व्याप्तिनिश्चय इत्यर्थः । इतरस्य साध्यधर्मस्य । देशाविनाभूतं यथा—काश्मीरेषु सुवर्णभाण्डारिकपुरुषैर्यववाटिकारक्षणं यवनालेषु हेमाङ्कुरोद्भेदस्य लिङ्गम् । कालाविनाभूतं यथा—राज्ञोऽन्तःपुरे प्रातर्गायनादि प्रबोधलिङ्गम् । ननु देशकालाविनाभावमात्रेण गमकत्वे "अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति" सूत्रविरोध इत्यत

कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम् । कस्मात् ? व्यतिरेकदर्शनात् । तद्यथा अध्वर्युरोंश्रावयन् व्यवहितस्य हेतुर्लिङ्गम् चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च शरदि जलप्रसादोऽगस्त्योदयस्येति । एवमादि तत्सर्वमस्येदमिति सम्बन्धमात्रवचनात् सिद्धम् ।

(१)तत्तु द्विविधम्—दृष्टं सामान्यतो दृष्टं च ।

तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमान-

आह शास्त्र इति । नावधारणार्थं नत्वेतावन्त्येव लिङ्गानीत्यवधारणार्थमित्यर्थः । कुत एवमत आह व्यतिरेकेति । कार्यादिव्यतिरेकदर्शनाद्प्यनुमानान्नावधारणमिति भावः । तदेव दर्शयति तद्यथेति । अत्रायं प्रयोगः—अध्वर्युरविदूरदेशेन होत्राऽनुसंहितः यागभूमौ ओंश्रावयेतिशब्दकर्तृत्वात् पूर्वोपलब्धाध्वर्युवत् । अत्र च कार्यताद्यभावः स्पष्ट एव । उदाहरणान्तराण्याह चन्द्रोदय इत्याद्यगस्त्योदयस्येत्यन्तम् । न च तदनन्तरभावित्वमात्रेण कार्यत्वमत्र शंक्यम्, तस्यान्यथासिद्धत्वात् । उत्तरदेशप्राप्तिरूपायाः समुद्रवृद्धेः परस्परदलविभागस्य विकासस्य च पूर्वरूपनिवृत्तौ रूपान्तरोत्पादलक्षणजलप्रसादस्य च तत्कालसन्निपातिस्वकारणाधीनकर्मनिबन्धनत्वात् न कार्यादावन्तर्भाव इत्यर्थः । तर्हि कार्यादिव्यतिरिक्तलिङ्गसद्भावात् सूत्रे न्यूनताऽऽपतिता इत्याशङ्क्याह एवमादीति । सिद्धमिति । अस्येदमितिवचनात् सूत्रकृता प्रमाणसिद्धं कृतमित्यर्थः । कार्यकारणादिव्यवच्छेदार्थं मात्रपदम् । अत्र ३४३, १२५ सूत्रात् १३० सूत्रान्तं १२३ १२४ सूत्राणि च क्रमशो द्रष्टव्यानि ।

(१)तद्भेदमाह तत्तु द्विविधमिति । दृष्टं सामान्यतोदृष्टं चेति द्विविधमेवानुमानमिति चकारार्थः । तत्रेति । प्रसिद्धस्य पूर्वं लिङ्गेन सह दृष्टस्य साध्यस्य सम्प्रत्यनुमेयस्य च द्वयोरत्यन्तजात्यभेदे सति यदनुमानं तत्प्रथमं दृष्टमनुमानमित्यर्थः । उदाहरणं यथेति ।

म् । यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद्गवि प्रतिपत्तिः ।

(१)प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतो दृष्टम् । यथा कर्षकवणिग्राजपुरुषाणां च प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजनमनुद्दिश्य प्रवर्तमानानां फलानुमानमिति ।

पूर्वं गोत्वजातिविशिष्टायां गवि सास्नोपलब्ध्या सम्प्रत्यपि तत्रैव गोव्यक्तेरत्यन्तजात्यभेदेऽनुमानं दृष्टमाख्यायते । सांख्ये इदमेव दृष्टस्वलक्षणसामान्यविषयमित्युच्यते सास्नामात्रदर्शनाद्वनान्तरे यदनुमीयते गोत्वसामान्यं तस्य स्वलक्षणं पूर्वं नगरे दृष्टमिति ।

(१)द्वितीयमाह प्रसिद्धसाध्ययोरिति । प्रसिद्धस्य प्रतीतस्य साध्यस्यानुमेयस्य चात्यन्तजातिभेदे सति लिङ्गानुमेयधर्मयोः सामान्यानुवृत्तितो लिङ्गसामान्यस्य साध्यसामान्येन सहाविनाभावात् यदनुमानं तत्सामान्यतो दृष्टमित्यर्थः । उदाहरति यथेति । अत्र धान्यादिकं काञ्चनादिकं वाजिवारणादिकं यथासंख्यं त्रयाणां फलं स्वर्गादिकं तु वर्णाश्रमिणां प्रवृत्तेः फलमित्यन्तजातिभेदः । सिद्धसाध्यतापरिहाराय दृष्टं प्रयोजनमनुद्दिश्येति । प्रवृत्तित्वसामान्यस्य फलवत्त्वसामान्येनाविनाभावादनुमानोदयस्तु वर्णाश्रमिणां प्रवृत्तिः स्वर्गादिफलिका फलवत्त्वात्कर्षकादिप्रवृत्तिवदित्याकारः सामान्येन नियमदर्शनात् सामान्यतोदृष्टमित्युच्यत इति भावः । अत्र स्वर्गादिरूपफलविशेषलाभः पक्षधर्मताबलाद्भवतीत्याचार्याः । स्वर्गादिरूपविशेषजातीयस्य नियमो न दृष्ट इत्यदृष्टस्वलक्षणसामान्यविषयमिदमनुमानं सांख्यानामित्यलं विस्तरेण ।

कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम्। कस्मात्? व्यतिरेकदर्शनात्। तद्यथा अध्वर्युरोंश्रावयन् व्यवहितस्य हेतुर्लिङ्गम् चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च शरदि जलप्रसादोऽगस्त्योदयस्येति। एवमादि तत्सर्वमस्येदमिति सम्बन्धमात्रवचनात् सिद्धम्।

(१)तत्तु द्विविधम्—दृष्टं सामान्यतो दृष्टं च।

तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमान-

आह शास्त्र इति। नावधारणार्थं नत्वेतावन्त्येव लिङ्गानीत्यवधारणार्थमित्यर्थः। कुत एवमत आह व्यतिरेकेति। कार्यादिव्यतिरेकदर्शनादप्यनुमानान्नावधारणमिति भावः। तदेव दर्शयति तद्यथेति। अत्रायं प्रयोगः-अध्वर्युरविदूरदेशेन होत्राऽनुसंहितः यागभूमौ ओंश्रावयेतिशब्दकर्तृत्वात् पूर्वोपलब्धाध्वर्युवत्। अत्र च कार्यताद्यभावः स्पष्ट एव।उदाहरणान्तराण्याह चन्द्रोदय इत्याद्यगस्त्योदयस्येत्यन्तम्। न च तदनन्तरभावित्वमात्रेण कार्यत्वमत्र शंक्यम्, तस्यान्यथासिद्धत्वात्। उत्तरदेशप्राप्तिरूपायाः समुद्रवृद्धेः परस्परदलविभागस्य विकासस्य च पूर्वरूपनिवृत्तौ रूपान्तरोत्पादलक्षणजलप्रसादस्य च तत्कालसन्निपातिस्वकारणाधीनकर्मनिबन्धनत्वात् न कार्यादावन्तर्भाव इत्यर्थः। तर्हि कार्यादिव्यतिरिक्तलिङ्गसद्भावात् सूत्रे न्यूनताऽऽपतिता इत्याशङ्क्याह एवमादीति। सिद्धमिति। अस्येदमितिवचनात् सूत्रकृता प्रमाणसिद्धं कृतमित्यर्थः। कार्यकारणादिव्यवच्छेदार्थं मात्रपदम्। अत्र ३४३, १२५ सूत्रात् १३० सूत्रान्तं १२३ १२४ सूत्राणि च क्रमशो द्रष्टव्यानि।

(१)तद्भेदमाह तत्तु द्विविधमिति। दृष्टं सामान्यतोदृष्टं चेति द्विविधमेवानुमानमिति चकारार्थः। तत्रेति। प्रसिद्धस्य पूर्वं लिङ्गेन सह दृष्टस्य साध्यस्य सम्प्रत्यनुमेयस्य च द्वयोरत्यन्तजात्यभेदे सति यदनुमानं तत्प्रथमं दृष्टमनुमानमित्यर्थः। उदाहरणं यथेति।

म् । यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद्गवि प्रतिपत्तिः ।

(१)प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतो दृष्टम् । यथा कर्षकवणिग्राजपुरुषाणां च प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजनमनुद्दिश्य प्रवर्तमानानां फलानुमानमिति ।

पूर्वं गोत्वजातिविशिष्टायां गवि सास्नोपलब्ध्या सम्प्रत्यपि तत्रैव गोव्यक्तेरत्यन्तजात्यभेदेऽनुमानं दृष्टमाख्यायते । सांख्ये इदमेव दृष्टस्वलक्षणसामान्यविषयमित्युच्यते सास्नामात्रदर्शनाद्वनान्तरे यदनुमीयते गोत्वसामान्यं तस्य स्वलक्षणं पूर्वं नगरे दृष्टमिति ।

(१)द्वितीयमाह प्रसिद्धसाध्ययोरिति । प्रसिद्धस्य प्रतीतस्य साध्यस्यानुमेयस्य चात्यन्तजातिभेदे सति लिङ्गानुमेयधर्मयोः सामान्यानुवृत्तितो लिङ्गसामान्यस्य साध्यसामान्येन सहाविनाभावात् यदनुमानं तत्सामान्यतो दृष्टमित्यर्थः । उदाहरति यथेति । अत्र धान्यादिकं काञ्चनादिकं वाजिवारणादिकं यथासंख्यं त्रयाणां फलं स्वर्गादिकं तु वर्णाश्रमिणां प्रवृत्तेः फलमित्यन्तजातिभेदः । सिद्धसाध्यतापरिहाराय दृष्टं प्रयोजनमनुद्दिश्येति । प्रवृत्तित्वसामान्यस्य फलवत्त्वसामान्येनाविनाभावादनुमानोदयस्तु वर्णाश्रमिणां प्रवृत्तिः स्वर्गादिफलिका फलवत्त्वात्कर्षकादिप्रवृत्तिवदित्याकारः सामान्येन नियमदर्शनात् सामान्यतोदृष्टमित्युच्यत इति भावः । अत्र स्वर्गादिरूपफलविशेषलाभः पक्षधर्मताबलाद्भवतीत्याचार्याः । स्वर्गादिरूपविशेषजातीयस्य नियमो न दृष्ट इत्यदृष्टस्वलक्षणसामान्यविषयमिदमनुमानं सांख्यानामित्यलं विस्तरेण ।

(१)तत्र लिङ्गदर्शनं प्रमाणं प्रमितिरग्निज्ञानम् ।

(२)अथवाऽग्निज्ञानमेव प्रमाणं प्रमितिरग्नौ गुणदोषमाध्यस्थ्यदर्शनमित्येतत् स्वनिश्चितार्थमनुमानम् ॥

(३)शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात् । यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादि-

---

(१)करणव्युत्पत्तिसिद्धप्रमाणशब्दस्य फलं विनाऽपर्यवसानात् प्रमाणफलविभागमाह तत्रेति । प्रमाणं प्रमाकरणं प्रमितिरग्निज्ञानं तत्फलमित्यर्थः ।

(२)प्रकारान्तरमाहाथवेति । नन्वयं प्रमाणप्रमेयभावो न नियतः सोपाधित्वादुपाधीनामनियतत्वात् अनियतं चासत् तथाचायं रज्जावारोपितं सर्पत्वमिव काल्पनिकः प्रमाणप्रमेयभाव आपतित अत आहाथवेतीति आचार्याः । तथाचोपाधीनां नियतत्वाद् नायं परमार्थासत् न हि येनोपाधिना प्रमाणत्वमिष्यते तदा तेनैव तत्त्वेष्यत इति कस्याप्यभ्युपगमः । एवञ्च एकोपाधिसद्भावे उपाध्यन्तरसंभवेपि न क्षतिः सन्नयं पार्थिवो द्रव्यं घटश्चेति ज्ञानस्य वास्तविकत्वात् । यत्पूर्वमते फलमासीत् तदेवात्र प्रमाकरणं प्रमितिश्च गुणदोषमाध्यस्थ्यदर्शनं हेयोपादेयोपेक्षाप्रतिपत्तिरित्यर्थः । उपसंहरति एतदिति । निश्चितार्थमिति भावे क्तः । स्वनिश्चयार्थमित्यर्थः । अत्र ३४२ ५६ सूत्रे ।

(३)शब्दादीन्यपि प्रमाणान्तराणि सङ्गिरन्ते वादिनः, तानि कुतो नोक्तानीत्याशंक्य तेषामत्रैवान्तर्भावान्न पृथगभिधानमित्याह शब्दादीनामिति । समानविधित्वात् समानप्रवृत्तिप्रकारत्वात् यथा व्याप्तिग्रहणबलेनानुमानं तथा शब्दादयोऽपि प्रवर्तन्त इत्यर्थः । शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वाद्धूमवदिति । समानविधित्वमेव दर्शयति यथेति । प्रसिद्धः समयोऽविनाभावोऽव्यभिचार इति यावत् यस्य पुरुषस्य तस्य लिङ्गदर्शन-

व्याप्तिस्मरणाभ्यां यथाऽतीन्द्रियेऽर्थे भवत्यनुमानं तथा शब्दादिभ्योपीत्यर्थः । तावद्धि शब्दो नार्थं प्रतिपादयति यावदयमस्याव्यभिचारीत्येवं नावगम्यते ज्ञाते त्वव्यभिचारे प्रतिपादयन्नर्थं धूम इव लिङ्गं स्यादिति भावः । अपिनोपमानादिप्रमाणान्तराणां ग्रहणम् । शब्दस्य बहुविषयत्वान्नियतविषयोपमानाद्युत्कर्षपरत्वाच्च कण्ठतो ग्रहणम् । नन्वनुमाने साध्यधर्मविशिष्टो धर्मी प्रतीयते शब्दादर्थानुमाने को धर्मी न तावदर्थः तदानीं तस्याप्रतीयमानत्वात् । शब्दो धर्मीति चेत् किमस्य साध्यम्? अर्थवत्त्वं चेन्न पर्वतादेर्वह्न्यादिनेव शब्दस्यार्थेन सह संयोगादिरूपः सम्बन्धः कश्चिद्येनार्थविशिष्टोऽयं साधनीयः स्यात् । प्रतिपाद्यप्रतिपादकभावरूपो हि सम्बन्धोऽर्थप्रतीत्युत्तरकालीनो नार्थप्रतिपादनात्पूर्वं सम्भवति । देशकालव्यभिचाराच्च नाव्यभिचाररूपोऽपि सः असत्यामपि लङ्कायां जंबुद्वीपे लङ्काशब्दश्रवणादसत्यपि युधिष्ठिरे कलौ युधिष्ठिरशब्दप्रयोगाच्च व्यभिचारदर्शनात् । तस्मादनुमानसामग्रीवैलक्षण्याच्छब्दो नानुमानं देशविशेषेष्वर्थव्यभिचारात् न हि धूमो वन्हिमिव शब्दो नार्थं व्यभिचरति दाक्षिणात्यानां चौरशब्दे भक्ताभिधानात् आर्यावर्तवासिनां च तस्कराभिधानात् इति चेन्न ऊर्ध्वीकृतायां तर्जन्यां क्रयविक्रयव्यवहारे वणिजां तथाविधतर्जनीविन्यासस्य दशसंख्याप्रतिपादनाभिप्रायाव्यभिचारोपलम्भात्कर्तुस्तत्प्रतिपादनाभिप्रायावगतिमुखेन दशसंख्याप्रतीतिहेतुत्वमिवास्यापि अर्थप्रतीतिहेतुत्वम् । तद्यथा प्रथमं गोशब्दादुच्चारिताद्वक्तुः सास्नादिमदर्थविवक्षा गम्यते स्वसन्ताने गोशब्दोच्चारणस्य तदर्थविवक्षापूर्वकत्वोपलम्भात् तदर्थविवक्षया चार्थानुमानम् । प्रयोगश्च—पुरुषो धर्मी सास्नादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वादहमिवेति । आप्ताभिप्रायादेवास्यार्थाधिगतिरिति कन्दलीकाराः । आचार्यास्तु—एते पदार्था मिथः संसर्गवन्तः आकाङ्क्षादिमद्भिः पदैः स्मारितत्वात् गामभ्याजेति पदार्थवत् इति । न च विशेषासिद्धिः संसर्गस्य संसृज्यमानविशेषापेक्ष्यैव विशिष्टत्वात् । यद्वैतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारितत्वात् गामभ्याजेतिपदकदम्बवदिति । न चैवमर्थासिद्धिर्दोषः ज्ञानावच्छेदकतया तदसिद्धेः । तस्य

भ्योऽपीति । श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्षः, तद्वचनादाम्नायप्रामाण्यम् । लिङ्गाच्चानित्यो-बुद्धिपूर्वा वाक्यकृतिर्वेदे, बुद्धिपूर्वो ददातिरित्युक्तत्वात् ॥

संसृज्यमानोपहितस्यैवावच्छेदकत्वात् न विशेषाप्रतिलम्भ इति । अत्र साध्यादिविचारशैली किरणावल्यादौ द्रष्टव्या । ननु आप्तोक्तत्वादेव शब्दस्यार्थाधिगमकत्वे वेदवाक्यात्तत्प्रत्ययो दुर्घटस्तत्र वक्तुरेवाभावादत आह श्रुतिस्मृतीति । न केवलं लौकिक आम्नायः किन्तु श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तुः प्रामाण्यमपेक्ष्य प्रत्यायक इत्यर्थः । ननु वेदस्य नित्यत्वपक्ष एव वक्त्रभावाद्दोषाभावः सिद्ध्येत पौरुषेयत्वे तु कदाचित्पुरुषाणां रागद्वेषादिभिरयथार्थस्यापि वाक्यस्य दर्शनात् प्रामाण्यं न घटेतेत्याशंक्याह तद्वचनादिति । तदिति अनागतावेक्षणेनास्मद्बुद्धिभ्यो लिङ्गमृषेरिति सूत्रे प्रतिपादितस्यास्मद्विशिष्टस्य वक्तुः परामर्शः । तद्वचनात् तेन पुरुषविशेषेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यम् । अयमभिप्रायः—दोषाभावप्रयुक्तं प्रामाण्यं न नित्यत्वप्रयुक्तं नित्यत्वेऽपि श्रोत्रमनसोरागन्तुकदोषेण क्वचिदप्रामाण्यात् अनित्यत्वेपि प्रमृष्टदोषाणां चक्षुरादीनां प्रामाण्याच्च । दोषाश्च पुरुषविशेषे न सन्तीत्युपपादितम् । तस्मात्तदुक्तस्याम्नायस्य सत्यपि पौरुषेयत्वे प्रामाण्यमेवं न हि यथार्थद्रष्टा प्रक्षीणरागद्वेषः कृपावानुपदेष्टुं प्रवृत्तोऽयथार्थमुपदिशेदिति । तद्वचनादाम्नायस्येत्ययुक्तं तदर्थानुष्ठानकालेऽनुष्ठातृभिः कर्तुरस्मरणादभावसिद्धेरित्यत आह लिङ्गाच्चानित्य इति । लिङ्गादाम्नायोऽनित्य इत्यर्थः । लिङ्गमुपन्यस्यति बुद्धिपूर्वा वाक्यकृतिरिति । शब्दमात्रस्यानित्यतावादिनां नैयायिकानां मते तत्समूहस्य पदस्य तत्समूहस्य च वाक्यविशेषस्य नित्यता दुर्लभैवेत्यर्थः । प्रयोगश्च—वेदवाक्यकृतिः बुद्धिपूर्विका वाक्यरचनात्वात् लौकिकवाक्यरचनावदिति । लिङ्गान्तरमाह बुद्धिपूर्वो ददातिरित्युक्तत्वात् इति । वैदिकददातिशब्दो बुद्धिपूर्वकः ददातिरित्युक्तत्वात् लौकिकतच्छब्दवत् । अस्मर्यमाणकर्तृक-

(१)प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात् तदप्यनुमानमेव ॥

(२)आप्तेनाप्रसिद्धस्य गवयस्य गवा गवयप्रमि-

त्वं च "प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत् स तपोऽतप्यत तस्मात्तपसश्चत्वारो वेदा अजायन्त" इत्यादिना प्रसिद्धमेव। तदेवमनित्यत्वे वेदस्य सिद्धे पुरुषवचसां द्वैविध्यदर्शनात् प्रामाण्यसन्देहे सति दृष्टेऽर्थे सन्देहात् प्रवृत्तिसंभवेऽपि अदृष्टेऽर्थे प्रचुरवित्तव्ययायाससाध्ये प्रेक्षावत्प्रवृत्तिः प्रामाण्यावधारणं विना न भवेदिति लौकिकवचसो वक्तृगुणावगतिपूर्वकप्रामाण्यमिव वेदेऽपि तथा प्रामाण्यान्निर्विचिकित्समनुष्ठानमित्यलं प्रपञ्चेन। स्वतःप्रामाण्यवादिमीमांसकमतखण्डनप्रकारस्तु कन्दल्यादौ द्रष्टव्यः। अत्र १११ ३७० ३४५ ३४६ २२५ २२६ २२७ सूत्राणि, ३ सूत्रं च द्रष्टव्यम्।

(१)शब्दानन्तरमुपमानस्यान्तर्भावो यद्यपि वक्तुमुचितस्तथापि शब्दविशेषरूपचेष्टायास्तत्प्रस्तावेऽन्तर्भावमाह प्रसिद्धाभिनयस्येति। कराकुञ्चनाद्यभिनयस्याह्वानादिप्रतीतिजनकत्वेन चेष्टां प्रमाणान्तरमवधारयन्ति केचित्, तन्मतं दूषयितुमयमुपन्यासः। प्रसिद्धो व्याप्त्या गृहीतोऽभिनयः सङ्केतविशेषो येन पुरुषेण तस्य चेष्टया कायिकव्यापारेण प्रतिपत्तिदर्शनात् प्रतिपत्तिदर्शनरूपत्वात्, तदपि दर्शनमुपलभ्यमानमनुमानमेवानुमानफलमेवेत्यर्थः। अयमभिप्रायः—सति चेष्टायाः प्रामाण्ये तदीयप्रवेशश्चिन्तनीयः प्रमाणमेवासौ न भवति। सा तु द्विधा कृतसमयाकृतसमयभेदात्। तत्र प्रथमाऽभिप्रायस्थशब्दस्मरणमात्रोपयोगिनी लिपिवत्। शब्द एव तु चेष्टयोत्पादितस्मरणरूपः प्रमाणमर्थे। द्वितीया तु न प्रमाणान्तरमविनाभावात् न हि यत्र धूमस्तत्राग्निरित्यनौपाधिकसम्बन्धवद्यत्रोर्ध्वतर्जनी तत्र दशसंख्यापदार्थस्मरणमिति नियमः सर्वोपदर्शनादौ व्यभिचारात् स्मारकत्वेऽपि न प्रमाणमित्यन्यत्र विस्तरः।

(२)उपमानमन्तर्भावयति आप्तेनेति। आप्तेन प्रसिद्धसादृश्येना-

भ्योऽपीति । श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्षः, तद्वचनादाम्नायप्रामाण्यम् । लिङ्गाच्चानित्यो-बुद्धिपूर्वा वाक्यकृतिर्वेदे, बुद्धिपूर्वो ददातिरित्युक्तत्वात् ॥

संसृज्यमानोपहितस्यैवावच्छेदकत्वात् न विशेषाप्रतिलम्भ इति । अत्र साध्यादिविचारशैली किरणावल्यादौ द्रष्टव्या । ननु आप्तोक्तत्वादेव शब्दस्यार्थाधिगमकत्वे वेदवाक्यात्तत्प्रत्ययो दुर्घटस्तत्र वक्तुरेवाभावादत आह श्रुतिस्मृतीति । न केवलं लौकिक आम्नायः किन्तु श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तुः प्रामाण्यमपेक्ष्य प्रत्यायक इत्यर्थः । ननु वेदस्य नित्यत्वपक्ष एव वक्त्रभावाद्दोषाभावः सिद्ध्येत पौरुषेयत्वे तु कदाचित्पुरुषाणां रागद्वेषादिभिरयथार्थस्यापि वाक्यस्य दर्शनात् प्रामाण्यं न घटेतेत्याशंक्याह तद्वचनादिति । तदिति अनागतावेक्षणेनास्मद्बुद्धिभ्यो लिङ्गमृषेरिति सूत्रे प्रतिपादितस्यास्मद्विशिष्टस्य वक्तुः परामर्शः । तद्वचनात् तेन पुरुषविशेषेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यम् । अयमभिप्रायः—दोषाभावप्रयुक्तं प्रामाण्यं न नित्यत्वप्रयुक्तं नित्यत्वेऽपि श्रोत्रमनसोरागन्तुकदोषेण क्वचिदप्रामाण्यात् अनित्यत्वेपि प्रमृष्टदोषाणां चक्षुरादीनां प्रामाण्याच्च । दोषाश्च पुरुषविशेषे न सन्तीत्युपपादितम् । तस्मात्तदुक्तस्याम्नायस्य सत्यपि पौरुषेयत्वे प्रामाण्यमेवं न हि यथार्थद्रष्टा प्रक्षीणरागद्वेषः कृपावानुपदेष्टुं प्रवृत्तोऽयथार्थमुपदिशेदिति । तद्वचनादाम्नायस्येत्ययुक्तं तदर्थानुष्ठानकालेऽनुष्ठातृभिः कर्तुरस्मरणादभावसिद्धेरित्यत आह लिङ्गाच्चानित्य इति । लिङ्गादाम्नायोऽनित्य इत्यर्थः । लिङ्गमुपन्यस्यति बुद्धिपूर्वा वाक्यकृतिरिति । शब्दमात्रस्यानित्यतावादिनां नैयायिकानां मते तत्समूहस्य पदस्य तत्समूहस्य च वाक्यविशेषस्य नित्यता दुर्लभैवेत्यर्थः । प्रयोगश्च—वेदवाक्यकृतिः बुद्धिपूर्विका वाक्यरचनात्वात् लौकिकवाक्यरचनावदिति । लिङ्गान्तरमाह बुद्धिपूर्वो ददातिरित्युक्तत्वात् इति । वैदिकददातिशब्दो बुद्धिपूर्वकः ददातिरित्युक्तत्वात् लौकिकतच्छब्दवत् । अस्मर्यमाणकर्तृक-

(१)प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात् तदप्यनुमानमेव ॥

(२)आप्तेनाप्रसिद्धस्य गवयस्य गवा गवयप्रति-

त्वं च "प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत् स तपोऽतप्यत तस्मात्तपसश्चत्वारो वेदा अजायन्त" इत्यादिना असिद्धमेव। तदेवमनित्यत्वे वेदस्य सिद्धे पुरुषवचसां द्वैतोपलम्भात् प्रामाण्यसन्देहे सति दृष्टेऽर्थे सन्देहात् प्रवृत्तिसंभवेपि अदृष्टेऽर्थे प्रचुरवित्तव्ययायाससाध्ये प्रेक्षावत्प्रवृत्तिः प्रामाण्यावधारणं विना न भवेदिति लौकिकवचसो वक्तृगुणावगतिपूर्वकप्रामाण्यमिव वेदेऽपि तथा प्रामाण्यान्निर्विचिकित्समनुष्ठानमित्यलं प्रपञ्चेन। स्वतःप्रामाण्यवादिमीमांसकमतखण्डनप्रकारस्तु कन्दल्यादौ द्रष्टव्यः। अत्र १११ ३७० ३४५ ३४६ २२५ २२६ २२७ सूत्राणि, ३ सूत्रं च द्रष्टव्यम्।

(१)शब्दानन्तरमुपमानस्यान्तर्भावो यद्यपि वक्तुमुचितस्तथापि शब्दविशेषरूपचेष्टायास्तत्प्रस्तावेऽन्तर्भावमाह प्रसिद्धाभिनयस्येति। कराकुञ्चनाद्यभिनयस्याह्वानादिप्रतीतिजनकत्वेन चेष्टां प्रमाणान्तरमवधारयन्ति केचित्, तन्मतं दूषयितुमयमुपन्यासः। प्रसिद्धो व्याप्त्या गृहीतोऽभिनयः सङ्केतविशेषो येन पुरुषेण तस्य चेष्टया कायिकव्यापारेण प्रतिपत्तिदर्शनात् प्रतिपत्तिदर्शनरूपत्वात्, तदपि दर्शनमुपलभ्यमानमनुमानमेवानुमानफलमेवेत्यर्थः। अयमभिप्रायः—सति चेष्टायाः प्रामाण्ये तदीयप्रवेशश्चिन्तनीयः प्रमाणमेवासौ न भवति। सा तु द्विधा कृतसमयाकृतसमयभेदात्। तत्र प्रथमाऽभिप्रायस्थशब्दस्मरणमात्रोपयोगिनी लिपिवत्। शब्द एव तु चेष्टयोत्पादितस्मरणरूपः प्रमाणमर्थे। द्वितीया तु न प्रमाणान्तरमविनाभावात् न हि यत्र धूमस्तत्राग्निरित्यनौपाधिकसम्बन्धवद्यत्रोर्ध्वतर्जनी तत्र दशसंख्यापदार्थस्मरणमिति नियमः भयोपदर्शनादौ व्यभिचारात् स्मारकत्वेपि न प्रमाणमित्यन्यत्र विस्तरः।

(२)उपमानमन्तर्भावयति आप्तेनेति। आप्तेन प्रसिद्धसादृश्येना-

पादनादुपमानमाप्तवचनमेव ॥

(१)दर्शनार्थादर्थापत्तिर्विरोध्येव(२)श्रवणादनुमितानुमानम्।

प्रसिद्धगवयस्याज्ञातगवयस्य कीदृग्गवय इति जिज्ञासावतो गवा गोसादृश्येन गवयशब्दवाच्यस्य प्रतिपादनाद्यथा गौस्तथा गवय इत्याप्तवचनमेवातिदेशवाक्यमेवोपमानं प्रमाणमित्यर्थः । वाक्यादेव संज्ञासंज्ञिपरिच्छेदस्यापि सिद्धेः, आप्तवचनं चानुमानमेव तस्मादुपमानमप्यनुमानमेवेत्यभिप्रायः । यत्तु वने गवयदर्शनात् स्मृतायां गवि मदीया गौरेतत्सदृशीति सारूप्यज्ञानमुपमानाव-षय इति मीमांसकमतं तदपि न सामान्यवत् प्रत्येकं व्यक्तिगतं सादृश्यं न संयोगवदुभयत्र पर्याप्तं गोपिण्डस्यादर्शनेऽपि वने गवये गोसदृशोऽयमिति प्रतीत्युत्पादात् स्मरणात्मकमेवेति कन्दलयादौ द्रष्टव्यम् । गोसदृशस्य गवयशब्दवाच्यत्वज्ञानं तु गवयशब्दो गोसदृशस्य वाचकः असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् घटशब्दवदित्याद्यनुमानमेव । प्रत्यक्षे गवये सादृश्यज्ञानं तु प्रत्यक्षमेवेन्द्रियार्थसन्निकर्षजत्वादित्यवधेयम् ।

(१)अर्थापत्तिमपि प्रमाणान्तरं मन्यन्ते वादिनस्तद्दूषयन्नाह दर्शनार्थादिति । दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थान्तरकल्पनाऽर्थापत्तिः । सा द्विविधा—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति । तत्र प्रथमा यथा जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिःसत्त्वकल्पनं तद्विना जीवित्वानुपपत्तेः । तत्र प्रथमदूषणाभिप्रायेण दर्शनार्थादिति पदम् । दृश्यत इति दर्शनं तच्चासावर्थश्चेति दर्शनार्थः, पञ्चभिः प्रमाणैरवगतोऽर्थः तस्माद्दर्शनार्थादर्थान्तरस्यावगतिः सा विरोध्येव विरोध्यनुमानमेवेत्यर्थः । यस्य यथा नियमस्तस्य तथैव लिङ्गत्वम् । इह तु प्रमाणान्तरविरुद्ध एवार्थोऽर्थान्तराविनाभूत इति विरोध्येव लिङ्गम् । तथा च यद्यनुपपत्तिमात्रेण गृहाभावो बहिर्भावं कल्पयति नियमहेतोरभावादर्थान्तरमपि कल्पयेदित्यभिप्रायः । अयमत्र प्रयोगः—देवदत्तो बहिःसत्तावान् जीवित्वे सति गृहेऽसत्त्वादहमिवेति ।

(२)श्रुतार्थापत्तिमन्तर्भावयन्नाह श्रवणादिति । लिङ्गभूतेन श्रुतेन

(१)सम्भवोऽप्यविनाभावित्वादनुमानमेव ॥

(२)अभावोऽप्यनुमानमेव । यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम् , एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम् ॥

पीनो देवदत्तो दिवा न भुङ्क्त इति वाक्येनानुमितात् पीनत्वात् तत्कारणस्य रात्रिभोजनस्यानुमानमित्यर्थः । श्रवणादुक्तवाक्यश्रवणादनुमितानुमानमिति भाष्यसन्दर्भः । अयञ्च प्रयोगः–देवदत्तो रात्रिभोजी पीनत्वे सति दिवाऽभोजित्वादिति । न चासिद्धिः वाक्यप्रामाण्यान्यथानुपपत्त्या तत्सिद्धेरिति नार्थापत्तिः प्रमाणान्तरमिति सिद्धम् ।

(१)'शतं सहस्रे संभवतीति' संभवाख्यात्प्रमाणान्तरात् सहस्रेण शतज्ञानमिति केचित्तन्मतनिरासायाह । संभवोपीति । इदं शतसंख्यावत् सहस्रसंख्यावत्त्वाच्छतसंख्याव्याप्यपञ्चाशत्संख्यायुक्तफलपुञ्जवदिति प्रयोगोऽत्र बोध्यः । अत्र ३४६ सूत्रम् ।

(२)ननु तथापि यत्र प्रमाणान्तराणां प्रसक्तिविरोधस्तदभावाख्यं प्रमाणमभ्युपेयमत आहाऽभावोपीति । अपिना क्वचित् प्रत्यक्षमेवेत्यर्थः । नन्वभावस्य नेन्द्रियेण सन्निकर्षो नापि सत्तामात्रेण व्याप्रियमाणस्य क्वचित् लिङ्गत्वमत आह यथोत्पन्नमिति । कारणसद्भावे सामग्र्याः सद्भावे । अनुत्पन्नं कार्यं कार्यप्रागभावः । कारणासद्भावे सामग्र्या अभावे । लिङ्गं ज्ञापकमित्यर्थः । स चाभावः क्वचित् प्रत्यक्षः क्वचिच्चानुमानिक इति लोकसिद्धमिति भावः । योऽपि अभावं प्रमाणं वदति तस्यापि न ज्ञानानुत्पादमात्रात् प्रमेयभूतभावज्ञानं स्वरूपविप्रकृष्टस्यापि वस्तुनोऽभावप्रसङ्गात् किन्तु ज्ञानहेतुषु सत्सु ज्ञानयोग्यस्य वस्तुनो ज्ञानानुत्पादोऽभावावगतिहेतुः । न चायोग्यानुपलम्भाद्योग्यानुपलम्भे कश्चित्स्वरूपतो विशेषोऽभावस्य निरतिशयत्वात् तेन नायमिन्द्रियवत् स्वशक्त्या बोधकः किन्तु योग्यानुपलम्भो ज्ञेयाव्यभिचारी अयोग्यानुपलम्भस्तु तद्व्यभिचारी ज्ञेये सत्यपि तस्य सम्भवात् तथाच योग्यानुपलम्भेऽभावप्रतिपाद-

(१)तथैवैतिह्यमप्यवितथमाप्तोपदेश एवेति ॥

को नान्यः। एवं चाभावो लिङ्गमेवाविनाभावग्रहणसापेक्षत्वात् अनपेक्षत्वेऽनवस्थाप्रसङ्गः स्यात् । अपि च भावज्ञानवदभावज्ञानेपि इन्द्रियसंनिकर्षो हेतुरिति सोऽपि प्रत्यक्ष एव। भावांशेनैव तत्संनिकर्षे तु न किमपि प्रमाणम् । कार्यगम्या हि योग्यता–यथा भावपदार्थे इन्द्रियान्वयव्यतिरेकानुविधायि कार्यं तद्वदभावेऽपीति भाववदभावोऽपि इन्द्रियग्रहणयोग्य एव। कार्यदर्शनाच्चास्येन्द्रियसम्बन्धेपि विशेषणविशेष्यभावादिः कल्पित एव नैयायिकैरित्यलं पल्लवितेन।

ये तु पुनरभावरूपस्य प्रमेयस्य प्रशस्तपादाचार्यैरनङ्गीकृतत्वान्न साध्वी प्रमाणचिन्तेति वदन्ति ते प्रष्टव्याः, नास्तीति प्रतीतिस्सर्वजनसिद्धा किं सालम्बना निरवलम्बना वा? द्वितीये निरालम्बनं विज्ञानमिच्छतां विदुषां प्रतिभापराकाष्ठा। प्रथमे भूतलस्यालम्बनत्वे कण्टकादिमत्यपि भूतले कण्टको नास्तीति ज्ञानं तत्पूर्वकश्च निःशङ्कं गमनागमनलक्षणव्यापारो दुर्निवारः स्यात् । भाव एवैकाकी सद्वितीयश्चेति द्वयीमवस्थामनुभवति । एकाकित्वं स्वरूपमात्रं कैवल्यं वा तदा हि जिघृक्षितो घटादिरनुपलब्धो घटाद्यभावव्यवहारं प्रवर्तयति इति मन्यसे चेत् घटादेरभावाद्भूतलं च व्यतिरिच्यैकाकिशब्दार्थः कः समर्थितो यो भवद्भिर्नास्तीति प्रतिषेधधियो ह्यालम्बनं स्वीक्रियेत विषयवैलक्षण्यं विना विलक्षणबुध्युत्पादाभावात् । भावस्य स्वाभाविकमेकत्वमेवैकाकित्वमिति चेत्, किमेकत्वम् प्रतियोगिरहितत्वमेकत्वसंख्या वा ? एकत्वसंख्या तावद्यावदाश्रयभाविनी भावस्य सद्वितीयावस्थायामप्यनुवर्तते। अथ प्रतियोगिरहितत्वं स्वाभाविकमेकत्वमुच्यते सिद्धं प्रमेयान्तरम् । स च चतुर्व्यूहः प्रागभावप्रध्वंसाभावेतरेतराभावात्यन्ताभावभेदात् इति । निःश्रेयसहेतुपदार्थतत्त्वज्ञाननिरूपणपरेण भाष्यकारेण समुपेक्षितोपि अभावपदार्थः सूत्रकारमते सर्वथाऽस्तीति भाष्यसमालोचनपरैरस्मत्परमगुरुवरैः श्रीकैलासचन्द्रभट्टाचार्यैः सिद्धान्तितमिति तत्रैव द्रष्टव्यम्।

(१)ऐतिह्यमन्तर्भावयति तथैतिह्यमिति। इति हेति निपातसमुदा-

(१)पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं परार्थानुमानम् । पञ्चावयवेनैव वाक्येन संशयितविपर्यस्ताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयम् ॥

यः । पुरावृत्ते वर्तते तस्य भाव ऐतिह्यम् । स्वार्थे ष्यञ् । वितथं तदप्रमाणमेवावितथमाप्तोपदेश एव स चानुमानमित्यनुमानान्न व्यतिरिच्यते ऐतिह्यमित्यभिप्रायः ।

(१)परार्थानुमानव्युत्पादनायाह पञ्चावयवेनेति । नन्वनुमानं सिद्धं पञ्चावयवप्रयोगसहायता त्वस्यासिद्धा तद्व्यतिरेकेणानुमानसंभवात् । न चात्रार्थेऽप्रतिपन्नोऽसौ परप्रतिपादनानुपपत्तेरत आह पञ्चावयवेनेत्याचार्याः । अर्थ्यते गम्यतेऽनुमेयमनेनेत्यर्थो लिङ्गं तस्यार्थस्य स्वनिश्चितस्य साध्याविनाभावितया स्वयं गृहीतस्य प्रतिपाद्यतेऽनेनेति प्रतिपादनं प्रतिपादकं यत् परार्थं परसन्देहव्युत्सादार्थं तत् परार्थानुमानमित्यर्थः । केन रूपेण पुनस्तत्प्रतिपादकत्वन्तदाह पञ्चावयवेनैव वाक्येनेति । इत्थंभूतलक्षणे तृतीया पञ्चावयववाक्यरूपमित्यर्थः । यद्वा सुनिश्चितस्यानुमेयस्य प्रतिपादनं प्रतिपत्तिर्येन लिङ्गप्रतिपादनावान्तरव्यापारवता पञ्चावयवेन वाक्येन स्मृतिसमारूढेन परार्थं भवति तद्वाक्यं परार्थानुमानमिति । केवलशब्दस्यानिमित्तत्वान्नास्मिन् पक्षेऽनुमेयप्रतिपत्तेः शाब्दत्वप्रसङ्ग इति ध्येयम् । द्व्यवयववादिबौद्धादिमतनिराकरणद्वारा स्वोक्तं विवृणोति पञ्चावयवनैवेति । संशयितोऽर्थे सन्दिग्धः विपर्यस्तः मिथ्याज्ञानवान् अव्युत्पन्नो मूढस्ते त्रयोऽपि प्रतिपादनार्हास्तत्त्वप्रतीत्यभावात् यो यानि पदानि प्रयुंक्ते स तत्पदार्थसंसर्गप्रतिपादनाभिप्रायवानिति स्वात्मनि नियमे गृहीते तदनु पदसमूहप्रयोगाद्वक्तुस्तत्पदार्थसंसर्गप्रतिपादनाभिप्रायावगतिद्वारा पदेभ्यो वाक्यार्थानुमानमित्यशाब्दो वाक्यार्थ इति हृदयम् । निरवयवस्य स्फोटस्य शब्दरूपत्वात् पञ्चावयववाक्यं तदर्थधियमाधत्ते इति कथं सङ्गच्छत इति तु न वाच्यम्, औपाधिकस्यैवास्याभिन्नार्थप्रत्ययस्याङ्गीकारात् ।

(२०)अवयवप्रकरणम् ।

(१)अवयवाः पुनः-प्रतिज्ञापदेशनिदर्शनानुसन्धान-प्रत्याम्नायाः । तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा । प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशविषयमापादयितुमुद्देशमात्रं प्रतिज्ञा । यथा द्रव्यं वायुरिति ।

पदार्थप्रतीतिहेतुत्वमेव हि उपाधिः । पदप्रतीतिहेतुत्वं च क्षणिकत्वेऽपि स्मर्यमाणानां नियतानुपूर्वीविशिष्टानां यावन्तो यादृशा ये चेत्यादिपरिगृहीतानां सुकरमेवान्यथा स्फोटाङ्गीकारेपि समानत्वादिति कृतं विस्तरेण। पदप्रक्रियादिप्रकारोऽत्र किरणावल्यां द्रष्टव्यः ।

(२०) अवयवप्रकरणम् ।

(१)पञ्चावयवं वाक्यमित्यत्र विशेष्यज्ञानायाहाऽवयवाः पुनरिति । पुनःशब्देन दिङ्नागाद्यभिमतजिज्ञासादिदशावयववादो निरस्तः । प्रतिज्ञां न्यायप्राप्तामाह तत्रेति । तत्र तेष्ववयवेषु मध्ये । अनुमेयोद्देशत्वाद्यत् कृतकं तदनित्यमित्यस्य प्रतिज्ञात्ववारणायाह प्रतिपिपादयिषितधर्मविशिष्टस्येत्यादि । अस्तित्वादिधर्मापेक्षया सर्व एव धर्मिणो धर्मविशिष्टा अतः प्रतिपादयितुमिष्टेन धर्मेण विशिष्टो यो धर्मी पक्षस्तस्योद्देशमात्रमभिधानमात्रं साधनरहितं प्रतिज्ञा । न च तच्छून्यमुद्देशमात्रं किञ्चित्करमित्याहापदेशविषयमापादयितुमिति । अपदेशो हेतुः तस्य विषयमापादयितुं प्रतिपादयितुं प्रतिज्ञाने खलु यत्र क्वचन साध्यसाधनाय हेतुः प्रयुज्यते तस्य सिद्धत्वात् अपि तु कुत्रचिद्धर्मिणि प्रतिनियते तस्मिन्ननुपन्यस्यमाने निराश्रयो हेतुर्न प्रवर्तते तस्याप्रवृत्तौ न साध्यसिद्धिरतः प्रतिज्ञया धर्मिग्राहकमानं दर्शयन्त्या हेतोराश्रयो धर्मी संनिधाप्यते इत्याश्रयोपदर्शनद्वारा हेतुं प्रवर्तयन्ती प्रतिज्ञा साध्यसिद्धेरङ्गम्, तथाच न्यायभाष्यम्—"असत्यां प्रतिज्ञायामनाश्रया हेत्वादयो न प्रवर्त्तेरन्निति" । प्रतिज्ञाया उदाहरणमाह यथेति । यो हि वायुं जानन्नपि तस्य द्रव्यत्वे संदिग्धस्तं प्रति सिषाधयिषितेन द्रव्यत्वेन विशिष्टस्य वायोरभिधानं वायुर्द्रव्यमिति प्रतिज्ञेत्यर्थः । अत्र ३४२ सूत्रम् ।

(१)अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगतस्वशास्त्रस्ववचनविरोधिनो निरस्ता भवन्ति । यथाऽनुष्णोऽग्निरिति प्रत्यक्षविरोधी, घनमम्बरमित्यनुमानविरोधी, ब्राह्मणेन सुरा पेयेत्यागमविरोधी, वैशेषिकस्य सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी, न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी ॥

(२१)अपदेशप्रकरणम् ।

(२)लिङ्गवचनमपदेशः । यदनुमेयेन सहचरितं त-

---

(१)अविरोधिपदस्य तात्पर्यमाहाविरोधिग्रहणादिति । वादिना साधयितुमिष्टोऽर्थस्साध्य इत्युच्यते प्रत्यक्षादिविरुद्धोऽपि कदाचिदनेन भ्रमात् साधयितुमिष्येत चेत् प्रत्यक्षादिविरुद्धमपि वचनं प्रतिज्ञा स्यात् अत अविरोधिपदमित्यर्थः । इदमत्राभिप्रेतम्—वाद्यभिप्रेत एव न साध्यताऽपि तु साधनार्हे स एव च पक्षस्तदितरः पक्षाभास इति । प्रत्यक्षादिविरोधोदाहरणान्याह यथाऽनुष्णोग्निरित्यादिना । घनमम्बरमिति । धर्मिग्राहकप्रमाणसिद्धेन नित्यत्वेन निरवयवत्वेन च निबिडावयवमम्बरमिति प्रतिज्ञा विरुध्यते इत्यभिप्रायः । ब्राह्मणेनेति । अत्र क्षीरमुदाहरणं तथाच यथाऽऽगमेन क्षीरपानस्य पापसाधनत्वाभावः प्रतिपादितस्तथा तेनैव सुरापानस्य तत्साधनत्वं प्रतिपादितमिति ब्राह्मणस्य सुरापानप्रतिज्ञाया दृष्टान्तग्राहकप्रमाणविरोध इत्यर्थः । स्वशास्त्रेति । स्वशास्त्रं वैशेषिकं तत्र असदुत्पद्यत इति प्रतिपादनात् सदुत्पद्यते इति प्रतिज्ञा शास्त्रेण विरुध्यत इति भावः । शब्द इति । यदि शब्दो नार्थजनकः स्यात्तर्हि अर्थप्रतिपादनप्रयोजनकः शब्दप्रयोगोऽनुपपन्नः, अथैतदर्थः शब्दप्रयोगस्तदभ्युपगतं शब्दस्यार्थप्रतिपादकत्वमिति प्रतिज्ञायाः स्ववचनविरोध इत्यभिप्रायः । अत्र १३१ सूत्रम् ।

(२१) अपदेशप्रकरणम् ।

(२)अपदेश इति । कथ्यत इति । शेषः । अस्यार्थमाह यदनुमेयेनेति ।

त्समानजातीये सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव तल्लिङ्गमुक्तं, तस्य वचनमपदेशः । यथा क्रियावत्त्वाद्गुणवत्त्वाच्च तथा च तदनुमेयेऽस्ति तत्समानजातीये च सर्वस्मिन् गुणवत्त्वमसर्वस्मिन् क्रियावत्त्वम् । उभयमप्येतदद्रव्ये नास्त्येव तस्मात् तस्य वचनमपदेश इति सिद्धम् ॥

(२२) हेत्वाभासप्रकरणम्

(१) एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तम्भवति ।

(२) तत्रासिद्धश्चतुर्विधः—उभयासिद्धोऽन्यतरासि-

उदाहरणमाह । यथेति । वायुर्द्रव्यं क्रियावत्वाद्गुणवत्वाच्चेति प्रयोगः । अस्यां प्रतिज्ञायां क्रियावत्त्वादिति क्रियावत्त्वस्य गुणवत्त्वादिति च गुणवत्त्वस्य लिङ्गस्य वचनमपदेशः, तयोरुपन्यासः सपक्षैकदेशवृत्तेः सपक्षव्यापकस्य च हेतुत्वप्रदर्शनार्थ इत्यर्थः । तत्रलिङ्गलक्षणं सङ्गमयति तथाचेति । तत्-गुणवत्त्वमनुमेये वायौ तत्समानजातीये सपक्षे द्रव्ये सर्वस्मिन्नस्ति असर्वस्मिन् सपक्षैकदेशे मूर्तद्रव्यमात्रे क्रियावत्वमिति । उभयमप्येतत् क्रियावत्त्वं गुणवत्त्वं चाद्रव्ये विपक्षे नास्त्येवेत्युभयमपदेशो हेतुरिति सिद्धम् । अत्र ३४२ ३४३ सूत्रे ।

(२२) हेत्वाभासप्रकरणम् ।

(१) एतेनेति। एतेनापदेशलक्षणवचनेनार्थादसिद्धादीनामनपदेशत्वमित्यर्थः। अनुमेयेन सहचरितमित्यनेनासिद्धस्य तत्समानजातीये चेत्यनेन विरुद्धानध्यवसितवचनयोस्तद्विपरीते नास्त्येवेत्यनेन संदिग्धवचनस्य चानपदेशत्वमिति विवेकः ।

(२) तेष्वसिद्धमाह तत्रेति । उभयासिद्धमुदाहरति उभयोरिति । शब्दे सावयवत्वं वादिप्रतिवादिनोरसिद्धमित्यर्थः । अन्य-

द्धः तद्भावासिद्धोऽनुमेयासिद्धश्चेति। तत्रोभयासिद्धः—उभयोर्वादिप्रतिवादिनोरसिद्धः यथाऽनित्यः शब्दः सावयवत्वादिति। अन्यतरासिद्धः—यथाऽनित्यः शब्दः कार्यत्वादिति। तद्भावासिद्धो—यथा धूमभावेनाग्न्याधिगतौ कर्त्तव्यायामुपन्यस्यमानो वाष्पो धूमभावेनासिद्ध इति। अनुमेयासिद्धो—यथा पार्थिवं द्रव्यं तमः कृष्णरूपवत्त्वादिति।

(१)यो ह्यनुमेयेऽविद्यमानोऽपि तत्समानजातीये सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनाद्विरुद्धः यथा यस्माद्विषाणी तस्मादश्व इति।

तरासिद्धमाह यथेति। यद्यपि शब्दे परमार्थतः कार्यत्वं तथापि मीमांसकस्यासिद्धं तत्कथमनित्यत्वं साधयेत् यावन्न साध्यत इत्यन्यतरासिद्धोऽयं हेतुरित्यर्थः। तद्भावासिद्धमुदाहरति यथा धूमभावेनेति। धूमभावेन धूमस्वरूपेणेत्यर्थः। अनुमेयासिद्धमाह पार्थिवं द्रव्यमिति। तमः पार्थिवं द्रव्यं कृष्णरूपवत्त्वादिति प्रयोगः। आरोपितकार्ष्ण्यमात्रप्रतीतेस्तमसो द्रव्यान्तरत्वाभावेन तमो द्रव्यमित्याद्याश्रयासिद्धमित्यर्थः। विशेषणासिद्ध्यादय उभयासिद्ध्यादिष्वन्तर्भूता इति पृथङ्नोक्ता इति ध्येयम्।

(१)विरुद्धहेत्वाभासमाह यो ह्यनुमेय इति। उदाहरति यथेति। कश्चिद्यदा वनान्तरिते गोपिण्डे विषाणमुपलभ्यायं पिण्डोऽश्वो विषाणित्वादिति साधयति तदा विषाणित्वमश्वजातीयेऽविद्यमानमश्वविपरीते गोमहिष्यादौ विपक्षे विद्यमानं व्याप्तिबलेनाश्वत्वविरुद्धमनश्वत्वं साधयत् अभिमतसाध्यविपरीतसाधनाद्विरुद्धमित्युच्यते। इदञ्च सर्वत्रानश्वे स्तंभादावसत्त्वात् विपक्षैकदेशवृत्तिविरुद्धोदाहरणम्, समस्तविपक्षव्यापकविरुद्धोदाहरणन्तु नित्यः शब्दः कृतकत्वादिति बोध्यम्।

त्समानजातीये सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव तल्लिङ्गमुक्तं, तस्य वचनमपदेशः। यथा क्रियावत्त्वाद्गुणवत्त्वाच्च तथा च तदनुमेयेऽस्ति तत्समानजातीये च सर्वस्मिन् गुणवत्त्वमसर्वस्मिन् क्रियावत्त्वम्। उभयमप्येतदद्रव्ये नास्त्येव तस्मात् तस्य वचनमपदेश इति सिद्धम्॥

(२२) हेत्वाभासप्रकरणम्

(१) एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तम्भवति।

(२) तत्रासिद्धश्चतुर्विधः—उभयासिद्धोऽन्यतरासि-

उदाहरणमाह। यथेति। वायुर्द्रव्यं क्रियावत्त्वाद्गुणवत्त्वाच्चेति प्रयोगः। अस्यां प्रतिज्ञायां क्रियावत्त्वादिति क्रियावत्त्वस्य गुणवत्त्वादिति च गुणवत्त्वस्य लिङ्गस्य वचनमपदेशः, तयोरुपन्यासः सपक्षैकदेशवृत्तेः सपक्षव्यापकस्य च हेतुत्वप्रदर्शनार्थं इत्यर्थः। तत्रलिङ्गलक्षणं सङ्गमयति तथाचेति। तत्-गुणवत्त्वमनुमेये वायौ तत्समानजातीये सपक्षे द्रव्ये सर्वस्मिन्नस्ति असर्वस्मिन् सपक्षैकदेशे मूर्तद्रव्यमात्रे क्रियावत्त्वमिति। उभयमप्येतत् क्रियावत्त्वं गुणवत्त्वं चाद्रव्ये विपक्षे नास्त्येवेत्युभयमपदेशो हेतुरिति सिद्धम्। अत्र ३४२ ३४३ सूत्रे।

(२२) हेत्वाभासप्रकरणम्।

(१) एतेनेति। एतेनापदेशलक्षणवचनेनार्थादसिद्धादीनामनपदेशत्वमित्यर्थः। अनुमेयेन सहचरितमित्यनेनासिद्धस्य तत्समानजातीये चेत्यनेन विरुद्धानध्यवसितवचनयोस्तद्विपरीते नास्त्येवेत्यनेन संदिग्धवचनस्य चानपदेशत्वमिति विवेकः।

(२) तेष्वसिद्धमाह तत्रेति। उभयासिद्धमुदाहरति उभयोरिति। शब्दे सावयवत्वं वादिप्रतिवादिनोरसिद्धमित्यर्थः। अन्य-

द्धः तद्भावासिद्धोऽनुमेयासिद्धश्चेति । तत्रोभयासिद्धः—उभयोर्वादिप्रतिवादिनोरसिद्धः यथाऽनित्यः शब्दः सावयवत्वादिति । अन्यतरासिद्धः—यथाऽनित्यः शब्दः कार्यत्वादिति । तद्भावासिद्धो—यथा धूमभावेनाग्न्यधिगतौ कर्तव्यायामुपन्यस्यमानो वाष्पो धूमभावेनासिद्ध इति । अनुमेयासिद्धो—यथा पार्थिवं द्रव्यं तमः कृष्णरूपवत्त्वादिति ।

(१)यो ह्यनुमेयेऽविद्यमानोऽपि तत्समानजातीये सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनाद्विरुद्धः यथा यस्माद्विषाणी तस्मादश्व इति ।

तरासिद्धमाह यथेति । यद्यपि शब्दे परमार्थतः कार्यत्वं तथापि मीमांसकस्यासिद्धं तत्कथमनित्यत्वं साधयेत् यावन्न साध्यत इत्यन्यतरासिद्धोऽयं हेतुरित्यर्थः । तद्भावासिद्धमुदाहरति यथा धूमभावेनेति । धूमभावेन धूमस्वरूपेणेत्यर्थः । अनुमेयासिद्धमाह पार्थिवं द्रव्यमिति । तमः पार्थिवं द्रव्यं कृष्णरूपवत्त्वादिति प्रयोगः । आरोपितकार्ष्ण्यमात्रप्रतीतेस्तमसो द्रव्यान्तरत्वाभावेन तमो द्रव्यमित्याद्याश्रयासिद्धमित्यर्थः । विशेषणासिद्ध्यादय उभयासिद्ध्यादिष्वन्तर्भूता इति पृथङ्नोक्ता इति ध्येयम् ।

(१)विरुद्धहेत्वाभासमाह यो ह्यनुमेय इति । उदाहरति यथेति । कश्चिद्यदा वनान्तरिते गोपिण्डे विषाणमुपलभ्यायं पिण्डोऽश्वो विषाणित्वादिति साधयति तदा विषाणित्वमश्वजातीयेऽविद्यमानमश्वविपरीते गोमहिष्यादौ विपक्षे विद्यमानं व्याप्तिबलेनाश्वत्वविरुद्धमनश्वत्वं साधयत् अभिमतसाध्यविपरीतसाधनाद्विरुद्धमित्युच्यते । इदञ्च सर्वत्रानश्वे स्तंभादावसत्त्वात् विपक्षैकदेशवृत्तिविरुद्धोदाहरणम्, समस्तविपक्षव्यापकविरुद्धोदाहरणन्तु नित्यः शब्दः कृतकत्वादिति बोध्यम् ।

(१) यस्तु सन्ननुमेये तत्समानासमानजातीययोः साधारणः सन्नेव स सन्देहजनकत्वात् सन्दिग्धः यथा यस्माद्विषाणी तस्माद्गौरिति । एकस्मिंश्च द्वयोर्हेत्वोर्यथोक्तलक्षणयोर्विरुद्धयोः सन्निपाते सति संशयदर्शनादयमन्यः सन्दिग्ध इति केचित् । यथा मूर्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वास्पर्शवत्त्वयोरिति । नन्वयमसाधारण एवाचाक्षुषत्वप्रत्यक्षत्ववत् संहतयोरन्यतरपक्षासम्भवात् ततश्चानध्यवसित इति वक्ष्यामः । ननु शास्त्रे तत्रतत्रोभयथा दर्शनं संश-

---

(१)समानासमानजातीययोरिति । सपक्षविपक्षयोरित्यर्थः । उदाहरति यथेति । यदाऽयं पिण्डो गौर्विषाणित्वादिति साध्यते तदा विषाणित्वं गवि महिषे च दर्शनात्सन्देहं जनयन् सन्दिग्धो हेत्वाभासः स्यादित्यर्थः । सपक्षविपक्षयोरेकधर्म्मदर्शनाद्यथा धर्मिणि सन्देहे न सन्दिग्धहेत्वाभासस्तथैकस्मिन् धर्मिणि तुल्यबलयोर्विरुद्धयोर्हेत्वोः संनिपाते संशयदर्शनादपि सन्दिग्धो हेत्वाभासः स्यात् इति एकदेशिमतखण्डनाय तन्मतमाह एकस्मिंश्चेति । उदाहरणमाह यथेति । मनो मूर्तं क्रियावत्वाच्छरादिवत्, अमूर्तं च मनोऽस्पर्शत्वाद् गगनवदिति विरुद्धार्थप्रसाधकयोः क्रियावत्त्वास्पर्शवत्त्वयोर्हेत्वोः संनिपाते मनसि मूर्तत्वामूर्तत्वयोः संशय एवेत्यभिप्रायः । तत्र स्वमतमाह नन्वयमिति। क्रियावत्त्वास्पर्शवत्त्वयोः प्रत्येकं निर्णयहेतुत्वेन संशयाजनकत्वेऽपि तयोस्संनिपातोऽयमसाधारण एव संहतयोस्तयोर्मनोव्यतिरेकेणान्यतरपक्षे सपक्षे विपक्षे वा ऽसंभवात् । यथाऽचाक्षुषत्वप्रत्यक्षत्वयोः प्रत्येकं गुणव्यभिचारेऽपि समुदितयोर्गुणव्यतिरेकेणान्यत्रासंभवः । ततश्चासाधारणत्वादेवानध्यवसितोऽयमध्यवसायं न करोतीति वक्ष्याम इति भाष्यार्थः । अनध्यवसितवचनेऽस्यान्तर्भाव

यकारणमपदिश्यत इति । न, संशयो विषयद्वैतदर्शनात् । संशयोत्पत्तौ विषयद्वैतदर्शनं कारणम् तुल्यबलत्वे च तयोः परस्परविरोधान्निर्णयानुत्पादकत्वं स्यान्न तु संशयहेतुत्वम् । न च तयोस्तुल्यबलत्त्वमस्ति अन्यतरस्यानुमेयोद्देशस्यागमबाधितत्वादयं तु विरुद्धभेद एव ।

इत्यर्थः । विरुद्धाव्यभिचारिणोऽस्य स्थापिते संशयहेत्वभावे शास्त्रविरोधं पूर्वपक्षी चोदयति नन्विति । तत्रतत्र स्थाने उभयथा दर्शनं उभाभ्यां विरुद्धधर्माभ्यां सहैकस्य धर्मिणो दर्शनं संशयकारणमिति शास्त्रेऽपदिश्यते कथ्यत इत्यर्थः । सूत्रार्थस्तु यथा येन धर्मेण परमाणौ मूर्तत्वाव्यभिचारिणा क्रियावत्त्वेन समं दृष्टं मनस्तस्मात्, अयथादृष्टं आत्मनि अमूर्तत्वाव्यभिचारिणा स्पर्शवत्त्वेन समं दृष्टं च मन इत्युभयथा दृष्टत्वात्संशयः–किं क्रियावत्त्वान्मूर्तं मन उतास्पर्शवत्त्वान्मूर्तमिति । परिहरति नेति । न त्वदुक्तविरोधो नेत्यर्थः । यतो विषयद्वैतदर्शनात् संशयो जायत इति । इदमेव विवृणोति संशयोत्पत्ताविति। यत्रोच्चैस्तरे स्थाणुर्वा पुरुषो वेति संशयो जायते तादृशस्य विषयस्य पूर्वं द्वैतदर्शनमुभयथादर्शनं स्थाणुत्वपुरुषत्वभ्यां सह दर्शनं हेतुर्नत्वेकस्मिन्धर्मिणि विरुद्धधर्मद्वयसंनिपातः संशयकारणं तथाच विरुद्धाव्यभिचारिधर्मद्वयोपानिपातात् संशय इति नोक्तसूत्रार्थः किन्तु पूर्वं यथादृष्टं स्थाण्वादि कालान्तरे देशान्तरे वा तत्समं दृष्ट्वा विशेषादर्शने सति संशयः । एवं पूर्वदृष्टमेव पुरुषं यथाऽवस्थादिविशेषेण दृष्टं जटिलं मुण्डनं वा ततोऽयथादृष्टमवस्थाभेदेन दृष्टं कालान्तरे दृष्ट्वा अवस्थाविशेषमपश्यतः स्मरतश्च संशयो भवति किमयमिदानीं जटिलो मुण्डो वेति तत्सूत्रार्थः। तुल्यबलत्वे चेति। निर्णयानुत्पादकत्वं स्यात् स्वसाध्यसाधकत्वं न स्यादित्यर्थः । न तु संशयहेतुत्वं विशेषानुपलम्भमात्रेण विरुद्धोभयविशेषोपस्थापनाभावादिति शेषः । पूर्वं तुल्यबलत्वमङ्गीकृत्य विरुद्धाव्यभिचारिणः संशयहेतुत्वं निर-

(१)यश्चानुमेये विद्यमानस्तत्समानासमानजातीययोरसन्नेव सोऽन्यतरासिद्धोऽनध्यवसायहेतुत्वादनध्यवसितः यथा सत्कार्यमुत्पत्तेरिति । अयमप्रसिद्धोऽनपदेश इति वचनादवरुद्धः । ननु चायं विशेषः संशयहेतुरभिहितः शास्त्रे तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति, नान्यार्थत्वात् । शब्दे विशेष-

---

स्तं सम्प्रति तदेव न सम्भवति इत्याह न चेति । अन्यतरस्यानुमेयोद्देशस्यामूर्त मन इत्यस्यागमेन 'तदभावादणु मनः' इति सूत्रेण बाधितत्वात् । ननु तर्ह्ययं को दोष इत्यत आहायन्त्विति । तथाच प्रतिज्ञालक्षणेऽविरोधिपदनिवर्तितानां प्रत्यक्षादिविरुद्धानां प्रतिज्ञाभासानामागमविरुद्धो विरुद्धभेद एव न सन्दिग्ध इति भावः ।

(१) अनध्यवसितापरपर्यायमसाधारणहेत्वाभासमाह यश्चेति । उदाहरति यथेति । सर्वं कार्यमुत्पादात्पूर्वमपि सत् उत्पत्तेरिति सांख्यानां प्रयोगः । तेषां सति सपक्षे गगनादावसति विपक्षे गगनकुसुमादावभावाच्चैकतरपक्षाध्यवसायजनकोऽयं हेतुरिति अनध्यवसित इत्यर्थः । अभिव्यक्तिमङ्गीकुर्वतां तेषान्तु नायं हेतुः स्वतोऽसिद्ध इति विभावनीयम् । सूत्रकारसम्मतिमस्मिन् हेत्वाभासे दर्शयति अयमिति । अनैकान्तिकवदसाधारणो धर्मः संशयहेतुस्तेनास्य सन्दिग्धश्चानपदेश इति वचनेन सङ्ग्रहो युक्तो न पुनरप्रसिद्धवचनेनेत्यभिप्रायेणाशङ्कते ननु चेति । शास्त्रे सूत्रे । तच्च यथा 'तुल्यजातीयेष्वित्यादि दृष्टत्वादित्यन्तम्' । तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यश्च पदार्थानां विशेषो भवति । यथा पृथिव्यां गन्धवत्त्वं विशेषो तुल्यजातीयेभ्यो जलादिद्रव्येभ्यो गुणकर्मादिभ्यश्च भवति । शब्दे च श्रावणत्वं विशेषो दृश्यते । तत्किं शब्दस्य रूपादिभ्यस्तुल्यजातीयेभ्योऽयं विशेषः किं वा विजातीयेभ्यः । यदि शब्दो गुणस्तदा सजातीयरूपादिभ्यो विशेषोऽयम् । अथ द्रव्यं कर्म वा तदा विजातीयेभ्य इति शब्दे श्रावणत्वात् द्रव्यं गुणः कर्म वेति संशय इति संशयहेतुत्वा-

दर्शनात् संशयानुत्पत्तिरित्युक्ते, नायं द्रव्यादीनामन्यतमस्य विशेषः स्याच्छ्रावणत्वं किन्तु सामान्यमेव सम्पद्यते । कस्मात्? तुल्यजातीयेष्वर्थान्तरेभूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्योभयथा दृष्टत्वादित्युक्तं न संशयकारणम्, अन्यथा षट्स्वपि पदार्थेषु संशयप्रसङ्गात् तस्मात् सामान्यप्रत्ययादेव संशय इति ॥

दस्य सन्दिग्धता युक्तेति पूर्वपक्षयभिप्रायः । परिहरति नान्यार्थत्वादिति । कोऽसावन्यार्थ इत्यत आह शब्दे विशेषदर्शनादित्यादिना । "श्रोत्रग्रहणो योऽर्थः सशब्दः" अ. २ आ. २ सु. २१ श्रोत्रग्राह्यमर्थं शब्दत्वेन प्रतिपाद्य तस्मिन् द्रव्यं गुणो वा कर्म वेति संशयः प्रदर्शितः सूत्रकारेण । तत्र परः शङ्कते शब्द इति । शब्दे यः संशयहेतुः श्रोत्रग्राह्यत्वधर्मो भवताऽङ्गीकृतः स च विशेषस्तस्य दर्शनात् संशयानुत्पत्तिः संशयस्य विरुद्धोभयस्मृतिपूर्वकत्वात् । सा च स्मृतिर्नासाधारणधर्मदर्शनाद्भवति तस्य केनचिद्विशेषेण सहानुपलम्भात् । इत्युक्ते—इति परेणाशङ्किते । सूत्रकाराशयेन समाधत्ते नायमिति । द्रव्यादीनामन्यतमस्य द्रव्यस्य गुणस्य कर्मणो वा श्रावणत्वं न विशेषः किन्तु सामान्यमेव । कुत इत्यत आह तुल्यजातीयेष्विति । द्रव्यादिभेदानां द्रव्यगुणकर्मणां मध्ये एकैकस्य द्रव्यस्य गुणस्य कर्मणो वा तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यश्च विशेषस्योभयथा दृष्टत्वात् । अत्र सप्तमी पञ्चम्यर्थे । यथा पृथिव्यास्तुल्यजातीयेभ्यो जलादिभ्यो विशेषः पृथिवीत्वं द्रव्यत्वेन सह दृष्टम् रूपस्य च रूपत्वं विशेषो गुणत्वेन सह दृष्टं तथा शब्दस्यापि श्रावणत्वं विशेषः गुणत्वेन, तस्मादेतदपि विशेषत्वेन रूपेण द्रव्यादीनां सामान्यमेव ततश्च सामान्यरूपेणास्य संशयहेतुत्वं भवतु असाधारणरूपेण तु न तद्धेतुत्वम् विशेषस्मारकत्वाभावादित्यर्थः । तस्यापि संशयहेतुत्वे दोषमाहान्यथेति । तेषामपि असाधारणधर्मयोगित्वात्ततश्च संशयविरामाभाव इत्यर्थः । उपसंहरति तस्मा-

(२३) निदर्शनप्रकरणम् ।

(१)द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण च । तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम् । तद्यथा यत् क्रियावत् तद्द्रव्यं दृष्टं यथा शर इति । अनुमेयविपर्यये च लिङ्गस्याभावदर्शनं वैधर्म्यनिदर्शनम् । तद्यथा यद्द्रव्यं तत् क्रियावन्न भवति यथा सत्तेति ॥

(२४) निदर्शनाभासप्रकरणम् ।

(२)अनेन निदर्शनाभासा निरस्ता भवन्ति । तद्यथा नित्यः शब्दोऽमूर्तत्वात् यदमूर्तं दृष्टं तन्नित्यम् यथा परमाणुर्यथा कर्म यथा स्थाली यथा तमः अम्बरवदिति

दिति । विरुद्धविशेषोभयसहचरस्य साधारणधर्मदर्शनस्य तदुभयस्मारकत्वेन संशयहेतुता न त्वसाधारणधर्मदर्शनस्येत्यभिप्रायः । अत्र १३१ १३२ १३३ सूत्राणि ।

(२३) निदर्शनप्रकरणम् ।

(१)क्रमप्राप्तं निदर्शनस्वरूपं दर्शयितुमाह द्विविधमिति । साध्यसाधनानुगमनिदर्शकं साधर्म्यनिदर्शनं, साध्याभावेन साधनाभावनिदर्शकं च वैधर्म्यनिदर्शनमिति द्वैविध्यम् इति भावः । अन्यत्सुगमम् । अत्र ३४२ ३४३ सूत्रे ।

(२४) निदर्शनाभासप्रकरणम् ।

(२)अनेनेति । निदर्शनलक्षणेनेत्यर्थः । निदर्शनाभासाः केनाचित्साधर्म्येण निदर्शनवदाभासमाना निरस्ता भवन्ति लक्षणाभावादिति शेषः । स्ववाक्ये तान्परिहर्तुं परवाक्ये चोपालम्भं कर्तुं तत्स्वरूपमाह तद्यथेति । यथा परमाणुरिति लिङ्गासिद्धो निदर्शनाभासः परमाणोरमूर्तत्वात् । यथा कर्मेति अनुमेयासिद्धः कर्मणो-

यद् द्रव्यं तत् क्रियावद्दृष्टमिति च लिङ्गानुमेयोभयाश्रयासिद्धाननुगतविपरीतानुगताः साधर्म्यनिदर्शनाभासाः ।

(१)यदनित्यं तन्मूर्तं दृष्टम् यथा कर्म यथा परमाणुर्यथाऽऽकाशं यथा तमः घटवत् यन्निष्क्रियं तदद्रव्यञ्चेति लिङ्गानुमेयोभयाव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्यावृत्ता वैधर्म्यनिदर्शनाभासा इति ॥

(२५)अनुसन्धानप्रकरणम् ।

(२)निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्ग-

ऽनित्यत्वात् । यथा स्थालीत्युभयासिद्धः स्थाल्यां नित्यत्वामूर्तत्वयोस्साध्यहेत्वोरभावात् । तम इत्याश्रयासिद्धः तस्य वस्तुत्वाभावात् । अम्बरवदिति अननुगतो निदर्शनाभासः तत्रोभयसत्त्वेपि यदमूर्तं तन्नित्यमिति प्रतीत्यभावात् । अम्बरवदिति सामान्यनिदर्शनेऽप्रतिपन्नसाध्यसाधनयोरम्बरे न सद्भावप्रतीतिरित्यननुगतोऽयं निदर्शनाभासः ।

(१)यथा कर्मेति लिङ्गाव्यावृत्तो वैधर्म्यदृष्टान्ताभासः कर्मणोऽमूर्तत्वात् । परमाणुरिति अनुमेयाव्यावृत्तोऽनुमेयस्य नित्यत्वस्य तत्र भावात् । आकाशमित्युभयाव्यावृत्तो ततोऽमूर्तत्वनित्यत्वयोरव्यावृत्तत्वात् । तम इति आश्रयासिद्धः । तस्य वस्तुत्वाभावेन किमाश्रया साध्यसाधनयोर्व्यावृत्तिः स्यात् । घटवदित्यव्यावृत्तः तत्रोभयव्यावृत्तिसत्त्वेऽपि यदनित्यं तन्मूर्तमित्यनुक्तेर्नोभयव्यावृत्तिप्रतिपत्तिर्विप्रतिपन्नस्येति अयमव्यावृत्तः । यन्निष्क्रियं तदद्रव्यमिति विपरीतव्यावृत्तः साध्यसाधनयोरिव तदभावयोर्व्याप्यव्यापकभावात् । अत्र १२१ सूत्रम् ।

(२५) अनुसन्धानप्रकरणम् ।

(२)उपनयापरपर्यायमनुसन्धानमाह निदर्शन इति । दृष्टान्ते साध्याविनाभूतत्वेन दर्शितं लिङ्गं पक्षेऽनुसन्धीयत इति भावः । इदमेव

सामान्यस्यानुमेयेऽन्वानयनमनुसन्धानम् । अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनानुसन्धीयते तदनुसन्धानम् । तथा च वायुः क्रियावानिति । अनुमेयाभावे च तस्यासत्त्वमुपलभ्य न च तथा वायुर्निष्क्रिय इति ॥

(२६)प्रत्याम्नायप्रकरणम् ।

(१)अनुमेयत्वेनोद्दिष्टे चानिश्चिते च परेषां नि-

विवृणोति अनुमेयेति । प्रतिज्ञाहेतुवाक्याभ्यां साध्यप्रतिपादने लिङ्गस्य शक्तिरन्वयव्यतिरेकौ पक्षधर्मता च नावगतेत्यनुपलब्धशाक्तिकं लिङ्गं दृष्टान्ते साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनानुसन्धीयते तदनुसन्धानमिति । इदमत्र तात्पर्यम्—परार्थानुमान एव पञ्चावयववाक्यानामुपयोगात् यथा यथा परजिज्ञासोदयस्तथा तथा वाक्यानां प्रयोग आवश्यकः एवञ्च यथा साध्ये उक्ते कुत इति हेत्वाकाङ्क्षायां हेतुप्रयोगः । हेतुवचनेन च हेतुस्वरूपमात्रबोधो न पक्षधर्मताबोध एकस्य शब्दस्योभयार्थावाचकत्वात् । हेतुज्ञाने कथमस्य हेतुत्वमिति सामर्थ्यजिज्ञासायां साध्यप्रतीतेरविनाभावप्रतीतिनान्तरीयकत्वाद्व्याप्तिवचनेनाविनाभावे कथितेऽवधृतसामर्थ्यस्य हेतोः पक्षे सम्भव इति उदाहरणप्रयोगः । तदनन्तरञ्च पक्षधर्मताज्ञानार्थमनुसन्धानमुपगन्तव्यमिति । उदाहरति तथाचेति ।

अत्र ३४२ ३४३ सूत्रे ।

(२६) प्रत्याम्नायप्रकरणम् ।

(१) निगमनापराभिधं प्रत्याम्नायं दर्शयति अनुमेयत्वेनेति । प्रतिज्ञया पक्षेऽनुमेयत्वेन प्रतिपाद्यत्वेनोद्दिष्टे साध्यधर्मेऽनिश्चिते तस्यैव धर्मिणि प्रत्याम्नायः परेषां निर्णयाय प्रत्यावृत्त्याभिधानं येन वचने-

श्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः । प्रतिपाद्यत्वेनोद्दिष्टे चानिश्चिते च परेषां हेत्वादिभिरवयवैराहितशक्तीना परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः । तस्माद्द्रव्यमेवेति । न ह्येतस्मिन्नसति परेषामवयवानां समस्तानां व्यस्तानां वा तदर्थवाचकत्वमस्ति । गम्यमानार्थत्वादिति चेन्न अतिप्रसङ्गात् । तथाहि प्रतिज्ञानन्तरं हेतुमात्राभिधानं कर्तव्यम् विदुषामन्वयव्यतिरेकस्मरणात्

न क्रियते तन्निगमनामित्यर्थः । इदमेव विवृणोति प्रतिपाद्यत्वेनेति । प्रतिज्ञामात्रेण परेषां साध्यनिश्चयाभावात् तेषां हेत्वादिभिर्वाक्यैस्त्रैरूप्ये दर्शिते सञ्जातानुमेयप्रतिपत्तिसामर्थ्यानां प्रत्याम्नाये कृते परिपूर्णेन वाक्येन निश्चयो भवतीति प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः प्रवर्तत इत्यभिप्रायः । तदुदाहरति तस्मादिति । हेत्वादिभिः साध्यनिश्चयसम्भवे किमनेनात आह न ह्येतस्मिन्निति । स्वातन्त्र्यात्तेषां नैकार्थप्रतिपादकता, निगमने च सति आकांक्षयाऽङ्गाङ्गिभावेनैकार्थप्रतिपादकता स्यादिति भावः । शङ्कते गम्यमानार्थत्वादिति । स्वार्थपरार्थानुमानयोः प्रतिपत्तिसामग्री तु समानैव, स्वप्रतीतौ स्वतोऽनुसन्धानं परप्रतीतौ परेणेत्येतावानेव विशेषः तथाच परस्थलेऽपि लिङ्गसामर्थ्यादेवार्थबोधः वाक्यं तु लिङ्गोपक्षेपमात्रे चरितार्थम्, हेत्वादिभिश्चोपनयान्तैः पक्षधर्मतान्वयव्यतिरेकोपपन्नं लिङ्गं प्रतिपादितमिति कृतं निगममनेति शङ्कार्थः । समाधत्ते नातिप्रसङ्गादिति । अतिप्रसङ्गमेवाह तथाहीति । अत्रायमभिप्रायः–यथा विदुषां हेतुमात्रप्रयोगेणान्वव्यतिरेकस्मरणसम्भवेन साध्यसाधकत्वसम्भवेऽपि व्याप्तिपक्षधर्मताद्यर्थमुपनयप्रयोग आवश्यकस्तथाऽबाधितविषयत्वासत्प्रतिपक्षत्वबोधार्थं निगमनमप्यावश्यकमन्यथा प्रकरणसमादीनामपि साधकत्वं स्या-

तदर्थावगतिर्भविष्यतीति तस्मादत्रैवार्थपरिसमाप्तिः। कथम्? अनित्यः शब्दः इत्यनेनानिश्चितानित्यत्वमात्रविशिष्टः शब्दः कथ्यते प्रयत्नानन्तरीयकत्वादित्यनेनानित्यत्वसाधनधर्ममात्रमभिधीयते। इह यत् प्रयत्नानन्तरीयकं तदनित्यं दृष्टम् यथा घट इत्यनेन साध्यसामान्येन साधनसामान्यस्यानुगममात्रमुच्यते। नित्यमप्रयत्नानन्तरीयकं दृष्टम् यथाऽऽकाशमित्यनेन साध्याभावेन साधनस्यासत्त्वं प्रदर्श्यते। तथा च प्रयत्नानन्तरीयकः शब्दो दृष्टो न च तथाऽऽकाशवदप्रयत्नानन्तरीयकः शब्द इत्यन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य साधनसामान्यस्य

दिति। उपसंहरति तस्मादिति। यस्मान्निगमने सति हेतोः समग्रं सामर्थ्यं प्रतीयते तस्तादत्रैव निगमनेऽर्थस्य साध्यस्य परिसमाप्तिः प्रतीतिपर्यवसानम्। एकदैवाखिलावयवानां रूपं संहृत्य प्रश्नपूर्वकं पञ्चावयववाक्यप्रयोगापेक्षां दर्शयति कथमित्यादिना। किं शब्दो नित्योऽनित्यो वेत्यन्यतरधर्मजिज्ञासायामनित्यः शब्द इत्यनेन प्रतिज्ञावचनेनानिश्चितेनानित्यत्वमात्रेण विशिष्टः शब्दः कथ्यते। तत्र को हेतुरित्यपेक्षायां प्रयत्नानन्तरीयकत्वात्पूर्वमसतः प्रयत्नानन्तरमुपलभ्यमानत्वादिति हेतुवचनेनानित्यत्वधर्मसाधनमात्रमभिधीयते। मात्रपदेन पक्षधर्मताया अन्वयव्यतिरेकयोश्चानभिधानम् बोध्यम्। अवगतसाधनस्य कथमिदं साध्यं गमयतीत्यपेक्षायामुदाहरणं साध्यसाधनयोरनुगमं करोति न तु स्वरूपान्तरमिति मात्रशब्दार्थः। शब्दे तदस्ति नवेति जिज्ञासायां तथाचेत्यादि अन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य दृष्टाविनाभावस्य प्रयत्नानन्तरीयकत्वस्य शब्दे धर्मिण्यनुसन्धानमुपस्थापनं गम्यते। तथा यत् प्रयत्नानन्तरीयकं तदनित्यमिति बहिर्व्याप्तिसंभवे कदाचित् प्रयत्नानन्तरी-

शब्देऽनुसन्धानं गम्यते । तस्मादनित्यः शब्द इत्यने-
नानित्य एव शब्द इति प्रतिपिपादयिषितार्थपरिसमा-
प्तिर्गम्यते । तस्मात् पञ्चावयवेनैव वाक्येन परेषां स्व-
निश्चितार्थप्रतिपादनं क्रियते इत्येतत्परार्थानुमानं सि-
द्धमिति ॥

(२७)निर्णयस्य मानान्तरत्वखण्डनम् ।

(१)विशेषदर्शनजमवधारणज्ञानं संशयविरोधी नि-
र्णयः । एतदेव प्रत्यक्षमनुमानं वा । यद् विशेषदर्श-
नात् संशयाविरोध्युत्पद्यते स प्रत्यक्षनिर्णयः । यथा
स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यालोचनाद्विशेषेष्वप्रत्यक्षे-
षूभयविशेषानुस्मरणात् किमयं स्थाणुः पुरुषो वेति

थकः शब्दोऽनित्यो न भवेदिति विपक्षाशंकायां हेतोरसाधकत्वे त-
स्मादनित्यः शब्द इति प्रत्याम्नायो नित्यत्व[illegible]
च्छब्दो नित्यो न भवतीत्यर्थः । अनेनान्वयव्यावृत्त्या विपरीतशंका-
निवृत्तौ व्याप्तिविशिष्टाद्धेतोर्धर्मिण्युपसंहारात् [illegible]
लेन निर्विचिकित्सः साध्यं प्रत्येति नापरं किञ्चिदपेक्षते [illegible]
त्याम्नायेनानित्य एव शब्द इति प्रतिपिपादयिषितोऽर्थस्य परिसमा-
प्तिर्गम्यते । उपसंहरति तस्मादिति । अत्र ३४१ ३४५ सूत्रे ।

(२७)निर्णयस्य मानान्तरत्वखण्डनम् ।

(१)केचिन्निर्णयं प्रत्यक्षानुमानाभ्यां प्रमाणान्तरमिच्छन्ति तान्प्र-
त्याह विशेषेति प्रत्यक्षमनुमानं वेति । प्रत्यक्षविषयेऽवधारणात्मकं
ज्ञानं प्रत्यक्षनिर्णयः, अनुमानविषयेऽवधारणात्मकं ज्ञानमनुमाननि-
र्णय इति तयोः प्रत्यक्षानुमानान्तर्भावः प्रदर्शितो भाष्यकारेण । उदाह-
रणमाह यथेत्यादिना । अत्र ३५३ ३५७ सूत्रे ।

तदर्थावगतिर्भविष्यतीति तस्मादत्रैवार्थपरिसमाप्तिः । कथम्? अनित्यः शब्दः इत्यनेनानिश्चितानित्यत्वमात्रविशिष्टः शब्दः कथ्यते प्रयत्नानन्तरीयकत्वादित्यनेनानित्यत्वसाधनधर्ममात्रमभिधीयते । इह यत् प्रयत्नानन्तरीयकं तदनित्यं दृष्टम् यथा घट इत्यनेन साध्यसामान्येन साधनसामान्यस्यानुगममात्रमुच्यते । नित्यमप्रयत्नानन्तरीयकं दृष्टम् यथाऽऽकाशमित्यनेन साध्याभावेन साधनस्यासत्त्वं प्रदर्श्यते । तथा च प्रयत्नानन्तरीयकः शब्दो दृष्टो न च तथाऽऽकाशवदप्रयत्नानन्तरीयकः शब्द इत्यन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य साधनसामान्यस्य

दिति । उपसंहरति तस्मादिति । यस्मान्निगमने सति हेतोः समग्रं सामर्थ्यं प्रतीयते तस्तादत्रैव निगमनेऽर्थस्य साध्यस्य परिसमाप्तिः प्रतीतिपर्यवसानम् । एकदैवाखिलावयवानां रूपं संहृत्य प्रश्नपूर्वकं पञ्चावयववाक्यप्रयोगापेक्षां दर्शयति कथमित्यादिना । किं शब्दो नित्योऽनित्यो वेत्यन्यतरधर्मजिज्ञासायामनित्यः शब्द इत्यनेन प्रतिज्ञावचनेनानिश्चितेनानित्यत्वमात्रेण विशिष्टः शब्दः कथ्यते । तत्र को हेतुरित्यपेक्षायां प्रयत्नानन्तरीयकत्वात्पूर्वमसतः प्रयत्नानन्तरमुपलभ्यमानत्वादिति हेतुवचनेनानित्यत्वधर्मसाधनमात्रमभिधीयते । मात्रपदेन पक्षधर्मताया अन्वयव्यतिरेकयोश्चानभिधानम् बोध्यम् । अवगतसाधनस्य कथमिदं साध्यं गमयतीत्यपेक्षायामुदाहरणं साध्यसाधनयोरनुगमं करोति न तु स्वरूपान्तरमिति मात्रशब्दार्थः । शब्दे तदस्ति नवेति जिज्ञासायां तथाचेत्यादि अन्वकयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य दृष्टाविनाभावस्य प्रयत्नानन्तरीयकत्वस्य शब्दे धर्मिण्यनुसन्धानमुपस्थापनं गम्यते । तथा यत् प्रयत्नान्तरीयकं तदनित्यमिति बहिर्व्याप्तिसंभवे कदाचित् प्रयत्नानन्तरी-

शब्देऽनुसन्धानं गम्यते । तस्मादनित्यः शब्द इत्यने-
नानित्य एव शब्द इति प्रतिपिपादयिषिताऽर्थपरिसमा-
प्तिर्गम्यते । तस्मात् पञ्चावयवेनैव वाक्येन परेषां स्व-
निश्चितार्थप्रतिपादनं क्रियते इत्येतत्परार्थानुमानं सि-
द्धमिति ॥

(२७)निर्णयस्य मानान्तरत्वखण्डनम् ।

(१)विशेषदर्शनजमवधारणज्ञानं संशयविरोधी नि-
र्णयः । एतदेव प्रत्यक्षमनुमानं वा । यद् विशेषदर्श-
नात् संशयविरोध्युत्पद्यते स प्रत्यक्षनिर्णयः । यथा
स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यालोचनाद्विशेषेष्वप्रत्यक्षे-
षूभयविशेषानुस्मरणात् किमयं स्थाणुः पुरुषो वेति

यकः शब्दोऽनित्यो न भवेदिति विपक्षाशंकायां हेतोरसाधकत्वे त-
स्मादनित्यः शब्द इति प्रत्याम्नायो नित्यत्वप्रतिपादकप्रमाणाभावा-
च्छब्दो नित्यो न भवतीत्यर्थः । अनेनान्यव्यावृत्त्या विपरीतशंका-
निवृत्तौ व्याप्तिविशिष्टाद्धेतोर्धर्मिण्युपसंहृनात् व्याप्तिग्राहकप्रमाणब-
लेन निर्विचिकित्सः साध्यं प्रत्येति नापरं किञ्चिदपेक्ष्यते इत्यनेन प्र
त्याम्नायेनानित्य एव शब्द इति प्रतिपिपादयिषिताऽर्थस्य परिसमा-
प्तिर्गम्यते । उपसंहरति तस्मादिति । अत्र ३४१ ३४५ सूत्रे ।

(२७)निर्णयस्य मानान्तरत्वखण्डनम् ।

(१)केचिन्निर्णयं प्रत्यक्षानुमानाभ्यां प्रमाणान्तरमिच्छन्ति तान्प्र-
त्याह विशेषेति प्रत्यक्षमनुमानं वेति । प्रत्यक्षविषयेऽवधारणात्मकं
ज्ञानं प्रत्यक्षनिर्णयः, अनुमानविषये चावधारणात्मकं ज्ञानमनुमाननि
र्णय इति तयोः प्रत्यक्षानुमानान्तर्भावः प्रदर्शितो भाष्यकारेण । उदाह-
रणमाह यथेत्यादिना । अत्र ३५३ ३५७ सूत्रे ।

संशयोत्पत्तौ शिरःपाण्यादिदर्शनात् पुरुष एवायमित्यवधारणज्ञानं प्रत्यक्षनिर्णयः । विषाणमात्रदर्शनाद् गौर्गवयो वेति संशयोत्पत्तौ सास्नामात्रदर्शनाद् गौरेवायमित्यवधारणज्ञानमनुमाननिर्णय इति ॥

(२८)स्मृतिप्रकरणम् ।

(१)लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति ॥

(२९)आर्षज्ञानप्रकरणम् ।

(२)आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्व-

---

(२८) स्मृतिप्रकरणम् ।

(१)स्मृतिरूपां विद्यामाह लिङ्गदर्शनेच्छेत्यादिना । आदिशब्देन अ. ३ आ. २ सू. ४४ न्यायसूत्रोक्तानि प्रणिधानादीनि सङ्गृह्यन्ते तदपेक्षमाणादात्ममनसोः संयोगविशेषादिति स्मृतिहेतुप्रतिपादनम् । लिङ्गदर्शनादिवत् संस्कारोऽप्यस्य सहकारी केवलात्तस्मात्स्मरणानुपपत्तेरिति स्मृतिनिमित्तकारणमाह पट्विति । दृष्टश्रुतानुभूतेष्विति विषयसंकीर्तनमनुभूतेष्वनुमितेष्वित्यर्थः । शेषेत्यादिहेतुरित्यन्तं कार्यनिरूपणम् । तत्र शेषानुव्यवसायो प्रथमलिङ्गज्ञानापेक्षया तदनन्तर्भाव्यनुमेयज्ञानं तस्य हेतुर्व्याप्तिस्मरणं सुखसाधनतास्मृतिरिच्छाहेतुः प्रथमपदस्मृतिर्द्वितीयपदानुस्मरणहेतुः दुःखसाधकस्मरणं द्वेषहेतुरिति बोध्यम् । किन्त्वत्रार्थोऽतीतः पूर्वानुभूत इत्यतीतविषया स्मृतिः अत एव सा न प्रमाणमर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यादिति कन्दलीकाराः । अत्र ३५७ सूत्रम् ।

(२९)आर्षज्ञानप्रकरणम् ।

(२)आर्षमाहाम्नायेति । आम्नायो वेदः । धर्मादिष्वित्यत्राधर्मादि-

तीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत्तु प्रस्तारेण देवर्षीणाम् । कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति॥

(३०)सिद्धदर्शनान्तर्भावप्रकरणम् ।

(१)सिद्धदर्शनं न ज्ञानान्तरम् । कस्मात् ? प्रयत्नपूर्वकमञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टृणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारादिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टम् तदप्यनुमानमेव । अथ लिङ्गानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतमित्येवं बुद्धिरिति ॥

कालादयो आदिपदेन बोध्याः । इन्द्रियलिङ्गाद्यभावे यदर्थभानं सा प्रतिभा सैव च प्रातिभमित्युच्यते आर्षापरपर्यायम् । कारणाभावे तत्कथं भवेदतो धर्मविशेषादिति कारणनिर्देशः स च विद्यातपःसमाधिजः प्रकृष्टो धर्मः । प्रस्तारेण बाहुल्येन । उभयकोट्यनुल्लेखान्नायं संशयः संवादाच्च न विपर्यय इति बोध्यम् । अत्र ३५४ सूत्रम् ।

(३०) सिद्धदर्शनान्तर्भावप्रकरणम् ।

(१)सिद्धदर्शनमपि केचित् विद्यान्तरमङ्गीकुर्वन्ति तन्निरासायाह सिद्धदर्शनं न ज्ञानान्तरमिति । प्रश्नपूर्वकन्तदेवाह कस्मादित्यादिना । अथेति । प्रत्यक्षार्षयोरिति । यदि धर्मादिदर्शनमिन्द्रियजं तदा प्रत्यक्षम् अथेन्द्रियानपेक्षं तदार्षमिति विवेकः । उपसंहरति एवमिति । बुद्धिर्व्याख्यातेत्यर्थः । अन्यत्सुगमम् । अत्र ३५४ सूत्रम् ।

संशयोत्पत्तौ शिरःपाण्यादिदर्शनात् पुरुष एवायमित्यवधारणज्ञानं प्रत्यक्षनिर्णयः । विषाणमात्रदर्शनाद् गौर्गवयो वेति संशयोत्पत्तौ सास्नामात्रदर्शनाद् गौरेवायमित्यवधारणज्ञानमनुमाननिर्णय इति ॥

(२८)स्मृतिप्रकरणम् ।

(१)लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति ॥

(२९)आर्षज्ञानप्रकरणम् ।

(२)आम्नायविधातृणामृषीणामतीतानागतवर्तमानेष्व-

---

(२८) स्मृतिप्रकरणम् ।

(१)स्मृतिरूपां विद्यामाह लिङ्गदर्शनेच्छेत्यादिना । आदिशब्देन अ. ३ आ. २ सू. ४४ न्यायसूत्रोक्तानि प्रणिधानादीनि सङ्गृह्यन्ते तदपेक्षमाणादात्ममनसोः संयोगविशेषादिति स्मृतिहेतुप्रतिपादनम् । लिङ्गदर्शनादिवत् संस्कारोऽप्यस्य सहकारी केवलात्तस्मात्स्मरणानुपपत्तेरिति स्मृतिनिमित्तकारणमाह पट्विति । दृष्टश्रुतानुभूतेष्विति- विषयसंकीर्तनमनुभूतेष्वनुमितेष्वित्यर्थः । शेषेत्यादिहेतुरित्यन्तं कार्यनिरूपणम् । तत्र शेषानुव्यवसायो प्रथमलिङ्गज्ञानापेक्षया तदनन्तर्भाव्यनुमेयज्ञानं तस्य हेतुर्व्याप्तिस्मरणं सुखसाधनतास्मृतिरिच्छाहेतुः प्रथमपदस्मृतिर्द्वितीयपदानुस्मरणहेतुः दुःखसाधकस्मरणं द्वेषहेतुरिति बोध्यम् । किन्त्वत्रार्थोऽतीतः पूर्वानुभूत इत्यतीतविषया स्मृतिः अत एव सा न प्रमाणमर्थपरिच्छेदे पूर्वानुभवपारतंत्र्यादिति कन्दलीकाराः । अत्र ३५७ सूत्रम् ।

(२९)आर्षज्ञानप्रकरणम् ।

(२)आर्षमाहाम्नायेति । आम्नायो वेदः । धर्मादिष्वित्यत्राधर्मादि-

तीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत्तु प्रस्तारेण देवर्षीणाम् । कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति॥

(३०) सिद्धदर्शनान्तर्भावप्रकरणम् ।

(१) सिद्धदर्शनं न ज्ञानान्तरम् । कस्मात् ? प्रयत्नपूर्वकमञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टॄणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारादिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टम् तदप्यनुमानमेव । अथ लिङ्गानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतमित्येवं बुद्धिरिति ॥

कालादयो आदिपदेन बोध्याः । इन्द्रियलिङ्गाद्यभावे यदर्थभानं सा प्रतिभा सैव च प्रातिभमित्युच्यते आर्षापरपर्यायम् । कारणाभावे तत्कथं भवेदतो धर्मविशेषादिति कारणनिर्देशः स च विद्यातपःसमाधिजः प्रकृष्टो धर्मः । प्रस्तारेण बाहुल्येन । उभयकोट्यनुल्लेखान्नायं संशयः संवादाच्च न विपर्यय इति बोध्यम् । अत्र ३५४ सूत्रम् ।

(३०) सिद्धदर्शनान्तर्भावप्रकरणम् ।

(१) सिद्धदर्शनमपि केचित् विद्यान्तरमङ्गीकुर्वन्ति तन्निरासायाह सिद्धदर्शनं न ज्ञानान्तरमिति । प्रश्नपूर्वकन्तदेवाह कस्मादित्यादिना । अथेति । प्रत्यक्षार्षयोरिति । यदि धर्मादिदर्शनमिन्द्रियजं तदा प्रत्यक्षम् अथेन्द्रियानपेक्षं तदार्षमिति विवेकः । उपसंहरति एवमिति । बुद्धिर्व्याख्यातेत्यर्थः । अन्यत्सुगमम् । अत्र ३५४ सूत्रम् ।

(३१)सुखप्रकरणम् ।

(१)अनुग्रहलक्षणं सुखम् । स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत् सुखम् । अतीतेषु विषयेषु स्मृतिजम् । अनागतेषु सङ्कल्पजम् । यत्तु विदुषामसत्सु विषयानुस्मरणेच्छासङ्कल्पेष्वाविर्भवति तद्विद्याशमसन्तोषधर्मविशेषनिमित्तमिति ॥

---

(३१) सुखप्रकरणम् ।

विद्याऽविद्यादिभेदविस्तृतां बुद्धिमुक्त्वा तत्कार्यत्वादनन्तरं सुखमाह अनुग्रहेति । अनुग्रहलक्षणं अनुग्रहस्वभावम् । अनुकूलस्वभावतयैव स्वविषयमनुभवं कुर्वत् पुरुषान्तरमनुगृह्णाति सुखमित्याह स्रगादीत्यादिना । संनिहितेप्यर्थे विषयान्तरव्यासक्तस्य सुखानुत्पादादिष्टोपलब्धेः कारणत्वं गम्यते वियुक्तस्य सुखाभावाद्विषयसंनिकर्षोपि कारणम् । धर्मादीत्यत्रादिपदेन स्वस्थतापरिग्रहः । अनुग्रहादीति कार्योपवर्णनम् । तत्रानुग्रहस्सुखसंवेदनम् । अभिष्वङ्गोऽनुरागः नयनादिप्रसादो वैमल्यम् । आदिना मुखप्रसादग्रहणम् । एतेषां सुखं हेतुरित्यर्थः । यत्त्विति । विदुषामात्मज्ञानिनामसत्सु विषयादिषु यदाविर्भवति तद्विद्यादिजन्यमित्यर्थः । विद्याऽऽत्मज्ञानम् शमो जितेन्द्रियत्वम् । संतोषः शरीरनिर्वाहातिरिक्तानभिकांक्षित्वम् । धर्मविशेषः प्रकृष्टो निर्वर्तकलक्षणो धर्मः । ये तु दुःखाभावमेव सुखमाहुस्तेषामानन्दात्मनाऽनुभवविरोधो हितं प्राप्स्यामि अहितं हास्यामि इति प्रवृत्तिद्वयानुपपत्तिश्च बोध्येति श्रीधराचार्याः । अत्र ३५५ सूत्रात ३६० सूत्रपर्यन्तम्, २१३ सूत्रञ्च द्रष्टव्यम् ।

(३२)दुःखप्रकरणम्।

(१)उपघातलक्षणं दुःखम्। विषाद्यनभिप्रेतविषयसान्निध्ये सत्यनिष्टोपलब्धीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगाद्यदमर्षोपघातदैन्यनिमित्तमुत्पद्यते तद्दुःखम्। अतीतेषु सर्पव्याघ्रचौरादिषु स्मृतिजम्। अनागतेषु सङ्कल्पजमिति॥

(३३)इच्छाप्रकरणम्।

(२)स्वार्थं परार्थं वाऽप्राप्तप्रार्थनेच्छा। सा चात्ममनसोः संयोगात् सुखाद्यपेक्षात् स्मृत्यपेक्षाद्वोत्पद्यते। प्रयत्नस्मृतिधर्माधर्महेतुः। कामोऽभिलाषः राग सङ्कल्पः कारुण्यं वैराग्यम् उपधा भाव इत्येवमादय इच्छाभेदाः।

---

(३२) दुःखप्रकरणम्।

(१)सुखप्रत्यनीकतया तदनन्तरं दुखमाहोपघातेति। उपजातं दुःखं प्रतिकूलस्वभावतया स्वात्मविषयमनुभवं कुर्वदात्मानमुपहन्तीत्याह।निष्टोपलब्धीत्यादिना। अमर्षादिरिति कार्यकथनम्। अमर्षोऽसहिष्णुता उपघातो दुःखानुभूतिः दैन्यं विच्छायता। दुःखे सति तदनुभवलक्षण आत्मोपघातः स्यादित्यर्थः। अन्यत्स्पष्टम्। अत्र सुखप्रकरणसूत्राण्येव बोध्यानि।

(३३) इच्छाप्रकरणम्।

(२)इच्छामाह स्वार्थमिति। कारणमाह सा चेत्यादिना। अनागते सुखसाधने वस्तुनीच्छोपजायते तदुत्पत्तौ तद्विषयसाध्यमनागतमपि सुखं निमित्तकारणम्। अतिक्रान्ते सुखहेताविच्छोत्पत्तेः स्मृतिरपि हेतुः। प्रयत्नेत्यादि कार्यकथम्। तद्यथा उपादानेच्छया तदनुकूलः प्रयत्नः, स्मरणेच्छया स्मरणं, यागादिषु फलेच्छया प्रवृत्तस्य धर्मोत्पत्तिः प्रतिषिद्धेषु अधर्मोत्पत्तिश्चेति। कामादय इच्छाभेदा

मैथुनेच्छा कामः । अभ्यवहारेच्छाऽभिलाषः । पुनः पुनर्विषयानुरञ्जनेच्छा रागः । अनासन्नक्रियेच्छा सङ्कल्पः । स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम् । दोषदर्शनाद्विषयत्यागेच्छा वैराग्यम् । परवञ्चनेच्छा उपधा । अन्तर्निगूढेच्छा भावः । चिकीर्षाजिहीर्षेत्यादिक्रियाभेदादिच्छाभेदा भवन्ति ॥

(३४)द्वेषप्रकरणम् ।

(१)प्रज्वलनात्मको द्वेषः । यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः । स चात्ममनसोः संयोगाद् दुःखापेक्षात् स्मृत्यपेक्षाद्वोत्पद्यते । प्रयत्नस्मृतिधर्माधर्महेतुः । क्रोधो द्रोहः मन्युरक्षमाऽमर्ष इति द्वेषभेदाः ॥

(३५)प्रयत्नप्रकरणम् ।

(२)प्रयत्नः संरम्भ उत्साह इति पर्यायाः । स द्विवि-

न तत्त्वान्तरमित्युक्तमेव दर्शयति मैथुनेच्छेत्यादिना । भाष्यं स्पष्टार्थम् । अत्र २५० २५१ २५२ २५३ २५४ ६ सूत्राणि ।

(३४) द्वेषप्रकरणम् ।

(१)द्वेषमाह प्रज्वलनेति । प्रयत्नेत्यादि द्वेषकार्योक्तिः । द्वेषादेनं हन्मीति प्रयत्नः, वेदार्थविप्लवकारिषु द्वेषाद्धर्मः, तदर्थपालकेषु द्वेषादधर्म इति बोध्यम् । अलक्षितविकारश्चिरानुबद्धापकारावसानो द्रोहः । शरीरादिविकारहेतुः क्षणभङ्गुरो द्वेषः क्रोधः । अपकारासमर्थस्यान्तर्निगूढो द्वेषो मन्युः । परगुणद्वेषोऽक्षमा । स्वगुणपरिभवाक्षमो द्वेषोऽमर्ष इति तद्भेदाः । अत्रापीच्छासूत्राण्येव योज्यानि ।

(३५) प्रयत्नप्रकरणम् ।

(२)क्रमप्राप्तं प्रयत्नमाह प्रयत्न इति । सदेहस्यात्मनो विपच्यमान-

धो—जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च । तत्र जीवनपूर्वकः सुप्तस्य प्राणापानसन्तानप्रेरकः प्रबोधकाले चान्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुः । अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद्धर्माधर्मापेक्षादुत्पत्तिः । इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरविधारकश्च । स चात्ममनसोः संयोगादिच्छापेक्षाद् द्वेषापेक्षाद्वोत्पद्यते ॥

(३६)गुरुत्वप्रकरणम् ।

(१)गुरुत्वं जलभूम्योः पतनकर्मकारणम् । अप्रत्यक्षं

कर्माशयसहितस्य मनसा सह संयोगः सम्बन्धो जीवनं तत्पूर्वकः प्रयत्नः कामर्थक्रियां जनयतीत्यत आह तत्रेति । अत्रायं प्रयोगः-सुप्तस्य प्राणादिक्रिया प्रयत्नकार्या क्रियात्वात् । न च तदानीमिच्छाद्वेषौ तद्धेतू संभवतः तस्माज्जीवनपूर्वकः प्रयत्न एव प्राणापानप्रेरक इति गम्यते । एवमयं प्रबोधकालेऽन्तःकरणस्य इन्द्रियान्तरप्राप्तिहेतुश्च । अत्रेयमनुमानप्रक्रिया—विषयप्राप्त्यनुमितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्योऽन्तःकरणेन्द्रियसंयोगजत्वात् जागरान्तःकरणेन्द्रियसंयोगवदिति । कारणमाहास्येति । द्वितीयमिच्छाद्वेषपूर्वकमाहेतरस्त्विति । गुरुत्वे सत्यपततः शरीरस्येच्छापूर्वकः प्रयत्नो विधारक इत्यर्थः । तत्कारणमाह स चेति । हितसाधनोपादानेषु इच्छापूर्वकः, दुःखसाधनपरित्यागे च द्वेषपूर्वकः प्रयत्नो जायत इत्यर्थः । अत्र २५४ २८१ २१२ ६ सूत्राणि ।

(३६) गुरुत्वप्रकरणम् ।

(१)गुरुत्वमाह गुरुत्वमिति । जलभूम्योरित्याश्रयकथनम् । पतनेत्यादि कार्यनिरूपणम् । अप्रत्यक्षमिति स्वभाववर्णनम् । केचित्त्वगिन्द्रियग्राह्यं गुरुत्वमाहुस्तेषामधःस्थितद्रव्यस्य स्पर्शोपलम्भवत् गुरुत्वोपलम्भप्रसङ्गः स्यात् । उपरिस्थितस्य गुरुत्वप्रतीतिस्तु

पतनकर्मानुमेयं संयोगप्रयत्नसंस्कारविरोधि। अस्य चाबादिपरमाणुरूपादिवन्नित्यानित्यत्वनिष्पत्तयः॥

(३७)द्रवत्वप्रकरणम्।

(१)द्रवत्वं स्यन्दनकर्मकारणम्। त्रिद्रव्यवृत्ति। तत्तु द्विविधम्—सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकमपां विशेषगुणः। नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः। सांसिद्धिकस्य गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः। सङ्घातदर्शनात् सांसिद्धिकमयुक्तमिति चेन्न दिव्येन तेजसा संयुक्तानामाप्यानां परमाणूनां परस्परं संयोगो द्रव्यारम्भकः सङ्घाताख्यः तेन परमाणुद्रवत्वप्रति-

---

हस्तादीनामधोगमनानुमानादिति। अतीन्द्रियं चेत्कथमस्य प्रतीतिरत आह पतनेति। संयोगेति। गुरुत्वस्य संयोगादिभिस्त्रिभिर्विरोधः तैः प्रतिबद्धस्य स्वकार्याकरणात्। तथाहि दोलारूढस्य संयोगेन प्रतिबन्धात् अपतनं, प्रयत्नेन प्रतिबन्धादपतनं च शरीरस्य, वेगेन प्रतिबन्धादपतनं बहिःक्षिप्तस्य शरादेरिति। अस्य चेति। यथाप्यपरमाणुरूपादयो नित्यास्तथा पार्थिवपरमाणुष्वपि गुरुत्वं, यथा चाबादिकार्यद्रव्ये कारणगुणक्रमेण रूपादयो जायन्ते आश्रयनाशान्नश्यन्ति च तथा गुरुत्वमपीति बोध्यम्। अत्र १८७ १९८ २०१ सूत्राणि।

(३७) द्रवत्वप्रकरणम्।

(१)द्रवत्वं व्युत्पादयति द्रवत्वमिति। सांसिद्धिकद्रवत्वममन्वानः शङ्कते सङ्घातदर्शनादिति। आप्यस्य हिमकरकादेः द्रव्यस्य सङ्घातस्य काठिन्यस्य दर्शनात् सांसिद्धिकद्रवत्वमित्ययुक्तमित्याशङ्कार्थः। समाधत्ते दिव्येनेति। सर्वत्रोदके स्वाभाविकद्रवत्वोपलम्भादपां सांसिद्धिकमेव द्रवत्वमिति निश्चिते यद्धिमकरकादौ द्रवत्वानुपलम्भस्तत्र दिव्येन तेजसा सम्बद्धानामाप्यपरमाणूनां परस्परसंयोगो द्रव्यारंभकः संघाताख्यस्तेन हिमकरकारम्भकपरमा-

बन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः । नैमित्तिकं च पृथिवीतेजसोरग्निसंयोगजम् । कथम्? सर्पिर्जतुमधूच्छिष्टादीनां कारणेषु परमाणुष्वग्निसंयोगाद्वेगापेक्षात् कर्मोत्पत्तौ तज्जेभ्यो विभागेभ्यो द्रव्यारम्भकसंयोगविनाशात् कार्यद्रव्यनिवृत्तावग्निसंयोगादौष्ण्यापेक्षात् स्वतन्त्रेषु परमाणुषु द्रवत्वमुत्पद्यते ततस्तेषु भोगिनामदृष्टापेक्षादात्माणुसंयोगात् कर्मोत्पत्तौ तज्जेभ्यः संयोगेभ्योद्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पाद्यते तस्मिंश्च रूपाद्युत्पत्तिसमकालं कारणगुणप्रक्रमेण द्रवत्वमुत्पद्यतइति ॥

(३८) स्नेहप्रकरणम् ।

(१)स्नेहोऽपां विशेषगुणः । संग्रहमृजादिहेतुः । अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः ॥

णुद्रवत्वप्रतिबन्धात् तेजःसंयोगेन परमाणूनां द्रवत्वं प्रतिबद्धमिति लवणादौ अनुमितं लवणस्याऽऽप्यत्वमिवात्रापि वह्निसंयोगनिमित्तं हिमकरकाद्याप्यत्वमित्याभिप्रायः । सांसिद्धिकमुक्त्वा नैमित्तिकमाह नैमित्तिकमिति । प्रक्रियाभाष्यं सुगमम् । हिमकरकादिविलयनेपीयं प्रक्रिया बोध्या । अत्र २०२ ५० ५४ ५५ २०६सूत्राणि ।

(३८) स्नेहप्रकरणम् ।

(१)स्नेहमाह स्नेहोऽपामिति । पिण्डीभावहेतुः संयोगविशेषः संग्रहः । मृजा परिशुद्धिः । मृदुत्वमादिपदेन ग्राह्यम् । अस्यापीति । यथा गुरुत्वं परमाणुषु नित्यं कार्ये च कारणगुणपूर्वकमाश्रयनाशाद्विनाशि च तथा स्नेहोऽपीति भावः । अत्र ५० सूत्रम् ।

(३९) संस्कारप्रकरणम् ।

(१)संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्च । तत्र वेगो मूर्तिमत्सु पञ्चसु द्रव्येषु निमित्तविशेषापेक्षात् कर्मणो जायते नियतदिक्क्रियाप्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविशेषविरोधी क्वचित्कारणगुणपूर्वक्रमेणोत्पद्यते ।

(२)भावनासञ्ज्ञकस्त्वात्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति ज्ञानमददुःखादिविरोधी । पटुत्वभ्यासादरप्रत्ययजः पटुप्रत्ययापेक्षादात्ममनसोः संयो-

---

(३९)संस्कारप्रकरणम् ।

(१)संस्कारमाह संस्कारस्त्रिविध इति । पञ्चसु पृथिव्यप्तेजोवायुमनःसु नोदनाभिघातादिनिमित्ताविशेषापेक्षं कर्म वेगं करोति नान्यत्र स्वक्षमभावात् । नियतेति । यद्दिगाभिमुख्येन क्रियया वेगस्तद्दिगाभिमुख्येनैव क्रियासन्तानहेतुर्वेग इत्यर्थः । स्पर्शवदिति । विशिष्टेनात्यन्तनिबिडावयववृत्तिना स्पर्शवद्द्रव्यसंयोगेन वेगो विनाश्यते यः स्वयं विशिष्टः मन्दस्तु वेगः स्पर्शवद्द्रव्यसंयोगमात्रेण नश्यति यथाऽतिदूरं गतस्येषोः स्तिमितवायुप्रतिबद्धस्य । क्वचिदिति । वेगवदवयवारब्धे जलावयविनि कारणवेगेभ्योऽपि वेगो जायत इत्यर्थः ।

(२)भावनाख्यं संस्कारमाह भावनासंज्ञकस्त्विति । स्मृतिप्रत्यभिज्ञानहेतुरिति भावनाकार्यकथनम् । ज्ञानेति । प्रतिपक्षज्ञानेन संस्कारो विनाश्यते द्यूताद्यासक्त्या पूर्वाधीतविस्मरणात् । सुरामत्तस्य पूर्वस्मृतिलोपात् मदेन संस्कारविनाशः । जन्मान्तरानुभूतस्मरणाभावान्मरणादिदुःखमपि संस्कारनाशकम् । आदिशब्देन सुखादिपरिग्रहः । पट्वभ्यासेति । पटुप्रत्ययादभ्यासप्रत्ययादादरप्रत्ययाच्च

गादाश्चर्येऽर्थे पटुः संस्कारातिशयो जायते। यथा दाक्षिणात्यस्योष्ट्रदर्शनादिति। विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारमपेक्षमाणादुत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः संयोगात् संस्कारातिशयो जायते। प्रयत्नेन मनश्चक्षुषि स्थापयित्वाऽपूर्वमर्थं दिदृक्षमाणस्य विद्युत्सम्पातदर्शनवदादरप्रत्ययः तमपेक्षमाणादात्ममनसोः संयोगात् संस्कारातिशयो जायते यथा देवह्रदे राजतसौवर्णपद्मदर्शनादिति।

(१)स्थितिस्थापकस्तु स्पर्शवद्द्रव्येषु वर्तमानो घनावयवसन्निवेशविशिष्टेषु कालान्तरावस्थायिषु स्वाश्रय-

---

संस्कारोऽयं जायत इत्यर्थः। प्रथमस्योदाहरणमाह यथा दाक्षिणात्यस्येति। दाक्षिणात्यस्योष्ट्रोऽत्यन्तमननुभूताकार इति आश्चर्यजनकस्तस्य दर्शनात्तस्य पटुः संस्कारो जायते कालान्तरेऽप्युष्ट्रानुभवस्मृतिजननदर्शनात्। अभ्यासप्रत्ययजमाह विद्येति। विद्या शास्त्रागमादिरूपा। शिल्पं पत्रभङ्गादिक्रिया। व्यायाम आयुधादिश्रमः। तेष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारापेक्षोत्तरोत्तरानुभवाहिताधिकाधिकसंस्कारोत्पत्तिक्रमेणोपान्त्यसंस्कारापेक्षादन्त्यानुभवात्संस्कारातिशयोत्पत्तिरिति बोध्यम्। आदरप्रत्ययजन्यं संस्कारमाह प्रयत्नेनेति। उदाहरणमाह यथा देवह्रदे इति। देवह्रदे चैत्रमासपौर्णमास्यामर्धरात्रे राजतानि सौवर्णानि च पद्मानि दृश्यन्ते इति प्रसिध्यनुरोधेन तद्दिने दिदृक्षया मिलितानामासन्नेऽर्धरात्रे प्रयत्नातिशयाच्चक्षुषि मनः स्थापयित्वा स्थितानामुत्थितेषु पद्मेषु क्षणमात्रदर्शनादादरप्रत्ययात् संस्कारातिशयः कालान्तरेऽपि स्फुटतरस्मृतिहेतुरुपजायते।

अत्र १९७ ३४७ सूत्रे।

(१)स्थितिस्थापकमाह स्थितिस्थापकस्त्विति। कार्यद्वारा स्थि-

मन्यथाकृतं यथावस्थितं स्थापयति। स्थावरजङ्गमविकारेषु धनुःशाखाशृङ्गदन्तास्थिसूत्रवस्त्रादिषु भुग्नसंवर्तितेषु स्थितिस्थापकस्य कार्यं संलक्ष्यते। नित्यानित्यत्वनिष्पत्तयोऽस्यापि गुरुत्ववत् ॥

(३९) धर्मलक्षणम्।

(१)धर्मः पुरुषगुणः। कर्तुः प्रियहितमोक्षहेतुः अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः। तस्य तु साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि। तत्र

तिस्थापकसत्तां दर्शयन्नाह स्थावरेत्यादिना। भुग्नाः कुब्जीकृताः, संवर्तिताः पूर्वावस्थां प्रापिताः। अवनामितविमुक्तेषु धनुःशाखादिषु यत्पूर्वावस्थाप्राप्तिहेतुकर्मण एकार्थसमवेतमसमवायिकारणं स संस्कारः स्थितिस्थापक इत्यर्थः ॥

(३९)धर्मप्रकरणम्।

(१)धर्म इति। गुणः पुरुषस्य न कर्मसामर्थ्यमित्यर्थः। प्रियेति। प्रियं सुखं, हितं तत्साधनं, मोक्ष आत्मगुणात्यन्तोच्छेदस्तेषां हेतुर्धर्म इत्यर्थः। अतीन्द्रियः अस्मदादिभिः केनचिदिन्द्रियेणाग्राह्यः। अन्त्यसुखसंविज्ञानविरोधीति। कार्यत्वाद्धर्मस्यावश्यं नाशो वक्तव्यस्स च नाहेतुक इति अन्त्यसुखसम्यक्ज्ञानेन धर्मो नाश्यते इत्यर्थः। पुरुषान्तःकरणेति। आत्ममनःसंयोगज इत्यर्थः आत्मविशेषगुणत्वात् सत्त्ववत्। विशुद्धोऽभिसन्धिः दम्भादिरहितः सङ्कल्पः तज्जश्च धर्म इति। वर्णेति। वर्णाश्रमिणां धर्मः प्रतिवर्णं प्रत्याश्रमं चाधिकृत्य विहितैः साधनैर्जन्यत इत्यर्थः। अतीन्द्रियस्य धर्मस्य साधनानि कुतोऽवगन्तव्यानीत्यत आह तस्य त्वि-

सामान्यानि—धर्मे श्रद्धा अहिंसा भूतहितत्वं सत्यवचन-मस्तेयं ब्रह्मचर्यमनुपधा क्रोधवर्जनमभिषेचनं शुचिद्रव्य-सेवनं विशिष्टदेवताभक्तिरुपवासोऽप्रमादश्च ।

(१)ब्राह्मणक्षत्रियवैश्यानामिज्याध्ययनदानानि। ब्रा-ह्मणस्य विशिष्टानि प्रतिग्रहाध्यापनयाजनानि स्ववर्णविहि-ताश्च संस्काराः। क्षत्रियस्य सम्यक्प्रजापालनमसाधुनि-

---

ति। श्रुतिस्मृत्युक्तानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थि-तानि द्रव्यादीनि धर्मस्य साधनानीत्यभिप्रायः। सर्वेषां वर्णाश्रमि-णां सामान्यतया धर्मसाधनान्याह तत्रेति। श्रद्धा मनःप्रसादः। अहिंसा भूतानामनभिद्रोहसङ्कल्पः। भूतहितत्वं भूतानाम-नुग्रहः। सत्यवचनं यथार्थवचनम्। अस्तेयम् अशास्त्रपूर्वकं परस्वग्रहणं मया न कर्तव्यमिति सङ्कल्पः। ब्रह्मचर्यं स्त्रीसे-वापरिवर्जनम्। अनुपधा भावशुद्धिः। क्रोधवर्जनं क्रोधपरित्या-गः। अभिषेचनं स्नानम्। शुचिद्रव्यसेवनं शुचीनां तिलादीनां द्रव्याणां पर्वणि नियमेन सेवनं। विशिष्टदेवतायां त्रयीसंमतायां भक्तिः। उपवास एकादश्यादौ भोजननिवृत्तिः। अप्रमादो नि-त्यनैमित्तिकानां कर्मणामवश्यम्भावेन करणम्। एतानि प्रायशो सङ्कल्परूपाण्येव समानानि धर्मसाधनानीति भावः। अत्र २ २४१ २२९ ३६९ २४२ २४५ २४८ २४९ २४२ २४४ सूत्राणि।

(१)ब्राह्मणेति। इज्या यागहोमादि, अध्ययनं वेदपाठः, दानं स्वद्र-व्यस्य परस्वत्वापादनम्। एतानि त्रैवर्णिकानां सामान्यानि साध-नानीत्यर्थः। किन्तु दानमत्र यज्ञादिविशिष्टं ग्राह्यं शूद्रस्यापि सामा-न्यदानाधिकारात्। ब्राह्मणस्यासाधारणानि धर्मसाधनान्याह प्र-तिग्रहेत्यादिना। प्रतिग्रहो विशिष्टाद्द्रव्यग्रहणम्। याजनमार्त्विज्य-म्। एभिरेवार्जितानां द्रव्याणां ब्राह्मणस्य धर्माधिकारादेतानि तस्यै-व धर्मसाधनानीत्यर्थः। संस्काराश्चाष्टचत्वारिंशत्, वैदिककर्मानु-ष्ठानयोग्यतासंपादनद्वारा धर्मसाधनानीति भावः। अनिवर्तनम-

ग्रहो युद्धेष्वनिवर्तनं स्वकीयाश्च संस्काराः । वैश्यस्य क्रयविक्रयकृषिपशुपालनानि स्वकीयाश्च संस्काराः । शूद्रस्य पूर्ववर्णपारतन्त्र्यममन्त्रिकाश्च क्रियाः । आश्रमिणां तु ब्रह्मचारिणो गुरुकुलनिवासिनः स्वशास्त्रविहितानि गुरुशुश्रूषाग्नीन्धनभैक्ष्याचरणानि मधुमांसदिवास्वप्नाञ्जनाभ्यञ्जनादिवर्जनं च । विद्याव्रतस्नातकस्य कृतदारस्य गृहस्थस्य शालीनयायावरवृत्त्युपार्जितैरर्थैर्भूतमनुष्यदेवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां सायम्प्रातरनुष्ठानम् एकाग्निविधानेन पाकयज्ञसंस्थानां च नित्या-

---

पलायनम् । वैश्यस्येति । मूल्यं दत्वा परस्मात् द्रव्यग्रहणं क्रयः । मूल्यमादाय स्वद्रव्यदानं विक्रयः । वर्णानां विशिष्टधर्मसाधनान्युक्त्वाऽऽश्रमिणां तान्याहाश्रमिणां त्विति । धर्मसाधनमुच्यत इति शेषः । स्वशास्त्रविहितानि ब्रह्मचारिणमधिकृत्य शास्त्रेण विहितानि । अग्न्यादीनामाचरणानीति । तत्राग्नेराचरणमग्नौ प्रत्यहं होमः । इन्धनाचरणं होमार्थं वनादिन्धनाहरणम् । भैक्ष्याचरणं भैक्ष्यकरणम् । गृहस्थस्य तान्याह विद्येति । वेदाध्ययनायाङ्गीकृतं व्रतमधीते वेदे यो विससर्ज स विद्याव्रतस्नातकः तस्य । शालीनेति । यावता धान्येन कुम्भीपात्रं पूर्यते ऽथहमेकाहं वा वर्तनं भवति तावन्मात्रस्य परेण स्वयमानीय श्रद्धया दीयमानस्य परिग्रहः शालीना वृत्तिः । परप्रतिग्रहं विना प्रत्यहं भिक्षाटनं यायावरवृत्तिः । भूतयज्ञो बलिदानम् । मनुष्ययज्ञो अतिथिपूजा । देवयज्ञो श्राद्धम् । ब्रह्मयज्ञो वेदपाठः । अनुष्ठानमित्यस्याग्रिमषष्ठ्यन्तपदेषु अन्वयः । तथा च सति सामर्थ्ये एकाग्नेरौपासनिकस्याग्नेः विधानं विवाहकाले परिग्रहः तेन पाकयज्ञसंस्थानां पाकयज्ञविशेषाणामष्टकादीनां नित्यानामनुष्ठानमपि गृहस्थस्य धर्मसाधनमित्यर्थः ।

नां शक्तौ विद्यमानायामग्न्याधेयादीनां च हविर्यज्ञसंस्था-
नामग्निष्टोमादीनां सोमयज्ञसंस्थानां च। ऋत्वन्तरेषु
ब्रह्मचर्यमपत्योत्पादनं च। ब्रह्मचारिणो गृहस्थस्य वा
ग्रामान्निर्गतस्य वनवासो वल्कलाजिनकेशश्मश्रुनखरोम-
धारणं च। वन्यहुतातिथिशेषभोजनानि वानप्रस्थस्य।
त्रयाणामन्यतमस्य श्रद्धावतः सर्वभूतेभ्यो नित्यमभयं द-
त्त्वा संन्यस्य सर्वाणि कर्माणि यमनियमेष्वप्रमत्तस्य षट्-
पदार्थप्रसंख्यानाद्योगप्रसाधनं प्रव्राजितस्येति। दृष्टं च प्र-

---

अग्न्याधेयादीनामिति। वसन्ते क्रियमाणानामित्यर्थः। हविर्यज्ञ-
संस्थानां हविर्यज्ञविशेषाणां दर्शपौर्णमासादीनाम्। अग्निष्टोमो-
क्थ्यषोडशीवाजपेयातिरात्राप्तोर्यामाः सप्त सोमयज्ञविशेषाः सोमय-
ज्ञसंस्थास्तेषां चानुष्ठानं धर्मसाधनमित्यर्थः। ऋत्वन्तरेषु ऋतुभि-
न्नकालेषु ब्रह्मचर्यं, ऋतुकालेष्वपत्योत्पादनं च गृहस्थस्य धर्म-
साधनमित्यर्थः। वानप्रस्थस्य धर्मसाधनमाह ब्रह्मचारिणो गृह-
स्थस्य वेति। 'यदहरेव विरजेत् प्रव्रजेत्तदहरेवेति' श्रुतेः श्रद्धायां
सत्यां ब्रह्मचारिणोपि वनवासो भवतीति। गृहस्थ वा वानप्रस्थव्र-
तं कुर्वतो वल्कलादिधारणं वन्यभोजनं फलमूलादिभोजनं हुत-
शेषभोजनं अतिथिशेषभोजनं च धर्मसाधनम्। प्राज्यपत्यादीष्टि-
पूर्वकं पुत्रे भार्यां निक्षिप्य प्रव्रजतो हुतशेषातिथिभोजने न धर्मसाध-
ने, पत्न्याऽग्निना च सह वनं प्रस्थितस्य तेऽपि धर्मसाधने इति
पृथगुक्तिः। यतिधर्ममाह त्रयाणामिति। अन्यतमस्येत्यनेन यत्या-
श्रमपरिग्रहे नियमो नास्तीति सूचितम्। यमेति। यमेष्वहिंसास-
त्यादिरूपेषु तपःशौचादिरूपेषु नियमेषु चाप्रमत्तस्यताननतिक्र-
मतः षट्पदार्थप्रसंख्यानात् षण्णां पदार्थानां तत्त्वज्ञानाद्योग-
स्यात्मज्ञानोत्पादनसमर्थस्य समाधिविशेषस्य प्रसाधनमुत्पाद-
नं प्रव्रजितस्य धर्मसाधनम्। कथमेतेषां धर्मसाधनत्वन्तदाह दृष्टं चे-

योजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चापेक्ष्यात्मम-
नसोः संयोगाद्धर्मोत्पत्तिरिति ॥

(४०) अधर्मप्रकरणम् ।

(१)अधर्मोऽप्यात्मगुणः। कर्तुरहितप्रत्यवायहेतुरतीन्द्रि-
योऽन्त्यदुःखसंविज्ञानविरोधी । तस्य तु साधनानि शास्त्रे
प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि
विहिताकरणम प्रमादश्चैतानि दुष्टाभिसन्धिं चापेक्ष्यात्म-
मनसोः संयोगादधर्मस्योत्पत्तिः ॥)

ति । दृष्टं लाभपूजादिप्रयोजनमनुद्दिश्यानभिसन्धाय यदैतानि सा-
धनानि क्रियन्ते तदा तानि भावप्रसादमभिप्रायविशुद्धिं चापेक्ष्या-
त्ममनसोः संयोगाद्धर्मोत्पत्तिरिति । स एव च वैशेषिके शास्त्रे 'यतो-
ऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इत्यत्र धर्मशब्देन निःश्रेयसहे-
तुतया विवक्षित इत्यभिप्रायः । सांख्यास्तु "समाधिद्वारा दुःखविग-
मायात्मख्यातिरेवोपाय इति श्रुत्वा वनं गत्वा समाधिः क्रियते
तस्माच्च प्रकृष्टसमाधिरूपधर्मोत्पत्तिः, तस्मिंश्च परिणते समाधावा-
त्मस्वरूपसाक्षात्कारि विज्ञानमुदेतीति" प्राहुः। धर्मनिरूपणे २४९ सूत्र-
मारभ्य २५१ सूत्रान्तं भाष्यकारेण व्याख्या न कृता।

(४०) अधर्मप्रकरणम् ।

(१) अधर्ममाहाधर्म इति । कर्तुरिति । अहितं दुःखसाधनं, प्र-
त्यवायो दुःखं, तयोर्हेतुः। हिंसेति । हिंसा परद्रोहः । अनृतं मिथ्या-
वचनम् । स्तेयं परस्वग्रहणमशास्त्रविहितम् । विहितस्यावश्यकर्त-
व्यस्याकरणमकर्तव्यता । प्रमादः अबुद्धिपूर्वकोऽतिक्रमः ।
अधर्मकार्याण्युक्त्वा तत्कारणमाहैतानीति । कामनापूर्वकेऽधर्मानु-
ष्ठाने दुष्टाभिसन्धेः कारणता न त्वकामिक इति ध्येयम् । अत्र
२४३ २४४ २४६ २४७ २२९ १३१ २३२ सूत्राणि ।

(४१) (प्रासङ्गिकं) संसारापवर्गप्रकरणम् ।

(१)अविदुषो रागद्वेषवतः प्रवर्तकाद्धर्मात् प्रकृष्टात् स्वल्पाधर्मसहितात् ब्रह्मेन्द्रप्रजापतिपितृमनुष्यलोकेष्वाशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति । तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषयदुःखादिभिर्योगो भवति । एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहिताद्देवमनुष्यतिर्यङ्नारकेषु पुनः पुनः संसारबन्धो भवति ॥

(२)ज्ञानपुर्वकात्तु कृतादसङ्कल्पितफलाद्विशुद्धे कुले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्न-

---

(४१) संसारापवर्गप्रकरणम् ।

(१)अधर्मसाधनमुक्त्वा तत्साध्यमाहाविदुष इति । अहमेव कर्ता भोक्ता चेत्यहङ्कारेण दुःखसाधनमपि सुखसाधनं मन्वानस्यात एव च तद्विषये रागवतो तदुपरोधिनि च द्वेषवतः प्रवर्तकाद्धर्मात् 'अहमितोऽपि श्रेष्ठो भूयासमिति' अभिलाषया कृतात् प्रकृष्टात् धर्मात् स्वल्पाधर्मयुक्तात् ब्रह्मादिमनुजान्तलोकेषु स्वस्वाश्रयानुरूपैरिष्टशरीरादिभिः सम्बन्धी भवतीत्यर्थः । विनाऽधर्मन्तत्र दुःखसंविन्न भवेदतः स्वल्पेति धर्मविशेषणम् । तथेति । प्रकृष्टादधर्माच्चाल्पधर्मसहितात् प्रेतादियोनिष्वनिष्टदेहादिभिर्योगो जायत इति भावः । उपसंहरति एवमिति । अत्र २५५ सुत्रम् ।

(२)एवं धर्मात्संसारं प्रतिपाद्य ततोऽपवर्गं प्रतिपादयति ज्ञानेति । अयमभिप्रायः—मोक्षानुकूलमसङ्कल्पितफलं कर्म विशुद्धकुले जन्म ग्राहयति, तत्र जातस्य प्रत्यहं दुःखैरभिहन्यमानस्य तद्विगमोपाये जिज्ञासा 'कुतोऽस्योपरम' इति संपद्यते । तदर्थं चाचार्यमु-

योजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चापेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति ॥

(४०) अधर्मप्रकरणम् ।

(१) अधर्मोऽप्यात्मगुणः। कर्तुरहितप्रत्यवायहेतुरतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी । तस्य तु साधनानि शास्त्रे प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि विहिताकरणम् प्रमादश्चैतानि दुष्टाभिसन्धिं चापेक्ष्यात्ममनसोः संयोगादधर्मस्योत्पत्तिः ॥

ति । दृष्टं लाभपूजादिप्रयोजनमनुद्दिश्यानभिसन्धाय यदैतानि साधनानि क्रियन्ते तदा तानि भावप्रसादमभिप्रायविशुद्धिं चापेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति । स एव च वैशेषिके शास्त्रे 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इत्यत्र धर्मशब्देन निःश्रेयसहेतुतया विवक्षित इत्यभिप्रायः । सांख्यास्तु "समाधिद्वारा दुःखविगमायात्मख्यातिरेवोपाय इति श्रुत्वा वनं गत्वा समाधिः क्रियते तस्माच्च प्रकृष्टसमाधिरूपधर्मोत्पत्तिः, तस्मिंश्च परिणते समाधावात्मस्वरूपसाक्षात्कारि विज्ञानमुदेतीति" प्राहुः। धर्मनिरूपणे२४९सूत्रमारभ्य २५१ सूत्रान्तं भाष्यकारेण व्याख्या न कृता।

(४०) अधर्मप्रकरणम् ।

(१) अधर्ममाहाधर्म इति । कर्तुरिति । अहितं दुःखसाधनं, प्रत्यवायो दुःखं, तयोर्हेतुः। हिंसेति । हिंसा परद्रोहः । अनृतं मिथ्यावचनम् । स्तेयं परस्वग्रहणमशास्त्रविहितम् । विहितस्यावश्यकर्तव्यस्याकरणमकर्तव्यता । प्रमादः अबुद्धिपूर्वकोऽतिक्रमः । अधर्मकार्याण्युक्त्वा तत्कारणमाहैतानीति । कामनापूर्वकेऽधर्मानुष्ठाने दुष्टाभिसन्धेः कारणता न त्वकामिक इति ध्येयम् । अत्र २४३ २४४ २४६ २४७ २२९ १३१ २३२ सूत्राणि ।

(४१) (प्रासङ्गिकं) संसारापवर्गप्रकरणम् ।

(१)अविदुषो रागद्वेषवतः प्रवर्तकाद्धर्मात् प्रकृष्टात् स्वल्पाधर्मसहितात् ब्रह्मेन्द्रप्रजापतिपितृमनुष्यलोकेष्वाशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति । तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषयदुःखादिभिर्योगो भवति । एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहिताद्देवमनुष्यतिर्यङ्नारकेषु पुनः पुनः संसारबन्धो भवति ॥

(२)ज्ञानपुर्वकात्तु कृतादसङ्कल्पितफलाद्विशुद्धे कुले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्न-

---

(४१) संसारापवर्गप्रकरणम् ।

(१)अधर्मसाधनमुक्त्वा तत्साध्यमाहाविदुष इति । अहमेव कर्ता भोक्ता चेत्यहङ्कारेण दुःखसाधनमपि सुखसाधनं मन्वानस्यात एव च तद्विषये रागवतो तदुपरोधिनि च द्वेषवतः प्रवर्तकाद्धर्मात् 'अहमितोऽपि श्रेष्ठो भूयासमिति' अभिलाषया कृतात् प्रकृष्टात् धर्मात् स्वल्पाधर्मयुक्तात् ब्रह्मादिमनुजान्तलोकेषु स्वस्वाश्रयानुरूपैरिष्टशरीरादिभिः सम्बन्धी भवतीत्यर्थः । विनाऽधर्मेन्तत्र दुःखसंविन्न भवेदतः स्वल्पेति धर्मविशेषणम् । तथेति । प्रकृष्टादधर्माच्चाल्पधर्मसहितात् प्रेतादियोनिष्वनिष्टदेहादिभिर्योगो जायत इति भावः । उपसंहरति एवमिति । अत्र २५५ सूत्रम् ।

(२)एवं धर्मात्संसारं प्रतिपाद्य ततोऽपवर्गं प्रतिपादयति ज्ञानेति । अयमभिप्रायः—मोक्षानुकूलमसङ्कल्पितफलं कर्म विशुद्धकुले जन्म ग्राहयति, तत्र जातस्य प्रत्यहं दुःखैरभिहन्यमानस्य तद्विगमोपाये जिज्ञासा 'कुतोऽस्योपरम' इति संपद्यते । तदर्थं चाचार्यमु-

षट्पदार्थतत्त्वज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसञ्चितयोश्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते । तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति ॥)

(४२) शब्दप्रकरणम् ।

(१) शब्दोऽम्बरगुणः श्रोत्रग्राह्यः क्षणिकः कार्यकारणो-

पगम्य तदुपदेशात् तस्य षट्पदार्थज्ञानं भवति ततो विरोधिनोऽज्ञानस्य ज्ञानेन निवृत्तौ विच्छिन्नरागद्वेषसंस्कारस्य रागद्वेषयोरभावात्तज्जधर्माधर्मानुत्पत्तौ पूर्वसञ्चितयोश्च धर्माधर्मयोरुपभोगान्निवृत्तौ निवृत्तिफलककर्मान्तरात्सन्तोषसुखदं शरीरपरिच्छेदमुत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः—निवर्त्यते संसारोऽनया तत्स्वभावो धर्मः केवलाख्यः परमार्थदर्शनजमात्मदर्शनजं सुखमुत्पाद्य निवर्तते । यदाऽऽत्मदर्शनं कृत्वा धर्मो निवृत्तस्तदा निर्बीजस्य देहादिबीजधर्माधर्मरहितस्यात्मन उत्पन्नानां शरीरादीनां कर्मक्षयान्निवृत्तौ जातायामनागततदुत्पत्तौ च हेत्वभावादन्यदेहाद्यनुत्पत्तौ दग्धेन्धनानलवच्छरीरानुत्पादो मोक्षो भवतीति । ज्ञानमात्रान्मुक्तिः ज्ञानकर्मसमुच्चयाद्वेत्यादि तु अन्यत्र द्रष्टव्यम् ।

अत्र २५६ २१४ २१६ सूत्राणि ।

(४२) शब्दप्रकरणम् ।

(१) क्रमप्राप्तं शब्दमाह शब्द इति । अम्बरगुण इति । आकाशविशेषगुणवत्त्वं तल्लक्षणमित्यर्थः । क्षणिक इति आशुतरविनाश्ययं न तु नित्य उच्चारणादूर्ध्वमनुपलब्धेः । व्यञ्जककल्पना तु सत्तायां प्रमा-

भयविरोधी संयोगविभागशब्दजः प्रदेशवृत्तिः समानासमानजातीयकारणः । स द्विविधो—वर्णलक्षणो ध्वनिलक्षणश्च । तत्र अकारादिर्वर्णलक्षणः शङ्खादिनिमित्तो ध्वनिलक्षणश्च । तत्र वर्णलक्षणस्योत्पत्तिः—आत्ममनसोः संयोगात् स्मृत्यपेक्षाद्वर्णोच्चारणेच्छा तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्मवायुसंयोगाद्वायौ कर्म जायते स चोर्ध्वं गच्छन् कण्ठादीनभिहन्ति ततः स्थानवायुसंयोगापेक्षमाणात् स्थानाकाशसंयोगात् वर्णोत्पत्तिः । अवर्णलक्षणोऽपि भेरीदण्डसंयोगापेक्षाद्भेर्याकाशसंयोगादुत्पद्यते । वेणुपर्वविभागाद् वेण्वाकाशविभागाच्च शब्दाच्च संयोगविभाग-

---

णाभावेनैवापास्ता । प्रत्यभिज्ञानन्तु सामान्यविषयमेव तीव्रमन्दादिभेदस्य व्यक्तिभेदसाधकत्वात् । विरोधीति । आद्यशब्दः स्वकार्येण विरुध्यतेऽन्त्यः स्वकारणेनोपान्त्यशब्देनान्यस्य विनाशहेतोरभावात् । मध्यस्तूभयथा विरुध्यत इत्यर्थः । संयोगेति । आद्यशब्दः संयोगाद्विभागाच्च जायते तत्पूर्वकस्तु शब्दादिति भावः । प्रदेशवृत्तिः अव्याप्यवृत्तिः । समानेति । शब्दजः शब्दः समानजातीयकारणः । संयोगजो विभागजश्चासमानजातीयकारणः । वर्णलक्षणस्योत्पत्तिरिति । कथ्यत इति शेषः । स्मृत्यपेक्षात्पूर्वानुभूतवर्णस्मृत्यपेक्षात् । तं निमित्तकारणं प्रयत्नं । वायुसंयोगादसमवायिकारणात् इत्यर्थः । वायौ कौष्ठ्यवायौ । स्थानवायुसंयोगादिति । निमित्तभूतात्तस्मात्स्थानाकाशसंयोगादसमवायिकरणाद्वर्णोत्पत्तिरित्यर्थः । भेर्याकाशेति । एवं दण्डीयवेगापेक्षाद्भेरीदण्डसंयोगान्निमित्ताद्भेर्याकाशसंयोगादसमवायिकारणाच्च वर्णोत्पत्तिरित्यर्थः । वेणुपर्वविभागात्तदाकाशविभागाच्च ध्वनिरूपशब्दोत्पत्तिमुक्त्वा शब्दाच्च तदुत्पत्तिमाह शब्दाच्चेति । नान्वयं कुतः कल्पना इत्यत्राह श्रोत्रशब्दयोरिति । न

निष्पन्नाद्वीचीसन्तानवच्छब्दसन्तान इत्येवं सन्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणं नास्ति परिशेषात् सन्तानसिद्धिरिति ॥

इति प्रशस्तपादभाष्ये गुणपदार्थः समाप्तः ॥

श्रोत्रं शब्ददेशं गच्छति नापि शब्दः श्रोत्रं तयोर्निष्क्रियत्वादप्राप्तस्य च ग्रहणं न स्यादिन्द्रियाणां प्राप्यकारित्वनियमात्, अन्यथा तूपलब्धिर्न स्यात् इति वीचीतरङ्गन्यायेन शब्दसन्तानकल्पनाऽऽवश्यकीत्यर्थः। अत्र ७५ १००, १०४ सूत्रात् १११सूत्रान्तं च द्रष्टव्यम्।

इति भाष्यविवरणे गुणपदार्थः ।



अथ कर्मपदार्थनिरूपणम् ।

(१) उत्क्षेपणादिकर्मप्रकरणम् ।

(१) उत्क्षेपणादीनां पञ्चानामपि कर्मत्वसम्बन्धः । एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वम् अगुणवत्त्वं गुरुत्वद्रवत्वप्रयत्नसंयोगजत्वं स्वकार्यसंयोगविरोधित्वं संयोगविभागनिरपेक्षकारणत्वम् असमवायिकारणत्वं स्वपराश्रयसमवेतकार्यारम्भकत्वं समानजातीयानारम्भ-

---

ॐ नमस्त्रिपुराम्बायै ।

अथ कर्मपदार्थः ।

(१) उत्क्षेपणादिकर्मप्रकरणम् ।

(१) उत्क्षेपणादीनामन्योन्यसाधर्म्यमितरपदार्थवैधर्म्यञ्च प्रतिपाद- यन्नाहोत्क्षेपणादीनामिति । कर्मत्वसामान्येन सहोत्क्षेपणादीनां स- म्बन्ध इत्यर्थः । कर्मत्वञ्च क्रियामात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं तत्र च प्रत्यक्षमेव प्रमाणम् चलतीत्यादिप्रत्यक्षस्य लौकिकपरीक्षक- साधारणत्वात् । एकद्रव्यवत्त्वमिति । एकदैकस्मिन्द्रव्ये एकमेव कर्म वर्तते, एकं कर्मैकत्रैव द्रव्ये वर्तत इत्येकद्रव्यवत्त्वम् । यद्येकत्र द्रव्ये युगपद्विरुद्धोभयकर्मसमवायः स्यात् तदाऽन्योन्यप्रतिबन्धाद्वि- ग्विशेषसंयोगविभागानुपपत्तौ "संयोगविभागयोरनपेक्षं कारणं कर्म" इति कर्मलक्षणानुपपत्तिः स्यात् इति भावः । स्वकार्येति । स्वकार्यसं- योगविनाश्यत्वं न तु विभागनाश्यत्वमुत्तरसंयोगाभावप्रसङ्गात् । संयोगेति । यथा वेगारम्भे नोदनाभिघातविशेषापेक्षत्वं नैवं संयोगवि- भागारम्भे तदपेक्षत्वमित्यर्थः । असमवायिकारणत्वमिति । गुणव- न्नैमित्तिकत्वं नेत्यर्थः । स्वपराश्रयेति । स्वपरयोराश्रये व्यासज्य स- मवेतं यत् संयोगविभागरूपं कार्यं तदारम्भकत्वमित्यर्थः । समानेति । अन्यथा गतिविनाशो न स्यात् इत्यर्थः । द्रव्यानारम्भकत्वमिति ।

कत्वं द्रव्यानारम्भकत्वं च प्रतिनियतजातियोगित्वम् । दिग्विशिष्टकार्यारम्भकत्वं च विशेषः ॥

(१)तत्रोत्क्षेपणं शरीरावयवेषु तत्सम्बद्धेषु च यदूर्ध्वभाग्भिः प्रदेशैः संयोगकारणमधोभाग्भिश्च प्रदेशैः विभागकारणं कर्मोत्पद्यते गुरुत्वप्रयत्नसंयोगेभ्यस्तदुत्क्षेपणम् ॥

(२)तद्विपरीतसंयोगविभागकारणं कर्मापक्षेपणम् ॥

(३)ऋजुनो द्रव्यस्याग्रावयवानां तद्देशैर्विभागः संयोगश्च मूलप्रदेशैर्येन कर्मणावयवी कुटिलः संजायते तदाकुञ्चनम् ॥

(४)तद्विपर्ययेण संयोगविभागोत्पत्तौ येन कर्मणावयवी ऋजुः सम्पद्यते तत्प्रसारणम् ॥

यदनियतदिक्प्रदेशसंयोगविभागकारणं तद्गमनमिति ॥

उत्तरसंयोगान्निवृत्ते कर्मणि द्रव्यारम्भ इत्यर्थः । प्रतिनियतेति । प्रतिनियतजातय उत्क्षेपणत्वादयस्तद्योगित्वमित्यर्थः । इदं सर्वं पञ्चानां साधर्म्यं बोध्यम् । अत्र ७ १७ १०५ ६९ १९ १४ २० ३० ३६४ ११ २४ ३१ २१ २२ सूत्राणि क्रमशो बोध्यानि ।

(१)दिग्विशिष्टकार्यारम्भकत्वमेव दर्शयति तत्रेति । तत्सम्बद्धेषु मुसलादिष्वित्यर्थः ।

(२)तद्विपरीतेति । अधोदेशसंयोगादिकारणमित्यर्थः ।

(३)ऋजुन इति । तद्देशैरग्रादिसम्बद्धाकाशादिदेशैः । येन कर्मणा ।

(४)तद्विपर्ययेणेति । अग्रावयवानां मूलप्रदेशविभागादुत्तरदेशसंयोगे जाते इत्यर्थः । अत्र ३८ सूत्रम् ।

(२)गमनप्रकरणम् ।

एतत्पञ्चविधमपि कर्म शरीरावयवेषु तत्सम्बद्धेषु च (१)सत्प्रत्ययमसत्प्रत्ययं च यदन्यत्तदप्रत्ययमेव ते ष्वन्येषु च तद्गमनमिति ।

(२)कर्मणां जातिपञ्चकत्वमयुक्तम् गमनाविशेषात् । सर्वं हि क्षणिकं कर्म गमनमात्रमुत्पन्नं स्वाश्रयस्योर्ध्व-मधस्तिर्यग्वाप्यणुमात्रैः प्रदेशैः संयोगविभागान् करोति सर्वत्र गमनप्रत्ययोऽविशिष्टस्तस्माद्गमनमेव सर्वमिति । न वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात्—इहोत्क्षेपणं परत्रापक्षेपणमित्येवमादि सर्वत्र वर्गशः प्रत्ययानुवृ-त्तिव्यावृत्ती दृष्टे तद्धेतुः सामान्यविशेषभेदोऽवगम्यते । तेषामुदाद्युपसर्गविशेषात् प्रतिनियतदिग्विशिष्टकार्यार-म्भत्वादुपलक्षणभेदोऽपि सिद्धः ।

---

(२) गमनप्रकरणम् ।

(१)सत्प्रत्ययमिति । प्रयत्नपूर्वकमप्रयत्नपूर्वकञ्चेत्यर्थः । यदन्यदि-ति । तेषु देहावयवेषु मुसलादिषु अन्येषु वा द्रव्येषु यत् तदप्रत्ययजं कर्म जायते सत्प्रत्ययादन्यत् तद्गमनमेव ।

(२)शङ्कते कर्मणामिति । हेतुमाह गमनाविशेषादिति । गम-नात् सर्वेषामविशेषादभेदादित्यर्थः । अविशेषमेवाह सर्वं हीति । सर्वत्र गच्छतीति प्रत्ययदर्शनात् उत्क्षेपणादिकं गमनमेवेति शङ्का-र्थः । समाधत्ते नेति । वर्गशः-प्रतिवर्गं उत्क्षेपणादौ प्रत्ययानुवृत्ति-व्यावृत्त्योर्दर्शनात् , गोवर्गेऽश्वादिवर्गव्यावृत्त्या प्रत्ययानुगमदर्शनात् यथा तत्र गोत्वं कल्प्यते तथाऽत्रापि उत्क्षेपणत्वादिकल्पना ज्यायसीति भावः । विवरणभाष्यं स्पष्टम् । तेषामिति । न केवलम-

(१)एवमपि पञ्चैवेत्यवधारणानुपपत्तिः । निष्क्रमणप्रवेशनादिष्वपि वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात् । यद्युत्क्षेपणादिषु सर्वत्र वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनाज्जातिभेद इष्यते एवञ्च निष्क्रमणप्रवेशनादिष्वपि । कार्यभेदात् तेषु प्रत्ययानुवृत्तिव्यावृत्ती इति चेत् न उत्क्षेपणादिष्वपि कार्यभेदादेव प्रत्ययानुवृत्तिव्यावृत्तिप्रसङ्गः । अथ समाने वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिसद्भावे उत्क्षेपणादीनामेव जातिभेदो न निष्क्रमणादीनामित्यत्र विशेषहेतुरस्तीति न, जातिसङ्करप्रसङ्गात् । निष्क्रमणादीनां जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्तौ जातिसङ्करः प्रसज्यते । कथम् ? द्वयोर्द्रष्टोरेकस्मादपवरकादपवरकान्तरं

नुवृत्तिव्यावृत्तिप्रत्ययदर्शनादुत्क्षेपणत्वादिसामान्यभेदः किन्तु उदाद्युपसर्गभेदात्प्रतिनियतदिग्विशिष्टकार्यारम्भकत्वादपीत्यर्थः ।

(१)पुनः शङ्कते एवमपीति प्रवेशनादिष्वपीत्यन्तेन । निष्क्रमणादावपि वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनान्निष्क्रमणत्वादिकमभ्युपेयामिति शङ्कार्थः । सिद्धान्त्याशङ्कते कार्यभेदादिति । प्रतिबन्द्या पूर्वपक्षी समाधत्ते नेति । कार्यभेदेनैव निष्क्रमणत्वादिभेदो न जातिभेदेनेति स्थापयितुमाहाथेत्यादिना । तथा च विशेषहेत्वभावात्कथं न जातिभेदो निष्क्रमणत्वादीनामिति आशङ्क्य तत्र बाधकमाह जातिसङ्करप्रसङ्गादिति । अस्यार्थमाह निष्क्रमणादीनामिति । यदि निष्क्रमणत्वादिजातयोऽङ्गीक्रियन्ते तदैकस्यां व्यक्तौ विरुद्धानेकजातिसमवायः प्रसज्यत इत्यर्थः । प्रश्नपूर्वकं तमेव दर्शयति द्वयोरिति भवतीत्यन्तेन । यदीमौ द्रष्टृभेदेन जातौ प्रत्ययौ जातिकृतौ तदैकस्यां व्यक्तौ परस्परविरुद्धानि-

गच्छतो युगपन्निष्क्रमणप्रवेशनप्रत्ययौ दृष्टौ तथा द्वारप्रदेशे प्रविशति निष्क्रामतीति च। यदा तु प्रतिसीराद्यपनीतं भवति तदा न प्रवेशनप्रत्ययो नापि निष्क्रमणप्रत्ययः किन्तु गमनप्रत्यय एव भवति। तथा नालिकायां वंशपत्रादौ पतति बहूनां द्रष्टॄणां युगपद्भ्रमणपतनप्रवेशनप्रत्यया दृष्टा इति जातिसङ्करप्रसङ्गः। न चैवमुत्क्षेपणादिषु प्रत्ययसङ्करो दृष्टः तस्मादुत्क्षेपणादीनामेव जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्ती निष्क्रमणादीनां तु कार्यभेदादिति।

(१)कथं युगपत्प्रत्ययभेद इति चेत्, अथ मतम्— "यथा जातिसङ्करो नास्ति एवमनेककर्मसमावेशोऽपि नास्तीत्येकस्मिन् कर्मणि युगपद्द्रष्टॄणां भ्रमणपतनप्रवेशनप्रत्ययाः कथं भवन्तीति"। अत्र ब्रूमः—न अवयवावयविनोर्दिग्विशिष्टसंयोगविभागानां भेदात्। यो हि द्रष्टा अवयवानां पार्श्वतः पर्यायेण दिक्-

---

ष्क्रमणत्वप्रवेशनत्वजातिद्वयसमावेशाज्जातिसङ्करप्रसङ्गः स्यादिति भावः। उदाहरणान्तरमाह तथा नालिकायामित्यादिना। स्वपक्षे विशेषमाह न चैवमिति। उपसंहरति तस्मादिति।

(१)एकदैकत्र द्रव्ये एकमेव कर्म भवतीत्युक्तं ततः कथं युगपदनेककर्मप्रत्यय इत्याशङ्कते कथमिति। तद्विवृणोति अथेत्यादिना। समाधानं कुर्वन्नाहात्र ब्रूम इति। न—एवं नेत्यर्थः यतोऽवयवानामवयविनश्च दिग्देशविशिष्टानां संयोगविभागानां भेदाद्युगपदनेककर्मप्रत्यय इ-

प्रदेशैः संयोगविभागान् पश्यति तस्य भ्रमणप्रत्ययो भवति यो ह्यवयवी न ऊर्ध्वप्रदेशैर्विभागमधःसंयोगं चावेक्षते तस्य पतनप्रत्ययो भवति । यः पुनर्नालिकान्तर्देशे संयोगं बहिर्देशे च विभागं पश्यति तस्य प्रवेशनप्रत्ययो भवतीति सिद्धः कार्यभेदान्निष्क्रमणादीनां प्रत्ययभेद इति । भवतूत्क्षेपणादीनां जातिभेदात् प्रत्ययभेदः निष्क्रमणादीनां तु कार्यभेदादिति ।

(१)अथ गमनत्वं किं कर्मत्वपर्यायः आहोस्विदपरं सामान्यमिति । कुतस्ते संशयः ? समस्तेषूत्क्षेपणादिषु कर्मप्रत्ययवद्गमनप्रत्ययाविशेषात् कर्मत्वपर्याय इति गम्यते । यतस्तूत्क्षेपणादिवद्विशेषसञ्ज्ञयाभिहितं तस्मादपरं सामान्यं स्यादिति । न । कर्मत्वपर्यायत्वात्—आत्मत्वपुरुषत्ववत्कर्मत्वपर्याय एव गमनत्वमि-

---

त्यर्थः । एतद्विवृणोति यो हीति । पार्श्वतः संयोगविभागकारणेष्ववयवकर्मसु भ्रमणप्रत्ययः अवयविक्रियायां कार्यभेदात् पतनप्रवेशनप्रत्ययावित्यर्थः । अन्यत्सुगमं भाष्यम् ।

अतिरिक्तसूत्राप्राप्तेरिदं भाष्यं कर्मविभाजकसूत्रव्याख्यानमेवेति गम्यते ।

(१)गमनत्वं कर्मत्वपर्याय उतापरं सामान्यमिति संशये सिद्धान्तिनः प्रश्नः कुतस्ते संशय इति । संशयं विभजते समस्तेष्विति । समाधत्ते नेति । गमनत्वस्येति शेषः । एतद्विवृणोति आत्मत्वेति । यथा समस्तभेदव्यापकत्वात् पुरुषत्वमात्मत्वपर्यायस्तथा गमनत्व कर्मत्वपर्याय इति भावः । तर्हि किमर्थं विशेषसंज्ञया पृथग्गमनग्रहणमित्यभिप्रायेणाशङ्कते अथेति । समाधत्ते नेति । सामान्यादित्य-

ति। अथ विशेषसंज्ञया किमर्थं गमनग्रहणं कृतमिति न, भ्रमणाद्यवरोधार्थत्वात्। उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्पन्दनादीनामवरोधार्थं गमनग्रहणं कृतमिति। अन्यथा हि यान्येव चत्वारि विशेषसंज्ञयोक्तानि तान्येव सामान्यविशेषसंज्ञाविषयाणि प्रसज्येरन्निति। अथवा अस्त्वपरं सामान्यं गमनत्वमनियतदिग्देशसंयोगविभागकारणेषु भ्रमणादिष्वेव वर्तते गमनशब्दश्चोत्क्षेपणादिषु भाक्तो द्रष्टव्यः स्वाश्रयसंयोगविभागकर्तृत्वसामान्यादिति॥

(३)सत्प्रत्ययकर्मप्रकरणम्।

(१)सत्प्रत्ययकर्मविधिः। कथम्? चिकीर्षितेषु यज्ञाध्ययनदानकृष्यादिषु यदा हस्तमुत्क्षेप्तुमिच्छत्यपक्षेप्तुं वा तदा हस्तवत्यात्मप्रदेशे प्रयत्नः सञ्जायते तं प्रयत्नं गुरुत्वं चापेक्षमाणादात्महस्तसंयोगाद्धस्ते कर्म भवति ह-

---

न्तेन। अनवरुद्धानामसंगृहीतानाम्। भ्रमणादयोपि ये लोकसिद्धास्तत्सङ्ग्रहाय गमनत्वस्य विशेषसंज्ञयाभिधानात् अन्यथोत्क्षेपणादीनामेव कर्मत्वमापतेतेति भावः। अथवा गमनत्वं भ्रमणादिष्वेव वर्तेत इत्याहाथवेति। तर्ह्युत्क्षेपणादिषु कुतो गमनप्रतीतिरत आह गमनशब्दश्चेति। उपचारबीजमाह स्वाश्रयेति। यथा गमनं स्वाश्रयसंयोगविभागौ करोति तथा उत्क्षेपणादयोऽपीति साधर्म्येणोत्क्षेपणादिषु गमनव्यवहार इत्यर्थः।

(३) सत्प्रत्ययकर्मप्रकरणम्।

(१)प्रयत्नपूर्वककर्मप्रकारमाह सत्प्रत्ययेति। तं प्रयत्नमिति। निमित्तकारणमित्यर्थः। आत्महस्तसंयोगादसमवायिकारणादित्य-

स्तवत सर्वशरीरावयवेषु पादादिषु शरीरे चेति ।

(१)तत्सम्बद्धेष्वपि कथम्? यदा हस्तेन मुसलं गृहीत्वेच्छां करोति "उत्क्षिपामि हस्तेन मुसलमिति" तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगाद्यस्मिन्नेव काले हस्ते उत्क्षेपणकर्मोत्पद्यते तस्मिन्नेव काले तमेव प्रयत्नमपेक्षमाणाद्धस्तमुसलसंयोगात् मुसलेऽपि कर्मेति । ततो दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते पुनरप्यपक्षेपणेच्छोत्पद्यते तदनन्तरं प्रयत्नस्तमपेक्षमाणाद्यथोक्तात् संयोगाद्धस्तमुसलयोर्युगपदपक्षेपणकर्मणी भवतः ततोऽन्त्येन मुसलकर्मणोलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते, स संयोगो मुसलगतवेगमपेक्षमाणोऽप्रत्ययं

र्थः । क्वचित्तथैव पाठः । प्रयत्ने सत्यपि गुरुत्वाभावे उत्क्षेपणादेरशक्यकरणतया गुरुत्वस्यापि कारणत्वकथनम् । हस्तवदिति । पादादिक्रियोत्पत्तावपि पादवदात्मप्रदेशे प्रयत्नस्य निमित्तहेतुत्वम् पादात्मसंयोगस्यासमवायिकारणत्वमित्यादि बोध्यम् । अत्र १८१ सूत्रम् ।

(१)तत्सम्बद्धेष्वपीति । शरीरावयवसम्बद्धेष्वपीति अप्यर्थः । प्रश्ने उत्तरमाह यदेति । तदनन्तरं इच्छानन्तरम् । प्रयत्नः हस्तेन सह मुसलमुत्क्षिपामीति हस्तमुसलयोर्युगपदुत्क्षेपणेच्छया जायमानः प्रयत्नो युगपदुत्क्षेपणसमर्थो विशिष्ट एव जायते, तं निमित्तभूतमपेक्षमाणात् असमवायिकारणादात्महस्तसंयोगाद्यदा हस्ते उत्क्षेपणं कर्मोत्पद्यते तदा तस्मादेव निमित्तादुभयार्थात् जायमानाद्धस्तमुसलसंयोगादसमवायिकारणान्मुसलेऽपि कर्म कारणयौगपद्याज्जायते इत्यर्थः । अत्र १८१ १८२ सूत्रे ।

तत इति । यथोक्तात्—संयोगात्—हस्तात्मसंयोगाद्धस्तमु-

मुसले उत्पतनकर्म करोति । तत्कर्माभिघातापेक्षं मुसले संस्कारमारभते तमपेक्ष्य मुसलहस्तसंयोगोऽप्रत्ययं हस्तेऽप्युत्पतनकर्म करोति । यद्यपि प्राक्तनः संस्कारो विनष्टः तथापि मुसलोलूखलयोः संयोगः पटुकर्मोत्पादकः संयोगविशेषभावात् तस्य संस्कारारम्भे साचिव्यसमर्थो भवति ।

(१)अथवा प्राक्तन एव पटुः संस्कारोऽभिघातादविनश्यन्नवस्थित इति । अतः संस्कारवति पुनः संस्कारारम्भो नास्त्यतो यस्मिन् काले संस्कारापेक्षादभिघातादप्रत्ययं मुसले उत्पतनकर्म तस्मिन्नेव काले तमेव संस्कारमपेक्षमाणात् मुसलहस्तसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति ॥

पाणिमुक्तेषु गमनविधिः । कथम्?(२)यदा तोमरं हस्तेन गृहीत्वोत्क्षेप्तुमिच्छोत्पद्यते तदनन्तरं प्रयत्नः

सलसंयोगाच्चेत्यर्थः । अप्रत्ययमिति । अप्रयत्नपूर्वकमित्यर्थः । अत्र १८१ १८२ २८३ सूत्राणि । प्राक्तनापक्षेपणसंस्कारस्याभिघातेन विनष्टत्वात् कथमपेक्षाहेत्वभावात् मुसलेऽप्रत्ययमुत्पतनकर्मोत्पतनसंस्कारमारभते इत्यत आह यद्यपीति । पटुकर्मोत्पादक इति । संस्कारजनककर्मोत्पादक इत्यर्थः । कुत इत्यत आह संयोगविशेषभावात् संयोगविशेषत्वादित्यर्थः । एतावता किमायातमत आह तस्येति ।

(१) प्रकारान्तरमाहाथवेति अस्मिन्नेव पक्षे हस्तमुसलोत्पतनकर्मणी । युगपद्भवत इत्याशयः । अत्र १८३ १८४ १८५ सूत्राणि ।

(२) पाणिमुक्तद्रव्येषु गमनप्रकारः कथमुत्पद्यते इति प्रश्ने आह

तमपेक्षमाणाद्यथोक्तात् संयोगद्वयात् तोमरहस्तयोर्युगपदाकर्षणकर्मणी भवतः । प्रसारिते च हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते तदनन्तरं तिर्यगूर्ध्वं दूरमासन्नं वा क्षिपामीतीच्छा सञ्जायते तदनन्तरं तदनुरूपः प्रयत्नस्तमपेक्षमाणस्तोमरहस्तसंयोगो नोदनाख्यः तस्मात् तोमरे कर्मोत्पन्नं नोदनापेक्षं तस्मिन् संस्कारमारभते । ततः संस्कारनोदनाभ्यां तावत् कर्माणि भवन्ति यावद्धस्ततोमरविभाग इति । ततो विभागान्नोदने निवृत्ते संस्कारादूर्ध्वं तिर्यग्दूरमासन्नं वा प्रयत्नानुरूपाणि कर्माणि भवन्त्यापतनादिति ॥

तथा यन्त्रमुक्तेषु गमनविधिः । कथम् ? यो बलवान् (२)कृतव्यायामो वामेन करेण धनुर्विष्टभ्य दक्षिणेन शरं सन्धाय सशरां ज्यां मुष्टिना गृहीत्वा आकर्षणेच्छां

यदेति । संयोगद्वयादात्महस्तसंयोगाद्धस्ततोमरसंयोगाच्चेत्यर्थः । क्वचित्तथैव पाठः । प्रयत्नो निवर्तते इति । तद्विरोधिप्रसारणप्रयत्नोत्पादादित्यर्थः । अत्र १८१ १८२ सूत्रे ।

तदनुरूप इति । तिर्यक्क्षेपणेच्छायां तिर्यक्क्षेपणप्रयत्नः, ऊर्ध्वक्षेपणेच्छायामूर्ध्वक्षेपणप्रयत्नः, दूरक्षेपणेच्छायां महान्प्रयत्नः आसन्नक्षेपणेच्छायां शिथिलप्रयत्नो जायत इति भावः । तस्मान्नोदनात् यथोक्तादिच्छानुरूपप्रयत्नापेक्षात् इत्यपि योज्यम् । क्वचित्तथैव पाठः । अत्र १८९ १९० सूत्रे ।

ततः संस्कारेति । तोमरपतनं यावत् संस्कारात्तदनुरूपाणि कर्माणि भवन्तीत्यर्थः । अत्र १९७ १९८ सूत्रे ।

कृतव्यायामः—कृतायुधाभ्यासः । इच्छाया आकारमाह सज्ये-

करोति "सज्येषुराकर्षयाम्येतद्धनुरिति" । तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते तदैव तमेव प्रयत्नमपेक्षमाणाद्धस्तज्याशरसंयोगाद् ज्यायां शरे च कर्म प्रयत्नविशिष्टहस्तज्याशरसंयोगमपेक्षमाणाभ्यां ज्याकोटिसंयोगाभ्यां कर्मणी भवतो धनुष्कोट्योरित्येतत् सर्वं युगपत् । एवमाकर्णादाकृष्टे धनुषि नातः परमनेन गन्तव्यमिति यज्ज्ञानं ततस्तदाकर्षणार्थस्य प्रयत्नस्य विनाशस्ततः पुनर्मोक्षणेच्छा सञ्जायते तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्माङ्गुलिसंयोगादङ्गुलिकर्म तस्माज्ज्याङ्गुलिविभागः ततो विभागात् संयोगविनाशः तस्मिन् विनष्टे प्रतिबन्धकाभावाद्यदा धनुषि वर्तमानः स्थितिस्थापकः संस्कारो मण्डलीभूतं धनुर्यथावस्थितं स्थापयति तदा तमेव संस्कारमपेक्षमाणाद्धनुर्ज्यासंयोगाज्ज्यायां शरे च कर्मोत्पद्यते तत्स्वकारणापेक्षं ज्यायां संस्कारं करोति तमपेक्षमाण इषुज्यासंयोगो नोदनं तस्मादिषा-

---

ष्वित्यादि । युगपदिति । कारणयौगपद्यादित्यर्थः । तदाकर्षणार्थस्येति । धनुराकर्षणार्थस्येत्यर्थः । मोक्षणेच्छेति । शरस्य गुणस्य चेति आदिः । ज्याङ्गुलिविभाग इति । शरगुणाभ्यामिति शेषः । तत्स्वकारणापेक्षमिति । तत्कर्म स्वकारणापेक्षं धनुर्ज्यासंयोगापेक्षम् । संस्कारं वेगाख्यमित्यर्थः । तस्मादिति । संस्कारादित्यर्थः । कस्माज्ज्याविभक्तस्येषोरन्तराले क्रमशो बहूनि कर्माणि भवन्तीति

वाद्यं कर्म नोदनापेक्षमिषौ संस्कारमारभते। तस्मात् संस्कारान्नोदनसहायात् तावत् कर्माणि भवन्ति या-वदिषुज्याविभागो। विभागान्निवृत्ते नोदने कर्माण्युत्तरो-त्तराणीषुसंस्कारादेवापतनादिति। बहूनि कर्माणि क्र-मशः, कस्मात्? संयोगबहुत्वात् एकस्तु संस्कारोऽन्तरा-ले कर्मणोऽपेक्षाकारणाभावादिति॥

(१) एवमात्माधिष्ठितेषु सत्प्रत्ययमसत्प्रत्ययं च कर्मोक्तम्।

(४) अप्रत्ययकर्मप्रकरणम्।

(२) अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेष्वप्रत्ययं कर्म गमनमेव नोदनादिभ्यो भवति। तत्र नोदनं गुरु-त्वद्रवत्ववेगप्रयत्नान् समस्तव्यस्तानपेक्षमाणो यः सं-योगविशेषो नोदनमविभागहेतोरेकस्य कर्मणः कारणम्

त्कल्प्यते न त्वेकमेवेत्यभिप्रायेणाशङ्कते बहूनीति। समाधत्ते संयोगबहुत्वादिति। क्षिप्तस्येषोरन्तराले बहवः संयोगा दृश्यन्ते तेन बहूनि कर्माणि भवन्तीति आश्रियते। अपेक्षाकारणाभावादिति। नोदनाभिघातयोरन्यतरापेक्षं कर्म संस्कारमारभते न कर्ममात्रं वे-गाभावादित्यभिप्रायः। अत्र १८१ १८२ १९७ १९८ १९६ सूत्राणि।

(१) उपसंहरति एवमिति।

(४) अप्रत्ययकर्मप्रकरणम्।

(२) अनधिष्ठितेष्विति। आत्मनाऽसाधारणेन सम्बन्धिनाऽधिष्ठितेषु बाह्येष्वप्रयत्नपूर्वकं गमनाख्यमेव कर्म भवति नोत्क्षेपणापक्षेपणादिक-मिति भावः। नोदनं किमत आह तत्रेत्यादि संयोगविशेष इत्यन्तम्। संयोगविशेषः कथं नोदनमुच्यते तत्राह नोदनमिति। नोद्यनोदकयोः

तस्माच्चतुर्ष्वपि महाभूतेषु कर्म भवति । यथा पङ्काख्यायां पृथिव्याम् ।

(१)वेगापेक्षो यः संयोगविशेषो विभागहेतोरेकस्य कर्मणः कारणं सोऽभिघातः । तस्मादपि चतुर्षु महाभूतेषु कर्म भवति । यथा पाषाणादिषु निष्ठुरे वस्तुन्यभिपतितेषु । तथा पादादिभिर्नुद्यमानायामभिहन्यमानायां वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघातयोरन्यतरापेक्ष उभयापेक्षो वा स संयुक्तसंयोगः तस्मादपि पृथिव्यादिषु कर्म भवति । ये च प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते तेष्वपि कर्म जायते ।

परस्परविभागाजनककर्मणः कारणं यतो नोदनन्तत इत्यर्थः । उदाहरति यथेति । यदा पङ्कोपरि शनैः स्थापितं लोष्ठं क्रमशः पङ्केन सहाऽधो गच्छति तदा गुरुत्वापेक्षो लोष्ठपङ्कसंयोगो नोदनं, यदा तु प्रयत्नतो दूरमुत्थाप्य लोष्ठेनाभिहन्यते पङ्कः तदा गुरुत्वप्रयत्नवेगापेक्षः संयोगो नोदनमित्याद्यूह्यम् ।

(१)अभिघातमाह वेगापेक्ष इति । अभिघात्याभिघातकयोः परस्परविभागो यतः कर्मणो जायते तस्यैव हेतुर्यः संयोगविशेषः सोऽभिघात इत्यर्थः । उदाहरति पाषाणादिष्विति । संयुक्तसंयोगमाह तथा पादादिभिरिति । एकत्र भूम्यां पादेन नुद्यमानायामभिहन्यमानायां वा ये प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते वा तेष्वपि कर्म दृश्यते । तत्र च चलतां प्रदेशान्तराणां नुद्यमानाभिहन्यमानभूप्रदेशैः सह संयुक्तप्रदेशसंयोगः कारणम् । यत्राभिघातिद्रव्यं भूप्रदेशमभिहत्य किञ्चिदधो नीत्वोत्पतति तत्र प्रदेशान्तरक्रियायामुभयापेक्षसंयुक्तसंयोगो हेतुर्बोध्यः । अत्र १९९ २१० सूत्रे ।

(१) पृथिव्युदकयोर्गुरुत्वविधारकसंयोगप्रयत्नवेगाभावे सति गुरुत्वाद्यदधोगमनं तत्पतनम्। यथा मुसलशरीरादिषूक्तम्। तत्राद्यं गुरुत्वाद्द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम्॥

(२) स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं यत्तद्द्रवत्वात् स्यन्दनम्। कथम्? समन्ताद्रोधःसंयोगेनावयविद्रवत्वं प्रतिबद्धम् अवयवद्रवत्वमप्येकार्थसमवेतं तेनैव प्रतिबद्धमुत्तरोत्तरावयवद्रवत्वानि संयुक्तसंयोगैः प्रतिबद्धानि। यदा तु मात्रया सेतुभेदः कृतो भवति तदा समन्तात् प्रतिबद्धत्वादवयविद्रवत्वस्य कार्यारम्भो नास्ति सेतुसमीपस्थस्यावयवद्रवत्वस्योत्तरोत्तरे-

---

(१) गुरुत्वस्य कर्महेतुत्वमाह पृथिवीति। तत्राद्यमिति। गुरुत्वप्रतिबन्धकस्य हस्तसंयोगस्याभावे मुसलस्य यदधो गमनं तत्पतनं कर्माऽऽद्यं गुरुत्वाद्भवति तेन कर्मणा संस्कारः ततश्चोत्तरकर्माणि गुरुत्वसंस्काराभ्यां जायन्ते इत्यर्थः। गुरुत्वविधारकप्रयत्नाभावे यच्छरीरस्य पतनं क्षिप्तस्येषोरन्तराले वेगाभावाद्यत्तदपि गुरुत्वहेतुकमित्यर्थः। उत्तरकर्माणि पूर्ववत्। अत्र १८७ १९८ २०१ सूत्राणि।

(२) द्रवत्वस्य कारणत्वमाह स्रोतोभूतानामिति। अपां यत्र स्थलान्निम्नाभिसर्पणं जायते तत्स्यन्दनं द्रवत्वाज्जायत इत्यर्थः। तेनैव प्रतिबद्धमिति। यस्मिन्नवयवे साक्षाद्रोधःसंयोगोऽस्ति तदवयवगतद्रवत्वं तेनैव रोधःसंयोगेन प्रतिबद्धमित्यर्थः। संयुक्तसंयोगैः प्रतिबद्धानीति। रोधःसंयुक्तेनावयवेन सह संयोगादवयवान्तरस्य द्रवत्वं प्रतिबद्धमित्यर्थः। कार्यारम्भो नास्तीति। दीर्घतरेण सेतुना सर्वतः प्रतिबद्धत्वान्महापरिमाणस्यावयविनो एकदेश-

षामवयवद्रवत्वानां प्रतिबन्धकाभावाद्वृत्तिलाभः। ततः क्रमशः संयुक्तानामेवाभिसर्पणम्। ततः पूर्वद्रव्यविनाशे सति प्रबन्धेनावस्थितैरवयवैर्दीर्घं द्रव्यमारभ्यते, तत्र च कारणगुणपूर्वक्रमेण द्रवत्वमुत्पद्यते। तत्र च कारणानां संयुक्तानां प्रबन्धेन गमने यदवयविनि कर्मोत्पद्यते तत् स्यन्दनाख्यमिति॥

(१)संस्कारात् कर्म इष्वादिषूक्तम्। तथा चक्रादिष्ववयवानां पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ यदवयविनः संस्कारादनियतदिग्देशसंयोगविभागनिमित्तं कर्म तद्भ्रमणमिति। एवमादयो गमनविशेषाः॥

प्राणाख्ये तु वायौ कर्म आत्मवायुसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षाज्जाग्रत (२)इच्छानुविधानदर्शनात्,

---

छ्रतालपमार्गेण निर्गमाभावादित्यर्थः। वृत्तिलाभ इति। अल्पस्यावयवस्य तेन मार्गेण निर्गतिसम्भवात्। ततः क्रमश इति। तत इति। प्राक्तनसंयोगविनाशे इत्यर्थः। तत्र–तस्मिन्द्रवत्वे उत्पन्ने सति कारणीभूतानामवयवानां प्रबन्धेन पंक्तीभावेनैकदेशतया गमने सति यदवयविनि कर्मोत्पद्यते तत् द्रवत्वात् स्यन्दनमित्यर्थः। अत्र २०२ सूत्रम्।

(१)संस्कारादिति। अत्र यथापदमध्याहृत्य तथा चक्रादिष्वित्यन्वयो बोध्यः। तदेव दर्शयति अवयवानामिति। उपसंहरति एवमादय इति। अत्र १९७ सूत्रम्।

(२) इच्छानुविधानदर्शनादिति। रेचकादौ इच्छानुविधायिनी प्राणक्रियोपलभ्यते नासारन्ध्रप्रविष्टे रजसि तन्निरासाय प्राणक्रिया द्वेषादपि भवति अतः प्रयत्नपूर्विकेत्यवगम्यते। सुप्तस्य जीवनपूर्वक-

सुप्तस्य तु जीवनपूर्वकप्रयत्नापेक्षात्। आकाशकालदिगात्मनां सत्यपि द्रव्यभावे निष्क्रियत्वं सामान्यादिवदमूर्तत्वात्। मूर्तिरसर्वगतद्रव्यपरिमाणम् तदनुविधायिनी च क्रिया सा चाकाशादिषु नास्ति तस्मान्न तेषां क्रियासम्बन्धोऽस्तीति ॥

(१)सविग्रहे मनसीन्द्रियान्तरसम्बन्धार्थं जाग्रतः कर्म आत्ममनःसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षात् अन्वभिप्रायमिन्द्रियान्तरेण विषयान्तरोपलब्धिदर्शनात्। सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नापेक्षात्। अपसर्पणकर्मोपसर्पणकर्म चात्ममनःसंयोगाददृष्टापेक्षात्। कथम्? यदा जीवनसहकारिणोर्धर्माधर्मयोरुपभोगात् प्रक्षयोऽन्योन्याभिभवो वा तदा जीवनसहाययोर्वैकल्यात्

प्रयत्नापेक्षादात्मवायुसंयोगात्, सुप्तप्राणक्रिया प्रयत्नकार्या प्राणक्रियात्वात् जाग्रतः प्राणक्रियावत्। स च प्रयत्नो नेच्छाद्वेषनिमित्तः सुप्तस्य तदभावात् तस्माज्जीवनपूर्वक एवेति निर्णीयते प्राणधारणस्य तत्पूर्वकत्वात्। क्रियात्वं मूर्तत्वव्याप्तं मूर्तत्वस्याकाशादिष्वभावात्सुतरां क्रियाभाव इत्याकाशादौ क्रियोत्पत्तिर्न विचारितेत्याहाऽऽकाशेति। अत्र २१० २१९ ६९. सूत्राणि।

(१)मनसि कर्मकारणमाह सविग्रहे इति। विषयान्तरोपलब्धिदर्शनादिति। अत्रायमनुमानप्रकारः—मनःक्रिया इच्छादिविशिष्टप्रयत्नसाध्या जागराद्यवस्थायामभिप्रायानतिक्रमेण चाक्षुषादिसाक्षात्कारदर्शनात्। एवञ्चान्तःकरणसम्बन्धमन्तरा वाह्येन्द्रियस्य विषयग्राहकत्वं नास्तीति इच्छाद्वेषपूर्वकात् प्रयत्नान्मनसि क्रियोत्पद्यत इति तात्पर्यम्। अत्र ३२२ सूत्रम्।

तत्पूर्वकप्रयत्नवैकल्यात् प्राणनिरोधे सत्यन्याभ्यां लब्धवृत्तिभ्यां धर्माधर्माभ्यामात्ममनःसंयोगसहायाभ्यां मृतशरीराद्विभागकारणमपसर्पणकर्मोत्पद्यते । ततः शरीराद्बहिरपगतं ताभ्यामेव धर्माधर्माभ्यां समुत्पन्नेनातिवाहिकशरीरेण सम्बध्यते तत्सङ्क्रान्तं च स्वर्गं नरकं वा गत्वा आशयानुरूपेण शरीरेण सम्बद्ध्यते तत्संयोगार्थं कर्मोपसर्पणमिति । योगिनां च बहिरुद्रेचितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनञ्च । तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं कर्मादृष्टकारितम् । एवमन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थं च भवति तदप्यदृष्टकारितम् । यथा सर्गादावणुकर्म अग्निवाय्वोरूर्ध्वतिर्यग्गमने महाभूतानां प्रक्षोभणम् । अभिषिक्तानां मणीनां तस्करं प्रति गमनम् । अयसोऽयस्कान्ताभिसर्पणञ्चेति ॥

इति प्रशस्तपादभाष्ये कर्मपदार्थः समाप्तः ॥

प्राणनिरोधे सतीति । पतितेऽस्मिन्शरीरे इति शेषः । अन्याभ्यां देहान्तरोपभोग्याभ्यामित्यर्थः । अपसर्पणकर्मेति । तत्र चात्ममनस्संयोगोऽसमवायिकारणम् मनः समवायिकारणं लब्धवृत्ती धर्माधर्मौ निमित्तकारणमिति बोध्यम् । बहिरपगतमिति । तन्मन इत्यर्थः । अत्र २१५ सूत्रम् ।

बहिरुद्रेचितस्येति । बहिर्निःसारितस्येत्यर्थः । कर्म-मनःकर्म । इतीति प्रकरणसमाप्तौ । अत्र २०० २११ २१० २१५ २०५ सूत्राणि ।

इति श्रीभाष्यविवरणे कर्मपदार्थः ।

अथ सामान्यपदार्थनिरूपणम् ।

(१) सामान्यप्रकरणम् ।

(१)सामान्यं द्विविधम् परमपरञ्च । स्वविषयसर्व-
गतमभिन्नात्मकमनेकवृत्ति एकद्विबहुष्वात्मस्वरूपानु-
गमप्रत्ययकारि स्वरूपाभेदेनाधारेषु प्रबन्धेन वर्तमानम-
नुवृत्तिप्रत्ययकारणम् । कथम् ? प्रतिपिण्डं सामान्यापे-
क्षं प्रबन्धेन ज्ञानोत्पत्तावभ्यासप्रत्ययजनिताच्च संस्का-
रादतीतज्ञानप्रबन्धप्रत्यवेक्षणाद् यदनुगतमस्ति तत्सा-
मान्यमिति ।

अथ सामान्यपदार्थः ।

(१) सामान्यप्रकरणम् ।

(१)क्रमप्राप्तं सामान्यपदार्थं निरूपयति । सर्वसर्वगतं सामान्य-मिति मतमपाकुर्वन्नाह स्वविषयसर्वगतमिति । यत्सामान्यं यत्र पिण्डे वर्तते स तद्विषयस्तज्जातीये सर्वत्र गतं समवेतं सर्वत्र तत्प्रतीतेः । सर्वसर्वगतत्वाभावे तु अनुपलब्धिरेव प्रमाणम् । अ-नेकवृत्तीति । इदन्तु सामर्थ्याद्बोध्यम् । ननु द्वित्वादिकमपि अ-भिन्नस्वभावमनेकवृत्ति च तदत्र को विशेष अत आह एकद्विब-हुष्विति । तथाच जातिरेकाद्विपिण्डादावात्मस्वरूपानुगमप्रत्ययं जनयति नैवं द्वित्वादिकमिति न क्षतिः । इदमेव विवृणोति प्रबन्धे-नेति । सातत्येनेत्यर्थः । कथमनेकेषु पिण्डेषु सामान्यस्य वृत्तिरित्य-शयेन पृच्छन्तं त्सरयति प्रतिपिण्डमिति । अयमभिप्रायः—एकत्र पिण्डे सामान्यमुपलभ्य पिण्डान्तरे तस्य प्रत्यभिज्ञानादेकस्यानेकवृत्तित्व-मवगम्यते अत एव च तत्र बाधकहेतवः प्रत्यक्षविरोधादपास्यन्त इति । अत्र ३४ सूत्रम् ।

(१)तत्र सत्तासामान्यं परमनुवृत्तिप्रत्ययकारणमेव । यथा परस्परविशिष्टेषु चर्मवस्त्रकम्बलादिष्वेकस्मान्नीलद्रव्याभिसम्बन्धात् नीलं नीलमिति प्रत्ययानुवृत्तिः तथा परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा सत्सदिति प्रत्ययानुवृत्तिः सा चार्थान्तराद्भवितु मर्हतीति यत्तदर्थान्तरं सा सत्तेति सिद्धा । सत्तानुसम्बन्धात् सत्सदिति प्रत्ययानुवृत्तिः तस्मात् सा सामान्यमेव । अपरं द्रव्यत्वगुणत्वकर्मत्वादि अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यं विशेषश्च भवति । तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादिष्वनुवृत्तिहेतुत्वात् सामान्यम् गुणकर्मभ्यो व्यावृत्तिहेतुत्वात् विशेषः । तथा गुणत्वं परस्परविशिष्टेषु रूपादिष्वनुवृत्तिहेतुत्वात् सामान्यं द्रव्यकर्मभ्यो व्यावृत्तिहेतुत्वाद्विशेषः । तथा कर्मत्वं परस्परविशिष्टेषूत्क्षेपणादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं द्रव्यगुणेभ्यो व्यावृत्तिहेतुत्वाद्वि-

---

(१)पूर्वोक्तं सामान्यविभागं विविच्य कथयति तत्रेति । सत्तायाः प्रत्यक्षत्वेऽपि विप्रतिपन्नम्प्रत्यनुमानमाह यथेति । अत्रेयमनुमानरीतिः—द्रव्यादौ सत्सदितिप्रतीतिः व्यतिरिक्तप्रत्ययनिबन्धना भिन्नेषु प्रतीत्यनुवृत्तित्वात् चर्मादिषु नीलप्रत्ययानुवृत्तिवत् । सामान्यमेवेति । यस्मात् सत्ता त्रिषु द्रव्यादिषु प्रत्ययानुवृत्तिं जनयति न व्यावृत्तिं तस्मात्सामान्यमेव न विशेष इत्येवकारार्थः । अत्र क्रमशो ३५ ३८ ३९ ४० ४१ ४८ सूत्राणि २५ सूत्रञ्च द्रष्टव्यम् ।

द्रव्यत्वादिवत् पृथिवीत्वादीनामप्यनुवृत्तिव्यावृत्तिप्रतीतिहेतु-

शेषः । एवं पृथिवीत्वरूपत्वोत्क्षेपणत्वगोत्वघटत्वप-टत्वादीनामपि प्राण्यप्राणिगतानामनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषभावः सिद्धः । एतानि तु द्रव्यत्वादीनि प्रभूतविषयत्वात् प्राधान्येन सामान्यानि स्वाश्रयविशेषकत्वाद्भक्त्या विशेषाख्यानीति ॥

(१)लक्षणभेदादेषां द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वं सिद्धम् । अत एव च नित्यत्वम् । द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च परस्परतश्चान्यत्वम् । प्रत्येकं स्वाश्रयेषु लक्षणविशेषाद्विशेषलक्षणाभावाच्चैक-

---

त्वात् सामान्यविशेषभावोऽस्तीत्याह एवमिति । प्राणिगतानि गोत्वादीनि । अप्राणिगतानि घटत्वादीनि । द्रव्यत्वादौ सामान्यस्वरूपं विशेषस्वरूपं वा पारमार्थिकमुभयस्वरूपं वेत्यत आह एतानीति । अत्र ३५ सूत्रम् ।

(१)ननु द्रव्यादिव्यतिरिक्तान्येव द्रव्यत्वादीनि न भवन्ति कुतः पृथक्कार्यं तेषां निरूप्यते अत आह लक्षणभेदादिति । तथाचानुवृत्तिप्रत्ययहेतुत्वरूपलक्षणभेदाद्व्यावृत्तिबुद्धिवेद्यद्रव्यादिव्यक्तिभ्योऽवश्यं द्रव्यत्वादिसामान्यानां भेदोऽङ्गीकार्यः लक्षणस्य समानासमानजातीयव्यवच्छेदार्थत्वात् इति भावः । नित्यत्वमिति । अभेदे व्यक्तिवदेषां विनाशोत्पादावापद्येतामित्यर्थः । सामान्यं व्यक्त्युत्पादविनाशेनोत्पादविनाशवत् व्यक्त्यन्तरावस्थाने चावस्थानान्नित्यमनित्यं चेति केचिन्मतन्तु न्यायकन्दल्यां व्यासत उक्तं तत्रैव सखण्डनं द्रष्टव्यं नेह विस्तराभयादुच्यते । द्रव्यादिष्विति । द्रव्यत्वादयः प्रत्येकं द्रव्यादिष्वेव नियताः प्रत्ययभेदश्चैतेषु दृश्यते तस्मात् द्रव्यादिषु प्रत्ययभेदाद्वृत्तिनियमाच्च द्रव्यत्वादीनां परस्परं भेदो बोध्य इत्यर्थः । अभेदात्मकं सामान्यमित्युक्तमेव स्पष्टय-

त्वम् । यद्यप्यपरिच्छिन्नदेशानि सामान्यानि भव-न्ति तथाप्युपलक्षणनियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि । अन्तराले च संयोगसमवायवृत्त्य-भावादव्यपदेश्यानीति ॥

इति प्रशस्तपादभाष्ये सामान्यपदार्थः समाप्तः ॥

ति प्रत्येकमिति । लक्षणमनुगताकारज्ञानात्मकं तस्य प्रतिपि-ण्डमविशेषात् वैलक्षण्याभावात् विशेषे भेदे लक्षणस्य प्रमाणस्या-भावाच्च सामान्यस्य स्वाश्रयेष्वभिन्नत्वमित्यर्थः । स्वविषय एव समवैति सामान्यं नान्यत्रेति यदुक्तं तत्र हेतुमाह यद्यपीति । अपरिच्छिन्नदेशान्यनियतदेशानि यत्रतत्रोपजायमानपिण्डेन स-म्बन्धादिति शेषः । उपलक्षणमभिव्यञ्जकमवयवसंस्थानविशेषः तस्य नियमात् नियतत्वात् । कारणसामग्रीति । पिण्डोत्पादकसा-मग्रीत्यर्थः । इदमत्र तात्पर्यम्—यद्यपि सर्वं सामान्यं सर्वत्रोपजायमा-नेन स्वविषयेणैव पिण्डान्तरेणापि सम्बद्धुं शक्यते सास्नादिसं-स्थानविशेषस्य गोत्वमात्रव्यञ्जकस्य गोमात्रनियतत्वात्, तथा-पि गोत्वस्य गव्येव समवायो नान्यत्रेति । एवं सामग्रीनियमादपि जातिसम्बन्धनियमो बोध्यः । एष हि तन्त्वादिस्वभावो यदेतैरुत्प-न्ने द्रव्ये पटत्वं समवैति नान्यत् । न तावत्सामान्यमन्यतो गत्वा सं-बध्यतेऽन्यत्र निःष्क्रियत्वात् । तत्र यदि पूर्वं नासीत तत्रोपजायमा-नेन पिण्डेनास्य सम्बन्धो न स्यात् दृश्यते तु सर्वत्र सम्बन्धस्त-स्मात् सर्वं सर्वत्रास्तीति केचिन्मतमपाकुर्वन्नाह अन्तराले इति । अन्तरालमाकाशं वा दिग्द्रव्यं वा तेषु गोत्वादीनां न संयोगो न वा समवायः असम्बद्धावस्थाने च न कश्चिद्धेतुरतोऽन्तराले न सामान्यव्यवहार इत्यर्थः । कारणसामर्थ्यात्तु तत्रोपजायमानपि-ण्डे सामान्यं सम्बध्यत इति भावः । प्रतीयमानभेदेषु मणिसूत्रवदे-कस्याकारस्याभावान्न सामान्यमिति अपोहरूपं वा तदिति च बौद्ध-मतखण्डनं कन्दल्यां द्रष्टव्यम् । अत्र ४२सूत्रात् ४७ सूत्रान्तं द्रष्टव्यम् ।

इति श्रीभाष्यविवरणे सामान्यपदार्थः ।

अथ विशेषपदार्थनिरूपणम् ।

(१)विशेषप्रकरणम् ।

(१)अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः । यथाऽस्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा गौः शुक्लः शीघ्रगतिः पीनककुद्मान् महाघण्ट इति । तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु च अन्यनिमित्तासम्भवाद् येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिः देशकालविप्रकर्षे च परमाणौ स

अथ विशेषपदार्थः ।

(१)विशेषप्रकरणम् ।

विशेषव्याख्यानायाह अन्तेष्विति । उत्पादविनाशयोरन्तेऽवस्थितत्वादन्तशब्दवाच्यानि निव्यद्रव्याणि तेषु भवाः स्थिता इत्यर्थः । स्वाश्रयभेदकत्वाच्च विशेषा अपि । इदमेवाह विनाशारम्भरहितेष्वित्यादिना । एकैकश इति । एकेनैव विशेषेण स्वाश्रयव्यावृत्तिसिद्धावनेकविशेषकल्पना निरर्थकैकत्रेति भावः । सिद्धे विशेषपदार्थे लक्षणं पूर्वोक्तं घटते नासिद्धे इत्याशङ्क्य तत्सद्भावं प्रतिपादयितुमवतारयति यथेत्यादिना । शुक्ल इति गुणनिमित्ता, शीघ्रगतिरिति क्रियानिमित्ता, पीनो ककुद्मानिति अवयवनिमित्ता, घण्टावानिति संयोगनिमित्ता प्रत्ययव्यावृत्तिर्बोध्या । यथाऽस्मदादीनां गवादिव्यक्तिषु प्रत्ययभेदो भवति तथा परमाण्वादिषु तद्दर्शि-

एवायमिति प्रत्यभिज्ञानं च भवति तेऽन्त्या विशेषाः।

(१)यदि पुनरन्त्यविशेषमन्तरेण योगिनां योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं न स्यात् ततः किं स्यान्नैवं भवति। यथा च योगजाद्धर्मादशुक्ले शुक्लप्रत्ययः सञ्जायते अत्यन्तादृष्टे च प्रत्यभिज्ञानम्। यदि स्यान्मिथ्या भवेत् तथेहाप्यन्त्यविशेषमन्तरेण योगिनां न योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं वा भवितुमर्हति। अथान्त्यविशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यते इति चेन्न तादात्म्यात्। इहातदात्मकेष्वन्यनिमित्तः प्रत्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे प्रदीपान्तरात्। यथा गवाश्वमांसादीना स्वत एवाशुचित्वं तद्योगादन्येषां तथे-

नां परस्परापेक्षया प्रत्ययभेदेन भवितव्यं व्यक्तिभेदसम्भवात्। न चास्य व्यक्तिभेदो निमित्तं तदुपलम्भेपि स्थाण्वादिषु संशयदर्शनात् आकृत्यादीनां तुल्यत्वात् नान्यन्निमित्तम्। निमित्तहीनस्तु प्रत्ययभेदो न दृष्टः तस्माद्यदस्य निमित्तं स विशेष इति।

(१)शङ्कते यदि पुनरिति। यथा योगजधर्मसामर्थ्याद्योगिनामतीन्द्रियार्थदर्शनं भवति तथा विशेषमन्तरेण प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च स्यादिति शङ्कार्थः। समाधत्ते नैवमिति। योगजाद्धर्मादतीन्द्रियार्थदर्शनं भवेन्न पुनर्निर्निमित्तमेवेत्यभिप्रायः। स्पष्टं भाष्यम्। पुनश्चोदयति अथेति। तथाच यथा विशेषेषु न विशेषान्तरमङ्गीक्रियतेऽनवस्थाभयात्तथा च स्वत एव प्रत्ययव्यावृत्तिस्तैर्भवता कल्पनीया चेत्परमाणुष्वपि किं विशेषाः कल्प्यन्ते इत्याशङ्कार्थः। उत्तरयति नेति। विवृणोति इहेति। यथा घटादिष्वप्रकाशस्वभावेषु प्रकाश-

अथ विशेषपदार्थनिरूपणम् ।

(१)विशेषप्रकरणम् ।

(१)अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः । यथाऽस्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा गौः शुक्लः शीघ्रगतिः पीनककुद्मान् महाघण्ट इति । तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु च अन्यनिमित्तासम्भवाद् येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिः देशकालविप्रकर्षे च परमाणौ स

अथ विशेषपदार्थः ।

(१)विशेषप्रकरणम् ।

विशेषव्याख्यानायाह अन्तेष्विति । उत्पादविनाशयोरन्तेऽवस्थितत्वादन्तशब्दवाच्यानि नित्यद्रव्याणि तेषु भवाः स्थिता इत्यर्थः । स्वाश्रयभेदकत्वाच्च विशेषा अपि । इदमेवाह विनाशारम्भरहितेष्वित्यादिना । एकैकश इति । एकेनैव विशेषेण स्वाश्रयव्यावृत्तिसिद्धावनेकविशेषकल्पना निरर्थकैकत्रेति भावः । सिद्धे विशेषपदार्थे लक्षणं पूर्वोक्तं घटते नासिद्धे इत्याशङ्क्य तत्सद्भावं प्रतिपादयितुमवतारयति यथेत्यादिना । शुक्ल इति गुणनिमित्ता, शीघ्रगतिरिति क्रियानिमित्ता, पीनो ककुद्मानिति अवयवनिमित्ता, घण्टावानिति संयोगनिमित्ता प्रत्ययव्यावृत्तिर्बोध्या । यथाऽस्मदादीनां गवादिव्यक्तिषु प्रत्ययभेदो भवति तथा परमाण्वादिषु तद्दर्शि-

एवायमिति प्रत्यभिज्ञानं च भवति तेऽन्त्या विशेषाः।

(१)यदि पुनरन्त्यविशेषमन्तरेण योगिनां योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं न स्यात् ततः किं स्यान्नैवं भवति। यथा च योगजाद्धर्मादशुक्ले शुक्लप्रत्ययः सञ्जायते अत्यन्तादृष्टे च प्रत्यभिज्ञानम्। यदि स्यान्मिथ्या भवेत् तथेहाप्यन्त्यविशेषमन्तरेण योगिनां न योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं वा भवितुमर्हति। अथान्त्यविशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यते इति चेन्न तादात्म्यात्। इहातदात्मकेष्वन्यनिमित्तः प्रत्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे प्रदीपान्तरात्। यथा गवाश्वमांसादीना स्वत एवाशुचित्वं तद्योगादन्येषां तथे-

---

नां परस्परापेक्षया प्रत्ययभेदेन भवितव्यं व्यक्तिभेदसम्भवात्। न चास्य व्यक्तिभेदो निमित्तं तदुपलम्भेपि स्थाण्वादिषु संशयदर्शनात् आकृत्यादीनां तुल्यत्वात् नान्यन्निमित्तम्। निमित्तहीनस्तु प्रत्ययभेदो न दृष्टः तस्माद्यदस्य निमित्तं स विशेष इति।

(१)शङ्कते यदि पुनरिति। यथा योगजधर्मसामर्थ्याद्योगिनामतीन्द्रियार्थदर्शनं भवति तथा विशेषमन्तरेण प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च स्यादिति शङ्कार्थः। समाधत्ते नैवमिति। योगजाद्धर्मादतीन्द्रियार्थदर्शनं भवेन्न पुनर्निर्निमित्तमेवेत्याभिप्रायः। स्पष्टं भाष्यम्। पुनश्चोदयति अथेति। तथाच यथा विशेषेषु न विशेषान्तरमङ्गीक्रियतेऽनवस्थाभयात्तथा च स्वत एव प्रत्ययव्यावृत्तिस्तैर्भवता कल्पनीया चेत्परमाणुष्वपि किं विशेषाः कल्प्यन्ते इत्याशङ्कार्थः। उत्तरयति नेति। विवृणोति इहेति। यथा घटादिष्वप्रकाशस्वभावेषु प्रकाश-

ह्यापि तादात्म्यादन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगात् परमाण्वादिष्विति ॥

इति प्रशस्तपादभाष्ये विशेषपदार्थः
समाप्तः ॥

स्वभावात्प्रदीपादेः प्रकाशो भवति न प्रदीपे प्रदीपान्तरात् प्रकाशः किन्तु स्वत एवेति भावः । स्वत एव-स्वरूपादेव । अत्र ३७ सूत्रम् ।

इति भाष्यविवरणे विशेषपदार्थः ।

अथ समवायपदार्थनिरूपणम्।

(१) समवायप्रकरणम्।

(१)अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः। द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानामकार्यकारणभूतानां वाऽयुतसिद्धानामाधार्याधारभावेनावस्थितानामिहेदमितिबुद्धिर्यतो भवति यतश्चासर्वगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्धः। कथम्? यथेह कुण्डे दधीतिप्रत्ययः सम्बन्धे सति दृष्टस्तथेह तन्तुषु पटः इह वीरणेषु कटः इह द्रव्ये गुणकर्मणी इह द्रव्यगुणकर्मसु सत्ता इह द्रव्ये द्रव्यत्वम् इह गुणे गुणत्वम् इह कर्मणि कर्मत्वम् इह नित्यद्रव्येऽन्त्या वि-

---

अथ समवायपदार्थः।

(१) समवायप्रकरणम्।

(१)समवायं निरूपयति अयुतेति। आधार्याधारभूतानां कार्यकारणभूतानामकार्यकारणभूतानां चेत्यर्थः। उद्देशव्याख्यानावसरे कृतव्याख्यानमेतत्। के ते अयुतसिद्धा अत आह द्रव्येत्यादि। कार्यकारणभूतानामकार्यकारणभूतानामिति नियमोक्तिः। तथा चावयवावयविनामनित्यद्रव्यतद्गुणानां नित्यद्रव्यतत्समवेतानामनित्यगुणानां कर्मतद्वतां च कार्यकारणभूतानां, नित्यद्रव्यतद्गुणानां सामान्यतद्वतामन्त्यविशेषतद्वतामकार्यकारणभूतानाञ्चायुतासिद्धानां समवायो भवतीति नियम एवेत्यर्थः। एवमाधार्याधारभावेनावस्थितानामित्यपि नियम एव। यतश्चेति। असर्वगतानां नियतदेशस्थितानामधिगतान्यत्वानामधिगतस्वरूपभेदाना-

शेषा इतिप्रत्ययदर्शनादस्त्येषां सम्बन्ध इति ज्ञायते ॥

न चासौ संयोगः सम्बन्धिनामयुतसिद्धत्वात्(१) अन्यतरकर्मादिनिमित्तासम्भवात् विभागान्तत्वादर्शनाद-धिकरणाधिकर्तव्ययोरेव भावादिति ॥

स च द्रव्यादिभ्यः पदार्थान्तरं भाववल्लक्षणभेदात् । (१)यथा भावस्य द्रव्यत्वादीनां स्वाधारेषु आत्मा-नुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्परतश्चार्था-न्तरभावः तथा समवायस्यापि पञ्चसु पदार्थेष्विहेतिप्र-त्ययदर्शनात् तेभ्यः पदार्थान्तरत्वमिति । न च संयो-गवन्नानात्वं भाववल्लिङ्गाविशेषात् विशेषलिङ्गाभावाच्च तस्माद्भाववत्सर्वत्रैकः समवाय इति ॥

मविष्वग्भावोऽस्वातन्त्र्यं समवायः सम्बन्ध इत्यर्थः । ज्ञायत इति । अनुमीयत इत्यर्थः । तत्प्रयोगश्चेत्थम्—इह तन्तुषु पट इत्यादि प्रतीतिः सम्बन्धहेतुका अवधारितप्रतीतित्वात् इह कुण्डे दधीतिप्रतीतिव-दिति ।

(१)अयुतसिद्धत्वादिति । संयोगस्तु युतसिद्धानामेव भवतीत्य-र्थः । अन्यतरेति हेत्वन्तरम् । इह त्वन्यतरकर्मादीनां निमित्तानामभावो भावोत्पादककारणसामर्थ्यभावित्वादित्यभिप्रायः । विभागान्तत्वादर्श-नाद्विभागनाश्यत्वस्य समवायेऽभावादित्यर्थः । अधिकरणेति । संयो-गस्तु स्वतन्त्रयोरपि यथोर्ध्वावस्थितयोरङ्गुल्योर्नायं तथेति भावः ।

(२)भाववल्लक्षणभेदादिति हेतुं विवृणोति यथेति । यथा भावस्य सत्तायाः द्रव्यत्वादीनाञ्च स्वस्वाधारेषु द्रव्यादिषु सत्सदिति द्र-व्यं द्रव्यमित्यादिरात्मानुरूपो यः प्रत्ययस्तस्य कर्तृत्वात् सत्तादी-नां स्वाश्रयेभ्यो भेदस्तथा समवायस्यापि इहेति प्रत्ययदर्शनाद्भे-

(१) ननु यद्येकः समवायो द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात् पदार्थसङ्करप्रसङ्ग इति, न आधाराधेयनियमात् । यद्यप्येकः समवायः सर्वत्र स्वतन्त्रः तथाप्याधाराधेयनियमोऽस्ति । कथम् ? द्रव्येष्वेव द्रव्यत्वं गुणेष्वेव गुणत्वं कर्मस्वेव कर्मत्वमिति । एवमादि कस्मात् ? अन्वयव्यतिरेकदर्शनात् । इहेतिसमवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते । यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयिभा-

---

द इत्यर्थः । भाववदिति । लिङ्गाविशेषात् लक्षणैक्याद्विशेषे भेदे लक्षणस्य प्रमाणस्याभावाच्च यथा सत्तैका तथा समवायोऽपीति भावः ।

(१) शङ्कते नन्विति । पदार्थसङ्कर इति । समवायस्यैकत्वे द्रव्यत्वस्य पृथिव्यादौ यः सम्बन्धः स एव गुणादौ गुणत्वादीनामिति यथा पृथिव्यां द्रव्यत्वसम्बन्धात् द्रव्यत्वं तथा तद्योगस्य गुणादावपि सत्त्वात् तेषामपि द्रव्यत्वं स्यादित्यादिः सङ्करो बोध्यः । समाधत्ते नेति । सङ्करो नेत्यर्थः । तत्र हेतुमाहाधाराधेयनियमादिति । न समवायसद्भावमात्रेण द्रव्यत्वं किन्तु द्रव्यसमवायेन द्रव्यत्वं स च द्रव्ये एव न गुणादाविति समाधानार्थः । आक्षेपप्रदर्शनपूर्वकमुत्तरबोधकं हेतुं विवृणोति यद्यपीत्यादिना । सम्बन्धान्तरं संयोगवत् न तद्वृत्तितानियामकमित्यर्थः । आधाराधेयनियमं प्रश्नपूर्वकं दर्शयति कथमित्यादिना । पुनः शङ्कते एवमादीति । द्रव्येष्वेव द्रव्यत्वमित्याद्याधाराधेयनियमः कथं त्वया ज्ञात इत्यर्थः । उत्तरयति अन्वयव्यतिरेकदर्शनादिति । द्रव्यत्वनिमित्तस्य प्रत्ययस्य द्रव्येष्वेवान्वयो गुणादिभ्यो व्यतिरेक इत्याद्यन्व-

वनियमः । तथा द्रव्यत्वादीनामपि समवायैकत्वेपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयनियम इति ॥

(१)सम्बन्ध्यनित्यत्वेऽपि न संयोगवदनित्यत्वं भाववदकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव इत्युक्तम् तथा समवायोऽपीति । न ह्यस्य किञ्चित् कारणं प्रमाणत उपलभ्यते इति । कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तते । न संयोगः सम्भवति तस्य गुणत्वेन द्रव्याश्रितत्वात् । नापि समवायस्तस्यैकत्वात् न चान्या वृत्तिरस्तीति । न । तादात्म्यात् । यथा द्रव्यगुणकर्मणां सदात्मकस्य भावस्य नान्यः सत्तायोगोऽस्ति । एवमविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति तस्मात् स्वात्मवृत्तिः । अत एवातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृ-

---

यव्यतिरेकदर्शनात् द्रव्यत्वादीनां नियमो ज्ञायत इत्यर्थः । ननु कुतोऽयं नियमो यत् द्रव्यत्वस्य पृथिव्यादिष्वेव समवायो नान्यत्रेति समवायस्याविशेषात् अत आह यथेति । संयोगस्यैकत्वेऽपि यथा कुण्डदध्नोराश्रयाश्रयिभावनियमः शक्तिनियमात्तथा समवायस्यैकत्वेपि द्रव्यत्वादीनामाश्रयाश्रयिभावनियमो व्यङ्ग्यव्यञ्जकशक्तिभेदादित्यभिप्रायः । द्रव्यत्वाभिव्यञ्जिका शक्तिर्द्रव्येष्वेव नान्यत्रेति तात्पर्यम् ।

(१)किमयं संयोगवदनित्यो नित्यो वेति संशये सत्याह सम्बन्ध्यनित्यत्वेऽपीति । हेतुमेव विवृणोति यथेत्यादिना । सम्बन्धिनाशे संयोगविनाशो युक्तः तदुत्पादे सम्बन्धिनोः समवायिकारणत्वात्; समवायस्य तु सम्बन्धिनौ न कारणं सम्बन्धिमात्रत्वात्, यथा न कारणं तथोपपादितम् । तस्मान्नास्य सम्बन्धिविनाशेऽप्यवि-

त्यभावात् स्वात्मगतसंवेदनाभावाच्च। तस्मादिहबुद्ध्यनुमेयः समवाय इति ॥

इति प्रशस्तपादभाष्ये समवायपदार्थः समाप्तः ॥

योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥

इति प्रशस्तपादविरचितं द्रव्यादिषट्पदार्थभाष्यं समाप्तम् ॥

नाशः सत्तावदाश्रयान्तरेप्यस्य सत्त्वात्। केन पुनः सम्बन्धेनायं सम्बन्धिषु वर्तते इत्याशयेनाशङ्कते कयेति। समाधत्ते नेति। वृत्त्यभावान्न वर्ततेऽयमिति न तादात्म्यात् वृत्त्यात्मकत्वात् स्वत एवायं वृत्तिरित्यर्थः। वृत्त्यभावादिति। यथा सत्तादीनां प्रत्यक्षेष्वर्थेषु वृत्तिरिति ते संयुक्तसमवायादिन्द्रियग्राह्याः नैवं समवायस्य वृत्तिसम्भव इत्यतीन्द्रियोऽयमित्यर्थः। स्वात्मगतेति। यथेन्द्रियेण संयोगप्रतिभासो नैवं समवायप्रतिभासः सम्बन्धिनोः पिण्डीभावोपलम्भादित्यभिप्रायः। तदुक्तं—

परस्परोपसंश्लेषो भिन्नानां यत्कृतो भवेत्।
समवायः स विज्ञेयो स्वातन्त्र्यप्रतिरोधकः ॥ इति।
अत्र ३०७ ३०८ ३०९ २२१ सूत्राणि।

यत्कृपालेशमात्रेण जन्मसंसारबन्धनम्।
विलयं याति तद्वन्दे गुरुपादाम्बुजद्वयम् ॥

इति श्रीप्रशस्तपादभाष्यविवरणे
समवायपदार्थप्रकरणम्।
समाप्तश्चायं ग्रन्थः।

—:o:—



वैशेषिकदर्शनसूत्राणां विषयनिघण्टुपत्रम् ।

प्रथमाध्याये प्रथमाह्निकम् ।

प्रथमाध्याये द्वितीयाह्निकम् ।

द्वितीयाध्याये प्रथमाह्निकम् ।

सप्तमाध्याये प्रथमाह्निकम् ।

सप्तमाध्याये द्वितीयाह्निकम् ।

अष्टमाध्याये प्रथमाह्निकम् ।

षष्ठाध्याये प्रथमाह्निकम् ।

षष्ठाध्याये द्वितीयाह्निकम् ।

सप्तमाध्याये प्रथमाह्निकम् ।

सप्तमाध्याये द्वितीयाह्निकम् ।

अष्टमाध्याये प्रथमाह्निकम् ।

अष्टमाध्याये द्वितीयाह्निकम् ।

नवमाध्याये प्रथमाह्निकम् ।

नवमाध्याये द्वितीयाह्निकम् ।

दशमाध्याये प्रथमाह्निकम् ।

दशमाध्याये द्वितीयाह्निकम् ।

विषयाणां सङ्कलनेन संख्या १५४ ।

इति वैशेषिकसूत्राणां विषयसूचकपत्रम् ।

वैशेषिकसूत्रोपस्कारस्य विषयानुक्रमपत्रम् ।

प्रथमाध्याये प्रथमाह्निकम् ।

प्रथमाध्याये द्वितीयाह्निकम् ।

द्वितीयाध्याये प्रथमाह्निकम् ।

द्वितीयाध्याये द्वितीयाह्निकम् ।

तृतीयाध्याये प्रथमाह्निकम् ।

तृतीयाध्याये द्वितीयाह्निकम् ।

चतुर्थाध्याये प्रथमाह्निकम् ।

चतुर्थाध्याये द्वितीयाह्निकम् ।

पञ्चमाध्याये प्रथमाह्निकम् ।

पञ्चमाध्याये द्वितीयाह्निकम् ।

षष्ठाध्याये प्रथमाह्निकम् ।

षष्ठाध्याये द्वितीयाह्निकम् ।

सप्तमाध्याये प्रथमाह्निकम् ।

सप्तमाध्याये द्वितीयाह्निकम् ।

दशमाध्याये प्रथमाह्निकम्।

दशमाध्याये द्वितीयाह्निकम्।

विषयाणां [illegible]

इति [illegible]ते। चित्सन्ततिर्ज्ञानधारा॥



नवमाध्याये द्वितीयाह्निक...

सटीकवैशेषिकदर्शनोपस्कारस्य

शुद्धिपत्रम् ।

अशुद्धिः ।	शुद्धिः ।	पृ०	पं०
शास्त्रपरत्वं	शास्त्रपरत्वे	७	७
निरूपकम्	निरूपकत्वम्	८	१९
कर्नणां	कर्मणां	१६	२
भावा	भावो	२०	१४
पक्षं कारणं कर्मेति	पेक्षं कारणं कर्मेति ।	"	२३
मन्यपरामर्श	मन्वयपरामर्श ।	२२	२१
केनेव	केनैव	२७	१
प्यङ्कराभावः	प्यङ्कुराभावः	३१	९
विशेषदं	विशेषपदं	३२	३०
निमित्तप्यगो	निमित्तमप्य[illegible]	३४	१६
बुद्धी क्रमशो	बुद्धी विप[illegible]तया	"	२१
स्याश्रया	स्वाश्रया	४१	१०
कारणत्व	करण[illegible]	४३	२८
व्यात्तिरेक	व्यति[illegible]क	४५	३०
मित्युयुक्तम्	मित[illegible]युक्तम्	४७	१८
रसतया	रस[illegible]तया	४८	२७
चित्ररूपन्त्वित्यादि	चित्ररूपेत्वित्यादि	"	२९
विशेषोऽग्नि	विशेषः सोऽग्नि	५३	२०
श्च तन्मते	श्चैतन्मते	५६	२२
दृष्ट	दृष्टश्च	६०	७
त्रसरेण्वादेरुपा	त्रसरेण्वाद्युपा	६२	२८
कालेऽपरत्वा	काले परत्वा	६६	२४
त्काभ्यवाप्रति	त्काभावप्रति	७१	१७
लिङ्गकरणं	[illegible]		
[illegible]र्णादीस्यादिति	[illegible] । चित्सन्ततिर्ज्ञानधारा ॥		

अशुद्धिः ।	शुद्धिः ।		
[illegible]ब्दो नित्य इत्थपरं	शब्दोऽनित्य इत्येकं शब्दोनित्य इत्यपरं	७६	४
आर[illegible]	आरभमाण	९५	७
रूपसत्तया	रूपासत्तया	९८	३
दृष्टेनेति	दृष्टेत्रेति	९९	२४
न त्कारणमिति	न तत्कारणमिति	१००	[illegible]०
परीक्षाशं	परीक्षाशेषं	१०२	२
रसानुभव	रसानुभवे	"	२९
सनसो	मनसो	११२	१०
संस्कारण	संस्कारेण	१३४	४
प्रतिबन्धय	प्रतिवध्य	"	२३
रूपादीना	रूपादीनां	१४३	८
प्रसज्यते	प्रसज्येत	१४६	९
प्रवन्धस्य यत्र च पर्थवसानं	प्रबन्धस्य यत्र निष्ठा [illegible]त्र च पर्यवसानं	१५६	७
त्रमरेणु	त्र[illegible]रेणु	१६६	१
हारावला	हा[illegible]वली	१६८	१
इति	इति [illegible]	१७९	२८
आत्मन्यत्वे	आत्म[illegible]न्यत्वे	१९६	१८
तात्त्विकवे	तात्त्विक[illegible]त्वे	१९८	७
निर्देशक	निर्देशकं		
वादःविजिगीषुकथा· वितण्डा	वादः । उभ[illegible]पक्षस्थापनावती विजिगी[illegible]कथा जल्पः । प्रतिपक्षपक्ष[illegible]थापनाहीना विजिगीषुकथा वितण्डा।	२२०	२७
आकांक्षादिमद्भिः स्मारि	आकांक्षादिमद्भिः पदैः स्मारि·	"	१५
भट्टमतामिति ।	भट्टमत इति ।	२२८	२६

योगजधर्मस्य प्रभावावश[illegible]

नवमाध्याय इति[illegible]

वैशेषिकदर्शनम् ।

प्रथमाध्याये प्रथमाह्निकम् ।

वैशेषिकसूत्रोपस्कारः ।

ऊर्ध्वबद्धजटाजूटक्रोड़क्रीड़त्सुरापगम् ।
नमामि य[illegible]मिनीकान्तकान्तभालस्थलं हरम् ॥ १ ॥
याभ्यां वैशेषिके तन्त्रे सम्यग् व्युत्[illegible]ादितोऽस्म्यहम् ।
कणादभवनाथाभ्यां ताभ्यां मम [illegible]ः सदा ॥ २ ॥
सूत्रमात्रावलम्बेन निरालम्बेऽपि [illegible]च्छतः ।
खे खेलवन्ममाप्यत्र साहसं सिद्धिमेष्यति ॥ ३ ॥

(१)तापत्रयपराहता विवेकिनस्ता[illegible]यनिवृत्तिनिदानमनुसन्दधा-ना [illegible] [illegible]णतत्त्वसाक्षात्कारमेव तदुपाय-माकलयाम्बभूवुः । तत्प्राप्तिहेतुमपि [illegible]न्थानं जिज्ञासमानाः परमका-रुणिकं कणादं मुनिमुपसेदुरथ [illegible]ादो मुनिस्तत्त्वज्ञानवैराग्यैश्वर्य-सम्पन्नः षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेवात्मत-त्त्वसाक्षात्कारप्राप्तये परमः पन्था इति मनसि कृत्वा तच्च निवृत्तिल-क्षणाद्धर्मादेतेषामनायासेन सेत्स्यतीति लक्षणतः स्वरूपतश्च धर्ममेव प्रथममुपदेशाम्यनन्तरं षण्णां पदार्थानुद्देशलक्षणपरीक्षाभिरुपदे-क्ष्यामीति हृदि निधाय तेष[illegible]वधानाय प्रतिजानीते—

---

(१) तापत्रयेति । आध्यात्मिकाधिभौ[illegible]ाधिदैविकरूपं तापत्रयमित्यर्थः । तापत्रयेत्यादि–प्रति-जानीतेत्यन्तग्रन्थेनानुबन्धचतुष्टयप्रदर्शनं [illegible]मसूत्रे विवरितं शङ्करमिश्रैः । तत्र अथातःशब्दौ प्रयोजनसूचकौ, धर्मपदेन धर्मप्रधानः ष[illegible]ार्थरूपोऽभिधेयो लक्षितः, प्रयोजनधर्मयोर्जन्यजनक-भावः अभिधेयशास्त्रयोश्च प्रतिपाद्यप्रतिपा[illegible] [illegible]ते । चित्सन्ततिर्ज्ञानधारा ॥
[illegible]कारीति ॥

अथातो धर्म्मं व्याख्यास्यामः ॥ १ ॥

अथेति शिष्याकाङ्क्षानन्तर्य्यमाह । अत इति । यतः श्रवणादि... वो... रसूयकाश्चान्तेवासिन उपसेदुरित्यर्थः । (१)यद्वा अथ... मङ्गल...र्थः । तदुक्तम्—

"अ...ङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ" ॥ इति ॥

युक्तश्चैत...। कथमन्यथा सदाचारपरम्परापरिप्राप्तकर्तव्यताकस्य मङ्गलस्य वैशेषिकशास्त्रं प्रणयतो महामुनेरनाचरणं सम्भाव्यते । न च कृतमङ्गलस्यापि फलादर्शनादकृतमङ्गलस्यापि फलदर्शनादननुष्ठानं न हि निष्फले प्रेक्षावान् प्रवर्तत इति वाच्यम् अकरणस्थले जन्मान्तरीयस्य करणस्थले चाङ्गवैगुण्यस्य (२)कल्पनया सफलत्वनिश्चयात् । न हि शि...ष्टाचारा(३)नुमितश्रुतिबोधितकर्तव्यताकस्यापाततः फलादर्शनमा...त्रा...कारणत्वशङ्कापि । न चैहिकमात्रफलकत्वान्न जन्मान्तरीयानुमा... पुत्रेष्टिवदैहिकफलकत्वानुपपत्तेः । कारीर्यादौ तु तथा कामनयैवानुष्ठानादैहिकमात्रफलकत्वम् । अत्र च समाप्तिकामोऽधिकारी स्वर्गका...म इव यागे तत्रापूर्वद्वारमिह तु विघ्नध्वंस इति विशेषः निर्विघ्नमारब्धं ...समाप्यतामिति कामनया प्रवृत्तेः । न...

---

(१) यद्वेति । अयमेव च युक्तः पक्ष इति ।... स्यान्त्यपक्षे मंगलवाचकत्वं, न वा ? आद्ये ... वित्यादिना वाचकत्वाप्रतिपादनाच्च स्वार्थे टिकन्प्र... पपन्नः स्यात् इति चेत् । अत्र केचित् अयमथशब्दो ... शिष्टपरम्पराप्राप्तत्वात् मङ्गलाचरणं कृतमिति । तदपि ... पि तेन 'माङ्गलिकावुभावि'त्यादेरथशब्दस्य मङ्गलस्वरू... स्यात् । नैवम् अत्राथशब्दोऽन्यार्थमुपनीयमानोदकुम्भ... मंगलाचरणरूप इति न कोपि दोषः ॥

...स्थपदान्तरान्वयस्यानुपपत्तेः, तेन माङ्गलिका... ...यात् । द्वितीये पदत्वाभावेन शास्त्रे तत्प्रयोगोऽनु... ...ग्रन्थघटकः किन्तु ग्रन्थकारेण तत्प्रारम्भकाले ...न, अन्वयानुपपत्तिदोषस्यात्र वारणसंभवे... ...ताबोधकस्य प्रमाणग्रन्थस्यासङ्गतेस्तादव... ...नवदानन्तर्यवाचकोपि स्वप्रयोगमात्रेण ...

(२) कल्पनयेति । अकरणस्थले समाप्तिरियं म... मत्त्वसम्बन्धेन समाप्तिमत्त्वात् शिष्टाचारानुष्ठितसमाप्ति... कारणसामग्रीविरहवत् समाप्तिजननयोग्यत्वे सति सम... नुमानकल्पनया अन्वयव्यतिरेकव्यभिचारवारणसम्भवें... ...रित्यभिप्रायः ॥

...जन्या स्वप्रतियोगिचरमवर्णानुकूलकृति... ...इति, करणस्थले चेदं मङ्गलं स्वेतर... ...नुपधायकत्वात् अरण्यस्थदण्डवत् इत्य... मङ्गलं सफलं अविगीताशिष्टाचारविषय... ...विगीतशिष्टाचारविषयत्वात् यो यदुद्दे... ...मानप्रकारो बोध्य...

च विघ्नध्वंसमात्रं फलं समाप्तिस्तु स्वकारणादेवेति वाच्यम् तस्य (१)स्वतोऽपुरुषार्थत्वात् समाप्तेस्तु सुखसाधनतया पुरुषार्थत्वा-उपस्थितत्वाच्च । (२)किञ्च दुरितध्वंसमात्रं न फलं तस्य प्रायश्चित्त-कीर्तनकर्म्मनाशापारगमनादिसाध्यतया व्यभिचारात् । प्रारब्धेतरेस-[illegible]प्रतिबन्धकदुरितध्वंसत्वेन फलत्वे समाप्तेरेव फलत्वोचित्यत्वात् । तत्रापि च हिरण्यदानप्रयागस्नानादिजन्यत्वेन व्यभिचारात् तेषा-मपि मङ्गलत्वाभिधानं साहसम् । (३)किञ्च मङ्गले सति समाप्तेरावश्य-कत्वमित्येवं मङ्गलस्य कारणता । तदुक्तम् "श्रौतात् [illegible]ात् कर्म्मणः फलावश्यम्भावनियमात्" इति । अत एव विकल्पेऽपि कारणं का-र्यमेव फलानन्तर्य्यनियमस्यैव (४)वैदिककारणत्वात् । (५)विकल्पे तु [illegible]जात्यकल्पनं वैजात्यमेव । (६)यत्रान्वयव्यतिरेकगम्या कारणता तत्र फलपूर्वभावनियमो ग्राह्यो न तु वेदेऽपि तत्र व्यतिरेकभागस्य गुरुत्वे-नानुपस्थितेः तथा च साङ्गे मङ्गले समाप्तिरावश्यकीति न व्यभिचारः ।

समाप्तिस्तु यस्मिन् अनुष्ठिते सम्पूर्णमिदं कर्म्मेति प्रमा सा च ग्रन्थादौ चरमवाक्यलिखने यागादौ चरमाहुतौ पटादावन्त्यतन्तुसंयो-गे ग्रामगमनादौ ग्रामचरणचरमसंयोगे एवं तत्र तत्रोहनीयमिति ।

---

(१) स्वत इति । अन्येच्छानधीनेच्छाविषयत्वं स्वतःपुरुषार्थत्वम् । विघ्नध्वंसे तु समाप्ती-[illegible] स्वतःपुरु[illegible]ण[illegible] भावः ॥

(२) ननु प्रारब्ध[illegible] माभूदिति कामनया मङ्गले प्रवृत्तिर्जायते तथा च कथं समाप्ते-रुपस्थितिविषयत्वमत आह किञ्चेति ॥

(३) ननु मङ्गलाकरणस्थले जन्मान्तरीयमङ्गलकल्पने जन्मान्तरीयसमाप्तिमुद्दिश्य जन्मान्तरे मङ्गलकरणापत्तिः । एवं समाप्तिर्मङ्गलजन्या समाप्तित्वादित्यनुमानं व्यभिचारिहेतुकं स्वतःसिद्ध-विघ्नविरहस्थलीयसमाप्तेर्मङ्गलजन्यत्वाभावात् इत्यत आह किञ्चेति । फलानन्तर्यमेव कारणत्वं नतु कार्यनियतपूर्ववर्त्तित्वमिति भावः ॥

(४) वैदिकेति । पूर्वभावनैयत्यस्य कारणत्वे व्रीहिकरणकयागस्थलीयापूर्वस्वर्गादिप्राक्काले यवकरणकयागस्य यवकरणयागस्थलीयस्वर्गादिप्राक्काले च व्रीहिकरणकयागस्य सत्ताऽऽवश्यकी स्यात् सा च नेति फलानन्तर्यमेव वैदिकस्थले कारणत्वमभिमतम् तच्च प्रत्यक्षस्थलेपीति हृदयम् ॥

(५) ननु कारणभेदवत् तत्तज्जन्यस्वर्गादिरूपकार्यवैजात्यं कल्पयित्वा तत्तत्कारणे कार्या-व्यवहितपूर्वत्वरूपं कारणत्वमपि कुतो न कल्प्यते तथा च वैदिकस्थलेपि पूर्वभावनैयत्यरूपं कारण-त्वमस्त्येवेत्यत आह विकल्पे इति । वैजात्यमेव - विरुद्धमेव । फलवैजात्यकल्पने उभयकरणकयागादपि विजातीयफलोत्पत्त्यापत्तेरिति भावः ॥

(६) नन्वेवमपि व्यतिरेकव्यभिचा[illegible] [illegible]ात । चित्सन्ततिर्ज्ञानधारा ॥

[illegible]तिरेकव्यभिचारो न [illegible]

अथातो धर्म्मं व्याख्यास्यामः ॥ १ ॥

अथेति शिष्याकाङ्क्षानन्तर्य्यमाह । अत इति । यतः श्रवणादि[illegible] वो[illegible]त्ययकाश्चान्तेवासिन उपसेदुरित्यर्थः । (१)यद्वा अथ[illegible]दो मङ्गल[illegible]र्थः । तदुक्तम्—

"अ[illegible]ङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ" ॥ इति ॥

युक्तश्चैत[illegible] । कथमन्यथा सदाचारपरम्पराप्राप्तकर्तव्यताक[illegible]स्य मङ्गलस्य वैशे[illegible]कशास्त्रं प्रणयतो महामुनेरनाचरणं सम्भाव्यते । न च कृतमङ्गलस्यापि [illegible]फलादर्शनादकृतमङ्गलस्यापि फलदर्शनादननुष्ठानं न हि निष्फले प्रे[illegible]वान् प्रवर्तेत इति वाच्यम् अकरणस्थले जन्मान्तरीयस्य करणा[illegible]थले चाङ्गवैगुण्यस्य (२)कल्पनया सफलत्वनिश्चयात् । न हि शि[illegible]चारा(३)नुमितश्रुतिबोधितकर्तव्यताकस्यापाततः फलादर्शनमा[illegible]काकारणत्वशङ्कापि । न चैहिकमात्रफलकत्वान्न जन्मान्तरीयानुमा[illegible] पुत्रेष्टिवदैहिकफलकत्वानुपपत्तेः । कारीर्यादौ तु तथा कामनयैवानु[illegible]नादैहिकमात्रफलकत्वम् । अत्र च समाप्तिकामोऽधिकारी स्वर्गक[illegible]म इव यागे तत्रापूर्वद्वारमिह तु विघ्नध्वंस इति विशेषः निर्विघ्नमारब्धं [illegible]समाप्यतामिति कामनया प्रवृत्तेः । न

---

(१) यद्वेति । अयमेव च युक्तः पक्ष इ[illegible]स्थपदान्तरान्वयस्यानुपपत्तेः, तेन माङ्गलिकास्यान्त्यपक्षे मंगलवाचकत्वं, न वा ? आद्ये [illegible]यात् । द्वितीये पदत्वाभावेन शास्त्रे तत्प्रयोगोऽनुवित्यादिना वाचकत्वाप्रतिपादनाच्च स्वार्थे टिकन्प्र[illegible] ग्रन्थघटकः किन्तु ग्रन्थकारेण तत्प्रारम्भकाले पपन्नः स्यात् इति चेत् । अत्र केचित् अयमथशब्दो [illegible]न, अन्वयानुपपत्तिदोषस्यात्र वारणसंभवे- शिष्टपरम्पराप्राप्तत्वात् मङ्गलाचरणं कृतमिति । तदपि [illegible]ताबोधकस्य प्रमाणग्रन्थस्यासङ्गतेस्तादवपि तेन 'माङ्गलिकावुभावि'त्यादेरथशब्दस्य मङ्गलस्व[illegible]नवदानन्तर्यवाचकोऽपि स्वप्रयोगमात्रेण स्थ्यात् । मैवम् अत्राथशब्दोऽन्यार्थमुपनीयमानोदकुम्भ[illegible] मंगलाचरणरूप इति न कोपि दोषः ॥

(२) कल्पनयेति । अकरणस्थले समाप्तिरियं म[illegible] [illegible]जन्या स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेन समाप्तिमत्त्वात् शिष्टाचारानुष्ठितसमाप्ति[illegible] इति, करणस्थले चेदं मङ्गलं स्वेतरकारणसामग्रीविरहवत् समाप्तिजननयोग्यत्वे सति सम[illegible]यनुपधायकत्वात् अरण्यस्थदण्डवत् इत्यनुमानकल्पनया अन्वयव्यतिरेकव्यभिचारवारणसम्भवें [illegible] मङ्गलं सफलं अविगीतशिष्टाचारविषय- [illegible]रित्यभिप्रायः ॥ [illegible]विगीतशिष्टाचारविषयत्वात् यो यदुद्दे- [illegible]मानप्रकारो बोध्य[illegible]

नवमाध्याये [illegible]

पक्षतानिर्वचनम् । ... ...

च विघ्नध्वंसमात्रं फलं समाप्तिस्तु स्वकारणादेवेति वाच्यम् तस्य (१)स्वतोऽपुरुषार्थत्वात् समाप्तेस्तु सुखसाधनतया पुरुषार्थत्वा[illegible] उपस्थितत्वाच्च । (२)किञ्च दुरितध्वंसमात्रं न फलं तस्य प्रायश्चित्त-की[illegible]नकर्म्मनाशापारगमनादिसाध्यतया व्यभिचारात् । प्रारब्ध[illegible]तरेस-मा[illegible]प्रतिवन्धकदुरितध्वंसत्वेन फलत्वे समाप्तेरेव फलत्वोचि[illegible]त्वात् । तत्रा[illegible]प च हिरण्यदानप्रयागस्नानादिजन्यत्वेन व्यभिचा[illegible]त् तेषा-मपि मङ्गलत्वाभिधानं साहसम् । (३)किञ्च मङ्गले सति स[illegible]माप्तेरावश्य-कत्वमित्येवं मङ्गलस्य कारणता । तदुक्तम् "श्रौतात् स्[illegible]ज्ञात् कर्म्मणः फलावश्यम्भावनियमात्" इति । अत एव विकल्पि[illegible]पि कारणं का-[illegible]मेव फलानन्तर्य्यनियमस्यैव (४)वैदिककारणत्[illegible]त् । (५)विकल्पे तु [illegible]जात्यकल्पनं वैजात्यमेव । (६)यत्रान्वयव्यतिरे[illegible]गम्या कारणता तत्र फलपूर्वभावनियमो ग्राह्यो न तु वेदेऽपि तत्र [illegible]तिरेकभागस्य गुरुत्वे-नानुपस्थितेः तथा च साङ्गे मङ्गले समाप्तिरा[illegible]यकीति न व्यभिचारः ।

समाप्तिस्तु यस्मिन् अनुष्ठिते सम्पूर्ण[illegible]दं कर्म्मेति प्रमा सा च ग्रन्थादौ चरमवाक्यलिखने यागादौ चरमा[illegible]तौ पटादावन्त्यतन्तुसंयो-गे ग्रामगमनादौ ग्रामचरणचरमसंयोगे [illegible]वं तत्र तत्रोहनियमिति ।

---

(१) स्वत इति । अन्येच्छानधीनेच्छाविषयत्वं [illegible]तःपुरुषार्थत्वम् । विघ्नध्वंसे तु समाप्ती-[illegible] भावः ॥

(२) ननु प्रारब्ध[illegible] माभूदिति क[illegible]या मङ्गले प्रवृत्तिर्जायते तथा च कथं समाप्ते-रुपस्थितिविषयत्वमत आह किञ्चेति ॥

(३) ननु मङ्गलाकरणस्थले जन्मान्तरी[illegible]ङ्गलकल्पने जन्मान्तरीयसमाप्तिमुद्दिश्य जन्मान्तरे मङ्गलकरणापत्तिः । एवं समाप्तिर्मङ्गलजन्या समाप्तित्वादित्यनुमानं व्यभिचारिहेतुकं स्वतःसिद्ध-विघ्नविरहस्थलीयसमाप्तेर्मङ्गलजन्यत्वाभावात् इत्यत आह किञ्चेति । फलानन्तर्यमेव कारणत्वं ननु कार्यनियतपूर्ववर्तित्वमिति भावः ॥

(४) वैदिकेति । पूर्वभावनैयत्य[illegible] कारणत्वे व्रीहिकरणकयागस्थलीयापूर्वस्वर्गादिप्राक्काले यवकरणकयागस्य यवकरणयागस्थलीय[illegible]स्वर्गादिप्राक्काले च व्रीहिकरणकयागस्य सत्ताऽऽवश्यकी स्यात् सा च नेति फलानन्तर्यमेव वैदिक[illegible]ले कारणत्वमभिमतम् तच्च प्रत्यक्षस्थलेपीति हृदयम् ॥

(५) ननु कारणभेदवत् तत्तज्जन्य[illegible]स्वर्गादिरूपकार्यवैजात्यं कल्पयित्वा तत्तत्कारणे कार्या-व्यवहितपूर्वत्वरूपं कारणत्वमपि कुतो न [illegible]ल्प्यते तथा च वैदिकस्थलेपि पूर्वभावनैयत्यरूपं कारण-त्वमस्त्येवेत्यत आह विकल्पे इति । वैजात[illegible]व - विरुद्धमेव । फलवैजात्यकल्पने उभयकरणकयागादपि विजातीयफलोत्पत्त्यापत्तेरिति भावः ॥

(६) नन्वेवमपि व्यतिरेकव्यभि[illegible]ते । चिरसन्ततिर्ज्ञानधारा ॥

[illegible]तिरेकव्यभिचारो न [illegible]

चाग्रे । तदेतेषां कर्मणां विहितयागस्नानदानादिषु धर्मानुकूलप्रयत्न-वदात्मसंयोगजन्यत्वं निषिद्धदेशगमनहिंसाकलञ्जभक्षणादिषु [illegible]धर्मानुकूलप्रयत्नवदात्मसंयोगजन्यत्वमध्यवसेयमिति ॥ ७ ॥

[illegible] द्रव्यादीनामुद्देशानन्तरं त्रयाणां साधर्म्यप्रकरणमा[illegible]ति । ज्ञाने[illegible] द्रव्यादीनां त्रयाणां साधर्म्यस्य तत्त्वज्ञानानुकूलतया [illegible]प्रथमं (१)त[illegible]ङ्क्षितत्वात् सामान्यादिपदार्थत्रयस्य उद्देशात् प्रागेव [illegible]त्रया-णां साध[illegible]र्म्यमाह—

सदा[illegible]त्यं द्रव्यवत्कार्य्यं कारणं सामान्यवि[illegible]शे-षवदिति द्रव्य[illegible]गुणकर्मणामविशेषः ॥ ८ ॥

विशेषे सत्यपि[illegible]अयमविशेषशब्दः साधर्म्यपरः। सदिति।सदा[illegible]रप्रत्ययव्यपदेशविष[illegible]त्वम् त्रयाणामेव सत्तायोगित्वात् । अनित्यमि-ति । ध्वंसप्रतियोगित्व[illegible]यद्यपि न परमाण्वादिसाधारणं (२)तथापि ध्वंसप्रतियोगिवृत्तिपदा[illegible]विभाजकोपाधिमत्त्वं विवक्षितम् । द्रव्यव-दिति । द्रव्यं समवायिका[illegible]रणतयाऽस्यास्तीति द्रव्यवत्, एतदपि प-रमाण्वादौ नास्तीति द्रव्य[illegible]समवायिकारणकवृत्तिपदार्थविभाजकोपा-धिमत्त्वं विवक्षितम् । का[illegible]र्यमिति । (३)प्रागभावप्रतियोगिवृत्तिप-दार्थविभाजकोपाधिमत्त्वं वि[illegible]क्षितम् । कारणमिति । ज्ञानेतरकार्य्य-नियतपूर्ववर्त्तिजातीयवृत्तिपदा[illegible]भाजकोपाधिमत्त्वम् तेन स्वसा-क्षात्कारे विषयतया कारणे गोत्वे[illegible] नातिप्रसक्तिर्न वा पारिमाण्ड-ल्यादावजनकेऽव्याप्तिः । सामान्या[illegible]शेषवदिति । सामान्यं सद्विशे-षोऽन्योन्यव्यावर्तकतया द्रव्यत्वगु[illegible]त्वकर्मत्वादि तद्वत्त्वमित्यर्थः । ननु "गां दद्यात्" "गोः पदा न स्प्रष्टव्या" इति श्रुतेर्धर्माधर्मजनक-त्वं जातेरपीति कारणत्वमतिव्यापीति चेन्न (४)अवच्छेदकतामात्रेण

---

(१) सामान्योद्देशस्य कर्मनिरूपणानन्तरं युक्तत्वात्कथमन्तरा साधर्म्यप्रकरणमारभ्यत इत्या-शङ्क्याह तत्रेति ॥

(२) तथापीति । यद्यपि ध्वंसप्रतियोगिवृत्तिजातिमत्त्वस्य परमाणुसाधारण्यात्पदार्थविभाजको-पाधिपदस्य वैयर्थ्यं सम्भवति तथापि जातिमत्त्वस्यैव लक्षणत्वसम्भवे तद्घटितस्य तस्य वैयर्थ्या-पत्तेर्दुष्परिहरत्वात् ॥

(३) [illegible]भावप्रतियोगित्वरूपकार्यत्वस्य परमाणावसम्भवात् विशेष्यदलम् ॥

(४) अवच्छेदकतामात्रेणेति । जात्याकृतिविशिष्टव्यक्तेरेव दानस्पर्शयोग्यतयाऽवच्छेदकता-[illegible] भाव: ॥

जातेर्नियोगात् । उपलक्षणञ्चैतत् (१)स्वसमवायार्थशब्दाभिधेयत्वमपि त्रयाणां साधर्म्यं द्रष्टव्यम् । (२)यदि तु कार्य्यत्वानित्यत्वे कारणत्वनासेव "कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्यः" इति प्रश्नस्तदेव चाव्यवस्थितं साधर्म्यमुच्यते तदा पदार्थविभाजकोपाधिमत्त्वया (३)न विशेष्यं सूत्रोक्तरीत्या । (४)त्रयाणां गुणजनकत्वं गुणजन्यत्वञ्चान्यत्र (५)नित्यद्रव्येभ्य इति ॥ ८ ॥

इदानीं द्रव्यगुणयोरेव साधर्म्यमाह—

द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥

पतदेव सूत्रान्तरेण स्पष्टयति—

द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥

अन्त्यावयविविशुद्रव्याणि तथान्त्यावयविगुणान् द्वित्वद्विपृथक्त्वपरत्वापरत्वादीन् गुणांश्च विहाय सजातीयारम्भकत्वं साधर्म्यं द्रष्टव्यम् । सजातीयारम्भकवृत्तिपदार्थविभाजकोपाधिमत्त्वं वा विवक्षितं तेनाजनकद्रव्यव्यक्तीनामप्युपग्रहः ॥ १० ॥

ननु कर्माणि कुतो न कर्मान्तरमारभन्ते इत्यत आह—

कर्म कर्मसाध्यं न विद्यते ॥ ११ ॥

विदिरयं ज्ञानार्थो (६)न तु गुणाभिधायी । सजातीयारब्ध-

---

(१) स्वसमवायेति । स्वसमवायशब्दाभिधेयत्वं स्वसमवायार्थाभिधेयत्वं चेत्यर्थः । समवायानुयोगित्वं स्वसमवायशब्दार्थः ।

(२) भाष्यकारमतमाह यदित्विति ।

(३) न विशेष्यमिति । गगनादावतिव्याप्तेरिति शेषः । सूत्रकारस्यापीदमेवाभिप्रतम् ।

(४) कार्यकारणपदयोर्विशेषार्थपरतया व्याचष्टे त्रयाणां गुणजनकत्वमिति । सुखदुःखसाक्षात्कारभिन्नानुभवावृत्तिगुणनिष्ठजन्यतानिरूपितजनकतावच्छेदकाश्रयत्वमित्यर्थः । सुखदुःखयोः साक्षात्कारानतिरिक्तगुणाजनकत्वादव्याप्तिवारणाय भिन्नान्तम् । पारिमाण्डल्यस्य ज्ञाननिष्ठजन्यतानिरूपितजनकतावच्छेदकतात्वादतिव्याप्तिवारणायानुभवावृत्तिपदम् सूत्रकारमतेनास्य साधर्म्यात् अन्यत्र नित्यद्रव्येभ्य इत्युक्तेः । एवं गुणजन्यत्वमपि गुणनिष्ठजनकतानिरूपितजन्यतावच्छेदकताश्रयधर्मवत्त्वमित्यर्थः ।

(५) नन्वयं भाष्यकाराभिप्रेतोऽर्थः सूत्रेण कथमुपलभ्यत इत्यत आहान्यत्रेति । तथा च सदनित्यमिति सूत्रैकदेशस्य नित्यसद्विशेषभिन्नमित्यर्थकरणादन्यत्र नित्यद्रव्येभ्य इदं साधर्म्यमित्यभिप्रायः ।

(६) ननु सत्ताभिधायीति । तथा च ज्ञानार्थकत्वे प्रमाणागोचरत्वादित्यर्थकरणेन [illegible] हेत्वाकाङ्क्षानिवृत्तिः नतु सत्तार्थकत्वेपीति भावः ।

द्रव्यगुणयोरिव कर्मसाध्ये कर्मणि प्रमाणं नास्तीत्यर्थः। इदमत्राकूतम्। कर्म यदि कर्म जनयेत् स्वोत्पत्त्यनन्तरमेव जनयेत् शब्दवत्। तथाच पूर्वकर्मणैव यावत्संयोगिद्रव्येभ्यो विभागे जनिते द्वितीयं कर्म केन सह विभागं जनयेत् विभागस्य संयोगपूर्वकत्वात्, संयोगान्तराणां च तत्राधिकरणेऽनुत्पन्नत्वात्, विभागाजनने तु (१)कर्मलक्षणक्षतिः। न च क्षणान्तरे कर्मान्तरं जनयिष्यतीति वाच्यम् समर्थस्य क्षेपायोगात्, अपेक्षणीयान्तराभावात्, पूर्वसंयोगनाशक्षणेऽपि जनने विभागजनकत्वानुपपत्तिरेव, उत्तरसंयोगोत्पत्तिकालेऽपि जननेऽप्येवमेव। उत्तरसंयोगोत्पत्त्यनन्तरकालन्तु कर्मनाश एव। तथाच सूत्रोक्तं 'कर्म कर्मसाध्यं न विद्यत' इति ॥ ११ ॥

गुणकर्मभ्यां द्रव्यस्य वैधर्म्यमाह—

न द्रव्यं कार्यं कारणञ्च वधति(२) ॥ १२ ॥

द्रव्यं न स्वकार्य्यं हन्ति न वा स्वकारणं हन्ति, (३)कार्य्यकारणभावापन्नयोर्द्रव्ययोर्वध्यघातकभावो नास्तीत्यर्थः। आश्रयनाशारम्भकसंयोगनाशाभ्यामेव द्रव्यनाशादिति भावः। बधतीति सौत्रो निर्देशः ॥ १२ ॥

गुणस्य कार्य्यकारणवध्यत्वमाह—

उभयथा गुणाः ॥ १३ ॥

कार्य्यवध्याः कारणवध्याश्चेत्यर्थः। आद्यशब्दादीनां कार्य्यवध्यत्वं चरमस्य तु कारणवध्यत्वम्, उपान्त्य शब्देन अन्त्यस्य नाशात्॥१३॥

गुणानां कार्य्यकारणोभयविरोधित्वमुक्त्वा कर्मणः कार्य्यविरोधित्वमाह—

---

(१) कर्मलक्षणक्षतेरिति। संयोगविभागयोरनपेक्षं कारणं कर्मेति कर्मलक्षणेऽव्याप्तिः स्यादिति भावः।

(२) बधतीति सौत्रोयं धातुगणपाठेऽदर्शनात्।

(३) ननु कर्मवैधर्म्यं द्रव्येऽनुपपन्नं 'कार्यविरोधि कर्म' इति अग्रिमसूत्रेण कर्मणः कार्यनाश्यतायाः, अत्र च द्रव्ये कार्यनाशकत्वाभावस्योक्तत्वादत आह कार्यकारणभावापन्नयोरिति। तथाच कार्यद्रव्ये वध्यत्वं कारणे घातकत्वं कारणद्रव्ये बध्यत्वं कार्ये घातकत्वं च नास्तीति सौत्रक्रमानुरोधेन [illegible] द्रव्ये कार्यनाश्यत्वाभावस्यापि लाभान्न वैधर्म्यानुपपत्तिः अस्मिन्पक्षे सूत्रस्थं द्रव्यपदं द्वितीयान्तं कर्म कार्यकारणपदे प्रथमान्ते कर्तृभूते इति भावः।

कार्य्याविरोधि कर्म ॥ १४ ॥

कार्य्यं विरोधि यस्येति बहुव्रीहिः, स्वजन्योत्तरसंयोगनाश्यत्वात् कर्मणः । द्रव्याणां कार्य्यकारणाविरोधित्वं नियतमेव । गुणकर्मणोस्तु गानियमः, आश्रयनाशासमवायिकारणनाशनिमित्तनाशविरोधिगुणानां नाशकत्वस्य वक्ष्यमाणत्वात् ॥ १४ ॥

शिष्याकाङ्क्षानुरोधेन त्रयाणां साधर्म्यमभिधायेदानीं त्रयाणां लक्षणं विवारभमाण आह—

क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥ १५ ॥

क्रियाश्च गुणाश्च विद्यन्तेऽस्मिन्निति क्रियागुणवत् । अत्र लक्षणशब्दश्चिह्नवचनः,(१)समानासमानजातीयव्यवच्छेदकव्यतिरेकिलिङ्गविशेषवचनश्च लक्ष्यतेऽनेनेतिव्युत्पत्तिबलात् क्रियया कर्मणा द्रव्यमिदमिति लक्ष्यते गुणवत्त्वेन च समानासमानजातीयेभ्यो व्यावृत्तं द्रव्यं लक्ष्यते(२), तत्र समानजातीया भावत्वेन गुणादयः पञ्च, असमानजातीयस्त्वभावः, तेन द्रव्यं गुणादिभ्यो भिन्नं गुणवत्त्वात् यन्न गुणादिभ्यो भिद्यते तन्न गुणवत् यथा गुणादीति । (३)गुणवत्त्वं यद्यप्याद्यक्षणेऽवयविनि नास्ति तथापि गुणात्यन्ताभावविरोधिमत्त्वं विवक्षितम् गुणप्रागभावप्रध्वंसयोरपि गुणात्यन्ताभावविरोधित्वात् । एवं समवायिकारणत्वमपि षट्पदार्थभेदकमेव द्रव्यपदार्थस्य लक्षणम् । न च साध्याप्रसिद्धिर्गुणादिभेदस्य घटादावेव प्रत्यक्षसिद्धत्वात् । नचात्र सिद्धसाधनं घटत्वावच्छेदेनेतरभेदस्य सिद्धत्वेऽपि द्रव्यत्वावच्छेदेन साध्यत्वात्, पक्षतावच्छेदकभेदे न सिद्धसाधनं (४)यथा

---

(१) चिह्नपदस्य लिङ्गार्थत्वेन व्यतिरेकिलिङ्गमेवात्रेतरभेदानुमापकमित्याशयेनाह समानेति । तथाच व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमित्युक्त्या इतरभेदे साध्ये तस्यान्यत्राप्रसिध्याऽन्वयपरामर्शासम्भवाद्व्यतिरेकिलिङ्गपरामर्शमात्रजन्यानुमितिकरणतया केवलव्यतिरेकिलिङ्गत्वमिति भावः ।

(२) लक्ष्यतेऽनुमीयते तत्प्रकारमेवाह तेनेत्यादिना ।

(३) गुणवत्त्वमिति । गुणवद्वृत्तिपदार्थविभाजकधर्मवत्त्वमित्यर्थः अन्यथा नव्यमते गुणप्रागभावध्वंसयोस्तदत्यन्ताभावविरोधित्वे मानाभावादाद्यक्षणेऽवयविन्यव्याप्तितादवस्थ्यापत्तेः ।

(४) यथेति । तथा च यथा मनस्त्वावच्छेदेन नित्यत्वस्य सिद्धावपि वाङ्मनसोभयत्वावच्छेदेन नित्यत्वस्यासिद्धत्वान्न सिद्धसाधनं तथा घटत्वावच्छेदेन गुणादिभेदासिद्धावपि द्रव्यत्वावच्छेदेन गुणादिभेदस्यात्र साध्यत्वान्न सिद्धसाधनमिति भावः ।

नित्ये वाङ्मनसी इत्यत्र इति केचित्तन्न(१) पक्षतावच्छेदकावच्छिन्ने क्वचिदपि साध्यसिद्धौ पक्षताक्षतेस्तथाऽप्यावश्यकत्वात् । इतिशब्द-श्च इत्यादिपरस्तेन सङ्ख्यावत्त्वपरिमाणवत्त्वपृथक्त्ववत्त्वसंयोगवत्त्व-विभागवत्त्वान्यपि द्रव्यलक्षणत्वेन सङ्गृह्यन्ते ॥ १५ ॥

द्रव्यानन्तरं गुणानामुद्देशात् तल्लक्षणमाह—

द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमन-पेक्ष इति गुणलक्षणम् ॥ १६ ॥

द्रव्यमाश्रयितुं शीलमस्येति द्रव्याश्रयी । एतच्च द्रव्येऽपि(२) ग-तमत आह अगुणवानिति । तथापि कर्मण्यतिव्याप्तिरित्यत आह संयोगविभागेष्वकारणम् । तथापि संयोगविभागधर्माधर्मेश्वरज्ञाना-दीनामसङ्ग्रहः(३) स्यादित उक्तमनपेक्ष इति । अत्रानपेक्ष इत्यनन्तरं गुण इति पूरणीयम् , (४)संयोगविभागेष्वनपेक्षः सन् कारणं यो न भवति स गुण इत्यर्थः । संयोगविभागादीनां संयोगविभागौ प्रति

---

(१) मतान्तरं दूषयति तन्नेति । पक्षतावच्छेदकावच्छिन्नेति । एतन्मतेऽभावसाध्यकस्थले सा-ध्यज्ञानाभाव एव पक्षतेति भावः । भावाभावसाधारणैकपक्षतावादिनां सिद्धान्तिनां मते तु अवच्छेदाव-च्छेदेनानुमितौ सामानाधिकरण्येन सिद्धिरविरोधिनीयं चावच्छेदावच्छेदेनैवानुमितिस्तथा च कथं सिद्ध-साधनम् कथं वा तत्परिहाराय धर्मितावच्छेदकभेदप्रदर्शनायास इत्यपरार्थं तादृशग्रन्थस्याह पक्षतेति । धर्मितावच्छेदकाभेदेपीति भावः । क्वचिदपि साध्यसिद्धौ 'सामानाधिकरण्येन साध्यसिद्धावपि' 'पक्षताक्षतेः' 'पक्षताया अनपायस्य' 'तथापि' 'तथैव सिद्धिसामान्याभावविरहकालवदेव' 'आवश्यकत्वात्' 'अव-श्याभ्युपगम्यमानत्वात्' । मतान्तरे व्यतिरेक्यनुमाने पक्षताऽसम्भवाद्व्यतिरेकिलिङ्गविशेषवचनश्चे-त्यत्र व्यतिरेकिपदं केवलव्यतिरेक्यन्वयव्यतिरेकिसाधारणमन्यपरामर्शस्यापि सम्भवादिति भावः ।

(२) अपिना जात्यादिपरिग्रहः ।

(३) असङ्ग्रह इति ! संयोगविभागयोः संयोगविशेषविभागविशेषजनकत्वस्याग्रे वक्ष्यमाणत्वात् धर्माधर्मेश्वरज्ञानप्रयत्नादीनां च जन्यमात्रं प्रति कारणत्वाच्च तत्र गुणलक्षणाव्याप्तिः स्यादिति भावः ।

(४) संयोगविभागेष्विति । संयोगमात्रस्य प्रवेशे कारणाकारणसंयोगे संयोगस्यानपेक्षकार-णत्वात्, विभागमात्रप्रवेशे च कारणाकारणविभागे विभागस्यानपेक्षहेतुत्वादव्याप्तिस्स्यादत उभयप्रवे-शः । तथा च संयोगस्य विभागं प्रति विभागस्य संयोगं प्रति चानपेक्षहेतुत्वाभावान्नाव्याप्तिरित्यर्थः । न चैवमनपेक्षपदं व्यर्थम् संयोगस्य विभागे विभागस्य च संयोगे कारणत्वसामान्यविरहादेवाव्या-प्त्यसम्भवादिति वाच्यम् धर्माधर्मादीनां संयोगाद्युत्पत्तौ नियमेन संयोगाद्यपेक्षणात्तन्नाव्याप्तिवार-णायानपेक्षपदसार्थक्यसम्भवात् । तथा च संयोगविभागयोरनपेक्षं कारणं यत्तदन्यत्वे सति गुण-वद्भिन्नत्वे सति द्रव्याश्रयित्वं गुणसामान्यलक्षणं पर्यवसितमित्यर्थः ।

सापेक्षत्वात् । (१)नित्यवृत्तिनित्यवृत्तिसत्ताव्याप्यजातिमत्त्वं गुणत्वम् । (२)संयोगविभागौ मिलितौ प्रति समवायिकारणत्वासमवायिकारणत्वरहिते सामान्यवति यत् कारणत्वं तद्गुणत्वाभिव्यञ्जकम् । संयोगविभागयोः प्रत्येकमेव संयोगविभागकारणकत्वं न मिलितयोः (३)धर्माधर्मेश्वरज्ञानादीनां द्वयोर्निमित्तकारणत्वमात्रं न समवायिकारणत्वं नाप्यसमवायिकारणत्वमिति तेषां सङ्ग्रहः । (४)यद्वा संयोगविभागसमवायित्वासमवायिकारणत्वशून्यत्व सामान्यसमानाधिकरणं गुणत्वव्यञ्जकम् । (५)सामान्यवत्त्वे सति कर्मान्यत्वे च सत्यगुणवत्त्वमेव वा गुणलक्षणम् ॥ १६ ॥

गुणानन्तरमुद्दिष्टस्य कर्मणो लक्षणमाह—

(६)एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥ १७ ॥

एकमेव द्रव्यम् आश्रयो यस्य तदेकद्रव्यम्, न विद्यते गुणोऽस्मि-

---

(१) सूत्रस्थेतिपदसूचितं लक्षणान्तरमाह नित्यवृत्ति इति । नित्यपरमाणुवृत्तिनित्यपरिमाणवृत्तिसत्ताव्याप्यजातिमत्त्वस्य गुणे सत्त्वाँल्लक्षणसमन्वयः । परमाणुनिष्ठद्रव्यत्वमादाय द्रव्येऽतिव्याप्तिवारणाय प्रथमं नित्यवृत्तिपदम् । द्वितीयनित्यपदानुपादाने द्व्यणुकवृत्तिद्रव्यत्वस्य द्रव्ये सत्त्वादतिव्याप्तिः स्यादतस्तदुपादानम् । सत्तामादाय द्रव्यकर्मणोरतिप्रसक्तिनिरासार्थं सत्ताव्याप्येति । अन्यतरत्वमादाय तद्दोषतादवस्थ्याज्जातिपदम् ।

(२) संयोगविभागाविति । द्रव्ये गुणत्वापत्तिवारणाय समवायिकारणत्वरहितेति । प्रागभाववारणाय सामान्यवतीति । कारणत्वपदानुपादाने प्रमेयत्वादिधर्ममादाय सर्वेषां गुणत्वं स्यादतस्तदुपादानम् ।

(३) समवाय्यसमवायिपदप्रवेशप्रयोजनमाह धर्मेति ।

(४) पारिमाण्डल्ये कारणत्वानङ्गीकारेण तदसङ्ग्रहः स्यादतः कल्पान्तरमाह यद्वेति । तथा च जातिसामानाधिकरण्यवैशिष्ट्ये सति संयोगविभागोभयसमवायित्वाभावतदुभयासमवायिकारणत्वाभावोभयवत्त्वं गुणत्वव्यञ्जकमित्यर्थः । जातिशून्ये सत्यन्ताभावान्न तदुभयवत्त्वमित्यदोषः ।

(५) लघुलक्षणान्तरमाह सामान्यवत्त्वे सतीति ।

(६) कारणाकारणसंयोगविभागयोरतिव्यातिनिरासाय एकद्रव्यमिति । अनेकद्रव्याभिन्नत्वमित्यर्थः संयोगविभागयोरनेकद्रव्यत्वान्नातिव्याप्तिरिति भावः । परमाणुरवृत्तित्वेनानेकद्रव्यभिन्नस्तत्रातिव्याप्तिवारणायागुणमिति । रूपादावेकैकगुणेऽतिव्याप्तिनिरासार्थमन्त्यदलम् तथा च मिलितौ संयोगविभागौ प्रति अनपेक्षकारणं यत् तत्कर्मेति निष्कृष्टलक्षणमित्यर्थः संयोगो विभागो वा न तदुभयम्प्रत्यनपेक्षं कारणमिति न तत्रातिप्रसङ्गः । केचित्तु संयोगस्यानपेक्षं कारणमिति, विभागस्यानपेक्षकारणमिति, प्रत्येकं दलत्रययुक्तं लक्षणद्वयम् उभयोश्चरमदलानुपादाने रूपाद्येकैकगुणेऽतिव्याप्तिरिति प्राहुः ।

न्नित्यगुणम्, संयोगविभागेष्वनपेक्षकारणमिति (१)स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षमित्यर्थः। तेन समवायिकारणापेक्षायां पूर्वसंयोगाभावापेक्षायाञ्च नासिद्धत्वम्। (२)स्वोत्पत्त्यनन्तरोत्पत्तिकानपेक्षत्वं वा विवक्षितम् पूर्वसंयोगध्वंसस्यापि स्वोत्पत्त्यनन्तरानुत्पत्तिकत्वात्, अभावत्वेन तस्याद्यक्षणसम्बन्धाभावात्। (३)नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मत्वम्, (४)चलतीतिप्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वं वा, (५)गुणान्यनिर्गुणमात्रवृत्तिजातिमत्त्वं वा, (६)स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिविभागकारणतावच्छेदकजातिमत्त्वं वा। (७)स चायं चलतीतिप्रत्ययसाक्षिकः पदार्थो नाविरलदेशोत्पादनादिनोपपाद्यः क्षणभङ्गस्याग्रे निराकरिष्यमाणत्वात्। लक्षणस्य इतरभेदसाधकताप्रकारः पूर्वोक्त एव ॥ १७ ॥

इदानीं कारणमुखेन त्रयाणामेव साधर्म्यप्रकरणमुपक्रमते—

---

(१) अनपेक्षत्वं विवृणोति स्वोत्पत्तीति। अत्र नित्यज्ञानेऽतिव्याप्तिवारणाय सविषयकान्यत्वे सतीति विशेषणं देयम्। तेन द्वितीयोत्पत्तिपदनिवेशेन, भावभूतपदप्रवेशप्रयोजनमाह पूर्वसंयोगाभावेति।

(२) भावभूतपदाप्रवेशनिबन्धनप्रयुक्तलाघवेन लक्षणान्तरमाह स्वेति। अभावत्वेनेति। अत्रेदमनुमानम्-ध्वंस आद्यक्षणसम्बन्धाभाववानभावत्वात्प्रागभाववत्। न च तथासति कथं ध्वंस उत्पन्न इति व्यपदेश इति वाच्यम् प्रतियोगिसम्बन्धप्रयुक्तस्य तद्व्यपदेशस्य गौणत्वात्। अत्र वाकारेणानास्था सूचिता घटादेराद्यक्षणसम्बन्धवत्तद्ध्वंसेऽप्याद्यक्षणसम्बन्धस्य प्रत्यक्षासिद्धतयाऽभावत्वहेतोर्व्यभिचारित्वात्। प्रतियोगिसम्बन्धोत्पत्तिस्वीकारे सम्बन्धस्यातिरिक्तपदार्थत्वापत्तेरिति विभावनीयम्।

(३) लक्षणान्तरमाह नित्येति। द्रव्यस्य सत्तासाक्षाद्व्याप्यजातिमत्त्वात्तत्रातिव्याप्तिवारणाय नित्यावृत्तीति। घटत्वादिकमादाय घटेऽतिव्याप्तिनिरासाय साक्षात्पदम्।

(४) कर्मत्वजातिः प्रत्यक्षसिद्धेत्यभिप्रायेणाह चलतीति।

(५) अगुणमिति सूत्रस्थलक्षणं विवृणोति गुणान्येति। गुणेऽतिव्याप्तिवारणाय गुणान्येति। द्रव्ये तद्वारणाय निर्गुणपदम्। तयोश्चातिव्याप्तिवारणाय मात्रपदं तदितरावृत्त्यर्थकम्।

(६) संयोगविभागेत्यादिसूत्रस्थलक्षणाभिप्रायेणाह स्वोत्पत्तीति। उत्पत्तिपदानुपादाने विभागप्रागभावेऽतिव्याप्तिः तदव्यवहितोत्तरक्षणविभागे तस्य हेतुत्वादत उत्पत्तिपदम्। प्रागभावस्योत्पत्तिविरहान्निरासः।

(७) क्षणभङ्गवादाभिप्रायेणाशङ्कते सचेति। तथा च क्षणिकनिरन्तरोत्पन्नसजातीयस्य वस्तुनः सजातीयप्रत्ययेनैव सम्भवात्तत्कारणतावच्छेदकतया कथं कर्मत्वजातिसिद्धिरिति शङ्कार्थः। निराकरोति क्षणभङ्गेति।

द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ॥ १८ ॥

समानमेव सामान्यम् एकमित्यर्थः, अनयोः समाना मातेतिवत्। एकस्मिन्नेव द्रव्ये समवायिकारणे द्रव्यगुणकर्माणि वर्त्तन्ते इत्यर्थः। द्रव्यसमवायिकारणकवृत्तिजातिमत्त्वं त्रयाणां साधर्म्यम् ॥ १८ ॥

गुणासमवायिकारणकत्वं त्रयाणां साधर्म्यमाह—

तथा गुणः ॥ १९ ॥

गुणासमवायिकारणकवृत्तिजातिमत्त्वं त्रितयसाधर्म्यम्। द्रव्याणां संयोगोऽसमवायिकारणम्, कार्य्यगुणानां रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वादीनां सजातीयकारणगुणासमवायिकारणकत्वम्, बुद्ध्यादीनामात्मगुणानां मनःसंयोगासमवायिकारणकत्वम्। पार्थिवपरमाणुगुणानामग्निसंयोगासमवायिकारणकत्वम्। (१)कर्मणान्तु वन्ह्यादिनोदनाभिघातगुरुत्वद्रवत्वसंस्कारादृष्टवदात्मसंयोगप्रयत्नवदात्मसंयोगाद्यसमवायिकारणकत्वं यथायथं स्वयमूहनीयम्। क्वचिदेकस्यापि गुणस्य त्रयाणां द्रव्यगुणकर्मणामारम्भकत्वम्। तद्यथा वेगवत्तूलपिण्डसंयोगस्तूलपिण्डान्तरे कर्म करोति द्वितूलकञ्च द्रव्यमारभते तत्परिमाणञ्च। क्वचिदेको गुणो द्रव्यगुणावारभते यथा तूलपिण्डसंयोग एव वेगानपेक्षप्रचयाख्यो द्वितूलकं द्रव्यं तत्परिमाणञ्चारभते ॥ १९ ॥

क्वचिदेकस्य कर्मणोऽनेककार्य्यकारित्वमाह—

संयोगविभागवेगानां कर्म समानम् ॥ २० ॥

---

(१) कर्मणामिति। अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेषु अप्रत्ययं कर्म नोदनादिभ्यो भवति नोदनं च संयोगविशेषो यथा पङ्कोपरि मन्दं व्यवस्थापिता प्रस्तरगुटिका क्रमशः पङ्केन सहाधो गच्छति स च गुरुत्वाधीनः प्रस्तरसंयोगो नोदनं तेनाधोगमनरूपा क्रिया भवतीत्यर्थः तत्रासमवायिकारणं नोदनम्। एवं वेगापेक्षाद्विभागकृतः कर्मणो हेतुभूतात्संयोगविशेषादभिघाताख्यात्पाषाणादिषु निष्ठुरे वस्तुन्यभिपतितेषु कर्म यज्जायते तत्राभिघातोऽसमवायिकारणम्। गुरुत्वप्रतिबन्धकहस्तसंयोगाभावे मुषलाधोगमनकर्मणि गुरुत्वम्, अपां स्थलान्निम्नाभिसर्पणरूपस्यन्दनकर्मणि च द्रवत्वम्, इष्वादिकर्मणि च संस्कारोऽसमवायीत्यर्थः। प्राणाख्ये वायौ यत्कर्म तत्रेच्छाद्वेषपूर्वकप्रयत्नापेक्ष आत्मसंयोगो, पूर्वशरीरोपभोगसहचारिधर्माधर्मयोरुपभोगादिना क्षयेऽन्याभ्यां धर्माधर्माभ्यामात्ममनःसंयोगसहायाभ्यां मृतशरीराद्विभागकारणं कर्म जायते तत्रादृष्टवदात्मसंयोगश्चासमवायीति बोध्यम् विस्तरस्तु भाष्ये द्रष्टव्यः।

कारणमित्यनुषङ्गः । यत्र(१) द्रव्ये कर्मोत्पन्नं तेन समं यावद्द्रव्यं संयुक्तमासीत् तावत्सङ्ख्याकान् विभागान् जनयित्वा तावतः संयोगानपि पुनरन्यत्र जनयति, वेगं पुनरेकमेव स्वाश्रये करोति वेगपदं स्थितिस्थापकमप्युपलक्षयति ॥ २० ॥

ननु क्रियावता द्रव्येणारम्भकसंयोगे जनिते तेन च द्रव्यमारब्धं यत्तद्[illegible] कर्मजन्यमेव कर्मणस्तत्पूर्ववर्त्तित्वादत आह—

न द्रव्याणां कर्म ॥ २१ ॥

कर्म द्रव्याणां न कारणमित्यर्थः ॥ २१ ॥

कुत एवमत आह—

व्यतिरेकात् ॥ २२ ॥

व्यतिरेकादिति । निवृत्तेरित्यर्थः । उत्तरसंयोगेन कर्मणि निवृत्ते द्रव्यमुत्पद्यते इति न कर्मणो द्रव्यकारणत्वं विनश्यदवस्थञ्च कर्म न द्रव्यकारणम् । (२)किञ्च कर्म द्रव्यस्यासमवायिकारणं वा भवेन्निमित्तकारणं वा ? न तावदाद्यः द्रव्यस्यासमवायिकारणनाशनाश्यत्वेन अवयवकर्मनाशादेव द्रव्यनाशापत्तेः । न द्वितीयः महापटनाशेऽवस्थितसंयोगेभ्य एव खण्डपटोत्पत्तौ निष्कर्मणामेवावयवानां द्रव्यारम्भदर्शनाद्व्यभिचारात् ॥ २२ ॥

(३)बहूनामेकस्यारम्भकत्वमुक्त्वा इदानीमेकस्मिन् कार्य्ये बहूनामारम्भकत्वमाह—

द्रव्याणां द्रव्यं कार्य्यं सामान्यम् ॥ २३ ॥

द्रव्ये च द्रव्याणि चेति द्रव्याणि तेषां द्रव्याणाम् । तत्र द्वाभ्यां तन्तुभ्यां द्वितन्तुकः पटो बहुभिरपि तन्तुभिरेकः पट आरभ्यते । न-

---

(१) यत्रेत्यादिना द्रव्यादिवत् कर्मणोऽनेककार्यकारित्वकथनेन जातिघटितधर्मावच्छिन्ननानाकार्यतानिरूपितकारणत्वाश्रयवृत्तिजातिमत्त्वम् त्रयाणाम्, एकं वेगमित्यादिना च वेगान्तरस्य गुणजन्यत्वसूचनेन च गुणकर्मणोः संयोगाद्यसमवायिकारणवृत्तिपदार्थविभाजकधर्मवत्त्वं साधर्म्यं सूचितम् ।

(२) विनिगमनाविरहात्संयोगवत्कर्मणोपि कारणत्वं स्यादत आह किञ्चेति ।

(३) सजातीयैककार्यानेककारणवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्वयोरेव साधर्म्यं न कर्मणः इति अग्रिमसूत्रद्वयतात्पर्यं प्रकटयन्नवतारयति बहूनामिति ।

न्वेकतन्तुकोऽपि पटो दृश्यते यत्रैकेनैव तन्तुना तानप्रतितन्त्रौ(१) भवत इति चेन्न तत्रैकस्य संयोगाभावेनासमवायिकारणाभावात् पटानुत्पत्तेः। न चांशुकतन्तुसंयोगोऽसमवायिकारणम् अवयवावयविनोरयुतसिद्धत्वेन(२) संयोगाभावात् आरभ्यारम्भकभावानभ्युपगमात्, मूर्त्तानां समानदेशताविरोधात्। दृश्यते तावदेवमिति चेन्न तत्र वेमाद्यभिघातेन महावयविनस्तन्तोर्नाशात् खण्डावयविनानातन्तूत्पत्तौ तेषामन्योन्यसंयोगात् पटोत्पत्तेः, वस्तुगत्या तत्र नानाभूतेषु तन्तुषु एकत्वाभिमानात् ॥ २३ ॥

ननु यथा द्रव्याणां द्रव्यं कार्य्यं गुणानाञ्च गुणस्तथा किं कर्मण अपि कर्म कार्य्यमित्यत आह—

गुणवैधर्म्यान्न कर्मणां कर्म ॥ २४ ॥

कार्य्यमिति शेषः। द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यमुक्तम्। तत्र कर्म कर्मसाध्यं न विद्यते इति सूत्रेण कर्मणां कर्मजनकत्वं प्रतिषिद्धमेव तदिहानूद्यते(३) इति भावः ॥ २४ ॥

इदानीं व्यासज्यवृत्तीनां गुणानाम् अनेकद्रव्यारभ्यत्वं दर्शयन्नाह—

द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च॥२५॥

अनेकद्रव्यारभ्या इति शेषः। द्वित्वादिसमभिव्याहृतं पृथक्त्वपदमपि द्विपृथक्त्वादिपरम्। एवञ्च द्वित्वादिकाः परार्धपर्य्यन्ताः सङ्ख्या द्विपृथक्त्वादीनि च संयोगा विभागाश्च द्वाभ्यां बहुभिश्चैव द्रव्यैरारभ्यन्ते इत्यने(४)कवृत्तित्वममीषाम्। तच्च समवाय्यन्योन्याभावसामानाधिकरण्यम् ॥ २५ ॥

नन्ववयविद्रव्याणां गुणानाञ्चोक्तानां यथा व्यासज्यवृत्तित्वं त-

---

(१) तानप्रतानौ इति पाठान्तरम्।

(२) अयुतसिद्धत्वेनेति। अयुतसिद्धयोरप्राप्तप्राप्तिरूपसंयोगस्यासम्भवादित्यर्थः। आरभ्येति। पटैकतन्त्वोरारभ्यारम्भकभावानङ्गीकारादिति भावः। तयोरयुतसिद्धत्वे हेतुमाह मूर्त्तानामिति। अयुतसिद्धत्वविरहिणामित्यर्थः तथा च तदंशुकतन्त्वोः समानदेशत्वादयुतसिद्धत्वमिति हृदयम्।

(३) उक्तार्थस्य सप्रयोजनमनुवचनमनुवादः। तथा च 'न कर्म कर्मसाध्यं' इत्यनेन कर्मणि यत्किञ्चित्कर्मसाध्यत्वे निषिद्धेपि बहुकर्मसाध्यत्वस्यानिषेधात्तत्प्रतिपत्तिरेवानुवादप्रयोजनमित्यर्थः।

(४) अनेकेति। अनेकद्रव्यारब्धैककार्यवृत्तिपदार्थविभाजकधर्मवत्त्वं द्रव्यगुणयोः साधर्म्यमित्यर्थः।

था कर्मणामपि किं न स्यादत आह–

(१)असमवायात् सामान्यकार्य्यं कर्म न विद्यते ॥२६॥

असमवायादित्यत्र द्रव्ययोर्द्रव्येष्विति योज्यम्, तथा च न द्रव्ययोरेकं कर्म समवैति न वा द्रव्येष्वेकं कर्म समवैति, तेन सामान्यस्य समुदायस्य कार्य्यं कर्म न विद्यते। अत्रापि विदिर्ज्ञानार्थो न सत्तावचनः। यदि कर्म व्यासज्यवृत्ति स्यात् एकस्मिन् द्रव्ये चलति द्वयोर्द्रव्ययोर्बहुषु च द्रव्येषु चलतीति प्रत्ययः स्यात्, न चैतत् तस्मान्न कर्म व्यासज्यवृत्तीत्यर्थः। ननु शरीरतदवयवानां कर्म शरीरतदवयवैर्बहुभिरारभ्यत एव कथमन्यथा शरीरे चलति करचरणादावपि चलतीति–प्रत्ययः एवमन्यत्राप्यवयविनीति चेन्न अवयविकर्मसामग्र्या अवयवकर्मसामग्रीव्याप्तत्वात् तथोपलब्धेः, न तु वैपरीत्यं, न ह्यवयवे चलति सर्वत्रावयविनि चलतीति प्रत्ययः, अन्यथा कारणाकारणसंयोगात् कार्य्याकार्य्यसंयोगोऽपि न स्यात् कारणकर्मणैव कार्य्यस्यापि संयोगोपपत्तेः ॥ २६ ॥

पुनर्बहूनामेकं कार्य्यमाह–

संयोगानां द्रव्यम् ॥ २७ ॥

बहूनां संयोगानां द्रव्यमेकं कार्य्यमित्यर्थः। (२)निःस्पर्शानां द्रव्याणाम् अन्त्यावयविनां विजातीयद्रव्याणाञ्च ये संयोगास्तान् विहायेति द्रष्टव्यम् ॥ २७ ॥

इदानीं बहूनां गुणानामेकं गुणकार्य्यमाह–

रूपाणां रूपम् ॥ २८ ॥

रूपमेकं कार्य्यमित्यन्वयः। रूपपदमुभयमपि लाक्षणिकम्, अजहत्स्वार्था चेयं(३)लक्षणा। कारणैकार्थसमवायप्रत्यासत्त्या जन्यजनकभावाश्रयत्वञ्च शक्यलक्ष्यसाधारणो धर्मस्तेन रूपरसगन्धस्पर्शस्नेह-

---

(१) कर्मणस्तद्वैधर्म्यमाह असमवायादिति। सुगमोऽर्थः।

(२) सूत्रे द्रव्यमित्युपलक्षणम्। नानागुणजन्यैककार्यवृत्तिजातिमत्त्वं द्रव्यादित्रिकसाधर्म्यमिति द्रष्टव्यम्। संयोगानामिति बहुवचनमविवक्षितम् निःस्पर्शादिद्रव्यसंयोगानां हेतुत्वाभावादित्याशयेनाह निःस्पर्शानामिति।

(३) लक्षणेति। तथा चाजहत्स्वार्थलक्षणया रूपपदेन कारणैकार्थप्रत्यासत्त्या घटादिनिष्ठस्नेहादिगुणपरिग्रहः। च कारणगुणा अनेके कार्येषु एकमेव समानजातीयकं गुणमारभन्ते इत्यर्थः।

सांसिद्धिकद्रवत्वैकत्वैकपृथक्त्वानि संगृह्यन्ते । एते हि कारणे वर्त्तमानाः कार्य्येषु समानजातीयमेकमेव गुणमारभन्ते । द्विधा ह्यसमवायिकारणानाङ्गतिः । केचित् कारणैकार्थप्रत्यासत्त्या जनयन्ति, कारणमिह समवायिकारणं तच्च जन्यस्य रूपादिलक्षणस्य कार्य्यस्य तेन रूपादिलक्षणकार्य्यस्य यत् समवायिकारणं घटादि तेन सह कपाले वर्तमानं रूपं कारणैकार्थसमवायेन घटरूपमारभते, एवं रसाद्यपि । क्वचित्तु कार्य्यैकार्थप्रत्यासत्त्याऽसमवायिकारणत्वम् यथा कारणमपि शब्दो नभसि कार्य्यमपि शब्दान्तरमारभते, नभस्येव रूपाद्यपि पार्थिवपरमाणावग्निसंयोगेन कार्य्यैकार्थसमवायप्रत्यासत्त्या जन्यते॥२८॥

एकस्य कर्मणोऽनेककार्य्यत्वमाह–

गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥ २९ ॥

उत्क्षेपणमेकं कार्य्यममीषामित्यर्थः । अत्र गुरुत्वस्य हस्तलोष्ठादिवर्त्तिनो निमित्तकारणत्वम्, प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं हस्तनिष्ठोत्क्षेपणस्य, लोष्ठनिष्ठोत्क्षेपणस्य तु हस्तनोदनमसमसमवायिकारणम् । अत्राप्युत्क्षेपणपदमवक्षेपणादावपि लाक्षणिकम् ॥ २९ ॥

ननु मूर्त्तगुणानां कार्य्याणां कारणगुणपूर्वकत्वं स्वाश्रयगुणपूर्वकत्वञ्चोक्तम्, द्रव्यकर्मणोश्च न कर्म कारणमित्युक्तम् (१)तथाच कर्मणः किमपि न कार्य्यमित्यायातम् , तथाचातीन्द्रियाणां सूर्य्यादिगतीनाम् अनुमानमपि दुर्लभं लिङ्गाभावात् अतः संयोगविभागवेगानां कर्मेति सूत्रोक्तमेव स्मारयन्नाह–

संयोगविभागाश्च कर्मणाम् ॥ ३० ॥

जन्या इति शेषः । व्यक्त्यभिप्रायेण बहुवचनं संस्कारोऽप्युपलक्षणीयः ॥ ३० ॥

ननु द्रव्यकर्मणी न कर्मकार्य्ये इति पूर्वमुक्तम्, संयोगविभागौ तु संयोगविभागकार्य्याविव तथाचेदानीं कर्मणः कारणत्वाभिधानं विरुद्धमित्यत आह–

---


(१) तथा चेति । कर्मणः कार्यत्वाभावेऽभिमतक्रियावत्त्वहेतुकसूर्यगत्यनुमानं न स्यादित्यर्थः ।

कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्॥३१॥

कारणसामान्यपदेन तत्प्रकरणमुपलक्ष्यते तेन कारणसामान्याभिधानप्रकरणे द्रव्यकर्मणी प्रति कर्मणोऽकारणत्वमुक्तं न तु सर्वथाप्यकारणमेव कर्मेति विवक्षितम्। येन 'संयोगविभागाश्च कर्मणामिति' सूत्रं व्याहन्येतेति भावः॥ ३१॥

इति शाङ्करे वैशेषिकसूत्रोपस्कारे प्रथमाध्यायस्य

प्रथमाह्निकम्॥



प्रथमाध्याये द्वितीयाह्निकम् ।

नन्वनेन प्रघट्टकेन द्रव्यादीनां त्रयाणां पदार्थानां कार्य्यैकत्वघटितं कारणैकत्वघटितञ्च साधर्म्यमुक्तम्, (१)तच्चानुपपन्नं कार्य्यकारणभावस्यैवासिद्धेरित्यत आह—

कारणाभावात्कार्य्याभावः ॥ १ ॥

दृश्यते हि मृच्चक्रसलिलकुलालसूत्रादौ समवहितेऽपि दण्डाभावाद् घटाभावः, भूसलिलादौ समवहितेऽपि वीजाभावादङ्कुराभावः, स च दण्डघटयोर्वीजाङ्कुरयोर्वा कार्य्यकारणभावमन्तरेणानुपपन्नः। अन्यथा वेमाद्यभावेऽपि घटाभावः शिलाशकलाद्यभावेऽप्यङ्कुराभावः स्यात्।(२)किञ्च घटपटादीनां कादाचित्कत्वमनुभूयते तदपि हेतुफलभावमन्तरेणानुपपन्नम्, न हि किञ्चित्कालासत्त्वे सति किञ्चित्कालसत्त्वरूपं कादाचित्कत्वं भावानां कारणापेक्षामन्तरेण सम्भवति तदा हि स्यादेव न स्यादेव वा नतु कदाचित् स्यात्(३) न हि भावो न भवत्येव नाप्यहेतोर्भवति नाप्यकस्मादेव भवति, न वा निरुपाख्यादेव शशविषाणादेर्भवति,(४)किन्तु दण्डवेमादेः सोपाख्यस्यावधेर्घटपटादौ कार्य्ये दर्शनात् अवधिस्तु कारणमेव।(५)एवं कार्य्यकारणभावाभावे प्रवृत्तिनिवृत्ती न स्याताम् तथा च निरीहं जगज्जायेत न हीष्टसाधनताज्ञानमन्तरेण प्रवृत्तिरनिष्टसाधनताज्ञानमन्तरेण निवृत्तिः ॥ १ ॥

(६)ननु सदेवोत्पद्यते नासत् "सदेव सौम्येदमग्र आसीत्" इत्यादिश्रुतिप्रामाण्यात् अन्यथाऽसत्त्वाविशेषे तन्तुभ्य एव पटो न कपा-

---

(१) तच्चेति। तथा चोपोद्घातसङ्गत्या साधर्म्यनिरूपणान्ते कार्यकारणभावं वर्णयतीत्यर्थः।

(२) कार्यकारणभावे प्रत्यक्षप्रमाणं दर्शयित्वाऽनुमानमाह किञ्चेति। घटादिकार्यं सहेतुकं कादाचित्कत्वाद्यन्नैवं तन्नैवं यथाऽऽत्मादि इति अनुमानप्रकारो बोध्यः।

(३) स्यादिति। तथा च कारणानपेक्षत्वेन घटादिकार्यसत्तातदभावयोः कालविशेषनैयत्यस्यानुचितत्वात्कादाचित्कत्वानुपपत्तिरिति भावः।

(४) किन्त्विति। तथा च नियतावधिककार्यदर्शनात् भवनहेत्वादिनिषेधोऽनुपपन्न इति भावः इदमेवोदयनाचार्यैः स्फुटीकृतम्—


हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्त्वतः ॥ इति कारिकया।

(५) बाधकान्तरमाह एवमिति। (६) सांख्यमतेनाशङ्कते नन्विति।

कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्॥३१॥

कारणसामान्यपदेन तत्प्रकरणमुपलक्ष्यते तेन कारणसामान्याभिधानप्रकरणे द्रव्यकर्मणी प्रति कर्मणोऽकारणत्वमुक्तं न तु सर्वथाप्यकारणमेव कर्मेति विवक्षितम्। येन 'संयोगविभागाश्च कर्मणामिति' सूत्रं व्याहन्येतेति भावः॥ ३१॥

इति शाङ्करे वैशेषिकसूत्रोपस्कारे प्रथमाध्यायस्य प्रथमाह्निकम्॥



लेभ्य इति नियमो न स्यादिति चेत् परिणामवादिभिरपि स्वीकृतकारणकैरयं नियमोऽभ्युपगन्तव्य एव, अन्यथा घटाभिव्यक्तिः कपालेष्वेव न तन्तुष्विति कथं स्यात्।(१)किञ्च यद्यभिव्यक्तिरपि पूर्वमासीदेव तदा तस्या अपि नित्यत्वे आविर्भावतिरोभावावेवोत्पादविनाशाविति रिक्तं वचः। अथाविर्भावतिरोभावौ कारणापेक्षौ, तदा घटपटादीनामपि कारणापेक्षैवासतामप्युत्पत्तिरित्यायातम्। यत्तु कारणं प्रति नियमानुपपत्तिरित्युक्तम्, तत्र स्वभावनियमेनैवोत्तरम्(२)। स च स्वभावनियमोऽन्वयव्यतिरेकावगम्यो भवति, भवति हि दण्डमन्तरेण न घटो दण्डे सति घट इति सर्वसाक्षिकोऽनुभवः। (३)एवञ्चानन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं (४)सहकारिवैकल्यप्रयुक्तकार्य्याभाववत्त्वं वा कारणत्वम्। यद्यपि "यवैर्यजेत व्रीहिभिर्वा" इत्यादौ नियतपूर्ववर्त्तित्वं नास्ति न हि यवकरणकयागनिष्पाद्ये फले व्रीहिकरणकयागस्य पूर्ववर्त्तित्वम् तथापि विकल्पितं विहितकारणं कारणमेव, फलैकजात्येऽपि द्वयोः कारणत्वोपपत्तेः। तथा च सहकारिवैकल्यप्रयुक्तकार्य्याभाववत्त्वं लोकवेदसाधारणी कारणता, नियतपूर्ववर्त्तित्वन्तु अन्वयव्यतिरेकगम्या कारणता लौकिकी, न हि "स्वर्गकामो यजेत" इत्यादौ व्यतिरेकभागोऽपि विषयः प्रवृत्तेरन्वयमात्रज्ञानादेवोपपत्तेः,अत एव(५)"विकल्पे उभयमशास्त्रार्थः"इत्यपि घटते,

---

(१) ननु यत्र कार्यं तादात्म्येन सत् तत्रैव कार्याभिव्यक्तिरिति नियमेन कपालेष्वेव घटोत्पत्तिरित्याशङ्क्याह किञ्चेति।

(२) उत्तरमिति। साङ्ख्यैर्यथा शब्दस्याकाशगुणत्वं न मनोगुणत्वमित्युच्यते तत्र को नियम इत्यनुयुक्ते स्वभाव एव नियमोऽभ्युपगन्तव्यः तथात्रापि घटकारणत्वं कपालस्य न तन्त्वादीनामिति स्वभाव एव नियम इत्यर्थः।

(३) अन्वयव्यतिरेकघटितकारणत्वस्य पर्यवसितार्थमाह एवञ्चेति। दण्डत्वादावतिव्याप्तिवारणाय विशेषणदलम्। तद्घटेऽन्यत्रेत्यादिरन्यथासिद्धिमत्यपि घटत्वावच्छिन्नेऽनन्यथासिद्धे तद्दण्डत्वादातिव्याप्तिवारणाय नियतपदम्। अरण्यस्थदण्डेऽव्याप्तिवारणाय जातीयत्वान्तम्।

(४) वैदिकस्थले विकल्पस्थलीयकारणतायां नियतपूर्ववृत्तित्वासम्भवात् तत्साधारणकारणतामाह सहकारीति। यवैर्व्रीहिभिर्वा यजेतेत्यादिवैकल्पिककारणतास्थलेऽसत्यपि व्रीहिकरणकयागे यवकरणकयागात्फलोत्पादेन कारणाभावकार्याभावयोरनुभवसाक्षिकप्रयोज्यप्रयोजकप्रतीत्यभावात् सहकारिपदम्। उदासीनेऽनन्यथासिद्धत्वविरहान्न तस्य हेतुत्वापत्तिरिति बोध्यम्।

(५) अत एव प्रवृत्तेरन्वयमात्रज्ञानादुपपत्तेरित्यर्थः। अन्यथा व्यतिरेकापेक्षायां विकल्पस्थले द्वयोः शास्त्रार्थलापातादिति भावः।

तज्जातीयस्य फलस्य एकेनैवोपपत्तेरपरानुष्ठानवैयर्थ्यात् । अत एव "श्रौतात् साङ्गात् कर्मणः फलावश्यम्भावनियमः" इत्यप्युचितम् "आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषाय" इत्याचार्य्याभिधानमृज्वर्थतात्पर्य्यकमेव । (१)तृणारणिमणिस्थले तु कार्य्यवैजात्यमावश्यकं तत्रान्वयव्यतिरेकगम्यत्वात् कारणताया व्यतिरेकाद्व्यतिरेकस्यावश्यकत्वात् । विकल्पस्थले तु फलवैजात्यकल्पने राजसूयवाजपेयादावपि वैकल्पिकी कारणता स्यादिति(२) कार्य्यकारणभावनियममेवोपपादयन्नाह–

न तु कार्य्याभावात् कारणाभावः ॥ २ ॥

यदि कार्य्यकारणभावनियमो न भवति तदा कार्य्याभावादपि कारणाभावः स्यात् । कार्य्याभावः कारणाभावं प्रत्यतन्त्रं कारणाभावस्तु कार्य्याभावं प्रति तन्त्रम्, तेनं(३) दुःखाभावार्थं जन्माभावे, जन्माभावार्थं प्रवृत्त्यभावे, तदर्थञ्च दोषाभावे, तदर्थं मिथ्याज्ञाननिवृत्तये, तदर्थञ्चात्मसाक्षात्काराय मुमुक्षूणां प्रवृत्तिः प्रयोजनमौपोद्(४)घातिकस्याप्यस्य द्विसूत्रकप्रकरणस्य ॥ २ ॥

(५)पदार्थत्रयोद्देशलक्षणानन्तरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह–

सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३ ॥

---

(१) ननु तर्हि तृणारणिमणिस्थलेपि कार्यवैचित्र्यं नाङ्गीकार्यमत आह तृणादीति ।

(२) इतीति । इति हेतौ । यतः कार्यकारणभावोऽनुभवसिद्धस्तत इत्यर्थः । तथा चोक्तनियमेनैव कारणं प्रति नियमसम्भवे किमर्थं कार्यकारणभावस्वीकार इत्याक्षेपतात्पर्यम् इति केचिदिमं ग्रन्थं वर्णयन्ति । तदसत् स च स्वभावनियम इत्यादिनोपस्कारकारैरन्वयव्यतिरेकघटितकारणताया लौकिकस्थले, वैदिकस्थले चान्वयमात्रघटितकारणताया नियमरूपत्वाङ्गीकारेणोक्ततात्पर्यासङ्गतिः स्यात् । तथाच इति एवंरूपं कार्यकारणभावनियममन्यव्यावर्तकमाहेति सरलार्थ एव ग्राह्यः । अत एव तदनङ्गीकारे दोषमाह यदीत्यादिना ।

(३) अस्य कार्यकारणभावरूपनियमप्रकरणस्य शिष्यावधानाय साक्षात्प्रयोजनमाह तेनेति ।

(४) औपोद्घातिकस्य उपोद्घातसङ्गतिप्राप्तस्य । चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः । तथा च कार्यकारणभावाज्ञाने मुमुक्षूणामत्र शास्त्रे प्रवृत्तिर्न स्यादिति भावः ।

(५) कार्यकारणभावप्रदर्शनान्तरं सामान्यविशेषनिरूपणेऽवसरसङ्गतिं सूचयन्नाह पदार्थेति । सूत्रे सामान्यपदं विशेषदं च लक्ष्यपरम् विभागसहितम् । इति बुद्ध्यपेक्षमिति च लक्षणम् । इति पदस्योभयावच्छिन्नामित्यर्थः तथाचानुवृत्तिव्यावृत्तिबुद्धिलक्षणं द्विविधसामान्यामित्यर्थः । तदेवाह परमित्यादिना ।

लेभ्य इति नियमो न स्यादिति चेत् परिणामवादिभिरपि स्वीकृतकारणकैरयं नियमोऽभ्युपगन्तव्य एव, अन्यथा घटाभिव्यक्तिः कपालेष्वेव न तन्तुष्विति कथं स्यात्।(१)किञ्च यद्यभिव्यक्तिरपि पूर्वमासीदेव तदा तस्या अपि नित्यत्वे आविर्भावतिरोभावावेवोत्पादविनाशाविति रिक्तं वचः। अथाविर्भावतिरोभावौ कारणापेक्षौ, तदा घटपटादीनामपि कारणापेक्षैवासतामप्युत्पत्तिरित्यायातम्। यत्तु कारणं प्रति नियमानुपपत्तिरित्युक्तम्, तत्र स्वभावनियमेनैवोत्तरम्(२)। स च स्वभावनियमोऽन्वयव्यतिरेकावगम्यो भवति, भवति हि दण्डमन्तरेण न घटो दण्डे सति घट इति सर्वसाक्षिकोऽनुभवः। (३)एवञ्चानन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं (४)सहकारिवैकल्यप्रयुक्तकार्य्याभाववत्त्वं वा कारणत्वम्। यद्यपि "यवैर्यजेत व्रीहिभिर्वा" इत्यादौ नियतपूर्ववर्त्तित्वं नास्ति न हि यवकरणकयागनिष्पाद्ये फले व्रीहिकरणकयागस्य पूर्ववर्त्तित्वम् तथापि विकल्पितं विहितकारणं कारणमेव, फलैकजात्येऽपि द्वयोः कारणत्वोपपत्तेः। तथा च सहकारिवैकल्यप्रयुक्तकार्य्याभाववत्त्वं लोकवेदसाधारणी कारणता, नियतपूर्ववर्त्तित्वन्तु अन्वयव्यतिरेकगम्या कारणता लौकिकी, न हि "स्वर्गकामो यजेत" इत्यादौ व्यतिरेकभागोऽपि विषयः प्रवृत्तेरन्वयमात्रज्ञानादेवोपपत्तेः,अत एव(५)"विकल्पे उभयमशास्त्रार्थः"इत्यपि घटते,

---

(१) ननु यत्र कार्यं तादात्म्येन सत् तत्रैव कार्याभिव्यक्तिरिति नियमेन कपालेष्वेव घटोत्पत्तिरित्याशङ्क्याह किञ्चेति।

(२) उत्तरमिति। साङ्ख्यैर्यथा शब्दस्याकाशगुणत्वं न मनोगुणत्वमित्युच्यते तत्र को नियम इत्युनुयुक्ते स्वभाव एव नियमोऽभ्युपगन्तव्यः तथात्रापि घटकारणत्वं कपालस्य न तन्त्वादीनामिति स्वभाव एव नियम इत्यर्थः।

(३) अन्वयव्यतिरेकघटितकारणत्वस्य पर्यवसितार्थमाह एवञ्चेति। दण्डत्वादावतिव्याप्तिवारणाय विशेषणदलम्। तद्घटेऽन्यत्रेत्यादिग्रन्थासिद्धिमत्यपि घटत्वावच्छिन्नेऽनन्यथासिद्धे तद्दण्डत्वादातिव्याप्तिवारणाय नियतपदम्। अरण्यस्थदण्डेऽव्याप्तिवारणाय जातीयत्वान्तम्।

(४) वैदिकस्थले विकल्पस्थलीयकारणतायां नियतपूर्ववृत्तित्वासम्भवात् तत्साधारणकारणतामाह सहकारीति। यवैर्व्रीहिभिर्वा यजेतेत्यादिवैकल्पिककारणतास्थलेऽसत्यपि व्रीहिकरणकयागे यवकरणकयागात्फलोत्पादेन कारणाभावकार्याभावयोरनुभवसाक्षिकप्रयोज्यप्रयोजकप्रतीत्यभावात् सहकारिपदम्। उदासीनेऽनन्यथासिद्धत्वविरहान्न तस्य हेतुत्वापत्तिरिति बोध्यम्।

(५) अत एव प्रवृत्तेरन्वयमात्रज्ञानादुपपत्तेरित्यर्थः। अन्यथा व्यतिरेकापेक्षायां विकल्पस्थले द्वयोः शास्त्रार्थतापातादिति भावः।

(१) तथाच यत्र पिण्ड उत्पद्यते तत्रस्थमेव गोत्वं तेन सम्बध्यते जातः सम्बद्धश्चेत्येकः काल इत्यभ्युपगमात् । एतेन कीदृश्याश्रये वर्त्तते इत्यत्र यत्र प्रतीयते इत्युत्तरम् । कुत्र प्रतीयते इत्यत्र यत्र वर्त्तते इत्युत्तरम् । गोत्ववृत्तेः पूर्वं स पिण्डः कीदृगासीदित्यत्र नासीदित्येवोत्तरम् । एवञ्च "न याति न च तत्रासीत्" इत्यादिकं परिदेवन(२)मात्रम् । अतद्व्यावृत्तिरेव गोत्वमित्यत्र गौरयमिति विधिमुखः प्रत्यय एव बाधकः । न ह्यनुभवोऽपि व्याख्यायते (३)तदुक्तम्—

विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थकः" इति ।

न हि गौरयमिति प्रत्ययेऽगोव्यावृत्तिरपि भासते । कार्त्स्न्यैकदेशविकल्पस्तदा भवेत् यद्येकस्य सामान्यस्य कार्त्स्न्यं भवेदेकदेशो वा । कृत्स्नता ह्यनेकाशेषता(४) सा चैकस्मिन्नोपपन्ना । (५)गौरयमित्याद्यनुभव एवासद्विषयो न वस्तुव्यवस्थापनक्षम इति । अत्रोत्तरं वक्ष्यते ।

(६)प्राभाकरास्तु संस्थानमात्रव्यङ्ग्यं सामान्यमाचक्षते । तद्यद्यनुगतप्रतीतिसाक्षिकं तदा किमपराद्धं गुणकर्मगतैः सामान्यैः भवति हि रूपरसादावनुगतधीः सा च जातिव्यवस्थापिकैव बाधकाभावात् । रूपत्वादिजातिषु (७)न तावद्व्यक्त्यभेदो बाधकः आकाशत्वादिवत्, रूपरसादिव्यक्तीनामनेकत्वात् । नापि बुद्धित्वज्ञानत्वादिवत् घटत्वकलसत्वादिवद्वा तुल्यत्वं बाधकम् । तथान्यूनानतिरिक्तव्यक्तिकत्वम् गुणत्वापेक्षया न्यूनव्यक्तिकत्वात् नीलत्वाद्यपे-

---

(१) तथा चेति । जात्याकृतिव्यक्तयः पदार्था इति सूत्रेण व्यक्त्युत्पत्तिकाले तन्निष्ठमेव सामान्यं विज्ञानवादिमतेऽसद्रूपमपि अदृष्टं किञ्चिद्विज्ञानमुत्तरस्मिन्विज्ञाने फलं जनयद्यथा व्यक्तीभवति तथा व्यक्तीभवतीति नानित्यत्वादिदोषप्रसक्तिरिति हृदयम् ।

(२) परिदेवनमवहेलनमित्यर्थः ।

(३) विधिरूपजातिप्रत्ययस्यातद्व्यावृत्तिरूपाभावासाधकत्वे प्रमाणं दर्शयति तदुक्तमिति । व्यतिरेकोऽतद्व्यावृत्तिः ।

(४) अनेकेति । अशेषत्वमुद्देश्यतावच्छेदकव्यापकयावत्त्वम् तच्चैकस्मिन्गवादावनुपपन्नमित्यर्थः ।

(५) शङ्कते गौरयमिति । वक्ष्यते असद्वादखण्डनावसरे इत्यर्थः ।

(६) सगोत्रैकदेशियानां प्राभाकराणां मतं निरस्यन्नाह प्राभाकरा इति ।

(७) व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह इति जातिबाधकविशेषाभावकूटेन तत्सामान्यमुपपादयन्नाह न तावद्व्यक्त्यभेद इति ।

क्षया चाधिकव्यक्तिकत्वात् । अत एव न सङ्करः भूतत्वमूर्त्तत्ववत्, परस्परात्यन्ताभावसामानाधिकरण्ये सति जात्यन्तरेण सामानाधिकरण्याभावात् । नाप्यनवस्था रूपत्वादिगतसामान्यान्तरानभ्युपगमात् । नापि रूपहानिर्विशेषत्ववत्, यदि विशेषाः द्रव्याश्रितत्वे सति जातिमन्तः स्युः गुणाः कर्माणि वा स्युः विभुवृत्तित्वे सति यदि जातिमन्तः स्युर्गुणाः स्युरिति यथा विशेषपदार्थस्वरूपहानिस्तथा प्रकृतेऽभावात् । नापि समवायत्ववदसम्बन्धः समवाये समवायाभ्युपगमेऽनवस्थाभयात्तथास्तु, प्रकृते तु समवायस्यैव सम्बन्धस्याभ्युपगमात् । यद्यपि समवायत्वजातिबाधको व्यक्त्यभेद एव तथापि यन्मते उत्पादविनाशशीलाः बहवः समवायास्तन्मते द्रष्टव्यम् । अभावत्वादिजात्यभ्युपगमे वा बाधकमेतत् । विवादपदमनुगतबुद्धिः अनुगतनिमित्तसाध्या अबाधितानुगतमतित्वात्(१) दामकुसुमबुद्धिवत् इति जातौ मानमिति वृत्तिकारास्तच्चि(२)न्त्यम् ॥ ३ ॥

सामान्यं विशेष इति द्वैविध्यं यदुक्तं तदुपपादयन्नाह—

भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ॥ ४ ॥

(३) भावः सत्ता अनुवृत्तेरेव हेतुः न तु व्यावृत्तेरपि हेतुः । तथा च विशेषसंज्ञां न लभते ॥ ४ ॥

केषां सामान्यानां विशेषसंज्ञेत्यपेक्षायामाह—

द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च ॥५॥

चकारः पृथिवीत्वादीनि-द्रव्यगतजातीः, रूपत्वादीनि-गुणगतजातीः उत्क्षेपणत्वादीनि-कर्मगतजातीः समुच्चिनोति । द्रव्यत्वमित्यादावसमासः परस्परं व्याप्यव्यापकभावाभावसूचनार्थः । सामान्यानि विशेषाश्चेत्यत्राऽसमासः सामान्यत्वे सत्येव विशेषत्वं यथा ज्ञायेत तदर्थम्, अन्यथा सामान्यविशेषा इति षष्ठीसमासभ्रमः स्यात्, तथाच सामान्यत्वे सति विशेषत्वं न प्रतीयेत । ननु द्रव्या-

(१) भ्रमवारणायाबाधितपदम् ।

(२) तच्चिन्त्यमिति । चिन्ताबीजन्तु तादृशबुद्धेरनुगतधर्मप्रकारकप्रत्ययत्वे तेनैव जातिसिद्धावलमनुमानेन, तदनङ्गीकारे तादृशनिमित्तं पराभिमतमतद्व्यावृत्तिरूपमेव कुतो नेत्यर्थान्तरमिति नानुमानेन तत्सिद्धिरिति भावः ।

(३) नन्वभिन्नवस्तुवृत्तिपरत्वापरत्वाभ्यां कथं सामान्यपदार्थस्य विभाग इत्यत आह भाव इति । तथा च सत्तामन्तर्भाव्य परत्वस्य भिन्नवस्तुवृत्तित्वेन न विभाजकत्वानुपपत्तिरिति भावः ।

कारानुगतमतिसाक्षिकं म द्रव्यत्वम्, पृथिव्यादौ (१)कथञ्चित् तत्-सत्त्वेऽपि वाय्वाकाशादौ तदसम्भवात्। न च गुणत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया तत्सिद्धिः नित्यानित्यवृत्तितया गुणत्वस्य कार्य्यतानवच्छेदकत्वात्, (२)गुणत्वार्थमपि पर्य्यनुयोगस्य तादवस्थ्यात्। मैवम् (३)संयोगत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धेः। सा हि न पृथिवीत्वाद्यवच्छेद्या न्यूनवृत्तित्वात्, नापि सत्तावच्छेद्याऽधिकवृत्तित्वात् अवश्यं ह्यवच्छेदकेन भवितव्यम्, अन्यथाकस्मिकतापत्तेः। तत्र परमाणुषु द्व्यणुकासमवायिकारणवत्तया द्व्यणुकेषु त्र्यणुकासमवायिकारणवत्तया विभुचतुष्टयस्य सर्वमूर्त्तसंयोगितयैव सिद्धेः मनसि इन्द्रियमनःसंयोगाधारतया वायौ तृणादिनोदनाश्रयतया प्रत्यक्षद्रव्येषु प्रत्यक्षतयैव संयोगाभ्युपगमस्यावश्यकत्वात्। अजस्तु संयोगो नास्त्येव येन संयोगत्वस्यापि कार्य्याकार्य्यवृत्तितया कार्य्यतावच्छेदकता न स्यात्। एवं(४) विभागसमवायिकारणतावच्छेदकतयाऽपि द्रव्यत्वसिद्धेः सुप्रतिपदत्वात्।

गुणत्वन्तु (५)संयोग विभाग समवायिकारणत्वासमवायिकारणत्वशून्ये सामान्यवति यत् कारणत्वं तदवच्छेदकतयैव सिद्धमित्युक्तत्वात्। कर्मत्वमपि प्रत्यक्षद्रव्येषु चलतीति प्रत्ययसाक्षिकम्। अन्यत्र तु संयोगविभागानुमेयम् संयोगविभागोभयासमवायिकारणतावच्छेदकतयाऽपि कर्मत्वसिद्धेरावश्यकत्वात्। (६)अत एवादित्यस्य देशान्तरप्राप्त्या गत्यनुमानम्, तत्र च

---

(१) घृतादिपृथिव्यां पृथिवीत्वसन्देहाद्द्रव्यत्वस्यापि सन्देह अतः कथंचिदिति।

(२) गुणत्वार्थमिति। गुणत्वजातिरेव कथं सिध्यतीति प्रश्नस्य तुल्यत्वादित्यर्थः।

(३) संयोगत्वेति। तथा च संयोगत्वावच्छिन्नसंयोगनिष्ठकार्यतानिरूपितद्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिरूपितदण्डनिष्ठकारणतावत् स चान्यूनानतिरिक्तवृत्तिर्धर्मो द्रव्यत्वमित्यनुमानेन द्रव्यत्वजातिसिद्धिरिति भावः।

(४) नित्यसंयोगाङ्गीकर्तृमतसाधारण्येन द्रव्यत्वजातिसिद्धिमाह एवमिति। अनुमानप्रयोगरीतिः पूर्वोक्तैव।

(५) संयोगेति। अत्रापि पूर्ववदुभयकारणताशून्य इत्यर्थो बोध्यः नातः संयोगविशेषकारणे संयोगेऽव्याप्तिः। एवं विभागेऽपि।

(६) अत एव कर्मणः संयोगादिकारणत्वादेव। अनुमानप्रयोगस्तु आदित्यो गतिमान् देशान्तरप्राप्तिमत्त्वात् इति।

देशान्तरस्याकाशादेरतीन्द्रियत्वेऽपि तत्किरणसंयोगविभागयोस्तन्मण्डलेन प्रत्यक्षत्वात् (१)तत एव गत्यनुमानम् । (२)देशान्तरप्राप्तिमान् आदित्यः अविनाशित्वे द्रव्यत्वे च सति प्राङ्मुखोपलब्धस्य प्रत्यङ्मुखेन तेनैवोपलभ्यतया प्रत्यभिज्ञायमानत्वादिति देशान्तरप्राप्त्या अनुमितया आदित्यगत्यनुमानमित्युद्योतकराचार्य्याः ॥ ५ ॥

ननु य एव विशेषपदार्थं उद्दिष्टः स एव किं सामान्यविशेषत्वेनाभिधीयते इति शिष्याकाङ्क्षामपनयन्नाह—

अन्यत्रान्त्येभ्यो विशेषेभ्यः ॥ ६ ॥

अन्त्या विशेषा नित्यद्रव्यवृत्तयो येऽभिहिताः तान् वर्जयित्वा सामान्यविशेषाभिधानमित्यर्थः । अन्तेऽवसाने भवन्तीत्यन्त्या,(३)यतो न व्यावर्त्तकान्तरमस्तीत्याचार्य्याः । उत्पादविनाशयोरन्तेऽवसाने भवन्तीत्यन्त्या नित्यद्रव्याणि तेषु भवन्तीत्यन्त्या विशेषा इति वृत्तिकृतः(४) । ते हि विशेषा एव व्यावृत्तिबुद्धिहेतवो न तु सामान्यरूपा अपीति ॥ ६ ॥

सत्तासामान्यमित्यत्र बहूनां विप्रतिपत्तिरतस्तत्र प्रमाणमाह—

सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ॥ ७ ॥

इतिकारेण प्रत्ययव्यवहारयोः प्रकारमुपदिशति । तथाच द्रव्यादिषु त्रिषु सत्सदिति-प्रकारको यतः प्रत्ययः सदिदं सदिदमि-

---

(१) तत एव देशान्तरप्राप्त्यैव । तथा च देशान्तरस्याकाशादेरतीन्द्रियत्वेपि अत्र सूर्यमण्डलमेव देशान्तरम् तेन तत्किरणसंयोगविभागयोः प्रत्यक्षतया देशान्तरप्राप्त्या गत्यनुमानं निराबाधमिति भावः ।

(२) आकाशस्यातीन्द्रियत्वेन तत्संयोगविभागयोरप्यतीन्द्रियतया प्रत्यक्षासम्भवादलिङ्गत्वेपि अनुमानं भवतीति न्यायवार्तिककारमतासिद्धानुमानं दर्शयति देशान्तरेति । तैलवर्तिविकारवशेन प्रतिक्षणभङ्गुरे प्राङ्मुखेन प्रत्यङ्मुखेन च दृष्टे सोयमिति प्रत्यभिज्ञाते च दीपे व्यभिचारवारणाय अविनाशित्व इति हेतौ विशेषणम् । सूर्यरूपादौ व्यभिचारनिरासाय द्रव्यत्वे सतीति च । अत्र च पूर्वं प्राग्दिशि स्थितः पश्चात्केनचित्प्रतीचीमानीतो मण्यादिर्दृष्टान्तो बोध्यः ।

(३) फलितार्थमाह यत इति । एकमात्रवृत्तयो जातिशून्याश्चेत्यर्थः । गुणस्याप्येकमात्रवृत्तित्वात् अभावस्य जातिशून्यत्वाच्च तत्र तत्रातिव्याप्तिवारणाय पदद्वयप्रवेशो बोध्यः । एकमात्रवृत्ताभावविशेषेऽतिव्याप्तिवरणाय वृत्त्यन्तं समवायेन निवेश्यम् ।

(४) वृत्तिकृत इति । एतन्मते सूत्रस्थान्त्येभ्य इति पदे एकशेषोऽङ्गीकर्तव्यस्तथा च अन्त्या नित्या, अन्त्याश्च नित्यद्रव्यवृत्तयश्चेति एकशेषसमासेन नित्यत्वे सति नित्यद्रव्यवृत्तित्वं विशेषलक्षणं पर्यवसितम् । न चात्मन्यतिव्याप्तिः नित्यद्रव्यद्वयावृत्तित्वेन विशेषणीयत्वात् । नन्वेवमपि गगनपरिमाणेऽतिव्याप्तिस्तदवस्थैवेति चेन्न गुणत्वशून्यत्वेनापि विशेषणीयत्वात् ।

सामान्यविशेषाभावेन च ॥ १४ ॥

यदि द्रव्यगुणकर्मभ्यो गुणत्वमतिरिक्तं न भवेत्तदा द्रव्यत्वगुणत्वकर्मत्वं तदवान्तरजातिमत्तया उपलभ्येतेत्यर्थः ॥ १४ ॥

द्रव्यगुणकर्मभ्यो भेदकं कर्मत्वस्याह—

कर्मसु भावात् कर्मत्वमुक्तम् ॥ १५ ॥

कर्मस्वेव भावात् समवायात् कर्मत्वमपि जात्यन्तरं द्रव्यगुणकर्मभ्यो भिन्नमुक्तं सत्तावदित्यर्थः ॥ १५ ॥

भेदकान्तरमाह—

सामान्यविशेषाभावेन च ॥ १६ ॥

कर्मत्वं यदि द्रव्याद्यात्मकं भवेत्तदा द्रव्यत्वादिसामान्यविशेषस्तत्र समवेयादित्यर्थः । (१)सेयमेकाकारा चतुःसूत्री सत्ताद्रव्यत्वगुणत्वकर्मत्वानां चतसृणां जातीनां द्रव्यगुणकर्मभेदप्रतिपादनाय एक प्रकरणेनोक्तेत्यवधेयम् ॥ १६ ॥

ननु सत्ता द्रव्यगुणकर्मसु वर्त्तमाना द्रव्यत्वाद्यवच्छेदभेदेन भिन्नैव कथ न स्यादत आह—

सदितिलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः ॥ १७ ॥

सदित्याकारक ज्ञानं शब्दप्रयोगो वा सत्ताया लिङ्गम् । तच्च द्रव्यगुणकर्मसु समानमविशिष्टम् । तेन भावः सत्ता एकैव तेषु वर्त्तते अन्यथा द्रव्यत्वादिभिस्तुल्यव्यक्तिकतया सत्ता वा न स्यात् तानि वा न स्युः । (२)विशेषलिङ्गाभावाच्चेति । विशेषो भेदस्तत्र यल्लिङ्गमनुमानं तदभावाच्च न भेद इत्यर्थः । भवति हि स एवायं दीप इत्यनुगमस्तत्र यथा विशेषलिङ्गं दीर्घह्रस्वत्वादिपरिमाणभेदस्तथात्र विशेषलिङ्गं नास्तीति भावः ॥ १७ ॥

इति श्रीभगवत्कणादसूत्रोपस्कारे शाङ्करे प्रथमाध्यायस्य द्वितीयमाह्निकम् ।

---

(१) नन्वेकाकारसूत्रचतुष्टयस्य सामान्यविशेषाभावेनेत्यस्यैकार्थतया पौनरुक्त्यापत्तिरत आह सेयमिति । तथा च सत्तादिविभिन्नपक्षकद्रव्यादिभेदसाध्यकद्रव्यत्वपृथिवीत्वादिप्रकारकप्रमाविशेष्यात्वाभावहेतुकानुमानानां पक्षहेतुभेदेन भिन्नत्वात् न पौनरुक्त्यमित्यर्थः ।

(२) ननु माऽस्तु सत्ता जात्यन्तरमत आह विशेषेति ।

द्वितीयाध्याये प्रथमाह्निकम् ।

द्वितीयाध्यायस्य प्रथमाह्निकस्य नवानां द्रव्याणां लक्षणमर्थः । तत्र पृथिव्यप्तेजसां लक्षणप्रकरणम्, ईश्वरसिद्धिप्रकरणम्, आकाशानुमानप्रकरणम् । तत्र प्रथमोद्दिष्टायाः पृथिव्या लक्षणमाह—

रूपरसगन्धस्पर्शवती पृथिवी ॥ १ ॥

रूपं नीलपीताद्यनेकप्रकारं पृथिव्या एव, तथाच (१)नीलरूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् । एवं रसः कटुकषायाद्यनेकप्रकारकः पृथिव्यामेव, तथाच कटुरससमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् । एवं कषायादिपदप्रक्षेपेण लक्षणान्यूहनीयानि । गन्धो द्विविधः सुरभिरसुरभिश्च तथाच (२)गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् तथा(३)गन्धसमानाधिकरण–गन्धासमानाधिकरणगुणासमानाधिकरण—जात्यधिकरणद्रव्यत्वं द्रष्टव्यम् । न च पाषाणादौ गन्धरसयोरननुभवात् तत्राव्यापकमिदमुभयमपीति वाच्यम् तत्रापाततो गन्धरसयोरननुभवेऽपि तदीयभस्मसु तदुपलम्भात्, (४)य एवावयवाः पाषाणारम्भकास्त एव तद्भस्मारम्भका अपीति नाव्याप्तिः । कथं तर्हि सुरभिः समीरणः तिक्तं कारवेल्लजलमिति–प्रतीतिरिति चेन्न पार्थिवोपाधिकत्वात् तयोर्गन्धरसयोः । स्पर्शोऽप्यनुष्णाशीतः पाकजः पृथिव्यामेव तथाच पाकजस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् । पाकजत्वञ्च

---

(१) नीलरूपेति । वायौ अतिव्याप्तिवारणाय समानाधिकरणान्तम् । जले तद्वारणाय नीलपदम् । द्रव्यत्वमादाय पुनर्जलादावतिव्याप्तिनिरासाय द्रव्यत्वव्याप्येति । अन्यतरत्वमादाय तद्वारणाय जातिपदम् । एवमग्रेपीदृग्पदानां लक्षणघटकानां व्यावृत्तिर्बोध्या विशेषस्तु तत्र तत्र वक्ष्यते ।

(२) गन्धसमानाधिकरणेति । उत्पत्तिकालावच्छिन्नघटादावव्याप्तिवारणाय गन्धवत्त्वं परित्यज्य गन्धसमानाधिकरणेत्यादि ।

(३) आत्मन्यतिव्याप्तिवारणाय गन्धसमानाधिकरणेति जातिविशेषणम् । द्रव्यत्वमादायातिव्याप्तिवारणाय गुणासमानाधिकरणेति जातौ विशेषणम् । गन्धसमानाधिकरणस्यापि पृथिवीत्वस्य रूपसमानाधिकरणत्वात्पृथिव्यामव्याप्तिवारणाय गन्धासमानाधिकरणेति गुणविशेषणम् बोध्यम् । अत्र जात्यधिकारणत्वपर्यन्तं लक्षणं द्रव्यत्वमित्यस्य पृथिव्याः द्रव्यपदार्थबोधकतामात्रत्वात् ।

(४) अत्र यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्त्या भस्मनि पाषाणोपादानपृथिवीपरमाणूपादेयत्वसिद्ध्या पाषाणपरमाणोः पृथिवीत्वेन तज्जन्यपाषाणेपि तेनैव हेतुना गन्धानुमानमिति भावः ।

(१)विशेषान्तरव्यङ्ग्यं पृथिवीस्पर्श एव, विशेषान्तरञ्च शिरीषलवङ्गकुसुमादौ स्पर्शविशेषे स्फुटतरम्. न त्वेवं जलादिस्पर्शे। यद्यप्यवयविनि पाकादग्निसंयोगात् स्पर्शादयो न जायन्ते (२)तथापि तत्परम्पराप्रभवतया तत्रापि वैजात्यविशेषोऽनुसरणीयः ।

ननु लक्षणमिदं व्यतिरेकिलिङ्गमितरभेदसाधकं व्यवहारसाधकं वा ? तत्र पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् यन्नेतरभिन्नं तन्न गन्धवत् यथा जलादि, इतरभेदाभावव्यापकाभावप्रतियोगिगन्धवती चेयं, तस्मादितरभिन्ना। (३)तत्रेतरभेदस्य साध्यस्य प्रसिद्धौ ततो हेतोर्व्यतिरेके सपक्षविपक्षव्यावृत्ततयाऽसाधारण्यम् अव्यतिरेके चान्वयित्वम्। अप्रसिद्धौ च अप्रसिद्धविशेषणः पक्षः। तथाच(४)तत्र न सन्देहो, न वा सिषाधयिषा (५)न वा तद्विशिष्टज्ञानरूपाऽनुमितिः। (६)किञ्च व्यतिरेकयोर्व्याप्तिस्तथाच न व्याप्तस्य पक्षधर्मत्वं पक्षधर्मस्य न व्याप्तत्वमिति वैषम्यम्(७) । अत एवोपनयवैयर्थ्यमपि व्या-

---

(१) विशेषेति। विशेषो काठिनत्वमृदुत्वादिः।

(२) तथापीति। अवयविस्पर्शेऽवयवस्पर्शस्तत्र च पाकः कारणमिति अवयविस्पर्शेऽपि परम्परया पाकजन्यत्वात् वैजात्यमंगीकार्यमिति भावः।

(३) तत्रेति। तत्र=उक्तपञ्चावयववाक्यप्रयोगेन इतरभेदसाधकानुमितौ। साध्यस्येति। साध्यप्रकारकनिश्चये इत्यर्थः। ततो=साध्यप्रकारकनिश्चयधर्मिणि, व्यतिरेके=हेतोरभावे सपक्षविपक्षव्यावृत्तत्वेनासाधारण्यम्। अव्यतिरेके=हेतोः सत्त्वेऽन्वयित्वम्, अन्वयव्याप्तिज्ञानजन्यानुमितिकरणत्वे व्यतिरेकित्वानुपपत्तिरित्यर्थः।

(४) अप्रसिद्धविशेषणपक्षत्वे का हानिरत आह तथा चेति। साध्यनिश्चयाधीनस्य सन्देहकारणस्य साध्यतदभावसहचारिधर्मवद्धर्मिज्ञानादिरूपस्याभावात्सन्देहरूपपक्षताऽसत्त्वान्नानुमितिरिति तात्पर्यम्।

(५) केवलसिषाधयिषारूपपक्षतामते अनुपपत्तिं प्रदर्श्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वेऽप्याह नवेति। पक्षतावच्छेदकव्यापेकतरभेदप्रतियोगिकत्वावच्छिन्नसंसर्गताकतत्पक्षकतत्साध्यकानुमितिरित्यर्थः तस्याश्चोक्तसंसर्गताकज्ञानरूपतया तद्विशिष्टविषयकज्ञानत्वेनेतरभेदसंसर्गतावच्छेदकप्रकारकज्ञानं विनाऽवच्छेदकावच्छेदेनानुमितिः कथं स्यादिति भावः।

(६) नन्ववच्छेदकावच्छेदेनानुमितौ साध्यांशे प्रकारतया पक्षतावच्छेदकावच्छेद्यत्वं भासते नतु पक्षतावच्छेदकव्याप्यकत्वादिकं संसर्गांशे विशिष्टवैशिष्ट्यावगाहिसंसर्गज्ञानमपि वा न संसर्गतावच्छेदकप्रकारकनिश्चयजन्यमत आह किञ्चेति।

(७) वैषम्यमिति। व्याप्तस्य=साध्याभावस्य, न पक्षधर्मत्वं न प्रकृतहेतुत्वं, प्रकृतहेतोश्च न व्याप्तत्वमिति वैषम्यमित्यर्थः। वैषम्याच्च व्याप्तिपक्षधर्मताविशिष्टहेतुप्रतिपादनरूपोपनयसार्थक्यमप्यसम्भवीत्युपनयवैयर्थ्यमेतदेवाह अत एवेत्यनेन। नत्विति। अगृहीतव्याप्तिकमुपनयेन न व्याख्यायत इति भावः।

ख्यायते न त्वगृहीतव्याप्तिकमपि। तदुक्तम्—

साध्याप्रसिद्धिर्वैधर्म्यं व्यर्थतोपनयस्य च।
अन्वयेनैव सिद्धिश्च व्यतिरेकिणि दूषणम्॥ इति।

एवं व्यवहारसाध्यकेऽपि। तत्र यद्यपि व्यवहारः पृथिवीपदवाच्यत्वम् तच्च पृथिवीत्वजातावप्यस्ति तत्र च पृथिवीत्वं हेतुर्नास्तीत्यसाधारण्यम्(१) तथापि पृथिवीत्वप्रवृत्तिनिमित्तकपृथिवीपदवाच्यत्वं साध्यमिति नासाधारण्यम्। (२)यद्वा पृथिवीत्वं क्वाचित्कपदप्रवृत्तिनिमित्तं जातित्वात् घटत्ववदिति सामान्यतः सिद्धौ पृथिवीपदं पृथिवीत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति साध्यम्। तथाचात्रापि साध्याप्रसिद्धिरेवेति चेत्।

(३)मैवम् इतरेषां जलादीनाम् भेदस्य घट एव प्रसिद्धेः। वाय्वादेरतीन्द्रियस्यापि भेदस्य अन्यान्याभावस्य घटादौ प्रत्यक्षत एव सिद्धत्वात् अन्योन्याभावग्रहे अधिकरणयोग्यतामात्रस्य तन्त्रत्वात् स्तम्भः पिशाचो न भवतीत्यादौ तथा दर्शनात्। नचैवं घट एव तर्हि दृष्टान्तोऽस्तु किं व्यतिरेकिणा।

ऋजुमार्गेण सिद्ध्यन्तं को हि वक्रेण साधयेत्।

इति वाच्यम् अव्यतिरेकिलिङ्गं चेदनाभासं(४), तदाऽयमपि मार्गो वक्ररुचिं प्रत्यप्रतिहत एव। साध्याप्रसिद्धेर्निरासे तन्मूलकदोषाणां निरस्तत्वात्। व्यतिरेकसहचारेण अन्वयव्याप्तेरेव ग्रहात् व्यतिरेकव्याप्त्याऽन्वयव्याप्तेरनुमानाद्वा न (५)वैषम्यम्। नचोपनय-

---

(१) असाधारण्यमिति। यद्यपि साध्यासामानाधिकरण्यस्यासाधारण्यत्वे इदमसाधारण्यमसम्भवि तथापि सपक्षविपक्षव्यावृत्तत्वरूपप्राचीनमतसिद्धासाधारण्यं भवत्येवेति ध्येयम्।

(२) ननु पृथिवीत्वप्रवृत्तिनिमित्तकत्वेऽपि पृथिवीपदवाच्यत्वस्यासिद्ध्या तादृशविशिष्टसाध्याप्रसिद्धिरिति आशङ्कायामाह यद्वेति।

(३) नन्वित्यादिना शङ्कितं समाधत्ते मैवमित्यादिना।

(४) अनाभासमिति। तथा च घटस्यापि पृथिवीपदवाच्यत्वादिरूपसाध्यसन्देहात्पक्षतुल्यतेति दृष्टान्तासिद्धिराभासो वक्ररुचिणा भवता देय इति वक्रमार्गोऽयं व्यतिरेकिरूपः स्वीकृत इति भावः।

(५) न वैषम्यमिति। व्यतिरेकसहचारज्ञानजन्येनाप्यन्वयव्याप्तिग्रहेण गदाधरभट्टाचार्यैरन्वयव्याप्त्यनुमितेः स्वीकृतत्वादत्र न हेतोर्व्यतिरेकित्वानुपपत्तिरिति न वैषम्यभावः। ननु यदि व्यतिरेकसहचारो व्यतिरेकव्याप्तिज्ञानं विनैवान्वयव्याप्तिज्ञानमुत्पादयति तर्हि कृतन्तद्ग्राहकोदाहरणादिनाऽतो द्वितीयो हेतुर्व्यतिरेकव्याप्त्यन्वयव्याप्तेरनुमानाद्वेति। एवमपि व्यतिरेकित्वं तादृशहेतौ निरपवादमेवेति न वैषम्यमित्यर्थः।

वैयर्थ्यम्, गृहीतव्याप्तेरेव हेतोः पक्षे उपसंहारात् । तदुक्तम्—

(१)नियम्यत्वनियन्तृत्वे भावयोर्यादृशी मते ।
त एव विपरीते तु विज्ञेये तदभावयोः ॥ इति ।

(२)व्यवहारस्तु गन्धवती पृथिवीत्युपदेशादेव यथा कम्बुग्रीवादिमान् घटपदवाच्य इति । तथा कुत्रचिदेव घृतादौ मृदादौ च गन्धवत्त्वेनोपलक्षणेन पृथिवीत्वे पृथिवीपदप्रवृत्तिनिमित्तत्वं येनोपदेशाद् गृहीतम्, गन्धवत् सर्वं पृथिवीत्वेन प्रवृत्तिनिमित्तेन पृथिवीपदवाच्यं गन्धवत्त्वात् यन्नैवं तन्नैवमिति व्यतिरेकी तस्याप्यवतरत्येव । ननु भेदसाधकव्यतिरेकिणि भेदो वैधर्म्यं स्वरूपभेदो वा अन्योन्याभावो वा ? न तावदाद्यौ प्रत्यक्षत एव तदवगमात् । न तृतीयः अभावभेदस्यापि साध्यत्वेन (३)तदन्योन्याभावस्य तत्राभावात्, (४)तेन सह स्वरूपभेदे साध्ये साध्याननुगमादिति चेन्न अभावप्रतियोगिकान्योन्याभावस्यापि साध्यत्वात् स यद्यतिरिक्तस्तदाऽस्त्येव न चेत् (५)स्वरूपमादाय तत्पर्य्यवसानात । (६)वस्तुतो (७)भिन्न एव तद्वैधर्म्यस्य तदन्योन्याभावव्याप्यत्वात्, (८)न चानवस्था यावत्येवानुभवस्तावत्येवाविश्रामात् अन्यत्र त्वननुभवेनैव

---

(१) नियम्यत्वेति । नियम्यत्वनियन्तृत्वे व्याप्यत्वव्यापकत्वे । तत्साध्यहेतुकान्वयव्याप्तिवत् तत्साध्यहेतुकव्यतिरेकव्याप्तिरपि तत्साध्यहेतुकानुमितिजनकतावच्छेदिकेत्यर्थः ।

(२) व्यवहारसाधकव्यतिरेक्यनुमितिहेतुत्वमपि गन्धवत्त्वादिहेतोर्व्यवस्थापयति व्यवहारस्त्विति ।

(३) ननु पृथिवीतरत्वस्याभावसाधारण्येन तद्भेदस्य साध्यस्य पृथिव्यां सत्त्वात्तदभावस्तत्रानिष्ट एवेत्यत आह तदन्योन्याभावेति । अभावभेदभेदस्यापि यत्किंचिदभावभेदरूपत्वेन साध्यतया पक्षसत्त्वमावश्यकं तत्र सम्भवति अभावभेदस्याधिकरणरूपत्वेन पृथिव्यादिरूपतया तद्भेदस्य पृथिव्यादावसत्त्वादिति भावः ।

(४) तनेति । इतरान्तर्गताभावेन सह स्वरूपभेदे साध्ये तत्र स्वरूपभेदः अन्यत्रान्योन्याभाव इति साध्याननुगमप्रसङ्ग इत्यर्थः ।

(५) स्वरूपमिति । अभावस्वरूपमित्यर्थः तथा चाभावभेदभेदस्य स्वाधिकरणीभूताभावसा[illegible] पक्षवृत्तित्वं निराबाधमिति तात्पर्यम् ।

(६) [illegible]त्वमभावभेदभेदस्यासम्भवि अभावस्य केवलान्वयित्वात्तस्यापि केवलान्वयि[illegible] आह वस्तुत इति ।

(७) भिन्न इति । [illegible]प्रतियोगिकभेदोऽधिकरणभिन्न एव इत्यर्थः । तत्र हेतुमाह तद्वैध[illegible] । [illegible]त्वे भावत्वाभावत्वरूपतद्वैधर्म्यानुपपत्तेरिति भावः ।

(८) [illegible] भेदभेदधारयाऽनवस्था स्यादित्याक्षिपति नचेति ।

विश्रामात्। यत्तु त्रयोदशान्योन्याभावास्त्रयोदशसु प्रसिद्धाः मिलिताः पृथिव्यां साध्यन्ते इति। (१)तत्तुच्छं प्रत्येकं प्रसिद्धेरतन्त्रत्वात् मिलितप्रसिद्धेरभावात् किन्तु निर्गन्धत्वावच्छिन्नप्रतियोगिताकान्योन्याभावः साध्येत प्रतियोगितावच्छेदकभेदेनाभावभेदस्यावश्यकत्वात् स च घटादावेव प्रत्यक्षसिद्ध इत्युक्तत्वात्। आकाशादौ का गतिरिति चेत् आकाशमितरभिन्नं शब्दाश्रयत्वात् यन्नैवं तन्नैवमित्यादौ पक्षैकदेशे यद्यपि न साध्यं प्रसिद्धम् तथापि यत् यद्वैधर्म्यवत् तत् तत्प्रतियोगिकान्योन्याभाववदिति सामान्यप्रवृत्तव्याप्तिबलेन शब्दाश्रयत्वात्यन्ताभाववत्प्रतियोगिकान्योन्याभावस्य पूर्वमेव सिद्धौ केवलं पक्षनिष्ठतया इदानीं बोध्यते वह्निरिव पर्वतनिष्ठतया इत्यन्योऽस्मत्सिद्धान्तः(२) तद्वैधर्म्मस्य तदन्योन्याभावव्याप्यत्वात्। शब्दाश्रयत्वात्यन्ताभाववत्त्वमेव विपक्षे न गृहीतमिति चेत् तर्हि शब्दाश्रयत्वस्य न लक्षणत्वं न वा लिङ्गत्वं विपक्षगामित्वशङ्काग्रस्तत्वादिति ॥ १ ॥

पृथिव्यनन्तरमुद्दिष्टानामपां लक्षणमाह—

रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः ॥ २ ॥

शुक्लमधुरशीता एव रूपरसस्पर्शाः द्रवत्वञ्च सांसिद्धिकं स्नेहस्तु स्वरूपतः (३)। ननु शुक्लमेव रूपमपामित्युयुक्तम् कालिन्दीजलादौ नैल्यस्योपलम्भात्। मधुर एव रस इत्यप्ययुक्तम् जम्बीरकरवीररसादौ आम्लत्वतैक्त्यादेरुपलम्भात्। शीत एव स्पर्श इत्यप्यनुपपन्नम् मध्यन्दिने औष्ण्यस्यैवोपलम्भात्। सांसिद्धिकञ्च द्रवत्वमव्यापकम् हिमकरकादावभावात्(४)। स्नेहस्तु स्वरूपासिद्धोऽतिव्यापकश्च जलेऽननुभवात् घृतादौ पार्थिवेऽनुभवाच्च। न च जलत्वं जातिरेव जललक्षणम् व्यवस्थापकाभावेन तदनुपपत्तेः। न च स्नेहसमवायिकारणतावच्छेदकत्वेन तत्सिद्धिः स्नेहत्वस्य कार्य्याकार्य्यवृत्ति-

---

(१) जलत्वाद्यवच्छिन्नाभावकूटस्यैवात्र साध्यतेति मतं निरस्यति तत्तुच्छमिति।

(२) सिद्धान्त इति। पक्षैकदेशे साध्यप्रसिद्धिवत् सामान्यमुखेन व्याप्तिबलाद्यत्र कुत्राचिद्वस्तुनि साध्यप्रसिद्धिं कृत्वाऽनुमितिनिर्वाह्येति उपस्कारकाराशयः।

(३) स्वरूपत इति। सूत्रस्थरूपादिपदानां तद्विशेषपरत्ववत् स्नेहपदस्य न विशेषपरत्वं किन्तु यथाश्रुतस्नेहपरत्वमिति भावः॥

(४) अभावादिति। रूपादिचतुष्टयघटिततत्तल्लक्षणमव्याप्तमित्यर्थः।

तया कार्य्यतानवच्छेदकत्वात् तस्मांच्छेदकाभावाद् जलं न भिद्यत इति, चेन्मैवम् अभास्वरशुक्लमात्ररूपस्यैव तच्छेदकत्वात् कालिन्दीजलादौ नैल्यस्याश्रयोपाधिकत्वात् वियद्विकीर्णकालिन्दीजले धावल्यस्योपलम्भात् । तेना(१)भास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् अपां लक्षणम् । रसोऽपि मधुर एव जम्बीरकरवीररसाम्ल्यतैक्त्यादेः पार्थिवोपाधिकत्वात् । जले माधुर्य्यं नानुभूयत एवेति चेन्न कषायद्रव्यभक्षणानन्तरं तदभिव्यक्तेः । न च हरीतक्या एव तन्माधुर्य्यं जलाभिव्यङ्ग्यम् तत्र कषायरसस्यैवोपलम्भात् हरीतक्याश्चामलक्यामिव कषाय एव रसः तस्यैवानुभावत् । न च (२)गुणविरोधेन तत्र रसानारम्भः । अवयवानामपि तत्र कषायरसवत्त्वात् षड्रसत्वप्रवादस्तु तत्तद्रसकार्य्यकारित्वनिबन्धनः । चित्ररसस्तु प्रमाणाभावादेव निरस्तः(३) चित्ररूपे तु पटोपलम्भ एव प्रमाणम् सुरभ्यसुरभ्यवयवारम्भस्तु गुणविरोधनिरस्त एव चित्रगन्धे प्रमाणाभावात् । तस्माद्धरीतकीभक्षणानन्तरं यन्माधुर्य्यमुपलभ्यते तत् जलस्यैव, उल्वणता तु द्रव्यविशेषसन्निधानाधीना श्रीखण्डसान्नियोगाज्जले शैत्योल्वणतेव । कर्कटीभक्षणानन्तरन्तु तिक्तता याऽनुभूयते सा कर्कट्या एव तदवयवे जलपानमन्तरेणापि तिक्ततोपलम्भात्, (४)रसनाग्रवर्त्तिपित्तद्रव्यतिक्तताया

---

(१) ननु तथापि शुक्लरूपवत्त्वलक्षणं स्फटिकादावतिव्याप्तमत आह तेनेति । पृथिव्यामतिव्याप्तिवारणायाभास्वरशुक्लेतररूपासमानाधिकरणेति । जले शुक्लरूपसमानाधिकरणजलत्वस्य सत्त्वादसम्भववारणाय शुक्लेतरेति । तेजसि तद्वारणार्थमभास्वरपदं, बोध्यम् । वायुत्वमादायातिप्रसङ्गभङ्गार्थं रूपवद्वृत्तीति । द्रव्यत्वमादाय पृथिव्यामतिव्याप्तिनिरासाय द्रव्यत्वसाक्षाद्व्याप्येति । पटत्वादिवारणाय साक्षादिति । जलघटान्यतरत्वमादाय घटादावतिव्याप्तिवारणाय जातिपदं बोध्यम् ।

(२) गुणविरोधेनेति । एकत्रावयवे कषायोऽन्यत्र मधुरो रसः, एवं चावयवद्वये एकस्य रसस्याभावात्तदारब्धे द्रव्ये कथमेको रसः स्यादिति शङ्कार्थः ।

(३) निरस्त इति । नानाजातीयैरसवदवयवैरारब्धेऽवयविनि रसो नास्त्येवेत्यर्थः । तत्र रसतयाऽवयवरसो गृह्यते न द्रव्यं तत्र तस्या असामर्थ्यात् अवयविनो नीरसत्वेपि क्षत्यभावादिति भावः । एवं चित्रगन्धोपि । चित्ररूपन्तु स्वीकार्यमेवान्यथा नीलाद्यवयवानां पीताद्यारम्भे प्रतिबंधाद्धर्मिणः पीतत्वाद्यनुपपत्त्या चाक्षुषत्वानुपपत्तिः स्यादित्याशयेनाह चित्ररूपन्त्वित्यादिना । विस्तरस्तु मुक्तावल्यादौ द्रष्टव्यः ।

(४) कर्कटीतिक्तताया जलमाधुर्याभिभावकत्वानङ्गीकारेप्याह रसनाग्रेति । पित्तादिदोषाक्रान्तस्य पुरुषस्य शर्करादिरसाभिभावकतिक्तरसानुभवोऽनुभवसिद्ध इति पित्तद्रव्यतिक्ततैव तादृशस्थले जलमाधुर्याभिभाविकेति भावः ।

वा तत्रानुभवात् । तथाच (१)मधुरेतररसासमानाधिकरणरससमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमपां लक्षणम् । (२)एवं शीतस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमपां लक्षणम् । मध्यन्दिने तु यदौष्ण्यं तत्तेजस एव तदन्वयव्यतिरेकानुविधानात् । एवं सांसिद्धिकद्रवत्वं स्वरूपत एव लक्षणम्(३)सांसिद्धिकद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं वा जलत्वम् । स्नेहस्तु गुणविशेषो न तु दुग्धत्वदधित्ववत् सामान्यविशेषः स्निग्धस्निग्धतरस्निग्धतमेति तारतम्यप्रतीतेः । न च जातौ तारतम्यं (४)सम्भवति । ननु भवतु स्नेहो गुणः स तु जले वर्तत इत्यत्र किं प्रमाणमिति चेन्न सक्तुसिकतादौ जलेन संग्रहे तदनुमानात्(५) । सङ्ग्रहो हि स्नेहद्रवत्वकारितः संयोगविशेषः स हि न द्रवत्वमात्राधीनः काचकाञ्चनद्रवत्वेन (६)सङ्ग्रहानुपपत्तेः, नापि स्नेहमात्रकारितः स्त्यानैर्घृतादिभिः सङ्ग्रहानुपपत्तेः, तस्मादन्वयव्यतिरेकाभ्यां स्नेहद्रवत्वकारितः । स च जलेनापि सक्तुसिकतादौ दृश्यमानः स्नेहं जले द्रढयति । इयञ्च प्रत्यक्षोपष्टम्भिकैव युक्तिः स्नेहस्य प्रत्यक्षत्वात् ।(७)घृतादौ तु स्नेह उपष्टम्भकजलनिष्ठः संयुक्तसमवायेन तद्गततया भानात् । एवं तैलरसादिष्वपि । उपष्टम्भकञ्चातिशयितस्नेहमेव जलम्, स्नेहाधिक्यादेव तस्य जलस्य नानलविरोधित्वम् । (८)यदि पृथिवीविशेषगुणः स्नेहः

---

(१) मधुरेतरेति । अत्रापि पूर्ववत्पदव्यावृत्तिः सर्वत्र जातिघटितलक्षणे बोध्या । गुडादौ अतिव्याप्तिवारणाय साक्षात्पदम् गुडादिपृथिव्यामतिव्याप्तिवारणायैव जातिघटितस्यास्य लक्षणस्य स्वीकृतत्वात् ।

(२) कुत्रचिदशीतजलेऽव्याप्तिवारणाय शीतस्पर्शवत्त्व इति लक्षणस्यापि जातिपरत्वमाह एवं शीतेति ।

(३) ननु उत्पत्तिकालावच्छेदेन जले सांसिद्धिकद्रवत्वस्याभावाज्जलेऽव्याप्तमिदं लक्षणमत आह सांसिद्धिकद्रवत्ववदिति ।

(४) सम्भवतीति । नित्यस्य जातिपदार्थस्य तरतमभावानुपपत्तेरित्यर्थः ।

(५) जलं स्नेहवत् सक्त्वादिसंग्रहात् इत्यनुमानप्रकारात् ।

(६) संग्रहानुपपत्तेः = सङ्ग्रहाभावात्, द्रवत्वमात्राधीनत्वे काचकाञ्चनद्रवत्वेन काचकाञ्चनयोः संग्रहः स्यादिति भावः ।

(७) ननु स्नेहवत्त्वलक्षणमतिव्याप्तं घृतादिपृथिव्यां तत्सत्त्वादत आह घृतादाविति ।

(८) ननु स्नेहस्य जलवृत्तित्वमात्राङ्गीकारे घृतवृत्तित्वोपपादनार्थं परम्परा कल्प्या तदपेक्षया तस्य पृथिवीगुणत्वमेव कुतो नाङ्गीक्रियत इत्यत आह यदीति ।

स्यात् सर्वपार्थिववृत्तिः स्यात् गन्धवत् । जलत्वं च द्रव्यत्वसाक्षाद्व्या-
प्यजातिः (१)स्नेहवन्मात्रवृत्तिसंयोगसमवायिकारणतावच्छेदिकाया
जातेः परमाणुसाधारण्येन सिद्धत्वात् ॥ २ ॥

उद्देशक्रमानुरोधेन तेजोलक्षणमाह-

तेजो रूपस्पर्शवत् ॥ ३ ॥

रूपं भास्वरं स्पर्शश्चोष्णस्तद्वत्तेज इत्यर्थः । ननु भास्वरत्वं पर-
प्रकाशकत्वं तादृशञ्च रूपं नोष्मणि न वा चामीकरस्थे भर्जनकपा-
लस्थे वारिस्थे वा तेजसि, शुक्लञ्च रूपमुक्तेषु न क्वापि, उष्णश्च स्प-
र्शो न चान्द्रे न वा चामीकरे तत् कथमेतदिति चेन्न उष्मादौ तेज-
स्त्वेन भास्वररूपानुमानात्(२) । तेजस्त्वमेव तत्र स्वरूपासिद्धमि-
ति चेन्न उष्णस्पर्शवत्त्वेन तदनुमानात् । चामीकरे कथमिति चेत्
तत्र भास्वररूपाभावेऽपि अत्यन्तानलसंयोगेनानुच्छिद्यमानजन्यद्र-
वत्वाधिकरणत्वेन व्यतिरेकिणा तेजस्त्वानुमानादिति वक्ष्यमाण-
त्वात्, भर्जनकपालादिनिष्ठे चोष्णस्पर्शवत्त्वेन तेजस्त्वानुमानात् ।
चतुर्विधं हि तेजः किञ्चिदुद्भूतरूपस्पर्शं यथा सौरादि, किञ्चिदु-
द्भूतरूपमनुद्भूतस्पर्शं यथा चान्द्रम्, किञ्चिदनुद्भूतरूपस्पर्शं
यथा नायनम्, किञ्चिदनुद्भूतरूपमुद्भूतस्पर्शं यथा नैदाघं वारि-
भर्जनकपालादिगतञ्च तेजः । नायनमग्रे साधयिष्यते ॥ ३ ॥

क्रमप्राप्तं वायुलक्षणमाह-

स्पर्शवान् वायुः ॥ ४ ॥

(३)रूपासमानाधिकरणस्पर्शसमानाधिकरणजातिमत्त्वम्१ रसा-
समानाधिकरणानुष्णाशीतस्पर्शसमानाधिकरणजातिमत्त्वम्२ गन्धा-
समानाधिकरणानुष्णाशीतस्पर्शसमानाधिकरणजातिमत्त्वम्३ स्पर्श-

---

(१) जलपरमाणौ स्नेहसमवायिकारणताया असत्त्वात्स्नेहवन्मात्रवृत्तिसंयोगपर्यन्तानुधाव-
नम् । नव्यास्तु स्नेहसमवायिकारणतावच्छेदकत्वेन जन्यजलत्वसिद्धौ तदवच्छिन्नजनकतावच्छेदक-
तया जलत्वसिद्धिरिति वदन्ति ।

(२) ऊष्मा भास्वररूपवान् तेजस्त्वात्प्रदीपवत् इति अनुमानप्रयोगः । ननु स्वरूपासिद्धोयं हेतु-
रतआह उष्णस्पर्शवत्त्वेनेति । ऊष्मा तेजः उष्णस्पर्शवत्त्वाद्वह्निवत् इत्यनेन तेजस्त्वसिद्धेरव्याहतत्वात् ।

(३) पृथिव्यादावतिव्याप्तिवारणाय सर्वत्र लक्षणेऽसमानाधिकरणान्तम् विशेषणम् ।
असम्भवनिव्याप्तिवारणाय च सर्वत्र समानाधिकरणान्तं बोध्यम् । द्वितीयलक्षणे तेजस्यतिप्रसङ्ग-
भङ्गायानुष्णाशीतेति स्पर्शविशेषणम् । तृतीयलक्षणे जलेतिऽव्याप्तिवारणायानुष्णपदं स्पर्श-

तरविशेषगुणासमानाधिकरणविशेषगुणसमानाधिकरणजातिमत्त्वं४ वा वायुलक्षणम् ॥ ४ ॥

नन्वाकाशकालदिगात्मनामपि रूपादिमत्त्वं कथं न लक्षणमत आह–

त आकाशे न विद्यन्ते ॥ ५ ॥

अत्र विदिरुपलब्धिवचनः नोपलभ्यन्ते यतोऽतो न ते रूपादयो (१)नियोगतः–समुच्चयतो विकल्पतो वा वर्तन्ते नभःप्रभृतिषु द्रव्येष्वित्यर्थः । ननु दधिधवलमाकाशमिति कथं प्रतीतिरिति चेन्न मिहिरमहसां विशदरूपाणामुपलम्भात्तथाभिमानात् । कथं तर्हि नीलं नभ इति प्रतीरिति चेन्न सुमेरोर्दक्षिणादिशमाक्रम्य स्थितस्येन्द्रनीलमयशिखरस्य प्रभामालोकयतां तथाभिमानात् । यत्तु सुदूरं गच्छच्चक्षुः परावर्तमानं स्वचक्षुःकनीनिकामाकलयत्तथाभिमानं जनयतीति मतं . तदयुक्तम् (२)पिङ्गलसारनयनानामपि तथाभिमानात् । इहेदानीं रूपादिकमिति–प्रत्ययात् दिक्कालयोरपि रूपादिचतुष्कमिति चेन्न समवयेन पृथिव्यादीनां तल्लक्षणस्योक्तत्वात् न तु सम्बन्धान्तरेणापि इहेदानीं रूपात्यन्ताभाव इत्यपि प्रतीतेः सर्वाधारतैव दिक्कालयोः ॥ ५ ॥

नन्वपां द्रवत्वं लक्षणमुक्तं तदयुक्तम् पृथिव्यामपि द्रवत्वोपलम्भादित्यत आह–

(३)सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम् ॥ ६ ॥

सर्पिरादीनां यद्द्रवत्वमस्ति तदग्निसंयोगान्निमित्तात् न तु सांसिद्धिकम् तादृशञ्चापां लक्षणम् द्रवत्वमात्रन्तु पृथिव्या अद्भिः सामान्यं न तु सांसिद्धिकं द्रवत्वमपीति नातिव्याप्तिरित्यर्थः ॥ ६ ॥

विशेषणम् । मनस्यतिव्याप्तिनिरासार्थमन्त्यलक्षणे विशेषगुणपर्यन्तानुधावनम् । लक्षणचतुष्टयमपि निरवद्यत्वात्संभवति न काप्यरुचिर्लक्षणान्तरग्रहणे इति बोध्यम् ।

(१) नियोगत इति । नियोगत इत्यस्य विवरणं समुच्चयतो विकल्पतो वेति । उभयथापि रूपादय आकाशादौ न वर्तन्ते इत्यर्थः ।

(२) पिङ्गलेति । तत्र कनीनिकानीलरूपाभावान्नीलप्रतीतिर्न स्यादिति भावः ।

(३) सर्पिरिति । सर्पिर्घृतं जतु लाक्षा मधूच्छिष्टं सिक्थकम् ।

ननु तथापि त्रपुसीसलोहादौ तेजसि गतत्वेन तदवस्थैवातिव्याप्तिरित्यत आह—

त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम् ॥ ७ ॥

उपलक्षणञ्चैतत् कांस्यताम्रार(१)कूटपारदादीनामप्युपसङ्ग्रहः । (२)शक्यलक्ष्यसाधारणञ्च अत्यन्ताग्निसंयोगानुच्छिद्यमानजन्यद्रवत्वाधिकरणत्वमेव तथाच सुवर्णादीनामपि द्रवत्वं नैमित्तिकमेव निमित्तस्याग्निसंयोगस्यान्वयव्यतिरेकासिद्धत्वात्, परन्तु पूर्वसूत्रेऽग्निपदमौष्ण्यप्रकर्षवत्तेजःपरम्, इह तु वह्निपरमिति विशेषः । ननु सुवर्णादीनामपि पार्थिवत्वमेव द्रव्यान्तरत्वं वा पीतिमगुरुत्वादेः पार्थिवत्वव्यवस्थापकत्वाद् द्रवत्वानुच्छेदस्य पृथिवीवैधर्म्यस्याप्यनुभवात् द्रव्यान्तरत्वव्यवस्थापकत्वादिति चेन्न सुवर्णं तैजसम् अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवीति व्यतिरेकिणा तैजसत्वसिद्धेः । न च जलपरमाणौ विरुद्धता, द्रवत्वस्यानित्यत्वेन विशेषणीयत्वात् । न च (३)प्रदीपादेः सपक्षाद्धेतोर्व्यावृत्तेरसाधारण्यम् सुवर्णं (४)न पार्थिवमिति साध्यार्थत्वात् । न चात्र गुरुत्वाधारस्य पक्षत्वे बाधः तदतिरिक्तस्य पक्षत्वे चाश्रयासिद्धिः, (५)द्रवत्वाधिकरणत्वेन पक्षत्वात् । न चात्यन्तिक-

---

(१) आरकूटं पित्तलमित्यर्थः ।

(२) शक्येति । सूत्रस्थत्रप्वादिशक्यकांस्यादिलक्ष्यसाधारणश्च धर्भ अत्यन्ताग्निसंयोगानुच्छिद्यमानजन्यद्रवत्वाधिकरणत्वमित्यर्थः । द्रव्यस्याश्रयभेदेन भिन्नत्वेपि अधिकरणताया निरूपकतावच्छेदकैक्येनैक्यादधिकरणतान्तानुधावनम् बोध्यम् ।

(३) प्रदीपादेरिति । आदिपदेन विपक्षभूतपृथिव्यादेर्ग्रहणम् तथा च सपक्षविपक्षव्यावृत्तत्वाद्धेतोरसाधारण्यमित्यर्थः ।

(४) उत्तरयति न पार्थिवमिति । एतत्साध्यपक्षे जलपरमाणौ न विरोधः । तथा चानित्यत्वविशेषणं व्यर्थमिति भावः । हेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यमिति नव्यमते तु तैजसत्वसाध्यकमेवानुमानं तत्र चोक्तविरोधवारणायानित्यत्वं देयमेवेति भावः । जलमध्यस्थघृते व्यभिचारं निरासितुमसति प्रतिबन्धके इत्यपि हेतौ विशेषणं देयम् । घृतादौ तद्वारणाय अत्यन्ताग्निसंयोगेपीति । न चैवं साध्ये सुवर्णस्य द्रव्यान्तरत्वं स्यादिति वाच्यम् न पार्थिवं न जलीयमित्यादिना तत्तद्द्रव्यभेदसिद्धौ परिशेषात्तैजसत्वसिद्धेर्द्रव्यान्तरत्वासंभवात् इति भावः ।

(५) द्रवत्वेति । अत्यन्ताग्निसंयोगेऽनुच्छिद्यमानद्रवत्वाधिकरणत्वेत्यर्थः । एतेनावच्छेदावच्छेदेनानुमितावपि नांशतो बाध इति ध्येयम् ।

त्वं दुर्वचम्, प्रहरपर्य्यन्तमग्निसंयोगेऽप्यनुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वादिति विवक्षितत्वात्। न च तरतमादिप्रत्ययादाश्रयनाशाच्च द्रवत्वनाशोऽप्यवश्यं वाच्य इति वाच्यम् (१)समानाधिकरणद्रवत्वसामग्र्यसमवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्वसामान्यवद्द्रवत्ववत्त्वादित्यस्य हेत्वर्थत्वात्। (२)यद्वा पीतिमगुरुत्वाश्रयः पीतरूपभिन्नरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः प्रहरपर्य्यन्तमनलसंयोगेऽपि पीतरूपभिन्नरूपानाश्रयत्वात् अनलसंयुक्तजलमध्यस्थितपीतपटवत्। ननु चान्धकारे सुवर्णरूपग्रहापत्तिस्तदानीं तद्रूपस्याभिभवाभावात् बलवत्सजातीयग्रहणकृतस्याग्रहणस्याभिभवपदार्थत्वात् इति चेत् तत्र फलबलेन (३)बलवत्सजातियसम्बन्धमात्रस्याभिभवपदार्थत्वात्। तदुक्तम्—

भूसंसर्गवशाच्चान्यरूपं नैव प्रकाशते॥

इति दिक्॥ ७॥

एवं स्पर्शवद्द्रव्यचतुष्कलक्षणप्रकरणं समाप्य वायोर्लक्षणमाश्रयासिद्धमिति तत्परिजिहीर्षया आदावनुमानं प्रमाणमुपन्यस्यानुमानस्यैव प्रथमं दृष्टानुसारेण प्रामाण्यमुपपाद्य वायुसाधनप्रकरणमारभते—

(४)विषाणी ककुद्मान् प्रान्तेबालधिः सास्नावान् इति गोत्वे दृष्टं लिङ्गम्॥ ८॥

---

(१) समानेति। पार्थिवद्रवत्ववृत्तिर्यो द्रवत्वत्वाविशेषोऽग्निसंयोगजन्यध्वंसप्रतियोगिनि काठिनावधौ द्रवत्वे वर्तते स चाग्निसंयोगस्समानाधिकरणद्रवत्वसामग्र्यसमवहितोऽन्यथा तदुत्तरं तत्र द्रवत्वमुत्पद्येत, सौवर्णद्रवत्वत्वस्योक्तध्वंसप्रतियोगिन्यवृत्तित्वात्तदाधिकरणतेजोभागे न व्यभिचारः। कालान्तरावच्छेदेन सर्वस्याग्निसंयोगस्य व्यधिकरणद्रवत्वसामग्रीसमवहितत्वादसिद्धिवारणाय समानाधिकरणेति। सौवर्णद्रवत्वस्यापि तरतमादिप्रत्ययवशादाश्रयनाशाच्चाग्निसंयोगनाश्यत्वादसिद्धिवारणायासमवहितान्तमग्निसंयोगविशेषणम्।

(२) ननु पक्षतावच्छेदकहेत्वोरैक्ये सामानाधिकरण्येन सिद्धिः स्यात् तस्याश्चावच्छेदावच्छेदेनानुमितिंप्रतिबन्धकत्वमतसाधारण्येनाह यद्वेति। साध्यघटकतादृशद्रवद्रव्यं तेज एवेत्यर्थः।

(३) बलवदिति। बलवत्सजातीयं यत्पार्थिवीरूपं तेन सम्बन्धः स्वसमवायिसंयुक्तसमवेतत्वं तस्य सुवर्णरूपे सत्त्वादन्धकारे सुवर्णरूपाग्रह इत्यर्थः।

(४) ननु स्पर्शवान् वायुरिति लक्षणमनुपपन्नं लक्ष्यस्य वायोरेवासिद्धत्वात् नहि तत्र प्रत्यक्षं प्रमाणं रूपाभावादित्यतस्तत्रानुमानं प्रमाणं दर्शयितुमादावनुमानप्रामाण्यं दृढयति विषाणीति। य-

यथा गोत्वं प्रति विषाणादीनि लिङ्गानि गृहीतव्याप्तिकानि तथाऽतीन्द्रियवाय्वादिद्रव्यपञ्चकलिङ्गान्यपि सामान्यतो दृष्टानि प्रमाणभावमासादयन्तीति भावः। अत्र यद्यपि विषाणित्वमात्रं न गोत्वे लिङ्गं महिषादौ व्यभिचारात्, न च सास्नादिमत्त्वं विशेषणम् विशेष्यस्य व्यर्थत्वापत्तेः तथापि गोविषाणे महिषमेषादिविषाणापेक्षया वैलक्षण्यमाकलयतां धूम इव ते ते विशेषा लिङ्गभावमासादयन्त्येव विषाणेष्वपि ऋजुत्ववक्रत्वकठिनत्वसुकुमारत्वह्रस्वत्वदीर्घत्वादयः। ते च विशेषाः निपुणतरवेद्याः सन्त्येव तथाच व्यवहितविप्रकृष्टगोपिण्डे अयं गौर्विषाणविशेषवत्त्वात् पूर्वानुभूतगोपिण्डवदित्यनुमानमप्रत्यूहमेव। एवं ककुद्वत्तापि लिङ्गं गोत्वे। प्रान्तेवालधिमत्त्वमपि स्वतन्त्रमेव लिङ्गं गोत्वे, प्रान्ते वाला आधीयन्तेऽस्मिन्निति प्रान्तेवालधिः–पुच्छविशेषः अलुक्समासात् गोपुच्छ एवान्तेवालधिशब्देनोच्यते, न हि यथा गोपुच्छेषु प्रान्तेवालधित्वं तथाऽश्वमेषादिपुच्छेषु, तेषां सामस्त्येन बालमयत्वात्, महिषादिपुच्छे तादृशी प्रलम्बता नास्तीति वैलक्षण्यात्। अन्तेवालधिमत्त्वमपि गोत्वे लिङ्गं मतुब्लोपात् गोपिण्ड उच्यते, तथाचायं गौः प्रान्तेवालधिमत्त्वात् पूर्वानुभूतगोपिण्डवत्। सास्नावत्ता तु प्रसिद्धैव गोत्वे लिङ्गम्॥ ८॥

एवं सकललोकयात्रावाहिनोऽनुमानस्य दृष्टानुसारेण प्रामाण्यमभिधाय वायुसाधनप्रकरणमारिप्समान आह––

स्पर्शश्च वायोः॥ ९॥

लिङ्गमिति शेषः। चकारात् शब्दधृतिकम्पाः समुच्चीयन्ते। ननूपलभ्यमानस्पर्शः पृथिव्या एवानुद्भूतरूपायाः स्यादिति चेन्न उद्भूतस्य पृथिवीस्पर्शस्योद्भू(१)तरूपनान्तरीयकत्वात्। तथाच (२)यो-

---

था गोत्वे विषाणादीनि लिङ्गानि सामान्यतो दृष्टानि लोकप्रसिद्धानि तथाऽतीन्द्रियवायौ स्पर्शादीनि लिङ्गानि प्रमाणानीति सूत्रद्वयार्थः। अत्रायमनुमानप्रयोगः अयं गौर्विषाणविशेषवत्त्वात् ककुद्मत्वात्, पुच्छविशेषवत्त्वात्, सास्नावत्वाद्वा पूर्वानुभूतगोपिण्डवत् इति।

(१) उद्भूतेति। उद्भूरूपनान्तरीयकत्वादुद्भूतरूपव्याप्यत्वादुद्भूतस्पर्शस्येत्यर्थः।

(२) योयमिति। अनेन पृथिव्याद्यसमवेतस्पर्शस्य पक्षत्वं सूचितम् तेन सिद्धसाधनाशंका दूरीकृता इदमेव न पृथिव्यादित्रयात्मक इत्याद्यनुमानेन उपस्कारकार अनुपदमेवाहेति भावः।

ऽयं स्पर्शोऽनुभूयते स क्वचिदाश्रितः स्पर्शत्वात् पृथिव्यादिस्पर्शवादिति सामान्यतोदृष्टेन स्पर्शाश्रयसिद्धौ स्पर्शाश्रयो न पृथिव्यादित्रयात्मकः नीरूपत्वात् नाकाशादिपञ्चात्मकः स्पर्शवत्त्वादितीतरबाधसहकृते- नाष्टद्रव्यातिरिक्तद्रव्यसिद्धिः । एवं शब्दविशेषोऽपि वायौ लिङ्गम्, तथाहि (१)असति रूपवद्द्रव्याभिघाते योऽयं पर्णादिशब्दसन्तानः स स्पर्शवद्वेगवद्द्रव्याभिघातनिमित्तकः अविभज्यमानावयवद्रव्यस- म्बन्धिशब्दसन्तानत्वात् दण्डाभिघातजभेरीशब्दसन्तानवत् । रूपव- द्द्रव्याभिघातव्यतिरेकस्तु योग्यानुपलब्धिगम्यः । तच्च स्पर्शवद्वेगव- द्द्रव्यमष्टद्रव्यातिरिक्तमेव परिशेषात्(२) । एवं धृतिविशेषोऽपि वा- योर्लिङ्गम् तथाहि तृणतूलस्तनयित्नुविमानानां नभसि धृतिः स्पर्श- वद्वेगवद्द्रव्यसंयोगजा चेतनानधिष्ठितद्रव्यधृतित्वात् प्रवाहे तृण- काष्ठनौकादिधृतिवत् । (३)अभिध्यानकृतविषादिधृतौ च अस्मदा- द्यधिष्ठानमेव । एवं पक्षिकाण्डादिधृतावपि । न चेश्वराधिष्ठितत्वेन हेतुविशेषणासिद्धिः चेतनपदेन तदितरस्य विवक्षितत्वात् । एवं कम्पोऽपि वायुसत्त्वे लिङ्गम् तथाहि इदं रूपवद्द्रव्याभिघातमन्तरेण तृणादौ कर्म स्पर्शवद्वेगवद्द्रव्याभिघातजं (४)गुरुत्वप्रयत्नवदात्मसं- योगाजन्यकर्मत्वात् नदीपूराहतवेतसवनकर्मवदिति । गुरुत्वपदेना- दृष्टवदात्मसंयोगद्रवत्वसंस्काराणामुपग्रहः तेन तदजन्यकर्मत्वं हेतुः । ननु प्रत्यक्ष एव वायुः किमत्र लिङ्गगवेषणयेति चेन्न वायुर्न प्रत्यक्षः नीरूपबहिर्द्रव्यत्वात् गगनवदित्यनुमानादतीन्द्रियत्वस्यैव सिद्धेः । ननु वायुः प्रत्यक्षः स्पर्शाश्रयत्वाद् घटवदिति प्रत्यक्षत्वानुमानमिति चेन्न उद्भूतरूपवत्त्वस्यात्रोपाधित्वात् । न च रूपादावात्मनि च

---

(१) असतीति । इदं पृथिव्याद्यभिघातजन्यस्पर्शे व्यभिचारवारकं पक्षविशेषणम् । वं- शस्फोटनजन्येऽवयवद्वयजन्यशब्दे व्यभिचारवारणाय हेतौ अविभज्यमानावयवेति ।

(२) परिशेषादिति । स्पर्शवद्वेगवद्द्रव्यं न पृथिव्याद्यात्मकं नीरूपत्वादित्यादिपूर्वोक्तरीत्या परिशेषानुमानं बोध्यम् ।

(३) चेतनानधिष्ठितपदस्य फलमाहाभिध्यानेति । एवमिति । वृक्षेपि भग्नक्षतसंरोहणाद्यनु- मितप्राणवत्तया चेतनत्वस्य शास्त्रोक्तत्वान्नाकाशे तत्काण्डधृतौ व्यभिचार इत्यर्थः ।

(४) गुरुत्वेति । पतनक्षेपणादिकर्मसु व्यभिचारनिरासायाजन्यान्तं हेतौ विशेषणम् । अत्र स्तेनाकर्षककांस्यादिकर्तृकतस्कराभिमुखगमनादिकर्मसु व्यभिचारवारणाय गुरुत्वपदं लक्षणयाऽदृष्ट- वदात्मसंयोगादिपरं बोध्यन्तदेवाह गुरुत्वपदेनेति ।

साध्याव्यापकमेतत्, (१)पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नस्य साधनधर्मावच्छिन्नस्य वा साध्यस्य व्यापकत्वात्। न च चाक्षुषप्रत्यक्षत्वे (२)तत्तन्त्रं तत्रैव तदन्वयव्यतिरेकानुविधानात् स्पार्शनप्रत्यक्षत्वे तु योग्यस्पर्शवत्तामात्रस्य तन्त्रतेति वाच्यम् रूपान्वयव्यतिरेकयोरुभयत्रापि तन्त्रत्वात्, न (३)ह्युभयसिद्धस्पर्शेनैव प्रत्यक्षता रूपस्य ग्रहमन्तरेण दृष्टा। (४)किञ्च यदि वायुः प्रत्यक्षः स्यात् सङ्ख्यादिसामान्यगुणोपलम्भेऽपि तन्त्रं स्यात्। नन्वस्त्येव फूत्कारादौ सङ्ख्यायाः परिमाणस्य च हस्तवितस्त्यादेः उभयपार्श्ववर्त्तिनोर्वाय्वोः पृथक्त्वस्य च परत्वापरत्वयोश्च प्रत्यक्षता वायुजातीयस्य व्यक्तिपरतया तु न तत्रापि नियमः पृष्ठलग्नवस्त्रादौ तदनुपलम्भादिति चेन्न व्यक्तिपरतयैव नियमात् पृष्ठलग्नवस्त्रादौ चार्जवावस्थाने सङ्ख्यादीनां ग्रहणात्, अनार्जवावस्थानदोषात्तु तदग्रहः। (५)उद्भूतरूपस्पर्शौ मिलितावेव बहिर्द्रव्यप्रत्यक्षत्वे तन्त्रे प्रभाया नयनगतपीतद्रव्यस्य चन्द्रमहसश्च स्पर्शानुद्भवादप्रत्यक्षत्वम् निदाघोष्मणोर्विभक्तावयवाप्यद्रव्याणाञ्च रूपानुद्भवादप्रत्यक्षत्वमिति न्यायवार्त्तिकतात्पर्य्यटीकाकृतः। (६)स्पर्शानुद्भवेऽपि प्रभादीनां प्रत्यक्षतैव अत एव चान्द्रालोके नभसि पक्षिकाण्डादिसंयोगविभागयोः प्रत्यक्ष-

---

(१) पक्षधर्मेति। स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजन्यत्वरूपोपाधावव्याप्तिवारणाय तस्यावश्यकत्वादित्यर्थः।

(२) तत्तन्त्रमिति। उद्भूतरूपं चाक्षुषप्रत्यक्ष एव हेतुरित्यर्थः।

(३) उभयसिद्धेति। प्राचीननवीनमतसिद्धस्पर्शस्य स्पार्शनप्रत्यक्षे कारणत्वेपि रूपस्यापि कारणत्वं बोध्यमिति प्राञ्चः। एवञ्च तन्मते बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति रूपस्य हेतुत्वमिति भावः।

(४) ननु स्पर्शस्य हेतुत्वमेव बहिर्द्रव्यप्रत्यक्षे कुतो नाङ्गीक्रियते प्रभां पश्यामीतिवत् वायुं स्पृशामीत्यनुभवस्यापलपितुमशक्यात्वत्तथाच बहिर्द्रव्यप्रत्यक्षमात्रे न रूपं कारणमित्यतो दोषान्तरमाह किञ्चेति।

(५) ननु रूपस्य बहिर्द्रव्यप्रत्यक्षे कारणत्वे प्रभायाः संख्यादिज्ञानापत्तिः, स्पर्शस्य तत्त्वे वायुगतसंख्यादिपरिच्छेदापत्तिस्तथा च किं कारणमित्यत्र विनिगमनाविरह इत्यत्रोद्योतकरवाचस्पतिमिश्रयोर्मतमाह उद्भूतरूपस्पर्शाविति।

(६) वायुप्रत्यक्षानङ्गीकर्तृप्राचीनमतमाह स्पर्शानुद्भवेपीति। नव्यास्तु प्रभेव वायुप्रत्यक्षस्याप्यनुभवसिद्धतया रूपस्पर्शयोर्न कस्यापि कारणत्वम्। बहिर्द्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न किञ्चित्। आत्मावृत्तिशब्दान्यविशेषगुणवत्त्वं वा प्रयोजकमस्तु वायुप्रभयोः संख्याद्यप्रत्यक्षं क्वचिद्दोषादित्याहुः।

तैवेति सम्प्रदायविदः । न चोद्भूतस्पर्शवत्त्वं सामान्यतो बहिर्द्रव्यप्रत्यक्षताप्रयोजकमिति वाच्यम्, इन्द्रनीलप्रभाया अप्रत्यक्षतापत्तेः । न चोद्भूतविशेषगुणवत्त्वमेव तन्त्रम् आकाशस्यापि प्रत्यक्षतापत्तेः । न च जन्यमहत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वं तथा रसनाग्रवर्त्तिपित्तद्रव्यस्य तैत्तयोद्भवेऽप्यप्रत्यक्षत्वात्, तस्मादुद्भतरूपवत्त्वमेवात्मेतरद्रव्यप्रत्यक्षतातन्त्रम् तच्च वायौ नास्तीत्यप्रत्यक्षो वायुः ॥९॥

ननु प्रत्यक्षतो दृष्टमिह लिङ्गं नास्ति न हि वह्निधूमयोरिवेह प्रत्यक्षेण व्याप्तिग्रहः । किञ्च पृथिव्याद्यन्यतमस्यैव स्पर्शोऽप्ययं भविष्यतीत्यत आह—

न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ॥ १० ॥

अयं स्पर्शो यः पक्षः क्रियते स दृष्टानां पृथिव्यप्तेजसां न भवति रूपासहचरत्वात्, तथाचायं स्पर्शः क्वचिदाश्रित इत्यनुमेयमित्यदृष्टलिङ्गः । सामान्यतोदृष्टलिङ्गोऽपि पक्षधर्मताबलादायात इत्यर्थः । यद्यपि दृष्टमेव स्पर्शादिचतुष्कं लिङ्गमिति तथापि वायुना सहागृहीतव्याप्तिकत्वाददृष्टलिङ्गत्वमुक्तम् न ह्ययं धर्मी वायुरिति प्रतिज्ञाय वायुः साधयितुं शक्यते, तथाच सामान्यतोदृष्टादेवेतरबाधसहकृताद्वायुरिति भावः ॥ १० ॥

उपलभ्यमानस्पर्शाश्रयमवयविनं साधयित्वा परमाणुलक्षणं तु साधयितुमाह—

अद्रव्यवत्त्वेन द्रव्यम् ॥ ११ ॥

द्रव्यमाश्रयभूतमस्यास्तीति द्रव्यवत् न द्रव्यवत् अद्रव्यवत् द्रव्यानाश्रितमित्यर्थः । (१)तथा चाकाशवत् परमाणुलक्षणो वायुर्द्रव्यम् अन्येषां पदार्थानां द्रव्याश्रितत्वात् । आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य इत्यभिधानात् परमाणुभ्यां द्व्यणुकारम्भात् द्व्यणुकादिप्रक्रमेणावयविनो महत आरम्भस्योपपादनीयत्वादिति ॥ ११ ॥

वायुपरमाणोर्द्रव्यत्वसाधकं हेतुद्वयं समुच्चिन्वन्नाह—

(१) तथा चेति । अत्रायं प्रयोगः परमाणुरूपो वायुर्द्रव्यं द्रव्यानाश्रितत्वादाकाशवत् इति । एतेन द्रव्यासमवेतत्वेन हेतुना परमाणावद्रव्यत्वसाधने द्रव्यत्वव्याप्यावयवत्वनिवृत्तौ परमाणुसाधकानुमाने बाध इति निरस्तम् तद्धेतोराकाशे व्यभिचारात् ।

परमाणुलक्षणवायोरिति शेषः । द्रव्यं हि समवायिकारणासमवायिकारणान्यतरनाशान्नश्यति परमाणोस्तु निरवयवतया न तदुभयमस्ति तथाच विनाशकाभावान्न विनश्यति । क्रियावत्त्वे गुणवत्त्वे च हेतौ सावयवत्वमुपाधिः । स च पक्षधर्म(१)द्रव्यत्वावच्छिन्नसाध्यव्यापकः केवलसाध्यव्यापकस्तु प्रागभावप्रतियोगित्वमुपाधिः ॥ १३ ॥

द्व्यणुकादिप्रक्रमेणारम्भसिद्धौ सिद्धमपि वायुनानात्वं प्रकारान्तरेणापि साधयितुमाह—

(२)वायोर्वायुसंमूर्च्छनं नानात्वलिङ्गम् ॥ १४ ॥

वायुसंमूर्च्छनमिति । वाय्वोर्वायूनां वा संमूर्च्छनं संयोगविशेषः । स च समानवेगयोर्विरुद्धदिक्क्रिययोः सन्निपातः । स च तृणतूलकादेरूर्द्ध्वगमनेनानुमीयते । वाय्वोरूर्द्ध्वगमनस्य सन्निपातस्य चातीन्द्रियत्वात् । तृणादीनान्तु प्रत्यक्षाणामूर्द्ध्वगमनलक्षणायाः क्रियायाः प्रत्यक्षायाः स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरजन्यत्वमनुमीयते । तथाहि तिर्य्यग्गमनस्वभावस्य वायोरूर्द्ध्वगमनं परस्परप्रतीघातमन्तरेणानुपपद्यमानं परस्परप्रतीघातं साधयति नदीपयःपूरयोस्तथादर्शनात् (३)तदूर्द्ध्वगमनञ्च तृणाद्यूर्द्ध्वगमनानुमेयं न हि तृणादीनामूर्द्ध्वगमनं स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरद्विनेति ॥ १४ ॥

नन्वदृष्टलिङ्गो वायुरित्युक्तं तथाच कथमेतादित्यत आह—

वायुसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ १५ ॥

दृष्टं हि लिङ्गं यत्र प्रत्यक्षेण व्याप्तिग्रहस्तदुच्यते यथा धूमोऽग्नेः ।

---

(१) स चासावयवत्वमुपाधिः कर्मान्तर्भावेणानित्यत्वाव्यापक अत आहोपस्कारकृद्द्रव्यत्वावच्छिन्नेति ।

(२) ननु आकाशवद्वायुरपि कथमेक एव नाङ्गीक्रियत इत्यत आह वायोरिति । अत्र वायुत्वं स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदवद् उक्तोभयसम्बन्धेन संमूर्च्छनवत्वात् नदीपूरत्ववदित्यनुमानप्रयोगो बोध्यः । संमूर्छनमेव कुत इति चेत् वायुः सम्मूर्च्छनवान् तृणाद्यूर्ध्वगमनात् इत्यनेन तत्सिद्धेः ।

(३) ननु तथापि वायोरूर्ध्वगतिः कथं सेत्स्यतीत्यत्राह तदूर्ध्वगमनञ्चेति । तृणाद्यूर्ध्वगतिः असतिरूपवद्द्रव्याभिघाते स्पर्शवद्वेगवद्द्रव्याभिघातजन्या ऊर्ध्वगतित्वात्कराभिहतकन्दुकोर्ध्वगतिवदित्यनेन तादृशद्रव्यवायूर्ध्वगतिसिद्धेः ।

(१)क्रियावत्त्वाद् गुणवत्त्वाच ॥ १२ ॥

वायुपरमाणुर्द्रव्यमिति शेषः। यद्यपि द्रव्यत्वे सिद्धे क्रियावत्त्वं गुणवत्त्वञ्च सिध्यति तत्सिद्धौ च द्रव्यत्वासिद्धिरित्यन्योन्याश्रयः तथाप्युपलभ्यमानस्पर्शाश्रयस्यावयविनो मूलभूतस्य परमाणोरसमवायिकारणसंयोगान्यथानुपपत्त्या क्रियावत्त्वम्, अवयविस्पर्शरूपादेः कारणगुणपूर्वकत्वनियमाद् गुणवत्त्वञ्च सिद्धं ताभ्याञ्च द्रव्यत्वमित्यदोषः । तत्र क्रियावत्त्वं (२)सपक्षैकदेशवृत्ति गुणवत्त्वञ्च सपक्षव्यापकम् । चकारात् समवायिकारणत्वं द्रव्यत्वसाधकं समुच्चिनोति। ननु परमाणावेव न प्रमाणं कस्य द्रव्यत्वं साध्यत इति चेन्न स्थूलकार्य्यस्य क्रियाविभागादिन्यायेन भज्यमानस्याल्पतरतमादिभावात् यतो नाल्पीयः स एव परमाणुः। अवयवावयविप्रसङ्गस्यानवधित्वे अनन्तावयवत्वाविशेषे सुमेरुसर्षपादीनां परिमाणाविशेषापत्तिः कारणसंख्याविशेषमन्तरेण परिमाणप्रचययोरपि परिमाणभेदं प्रत्यतन्त्रत्वात्। न च विनाशावधिरेवायम् अवयवावयविप्रसङ्गः अन्त्यस्य निरवयवत्वेन विनाशानुपपत्तेः सावयवत्वे च निरवधित्वापत्तेस्तत्र च दोषस्योक्तत्वात्। ननु त्रुटिरेवावधिर्दृश्यमानत्वाददृश्यमानकल्पनायां मानाभावादिति [illegible] तस्य चाक्षुषद्रव्यतया महत्त्वानेकद्रव्यत्वयोरावश्यकत्वात् (३)तस्मात् त्रसरेण्ववयवावयव एव परमाणुर्यथा पृथिव्यादौ तथा वायावपीति सिद्धो वायुपरमाणुः॥ १२ ॥

(४)ननु क्रियावत्त्वाद् गुणवत्त्वाच्च घटादिवत् परमाणोरनित्यत्वमनुमेयमत आह—

अद्रव्यत्वेन नित्यत्वमुक्तम् ॥ १३ ॥

---

(१) ननु द्रव्यासमवेतत्वस्य व्यभिचरितत्वेपि निष्क्रियत्वेन निर्गुणत्वेन च द्रव्यत्वाभावः साधनीय इत्याशंक्य द्रव्यत्वसाधनमुखेनोक्तहेत्वोः स्वरूपासिद्धिं प्रदर्शयन्नाह क्रियावत्त्वाद्गुणवत्त्वादिति सूत्रेण। (२) सपक्षेति। गगने तदभावादित्यर्थः।

(३) तस्मादिति। तथा च त्रसरेणुः सावयवः चाक्षुषत्वाद्घटवदित्यनुमानेन द्व्यणुकसिद्धौ द्व्यणुकः सावयवः महदारम्भकत्वात्कपालवदित्यनुमानेन परमाणुसिद्धिः इत्यर्थः।

(४) ननु क्रियावत्त्वं गुणवत्त्वञ्च द्रव्यत्वसाधकं हेतुद्वयं स्वरूपासिद्धमन्यथा तेनैव घटादिकं निदर्शनीकृत्यानित्यत्वमपि परमाणोः स्यादित्याशंक्य समाधत्ते नन्वित्यादिना। तथाचानित्यत्वसाधकक्रियावत्त्वादेः सोपाधिकत्वेन तदपेक्षया द्रव्यत्वेन निरुपाधिकेन नित्यत्वमेव युक्तमिति सूत्रतात्पर्यम्।

परमाणुलक्षणवायोरिति शेषः । द्रव्यं हि समवायिकारणासमवायिकारणान्यतरनाशान्नश्यति परमाणोस्तु निरवयवतया न तदुभयमस्ति तथाच विनाशकाभावान्न विनश्यति । क्रियावत्त्वे गुणवत्त्वे च हेतौ सावयवत्वमुपाधिः । स च पक्षधर्म(१)द्रव्यत्वावच्छिन्नसाध्यव्यापकः केवलसाध्यव्यापकस्तु प्रागभावप्रतियोगित्वमुपाधिः ॥ १३ ॥

द्व्यणुकादिप्रक्रमेणारम्भसिद्धौ सिद्धमपि वायुनानात्वं प्रकारान्तरेणापि साधयितुमाह—

(२)वायोर्वायुसंमूर्च्छनं नानात्वलिङ्गम् ॥ १४ ॥

वायुसंमूर्च्छनमिति । वाय्वोर्वायूनां वा संमूर्च्छनं संयोगविशेषः । स च समानवेगयोर्विरुद्धदिक्क्रिययोः सन्निपातः । स च तृणतूलकादेरूर्द्ध्वगमनेनानुमीयते । वाय्वोरूर्द्ध्वगमनस्य सन्निपातस्य चातीन्द्रियत्वात् । तृणादीनान्तु प्रत्यक्षाणामूर्द्ध्वगमनलक्षणायाः क्रियायाः प्रत्यक्षायाः स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरजन्यत्वमनुमीयते । तथाहि तिर्य्यग्गमनस्वभावस्य वायोरूर्द्ध्वगमनं परस्परप्रतीघातमन्तरेणानुपपद्यमानं परस्परप्रतीघातं साधयति नदीपयःपूरयोस्तथादर्शनात् (३)तदूर्द्ध्वगमनञ्च तृणाद्यूर्द्ध्वगमनानुमेयं न हि तृणादीनामूर्द्ध्वगमनं स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरद्विनेति ॥ १४ ॥

नन्वदृष्टलिङ्गो वायुरित्युक्तं तथाच कथमेतादित्यत आह—

वायुसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ १[illegible] ॥

दृ[illegible]लिङ्गं यत्र प्रत्यक्षेण व्याप्तिग्रहस्तदुच्यते यथा धूमोऽग्नेः ।

---

(१) स चासावयवत्वमुपाधिः कर्मान्तर्भावेणानित्यत्वाव्यापक अत आहोपस्कारकृद्द्रव्यत्वावच्छिन्नेति ।

(२) ननु आकाशवद्वायुरपि कथमेक एव नाङ्गीक्रियत इत्यत आह वायोरिति । अत्र वायुत्वं स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदवत् उक्तोभयसम्बन्धेन संमूर्च्छनवत्वात् नदीपूरत्ववदित्यनुमानप्रयोगो बोध्यः । संमूर्छनमेव कुत इति चेत् वायुः सम्मूर्च्छनवान् तृणाद्यूर्ध्वगमनात् इत्यनेन तत्सिद्धेः ।

(३) ननु तथापि वायोरूर्ध्वगतिः कथं सेत्स्यतीत्यत्राह तदूर्ध्वगमनञ्चेति । तृणाद्यूर्ध्वगतिः असतिरूपवद्द्रव्याभिघाते स्पर्शवद्वेगवद्द्रव्याभिघातजन्या ऊर्ध्वगतित्वात्कराभिहतकन्दुकोर्ध्वगतिवदित्यनेन तादृशद्रव्यवायूर्ध्वगतिसिद्धेः ।

(१)क्रियावत्त्वाद् गुणवत्त्वाच्च ॥ १२ ॥

वायुपरमाणुर्द्रव्यमिति शेषः । यद्यपि द्रव्यत्वे सिद्धे क्रियावत्त्वं गुणवत्त्वञ्च सिध्यति तत्सिद्धौ च द्रव्यत्वसिद्धिरित्यन्योन्याश्रयः तथाप्युपलभ्यमानस्पर्शाश्रयस्यावयविनो मूलभूतस्य परमाणोरसमवायिकारणसंयोगान्यथानुपपत्त्या क्रियावत्त्वम्, अवयविस्पर्शरूपादेः कारणगुणपूर्वकत्वनियमाद् गुणवत्त्वञ्च सिद्धं ताभ्याञ्च द्रव्यत्वमित्यदोषः । तत्र क्रियावत्त्वं (२)सपक्षैकदेशवृत्ति गुणवत्त्वञ्च सपक्षव्यापकम् । चकारात् समवायिकारणत्वं द्रव्यत्वसाधकं समुच्चिनोति । ननु परमाणावेव न प्रमाणं कस्य द्रव्यत्वं साध्यत इति चेन्न स्थूलकार्य्यस्य क्रियाविभागादिन्यायेन भज्यमानस्याल्पतरतमादिभावात् यतो नाल्पीयः स एव परमाणुः । अवयवावयविप्रसङ्गस्यानवधित्वे अनन्तावयवत्वाविशेषे सुमेरुसर्षपादीनां परिमाणाविशेषापत्तिः कारणसंख्याविशेषमन्तरेण परिमाणप्रचययोरपि परिमाणभेदं प्रत्यतन्त्रत्वात् । न च विनाशावधिरेवायम् अवयवावयविप्रसङ्गः अन्त्यस्य निरवयवत्वेन विनाशानुपपत्तेः सावयवत्वे च निरवधित्वापत्तेस्तत्र च दोषस्योक्तत्वात् । ननु त्रुटिरेवावधिर्दृश्यमानत्वाददृश्यमानकल्पनायां मानाभावादिति — तस्य चाक्षुषद्रव्यतया महत्त्वानेकद्रव्यत्वयोरावश्यकत्वात् (३)तस्मात् त्रसरेण्ववयवावयव एव परमाणुर्यथा पृथिव्यादौ तथा वायावपीति सिद्धो वायुपरमाणुः ॥ १२ ॥

(४)ननु क्रियावत्त्वाद् गुणवत्त्वाच्च घटादिवत् परमाणोरनित्यत्वमनुमेयमत आह—

अद्रव्यत्वेन नित्यत्वमुक्तम् ॥ १३ ॥

---

(१) ननु द्रव्यासमवेतत्वस्य व्यभिचरितत्वेऽपि निष्क्रियत्वेन निर्गुणत्वेन च द्रव्यत्वाभावः साधनीय इत्याशंक्य द्रव्यत्वसाधनमुखेनोक्तहेत्वोः स्वरूपासिद्धिं प्रदर्शयन्नाह क्रियावत्त्वाद्गुणवत्त्वादिति सूत्रेण । (२) सपक्षेति । गगने तदभावादित्यर्थः ।

(३) तस्मादिति । तथा च त्रसरेणुः सावयवः चाक्षुषत्वाद्घटवदित्यनुमानेन द्व्यणुकसिद्धौ द्व्यणुकः सावयवः महदारम्भकत्वात्कपालवदित्यनुमानेन परमाणुसिद्धिः इत्यर्थः ।

(४) ननु क्रियावत्त्वं गुणवत्त्वञ्च द्रव्यत्वसाधकं हेतुद्वयं स्वरूपासिद्धमन्यथा तेनैव घटादिकं निदर्शनीकृत्यानित्यत्वमपि परमाणोः स्यादित्याशंक्य समाधत्ते अद्रव्यत्वेनेत्यादिना । तथा चानित्यत्वसाधकक्रियावत्त्वादेः सोपाधिकत्वेन तदपेक्षया द्रव्यत्वेन निरुपाधिकेन नित्यत्वमेव युक्तमिति सूत्रतात्पर्यम् ।

परमाणुलक्षणवायोरिति शेषः । द्रव्यं हि समवायिकारणासमवायिकारणान्यतरनाशान्नश्यति परमाणोस्तु निरवयवतया न तदुभयमस्ति तथाच विनाशकाभावान्न विनश्यति । क्रियावत्त्वे गुणवत्त्वे च हेतौ सावयवत्वमुपाधिः । स च पक्षधर्म(१)द्रव्यत्वावच्छिन्नसाध्यव्यापकः केवलसाध्यव्यापकस्तु प्रागभावप्रतियोगित्वमुपाधिः ॥ १३ ॥

द्व्यणुकादिप्रक्रमेणारम्भसिद्धौ सिद्धमपि वायुनानात्वं प्रकारान्तरेणापि साधयितुमाह—

(२)वायोर्वायुसंमूर्च्छनं नानात्वलिङ्गम् ॥ १४ ॥

वायुसंमूर्च्छनमिति । वाय्वोर्वायूनां वा संमूर्च्छनं संयोगविशेषः । स च समानवेगयोर्विरुद्धदिक्क्रिययोः सन्निपातः । स च तृणतूलकादेरूर्द्ध्वगमनेनानुमीयते । वाय्वोरूर्द्ध्वगमनस्य सन्निपातस्य चातीन्द्रियत्वात् । तृणादीनान्तु प्रत्यक्षाणामूर्द्ध्वगमनलक्षणायाः क्रियायाः प्रत्यक्षायाः स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरजन्यत्वमनुमीयते । तथाहि तिर्य्यग्गमनस्वभावस्य वायोरूर्द्ध्वगमनं परस्परप्रतीघातमन्तरेणानुपपद्यमानं परस्परप्रतीघातं साधयति नदीपयःपूरयोस्तथादर्शनात् (३)तदूर्द्ध्वगमनञ्च तृणाद्यूर्द्ध्वगमनानुमेयं न हि तृणादीनामूर्द्ध्वगमनं स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरद्विनेति ॥ १४ ॥

नन्वदृष्टलिङ्गो वायुरित्युक्तं तथाच कथमेतादित्यत आह—

वायुसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ १५ ॥

दृष्टं हि लिङ्गं यत्र प्रत्यक्षेण व्याप्तिग्रहस्तदुच्यते यथा धूमोऽग्नेः।

---

(१) स चासावयवत्त्वमुपाधिः कर्मान्तर्भावेणानित्यत्वाव्यापक अत आहोपस्कारकृद्द्रव्यत्वावच्छिन्नेति ।

(२) ननु आकाशवद्वायुरपि कथमेक एव नाङ्गीक्रियत इत्यत आह वायोरिति । अत्र वायुत्वं स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदवत् उक्तोभयसम्बन्धेन संमूर्च्छनवत्वात् नदीपूरत्ववदित्यनुमानप्रयोगो बोध्यः । संमूर्छनमेव कुत इति चेत् वायुः सम्मूर्च्छनवान् तृणाद्यूर्ध्वगमनात् इत्यनेन तत्सिद्धेः ।

(३) ननु तथापि वायोरूर्ध्वगतिः कथं सेत्स्यतीत्यत्राह तदूर्ध्वगमनञ्चेति । तृणाद्यूर्ध्वगतिः असतिरूपवद्द्रव्याभिघाते स्पर्शवद्वेगवद्द्रव्याभिघातजन्या ऊर्ध्वगतित्वात्कराभिहतकन्दुकोर्ध्वगतिवदित्यनेन तादृशद्रव्यवायूर्ध्वगतिसिद्धेः ।

वायुसन्निकर्षे च वायुना सहाविनाभावे प्रत्यक्षं नास्ति न हि भवति यो यः स्पर्शकरूपादिमान् स वायुरिति कस्यचित् प्रत्यक्षं वायोरेवाप्रत्यक्षत्वादत एव तादृशं प्रत्यक्षगृहीतव्याप्तिकं लिङ्गं नास्तीत्यर्थः ॥ १५ ॥

तर्हि वायोरनुमानमेव कथमित्यत उक्तमेव द्रढयितुमाह–

सामान्यतोदृष्टाच्चाविशेषः ॥ १६ ॥

अनुमानं हि त्रिविधं पूर्ववत् शेषवत् सामान्यतोदृष्टं । तथाचायमनुभूयमानस्पर्शः क्वचिदाश्रितः स्पर्शत्वात् गुणत्वाद्वेति सामान्यतोदृष्टादेवेतरबाधसहकृतात् अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं सिध्यतीत्यर्थः । (१)गतं तर्हि केवलव्यतिरेकिणेति चेन्न (२)इतरबाधानन्तरं यत्र सामान्यतो दृष्टं प्रवर्त्तते तत्राष्टद्रव्यानाश्रितत्वं पक्षविशेषणं सिद्धमादाय, अष्टद्रव्यानाश्रितोऽयं स्पर्शः क्वचिदाश्रित इति प्रतिज्ञार्थोऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमनादाय न पर्य्यवस्यतीति–प्रतीत्यर्थापर्य्यवसन्नतयाऽन्वयिन एव तत्सिद्धिः । यत्र तु पूर्वमेव बाधावतारात् सामान्यतोदृष्टं तत्र प्रतीत्यर्थपर्य्यवसानात् केवलव्यतिरेकीत्यभ्युपगमात् । प्रकारार्थं केवलव्यतिरेकीति तु तुच्छमेव उक्तस्थले प्रकारस्यान्वयिन एवोपस्थितेः । व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति नियमस्त्वप्रामाणिकः सामग्रीविशेषसाचिव्यात् प्रकारान्तरभानस्यापि सम्भवात् ॥ १६ ॥

ननु चाविशेष इति वायुरयमित्याकाराऽनुमितिर्न भवति किन्त्वष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेनैव प्रकारेणेति विवक्षितं यदि तदा तस्य द्रव्यस्य वायुसंज्ञायां किं मानमत आह—

तस्मादागमिकम् ॥ १७ ॥

---

(१) ननु इतरबाधसहकृतोक्तवायुसाधकानुमानस्य सामान्यतोदृष्टत्वे शब्दधर्मिकगुणत्वसाधकेतरबाधसहकृतानुमानस्यापि तथात्वं स्यात्तथा च शेषवदपरपर्यायकेवलव्यतिरेक्यनुमानमेव निर्मूलं स्यादित्याशयेनाशङ्कते गतमिति ।

(२) समाधत्ते इतरेति । एवञ्चेतरबाधनिश्चयस्यात्र पूर्वं वर्तमानत्वात् 'प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः' परिशेष इति परिशेषस्य प्रसक्तिहेत्वप्रदर्शनादेव कस्याप्यप्रसक्तत्वात् शिष्यमाणप्रत्ययाभावाच्चासम्भव इति । यत्र तु पूर्वं इतरबाधाभावात् शब्दो क्वचित्समवेतो गुणत्वात् इत्यनुमानं तत इतरबाधस्तत्रैवोक्तविधपरिशेषसम्भवात् इदमेवाभिप्रेत्याह उपस्कारकार अष्टद्रव्यानाश्रितोयं स्पर्श इत्यादिनेति अन्यत्र विभावनीयम् ।

यस्माद्विशेषाकारेण नानुमितिः तस्माद्वायुरिति नाम आगमिकम्, आगमो वेदस्ततः सिद्धमित्यर्थः। 'वायुर्वै क्षेपिष्ठा देवता' 'वायव्यं श्वेतं छागलमालभेत'

वायुश्च सर्ववर्णोऽयं सर्वगन्धवहः शुचिः।

इत्यादि-विधिशेषीभूतार्थवादादेव वायुसंज्ञाधिगतिः। यथा—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।

इत्याद्यर्थवादात् स्वर्गसंज्ञायाः।

वसन्ते सर्वशस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥

इत्यर्थवादात् यवसंज्ञायाः, 'अम्बुजो वेतसः' इत्यर्थवादात् वेतससंज्ञायाः, 'वराहं गावोऽनुधावन्ति' इत्यर्थवादात् वराहसंज्ञायाः। अन्यथा 'स्वर्गकामो यजेत' इत्यादौ विशिष्टसुखानुपस्थितौ यागादिषु स्वर्गार्थिनां प्रवृत्तिर्न स्यात्, न स्याच्च 'यवमयश्चरुर्भवति' 'वैतसे कटे प्राजापत्यं धिनोति' 'वाराही चोपानत्' इत्यादौ म्लेच्छप्रसिद्धिमनुरुध्य प्रवृत्त्यनध्यवसायः। म्लेच्छा हि यववराहवेतसशब्दान् कङ्गुवायसजम्बुषु प्रयुञ्जते तथाचार्थवादमन्तरेण सन्देहः स्यादित्यागमादेव तत्तदर्थप्रतीतिरिति भावः। नाममात्रमागमिकं द्रव्यसिद्धिस्तु सामान्यतो दृष्टादेव॥ १७॥

एवं वायुप्रकरणं समाप्य तत् किमुन्मादिजल्पित-डित्थडवित्थसंज्ञावत् वायुसंज्ञापीत्यागमस्य सर्वज्ञप्रणीतत्वमुपपादयन् औपोद्घातिकमीश्वरप्रकरणमारिप्समान आह—

(१)संज्ञा कर्म त्वस्मद्विशिष्टानां लिङ्गम्॥ १८॥

तुशब्दः स्पर्शादिलिङ्गव्यवच्छेदार्थः। संज्ञा-नाम, कर्म-कार्य्यं क्षित्यादि, तदुभयमस्मद्विशिष्टानाम् ईश्वर-महर्षीणां सत्त्वेऽपि लिङ्गम्॥ १८॥

कथमेतदित्यत आह—

प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः॥ १९॥

अत्रापि संज्ञा च कर्म चेति समाहारद्वन्द्वादेकवद्भावः संज्ञाकर्त्तु-

(१) नतूक्तागमस्य कथं प्रामाण्यमित्याशंक्येश्वरसिद्धिद्वारा तत्प्रणीतागमस्यापि प्रामाण्यमित्युपोद्घातसङ्गत्येश्वरसिद्धिप्रकरणमारभते संज्ञेत्यादिसूत्रेण।

जगत्कर्त्तुश्चाभेदसूचनार्थः। तथाहि यस्य स्वर्गापूर्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्वादिसंज्ञाः कर्तुमीष्टे प्रत्यक्षे चैत्रमैत्रादिपिण्डे पित्रादेश्चैत्रमैत्रादिसंज्ञानिवेशनवत्। एवञ्च घटपटादिसंज्ञानिवेशनमपि ईश्वरसङ्केताधीनमेव यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र साधुः यथा या काचिदोषधिर्नकुलदंष्ट्राग्रस्पृष्टा सा सर्वाऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां लिङ्गमनुमापकं, याऽपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते साऽपि 'द्वादशेऽहनि पिता नाम कुर्य्यात्' इत्यादिविधिना नूनमीश्वरप्रयुक्तैव तथाच सिद्धं संज्ञाया ईश्वरलिङ्गत्वम्(१)। एवं कर्मापि कार्य्यमपीश्वरे लिङ्गम् तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वात् घटवदिति। अत्र यद्यपि (२)शरीराजन्यं जन्यं वा जन्यप्रयत्नाजन्यं जन्यं वा सकर्तृकत्वासकर्तृकत्वेन विवादाध्यासितं वा सन्दिह्यमानकर्तृकत्वं वा क्षित्यादित्वेन न विवक्षितम् अदृष्टद्वारा क्षित्यादेरपि जन्यप्रयत्नजन्यत्वात् विवादसन्देहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात्, (३)किञ्च सकर्तृकत्वमपि यदि कृतिमज्जन्यत्वं तदाऽस्मदादिना सिद्धसाधनम् अस्मदादिकृतेरप्यदृष्टद्वारा क्षित्यादिजनकत्वात्, उपादानगोचरकृतिमज्जन्यत्वेऽपि तथा अस्मदादिकृतेरपि किञ्चिदुपादानगोचरत्वात्, (४)कार्य्यत्वमपि यदि प्रागभावप्रतियोगित्वं तदा ध्वंसे व्यभिचार इति। (५)तथापि क्षितिः सकर्तृका कार्य्यत्वात्। अत्र च सकर्तृकत्वमदृष्टाद्वारककृतिमज्जन्यत्वं कार्य्यत्वञ्च प्रागभावावच्छिन्नसत्ताप्रतियोगित्वम्। न चाङ्कुरादौ सन्दिग्धाने-

---

(१) ईश्वरलिङ्गत्वमिति। स्वर्गादिसंज्ञा कर्तृप्रत्यक्षगोचरार्थशक्ता संज्ञात्वाद्देवदत्तादिसंज्ञावदित्यनुमानेन संज्ञाया ईश्वरलिङ्गत्वमित्यर्थः।

(२) धर्मिग्राहकबलादीश्वरसाधके कार्यत्वहेतौ व्यभिचारमाशङ्कते अत्र यद्यपीति। परमाणूनां नित्यत्वादंशतोबाधेन पृथिवीत्वादिपक्षतावच्छेदकावच्छेदेनानुमितिर्न सम्भवति अतः पक्षतावच्छेदकसामानाधिकरण्येनानुमितिः कार्येत्याशयेन सामानाधिकरण्येनानुमितिप्रकारं दर्शयित्वा दूषयति शरीराजन्यमित्यादिना।

(३) ननु जन्यपृथिवीत्वमेव पक्षतावच्छेदकं स्यादत आह किञ्चेति।

(४) नन्वस्मदादिकृतेः किञ्चिदुपादानगोचरत्वेपि त्रसरेण्वादेरुपादानाविषयत्वान्न सिद्धसाधनं तथाचोक्तसाध्यमक्षतमेवेत्यत आह कार्यत्वमपीति।

(५) समाधत्ते तथापीति। उक्तविशिष्टहेतोः ध्वंसेऽसत्त्वान्न व्यभिचारो न वास्मदादिकृतिमज्जन्यत्वमादाय सिद्धसाधनमस्मदादिकृतेरदृष्टद्वारकत्वात् इति भावः। अत्र जन्यक्षितिरेव पक्षो बोध्यः। जन्यत्वमाद्यक्षणसम्बन्धत्वं कार्यत्वं प्रागभावप्रतियोगित्वमिति पक्षतावच्छेदकहेत्वोर्भेद इति।

कान्तिकत्वम् साध्याभावनिश्चये हेतुसदसत्त्वसन्देहे सन्दिग्धानैकान्तिकत्वस्य दोषत्वात् अन्यथा सकलानुमानोच्छेदप्रसङ्गात्। न च पक्षातिरिक्ते दोषोऽयमिति वाच्यम् राजाज्ञापत्तेः, नहि दोषस्यायं महिमा यत् पक्षं नाक्रामति। तस्मादङ्कुरस्फुरणदशायां निश्चितव्याप्तिकेन हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् क सन्दिग्धानैकान्तिकता तदस्फुरणदशायान्तु सुतरामिति संक्षेपः॥ १९॥

एवं सूत्राभ्यामीश्वरप्रकरणं समाप्याकाशप्रकरणमारिप्समान आह—

निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम्॥ २०॥

इतिशब्दः प्रकारार्थः, उत्क्षेपणादीन्यपि कर्माणि संगृह्णाति। स्पर्शवद्द्रव्यसञ्चारो निष्क्रमणं प्रवेशनञ्च तदकार्य्यस्याकाशस्य लिङ्गमिति (१)साङ्ख्याः॥ २०॥

तदेतद्दूषयितुमाह—

तदलिङ्गमेकद्रव्यत्वात् कर्मणः॥ २१॥

निष्क्रमणप्रवेशनादिकर्म (२)न तावत् समवायिकारणतया आकाशमनुमापयति कर्मण एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणकत्वात्, न कर्मापि व्यासज्यवृत्तीत्युक्तं न वाऽमूर्त्तवृत्तीति॥ २१॥

ननु चासमवायिकारणतयैवाकाशमनुमापयिष्यति निष्क्रमणप्रवेशनादीत्यत आह—

कारणान्तरानुक्लृप्तिवैधर्म्याच्च॥ २२॥

अनुक्लृप्तिर्लक्षणम् अनुकल्प्यते ज्ञाप्यतेऽनेनेति व्युत्पत्त्या, कारणान्तरस्य असमवायिकारणस्य याऽनुक्लृप्तिर्लक्षणं तद्वैधर्म्यादित्यर्थः। द्रव्यन्तावदसमवायिकारणं न भवत्येव। असमवायिकार-

(१) सांख्या इति। निष्क्रमणादिजन्यविलक्षणसंयोगाद्याश्रयतयाऽऽकाशसिद्धिर्न तु शब्दलिङ्गकत्वेन शब्दस्य पृथिव्यादिवृत्तित्वेन व्यभिचरितत्वादिति तेषामभिप्रायः। निष्क्रमणजन्यः संयोगो स्पर्शाभाववद्द्रव्यनिरूपितः विलक्षणसंयोगत्वादिति तदनुमानप्रयोगः।

(२) उक्तानुमानस्याप्रयोजकत्वाभिप्रायेण दूषयति न तावदिति। निष्क्रमणादीनामाकाशकार्यत्वाभावान्न तैस्तदनुमानसम्भव इत्यर्थः।

णता च कारणैकार्थप्रत्यासत्त्या कार्य्यैकार्थप्रत्यासत्त्या च। (१)प्रथमा तन्तुरूपाणां पटरूपं प्रति, इयञ्चासमवायिकारणता महतीति संज्ञां लभते गुरुप्रातिपत्तिकत्वात्। द्वितीया(२) च यथा आत्ममनःसंयोगस्य ज्ञानादिकं प्रति, इयञ्चासमवायिकारणता लघ्वीति संज्ञां लभते लघुप्रतिपत्तिकत्वात्। आकाशस्य तु निष्क्रमणप्रवेशनादौ कर्मणि न समवायिकारणता नाप्यसमवायिकारणता। तथाच न च कर्माकाशसत्त्वे लिङ्गमिति ॥ २२ ॥

ननु निमित्तकारणमस्तु कर्मण्याकाशम्· दृश्यते ह्याकाशे पक्षिकाण्डादीनां सञ्चरणमत आह—

संयोगादभावः कर्मणः ॥ २३ ॥

मूर्त्तसंयोगेन कर्मकारणस्य वेगगुरुत्वादेः प्रतिबन्धात् कर्मणोऽभावोऽनुत्पादो न त्वाकाशाभावात् तस्य व्यापकत्वात्। तस्मादाकाशान्वयोऽन्यथासिद्ध एव नाकाशनिमित्ततां (३)साधयतीत्यर्थः ॥ २३ ॥

एवं साङ्ख्यमते दूषिते शब्दमाकाशे लिङ्गमुपपादयिष्यन् परिशेषानुमानाय पीठमारचयन्नाह—

कारणगुणपूर्वकः कार्य्यगुणो दृष्टः ॥ २४ ॥

पृथिव्यादिलक्षणे कार्य्ये ये विशेषगुणा रूपादयस्ते कारणगुणपूर्वका दृष्टाः। शब्दोऽपि विशेषगुणः (४)जातिमत्त्वे सति बाह्यकेन्द्रिय-

---

(१) द्विविधासमवायिकारणत्वमध्ये कारणैकार्थप्रत्यासत्तिघटितमसमवायित्वं द्रव्ये नास्तीत्यभिप्रायेणाह प्रथमेति। गुरुप्रतिपत्तिकत्वादिति। असमवायिकारणतायाः समवायद्वयघटितसामानाधिकरण्यरूपगुरुसम्बन्धावच्छिन्नप्रकारकतया गुरुज्ञानत्वात् द्रव्ये तादात्म्यसम्बन्धावच्छिन्नसमवायिकारणतायाः सत्त्वेपि तदसम्भवात्। घटरूपादिकार्यसमवायी घटस्तदन्यच्च द्रव्यमेकत्रैकदा न समवैति येन द्रव्येपि असमवायिकारणतोक्तसामानाधिकरण्यसम्बन्धेन गुणवत्स्यादिति भावः।

(२) कार्यैकार्थप्रत्यसत्तिघटिताप्यसमवायिकारणता द्रव्ये नास्तीत्याह द्वितीयेति। अत्र समवायरूपलघुसम्बन्धावच्छिन्नप्रकारकत्वेन लघुप्रतिपत्तिकत्वम्। कपालरूपे घटादेर्नियतपूर्ववर्तित्वाभावेनाकारणत्वात्, घटाव्यवहितपूर्वक्षणे कपाले द्रव्यान्तरस्यासत्त्वाद्घटं प्रत्यपि द्रव्यस्यासमवायित्वाभावादिति भावः।

(३) साधयतीति। फलादीनां भूम्यादिसंयोगात्कर्मानुत्पत्तिदर्शनात् संयोगविशेषाभावादिकमेव कर्मनिमित्तहेतुर्न त्वाकाशं तद्व्यतिरेकेण कर्मव्यतिरेकस्यासिद्धेस्तस्य व्यापकत्वात् इति भावः।

(४) जातिमत्त्वे सतीति। शब्दत्वेऽतिव्याप्तिवारणाय विशेषणदलम्। संख्यादौ तद्वारणायैकमात्रबहिरिन्द्रियग्राह्यत्वार्थकं विशेष्यदलम् बोध्यम्।

मात्रग्राह्यत्वात् रूपादिवत् । तथाच तादृशं कार्य्यं नोपलभ्यते यत्र कारणगुणपूर्वकः शब्दः स्यादित्यर्थः ॥ २४ ॥

ननु वीणावेणुमृदङ्गशङ्खपटहादौ कार्य्ये शब्द उपलभ्यते तथाच तत्कारणगुणपूर्वकः स्यादत आह--

कार्य्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ॥२५॥

भवेदेवं यथा तन्तुकपालादिषु रूपरसाद्यनुभूयते तत्सजातीयञ्च रूपरसाद्यन्तरं पटघटादावुपलभ्यते तथा वीणावेणुमृदङ्गाद्यवयवेषु यः शब्द उपलब्धस्तत्सजातीयश्चेत् वीणावेणुमृदङ्गाद्यवयविन्युपलभ्येत न चैवम् । प्रत्युत निःशब्दैरेवावयवैर्वीणाद्यारम्भदर्शनात्, नीरूपैस्तु तन्तुकपालादिभिः पटघटाद्यारम्भस्यादर्शनात् । (१)किञ्च यदि शब्दः स्पर्शवतां विशेषगुणः स्यात् तदा तत्र तार-तारतर-मन्द-मन्दतरादिभावो नानुभूयेत न ह्येकावयव्याश्रिता रूपादयो वैचित्र्येणानुभूयन्ते तस्मान्न स्पर्शवद्विशेषगुणः शब्दः ॥ २५ ॥

नन्वात्मगुणो मनोगुणो वा शब्दो भविष्यतीत्यत आह—

परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः ॥ २६ ॥

शब्दो यद्यात्मगुणः स्यात् तदाऽहं सुखी यते जाने इच्छमीत्यादिवत् अहं पूर्य्ये अहं वाद्ये अहं शब्दवानित्यादि धीः स्यात् नत्वेवमस्ति, किन्तु शङ्खः पूर्य्यते वीणा वाद्यते इति प्रतियन्ति लौकिकाः । किञ्च शब्दो नात्मगुणः बाह्येन्द्रियग्राह्यत्वात् रूपादिवत् अपिच शब्दो यद्यात्मयोग्यविशेषगुणः स्याद्बधिरेणाप्युपलभ्येत दुःखादिवत् तस्मात् सुष्ठूक्तं परत्र समवायादिति। अमनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति । नात्ममनसोर्गुण इति समासे कर्त्तव्ये यदसमासकरणं तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयो-

(१) ननु अनुद्भूत एव शब्दो वीणाद्यवयवे वर्तत इत्यत आह किञ्चेति । सूत्रस्थकार्यान्तरशब्दस्यान्यार्थमाह तारेति । अयमत्रानुमानप्रकारः–शब्दो न स्पर्शवद्विशेषगुणः अपाकजत्वे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् । अपाकजरूपे व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ तद्वारणाय विशेष्यदलम् । अत्रोपस्कारकारो व्यतिरेक्यनुमानं प्रकटयन्नाह नहीति । तन्मतेऽत्र एकावयविवृत्तित्वे सति वैजात्येनानुभूयमानत्वाद्रूपवदिति व्यतिरेकिदृष्टान्तो बोध्यः ।

रपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितम्(१) ॥ २६ ॥

यदर्थमयं परिशेषस्तदाह—

परिशेषाल्लिङ्गमाकाशस्य ॥२७॥

शब्द इति शेषः। अत्रापि शब्दः क्वचिदाश्रितो गुणत्वात् रूपादिवदिति सामान्यतोदृष्टाददृष्टद्रव्यातिरिक्तद्रव्यसिद्धिः। गुणश्चायं बाह्यैकेन्द्रियग्राह्यजातीयत्वात् रूपादिवत्, अनित्यत्वे सति विभुसमवेतत्वात् ज्ञानादिवत्। अनित्यत्वञ्च साधयिष्यते। (२)परिशेषसिद्धस्य द्रव्यस्यावयवकल्पनायां प्रमाणाभावान्नित्यत्वं सर्वत्र शब्दोपलब्धेर्विभुत्वम् ॥ २७ ॥

शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदेशेन साधयन्नाह—

द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ २८ ॥

अद्रव्यवत्त्वाद्यथा वायोर्नित्यत्वं तथाकाशस्यापि, गुणवत्त्वाद् यथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः ॥ २८ ॥

तत् किं बहून्याकाशानि एकमेव वेत्यत आह—

तत्त्वम्भावेन ॥ २९ ॥

व्याख्यातमिति विपरिणतेनान्वयः। भावः सत्ता सा यथैका तथाकाशमप्येकमेवेत्यर्थः ॥ २९ ॥

नन्वनुगतप्रत्ययमहिम्ना सत्तायाः एकत्वं सिद्धम् आकाशे कथमेकत्वं तद्दृष्टान्तेन सेत्स्यतीत्यत आह—

शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च ॥ ३० ॥

तत्त्वमाकाशस्य सिद्धमित्यर्थः। वैभवे सति सर्वेषां शब्दानां तदेकाश्रयतयैवोपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गः। अन्यदपि यदाकाशं कल्पनीयम् तत्रापि शब्द एव लिङ्गम् तच्चाविशिष्टम् न च विशेषसाधकं भेदसाधकं लिङ्गान्तरमस्ति। आत्मनां यद्यपि ज्ञानादिकमविशिष्टमेव लिङ्गं तथापि व्यवस्थातो लिङ्गान्तरादात्मना-

(१) सूचितमनुमितम्। तथा च शब्दो न दिक्कालमनसां गुणः प्रत्यक्षत्वाद्रूपवदिति अनुमानेन तत्सिद्धिरिति भावः।

(२) सूत्रस्थपरिशेषपदस्य शेषवदर्थकत्वं सूचयन्नाह परिशेषसिद्धस्येति। शेषवदनुमानेन सिद्धमाकाशं नित्यमित्यर्थः।

नात्वसिद्धिरिति (१)वक्ष्यते ॥ ३० ॥

नन्वाकाशस्य एकत्वं तावदस्तु, वैभवात् परममहत्त्वमप्यस्तु, शब्दासमवायिकारणत्वात् संयोगविभागावपि स्याताम् एकपृथक्त्वं कथमत आह--

तदनुविधानादेकपृथक्त्वञ्चेति ॥ ३१ ॥

नियमेनैकपृथक्त्वमेकत्वमनुविधत्ते इत्येकपृथक्त्वसिद्धिः । इतिराह्निकपरिसमाप्तौ मानसप्रत्यक्षाविषयविशेषगुणवद्द्रव्यलक्षणमाह्निकार्थः । तेन पृथिव्यप्तेजोवाय्वाकाशानां प्रसङ्गत ईश्वरात्मनश्च लक्षणमस्मिन्नाह्निके। तेन चतुर्दशगुणवती पृथिवी, ते च गुणा रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराः । तावन्त एव गन्धमपास्य स्नेहेन सहापाम् । एत एव रसगन्धस्नेहगुरुत्वान्यपास्य तेजसः । गन्धरसरूपगुरुत्वस्नेहद्रवत्वान्यपास्य वायोः । शब्देन सह सङ्ख्यादिपञ्चगुणवत्त्वमाकाशस्य। सङ्ख्यादिपञ्चकमात्रं दिक्कालयोः । परत्वापरत्ववेगसहितं सङ्ख्यादिपञ्चकं मनसः । सङ्ख्यादिपञ्चकं ज्ञानेच्छाप्रयत्नाश्चेश्वरस्य ॥ ३१ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे द्वितीयाध्याय-
स्याद्यमाह्निकम् ॥

---

(१) वक्ष्यत इति । 'सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम्' इत्यत्र अ० ३ आ० २ सू० १९ वक्ष्यत इत्यर्थः ।

द्वितीयाध्याये द्वितीयाह्निकम् ।

इदानीं भूतानां लक्षणानि गन्धादीनि परीचिक्षिषुर्गन्धादीनां स्वाभाविकत्वमौपाधिकत्वञ्च व्यवस्थापयन्नाह—

पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ॥ १ ॥

रूपरसगन्धस्पर्शा यत्र कारणगुणप्रक्रमेणोत्पद्यन्ते तत्र स्वाभाविकाः सन्तो लक्षणतामुपयन्ति नान्यथा, न हि समीरण उपलभ्यमानं सौरभं शिलातले उपलभ्यमानं शैत्यं जले उपलभ्यमानसौष्ण्यं वा लक्षणं भवति तदेतदाह पुष्पवस्त्रयोरिति । न हि कनककेतकीकुसुमसन्निकृष्टे वाससि कनककेतकीसौरभमनुपलभ्यमानं वाससः । (१)न हि वाससः कारसगुणप्रक्रमेण तदुत्पन्नम्, किन्तर्हि । कनककेतकीसन्निधानादौपाधिकं, न हि वस्त्रे गन्धाभावे केतकीगन्धाभावो लिङ्गम् । किं लिङ्गमत उक्तं गुणान्तराप्रादुर्भाव इति । गुणान्तरात् कारणगुणात् अप्रादुर्भावोऽनुत्पत्तिः यदि हि वस्त्रे यो गन्ध उपलभ्यते स तस्य स्वाभाविकः स्यात्तदा तदवयवेषु तन्तुषु केतकीसन्निकर्षात् पूर्वं तत्र वस्त्रे चोपलभ्येत न चैवमित्यर्थः । तथाच विवादाध्यासितो गन्धो न वस्त्रसमवेतः (२)तदवयवगुणाजन्यविशेषगुणत्वात् शीतोष्णस्पर्शादिवत् ॥ १ ॥

स्वाभाविकं गन्धं पृथिव्या लक्षणमाह—

व्यवस्थितः पृथिव्यां गन्धः ॥ २ ॥

पृथिव्यां व्यवस्थितोऽयोगान्ययोगाभ्यां परिच्छिन्नः समानासमानजातीयव्यावर्त्तकतया गन्धो लक्षणमित्यर्थः । भवति हि पृथिवी (३)गन्धवत्येव, पृथिव्येव गन्धवतीति, तदेवं समानजातीयेभ्यो जला-

---

(१) ननु कारणाभावे कार्याभावस्य वन्ह्यभावे धूमाभावस्येव लिङ्गत्वं दृश्यते तथा च केतकीपुष्पगन्धाभावेऽपि वस्त्रगन्धाभावे हेतुः स्यात् एवञ्च केतकीकुसुमगन्धादेव वस्त्रेपि गन्धस्तज्जातीय उत्पद्यत इति कथं तस्य नैसर्गिकत्वमित्याशंक्याह नहीति । यदि केतकीकुसुमगन्धाभावो वस्त्रे गन्धाभावे लिङ्गं स्यात् उक्तपुष्पवस्त्रगन्धयोः कार्यकारणभावशङ्का भवेत् तन्नास्तीति तात्पर्यम् ।

(२) तदवयवगुणाजन्यविशेषगुणत्वादिति । वस्त्ररूपादौ व्यभिचारवारणायाजन्यान्तं हेतुविशेषणम् । संयोगे कर्मजन्ये तद्वारणाय विशेषपदम् । एवमेव वाय्वादौ गन्धाभावोऽनुमेयः ।

(३) गन्धवत्येवेति । तेनेतरभेदानुमितौ न भागासिद्धिः । पृथिव्येवेति । एतेन व्यभिचारनिरासः ।

द्यष्टभ्योऽसमानजातीयेभ्यो गुणादिपञ्चभ्यो व्यावर्त्तकः स्वाभाविकः पृथिव्यां गन्ध इति व्यवस्थितम् ॥ २ ॥

(१)गन्धस्य स्वाभाविकत्वव्यवस्थापनप्रकारमुष्णतायां तेजोलक्षणेऽप्यतिदिशन्नाह—

एतेनोष्णता व्याख्याता ॥ ३ ॥

अबादिलक्षणे शैत्यादावप्ययमतिदेशो द्रष्टव्यः ॥ ३ ॥

तेजोलक्षणं परीक्षते—

तेजस उष्णता ॥ ४ ॥

स्वाभाविक्युष्णता तेजोलक्षणमित्यर्थः । रूपमपि शुक्लभास्वरमुपलक्ष्यते ॥ ४ ॥

अपां लक्षणं परीक्षते—

अप्सु शीतता ॥ ५ ॥

स्वाभाविकी शीतता अपां लक्षणमित्यर्थः । तथाच शिलातलश्रीखण्डादौ नातिव्याप्तिरिति भावः । शीततया रूपरसावप्युक्तलक्षणौ स्नेहं सांसिद्धिकद्रवत्वञ्चोपलक्षयति । ननु उद्देशलक्षणक्रमभङ्गः कुत इति चेन्न तेजःस्पर्शस्य पृथिवीजलस्पर्शयोरभिभावकत्वसूचनाय तयोर्मध्ये तेजःपरीक्षाया उक्तत्वात्, (२)वायुपरीक्षासूचनार्थं वा क्रमलङ्घनम् । तथाचापाकजानुष्णाशीतस्पर्शो वायोः स्वाभाविकः सन् लक्षणमित्युन्नेयमिति तात्पर्य्यम् ॥ ५ ॥

तदेवं कारणगुणपूर्वकाः स्पर्शवतां विशेषगुणाः गन्धादयः पृथिव्यादीनां लक्षणानीत्युक्तम् । इदानीं (३)क्रमप्राप्तं काललक्षणप्रकरणमारभमाण आह—

अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि ॥ ६ ॥

इतिकारो ज्ञानप्रकारपरः प्रत्येकमभिसम्बध्यते, तथाचापरमिति-

---

(१) गन्धस्येति । उष्णत्वं पृथिव्यसमवेतं तदवयवगुणाजन्यविशेषगुणत्वात् सांसिद्धिकद्रवत्ववत्, न जलसमवेतं गन्धवदित्यनुमानेन बाधात्तत्रोष्णत्वमौपाधिकं स्वाभाविकं तेजसीति सूत्रार्थः ।

(२) वाय्विति । सुवर्णचन्द्रकिरणादौ पृथिवीजलस्पर्शस्य तेजःस्पर्शाभिभावकत्वात्कल्पान्तरानुसरणम् । स्पर्शवत्त्वसाधर्म्येण वा स्मरणेन वायुपरीक्षापि बोध्येति व्युत्क्रमादर इति भावः ।

(३) क्रमप्राप्तमिति । आकाशलक्षणानन्तरं काललक्षणस्यैव क्रमप्राप्तत्वादित्यर्थः । अन्तराऽन्यनिरूपणस्य बलवज्जिज्ञासानिवृत्त्यर्थत्वादिति भावः ।

नित्येषु भावादनित्येषु भावात्कारणे कालाख्येति ॥९॥

इतिशब्दो हेतौ इति हेतोः कारणे सर्वोत्पत्तिमत्कारणे काल इत्याख्या । हेतुमाह नित्येष्वभावादनित्येषु भावादिति । नित्येषु आकाशादिषु युगपज्जातः चिरं जातः क्षिप्रं जातः इदानीं जातः दिवा जातः रात्रौ जात इत्यादिप्रत्ययस्याभावात्, अनित्येषु च घटपटादिषु (१)यौगपद्यादिप्रत्ययानां भावात् अन्वयव्यतिरेकाभ्यां कारणं काल इत्यर्थः । न केवलं यौगपद्यादिप्रत्ययबलात् कालस्य सर्वोत्पत्तिमन्निमित्तकारणत्वम् अपि तु पुष्पफलादीनां हैमन्तिकवासन्तिकप्रावृषेण्यादिसंज्ञाबलादप्येतदध्यवसेयम् ॥ ९ ॥

काललिङ्गकरणं समाप्य इदानीं दिग्लिङ्गप्रकरणमारभमाण आह—

इत इदमिति यतस्तद्दिश्यं लिङ्गम् ॥ १० ॥

दिश इदं दिश्यं दिगनुमापकम् । इतोऽल्पतरसंयुक्तसंयोगाश्रयादिदं बहुतरसंयुक्तसंयोगाधिकरणं परम् इतश्च संयुक्तसंयोगभूयस्त्वाधिकरणादिदं संयुक्तसंयोगाल्पीयस्त्वाधिकरणमपरमिति(२) नियतदिग्देशयोः समानकालयोः पिण्डयोर्यतो द्रव्याद्भवति सा दिगित्यर्थः । न हि तादृशं द्रव्यमन्तरेण भूयसां संयुक्तसंयोगानामल्पीयसां वा पिण्डयोरुपनायकमन्यदस्ति न च तदुपनयमन्तरेण तत्तद्विशिष्टबुद्धिः न च तामन्तरेण परत्वापरत्वयोरुत्पत्तिः न च तदुत्पत्तिं विना तद्विशिष्टप्रत्ययव्यवहारौ । न च काल एव संयोगोपनायकोऽस्तु किं द्रव्यान्तरेणेति वाच्यम् कालस्य नियतक्रियोपनायकत्वेनैव सिद्धेः । अनियतपरधर्मोपनायकत्वकल्पनायान्तु (३)काश्मीरकुङ्कुमपङ्करागं कार्णाटकामिनीकुचकलशं प्रत्युपनयेत् । आकाशात्मनोरपि तथा परधर्मोपसंक्रामकत्वे स एव प्रसङ्गः । दि-

---

(१) यौगपद्यादीति । अद्य भविष्यति श्वो भवितेत्यादिप्रत्ययो आदिपदग्राह्यः । तथा च युगपज्जात इत्यादिप्रत्ययस्य तत्तत्कार्योत्पत्त्यधिकरणत्वेन काल एव विषयः तदुत्पत्त्यधिकरणत्वेन व्यवहारविषयस्य तदुत्पत्तिकारणत्वनियमात् तदुत्पत्तिकारणत्वस्य तत्कारणताव्याप्यत्वात् इति भावः ।

(२) इतीति । विशिष्टबुद्धिरिति शेषः । तथाचास्मादिदं दूरमस्मादिदमन्तिकमिति दैशिकपरत्वापरत्वबुद्धिर्यतस्तादिगनुमापकं लिङ्गमित्यर्थः । कालवत् दैशिकपरत्वापरत्वासमवायिकारणदिक्पिण्डसंयोगाश्रयतया लाघवादेका दिक् सिध्यतीति भावः ।

(३) कालः क्रियाविशेषोपनायकः दिक्च संयोगविशेषोपनायिकेति नियमानङ्गीकारे दोषमाह काश्मीरेति । काश्मीरीकुचविलसत्कुङ्कुमपरागरञ्जिता कार्णाटी स्यादिति बुद्धिः स्यादिति भावः ।

शस्तु नियतपरधर्मोपसंक्रामकतयैव सिद्धत्वान्नातिप्रसङ्गः । एवञ्च क्रियोपनायकात् कालात् संयोगोपनायिका दिक् पृथगेव । किञ्चास्मात् पूर्वमिदम् अस्माद्दक्षिणमिदम् अस्मात्पश्चिममिदम् अस्मादुत्तरमिदम् अस्माद्दक्षिणपूर्वमिदम् अस्माद्दक्षिणपश्चिममिदम् अस्मात्पश्चिमोत्तरमिदम् अस्मादुत्तरपूर्वमिदम् अस्मादधस्तादिदम् अस्मादुपरिष्टादिदम् इत्येते प्रत्यया इत इदमितीत्यनेन सङ्गृहीताः एतेषां प्रत्ययानां निमित्तान्तरासम्भवात् । किञ्च (१)नियतोपाध्युन्नायकः कालः अनियतोपाध्युन्नायिका दिक् । भवति हि यदपेक्षया यो वर्तमानः स तदपेक्षया वर्तमान एव, दिगुपाधौ तु नैवं नियमः यं प्रति या प्राची तं प्रत्येव कदाचित्तस्याः प्रतीचीत्वात् । एवमुदीच्यादिष्वपि वाच्यम् । (२)यदपेक्षया सूर्य्योदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची, यदपेक्षया सूर्य्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया प्रतीची । सन्निधानन्तु सूर्यसंयुक्ते संयोगाल्पीयस्त्वं ते च सूर्य्यसंयोगा अल्पीयांसो भूयांसो वा दिगुपनेयाः । एवं प्राच्यभिमुखपुरुषवामप्रदेशावच्छिन्ना दिगुदीची, तादृशपुरुषदक्षिणभागावच्छिन्ना दिक् दक्षिणा । वामत्वदक्षिणत्वे तु शरीरावयववृत्तिजातिविशेषौ । गुरुत्वासमवायिकारणकक्रियाजन्यसंयोगाश्रयो दिक् अधः । अदृष्टवदात्मसंयोगजन्याग्निक्रियाजन्यसंयोगाश्रयो दिगूर्द्ध्वा । एवञ्चेन्द्राग्नियमनिर्ऋतवरुणवायुसोमेशाननागब्रह्माधिष्ठानोपलक्षिता दश दिश इति व्यपदेशान्तरं प्राच्यादिव्यपदेशात् ॥ १० ॥

दिशो द्रव्यत्वं नित्यत्वञ्च वायुपरमाणुवदित्याह—

द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ११ ॥

गुणवत्त्वाद्द्रव्यत्वम् अनाश्रितत्वाच्च नित्यत्वमित्यर्थः ॥ ११ ॥

एकत्वमतिदिशन्नाह—

तत्त्वम्भावेन ॥ १२ ॥

---

(१) नियतोपाधीति । पुरुषभेदे भेदविरहो नैयत्यं तादृशोपाधिमत्त्वं कालावच्छेदकस्य, पुरुषभेदेपि भेदोऽनैयत्यं, तच्च दिगवच्छेदकस्यैवेत्याह भवतीत्यादिना ।

(२) यदपेक्षयेति । यदवधित इत्यर्थः । तथा च पाटलिपुत्रादुदयगिरिः प्राचीत्यत्र पाटलिपुत्रमवधिस्तन्निष्ठोदयगिरिसंयुक्तपारम्पर्यागतसंयोगापेक्षयाऽल्पतरोदयगिरिसंयुक्तसंयोगाश्रयत्वरूपमुदयाचलसन्निहितत्वमस्तीति तत्प्रतीत्युपपत्तिरिति भावः । एवमन्यत्रापि ।

दिग्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च सत्तावदेकत्वं तदनुविधानादेकपृथक्त्वम् ॥ १२ ॥

ननु यद्येकैव दिक् कथं तर्हि दश दिश इति प्रतीतिव्यवहारावित्यत आह—

कार्य्यविशेषेण नानात्वम् ॥ १३ ॥

कार्य्यविशेषः (१)कार्य्यभेदस्तेन नानात्वोपचार इत्यर्थः ॥ १३ ॥

तमेव कार्यभेदं दर्शयन्नाह—

आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची॥१४॥

प्राक् अस्यां सविता अञ्चतीति प्राची, तथाच यस्यां दिशि मेरुप्रदक्षिणक्रमेण भ्रमत आदित्यस्य प्रथमं संयोगो भूतपूर्वो भविष्यन् वा भवन् वा सा दिक् प्राची। अत्र पुरुषाभिसन्धिभेदमाश्रित्य कालत्रयोपवर्णनम्, भवति हि कस्यचित्पूर्वेद्युः प्रातरस्यां दिशि आदित्यसंयोगः प्रथमं वृत्त इतीयं प्राचीति प्राचीव्यवहारः कस्यचिद्परेद्युरस्याम्, आदित्यसंयोगः प्रथमं भावीत्यभिसन्धाय प्राचीव्यवहारः, कस्यचिदिदानीम् अस्याम् आदित्यसंयोगो भवन्नस्तीत्यभिसन्धाय प्राचीव्यवहारः। भूतादिति आदिकर्मणि क्तप्रत्ययः तेनाभिसन्धेरनियमात् यदाप्यादित्यसंयोगो नास्ति रात्रौ मध्याह्नादौ वा तत्रापि प्राचीव्यवहारानुगमः सिद्ध्यतीति भावः ॥ १४ ॥

दिगन्तरव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह—

तथा दक्षिणा प्रतीची उदीची ॥ १५ ॥

तद्वदेव दक्षिणदिग्वर्त्तिनगादिना सहा(२)दित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताद्वा दक्षिणाव्यवहारः। एवं प्रतीच्युदीच्योरपि व्यवहार उन्नेयः। वामत्वदक्षिणत्वे निरुक्ते एव ॥ १५ ॥

दिगन्तरालव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह—

एतेन दिगन्तरालानि व्याख्यातानि ॥ १६ ॥

प्राचीदक्षिणयोर्दिशोर्लक्षणसाङ्कर्येण दक्षिणपूर्वा दिगिति व्यव-

---

(१) कार्यभेद उपाधिभेद इति यावत्।

(२) आदित्येति। आदित्यसंयुक्तयत्किञ्चिन्मूर्तसंनिहिता दिग्दक्षिणेत्यर्थः। इदमुपलक्षणं सुमेरुव्यवहितत्वमपि तथोपाधिः। अस्ताचलसंनिहितत्वं प्रतीच्याः सुमेरुसन्निहितत्वं चोदीच्या उपाधिरिति भावः।

हारः। एवं दक्षिणपश्चिमा पश्चिमोत्तरा उत्तरपूर्वेत्यूह्यम्। एते चा-
दित्यसंयोगा येन विभुना द्रव्येणोपनीयन्ते सा दिगिति कणाद-
रहस्ये व्युत्पादितं विस्तरतः॥ १६॥

चतुर्णां भूतानां रूपादीनि लक्षणानि कारणगुणपूर्वकतया ता-
त्त्विकानि अन्यथा त्वौपाधिकानीति व्यवस्थितं पूर्वमेव। विशेषगुण-
शून्यविभुलिङ्गञ्चोक्तम। इदानीमाकाशस्य लिङ्गं शब्दः परीक्षणीयः।
सन्ति चात्र तान्त्रिकाणां विप्रतिपत्तयः। (१)केचिच्छब्दं द्रव्यमा-
चक्षते, केचिद्गुणम्, गुणत्वे सत्यप्येके नित्यमाहुः अपरे त्वनि-
त्यम्, अन्ये तु शब्देऽपि स्फोटाख्यं शब्दान्तरमाहुः। तदत्र परी-
क्षामारभमाणः परीक्षाप्रथमाङ्गं संशयमेव तावल्लक्षणतः कारणतश्च
व्यवस्थापयन्नाह—

**सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च सं-
शयः॥ १७॥**

(२)सामान्यप्रत्यक्षादिति। सामान्यवतो धर्मिणः प्रत्यक्षात् ग्रह-
णात् मतुब्लोपात्। विशेषाप्रत्यक्षादिति। विशेषस्य परस्परव्या-
वर्त्तकस्य धर्मस्य वक्रकोटरादेः शिरःपाण्यादेश्चाप्रत्यक्षादग्रहणात्।
विशेषस्मृतेः विशेषस्य कोटिद्वयस्य स्थाणुत्वपुरुषत्वलक्षणस्य स्म-
रणात्। स्मरणमपि ग्रहणपरं(३) क्वचिदनुभूयमानधर्मयोरपि को-
टित्वात्, चकाराददृष्टादेः संशयकारणस्य संग्रहः। (४)असाधा-

(१) सांख्या इत्यर्थः। गुणपक्षेपि मीमांसका नित्यं नैयायिका अनित्यं शब्दमाहुः। अन्येत्वि-
ति। वैयाकरणा इत्यर्थः।
प्रत्यक्षात्सामान्यप्रकारकप्रत्यक्षादिति प्रा-
(२) सामान्येति। अत्र सामान्यवतो धर्मिणः
संशयः तस्य च संशयं प्रत्यन्वयव्यतिरेका-
चीनमतम् तथाचैतन्मते साधारणधर्मवद्धर्मिज्ञानादेव
साधारणधर्मवद्धर्मिविषयकसमू-
न्विधायिनी कारणतेति भावः। नवीनास्तु धारावाहिकसंशयस्थले
संशयं प्रत्यन्वयव्यतिरेकाभावादकारण-
ह्यलंबनज्ञानस्यानुभविकतया साधारणधर्मप्रकारकज्ञानस्य
धर्मितावच्छेदकप्रकारकज्ञानादित्यत्र
त्वेन सामान्यवद्विषयकप्रत्यक्षात्संशयो भवति इत्याहुः। स च
सत्कचित्संशय उपयुज्यते।
पर्यवस्यति अस्मिन्कल्पे साधारणधर्मज्ञानादिकं कोटिद्वयोपस्थापकं
सनिकर्षादिकं च संशय-
वस्तुतस्तु धर्मितावच्छेदकप्रकारकज्ञानं विशेषदर्शनाभावः कोटिद्वयज्ञानं
(३) ग्रहणपरं ज्ञानपरमित्यर्थः।
सामग्रीति॥

(४) ननु सामान्यधर्म एव तत्तदभावसमानाधिकरण इति तद्वद्धर्मिणो एकतरानिश्चायकत्वा-
त्संशयहेतुत्वं युक्तमसाधारणस्य तु तत्तदभावव्यावृत्तरूपस्य साधारणत्वाभावात् कथं संशयजन-
कतेत्याशंक्य प्राचीनमताभिप्रायेण निराकरोति असाधारण इति।

रणो धर्मोऽनध्यवसायात्मकज्ञानजनक इति नोक्तः । (१)यद्वा असाधारणस्यापि व्यावृत्तिद्वारा कारणत्वं सपक्षविपक्षव्यावृत्तिः साधारणधर्म एवेति नोक्तः । (२)विप्रतिपत्तिरपि विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयं शब्दो नित्य इत्यपरं तदुभयं, तदुभयजन्यञ्च ज्ञानद्वयमयुगपद्भावित्वात् सम्भूय न संशायकमतस्तत्र शब्दत्वादिरसाधारणः, सत्त्वप्रमेयत्वादिः साधारणो वा धर्मः संशायक इति (३)पृथङ्नोक्ता ।

समानतन्त्रे गौतमीयेऽनध्यवसायज्ञानस्यानभ्युपगमात् असाधारणो धर्मः संशयकारणत्वेनोक्तः । विप्रतिपत्तेर्विरुद्धवाक्यद्वयस्यान्वयव्यतिरेकशालितया संशयकारणत्वमुक्तम् । न्यायभाष्ये च उपलभ्यमानत्वं यत् संशयकारणमुक्तं सदप्युपलभ्यते असदप्युपलभ्यते इति उपलभ्यमानमिदं सदसद्वेति, यच्चानुपलभ्यमानत्वं सदपि नोपलभ्यते मूलककीलकोदकादि, असदपि नोपलभ्यते गगनारविन्दादि, तथाच पञ्चविधः संशय इति । तदेतत्सामान्यमेवेति सामान्यप्रत्यक्षादित्यनेनैव गतार्थम् । न्यायवार्त्तिकेऽपि यत् कारणभेदेन संशये त्रित्वमुक्तं तदपि न सम्भवति व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैवासम्भवात् । न हि तृणारणिमणिजन्यवन्हौ वैजात्यवदत्रापि वैजात्यं कल्पनीयं संशयत्वावच्छिन्नकार्य्यं प्रति समानधर्मत्वेनैव कारणतायाः कल्पनात् । यच्च प्रधानविधिकोटित्वप्रधाननिषेधकोटित्वादि वैजात्यमुक्तम्, (४)तदननुगतत्वान्नावच्छेदकम् ।

---

(१) नव्यमतेन समाधत्ते यद्वेति । असाधारणधर्मोऽपि एकसम्बधिज्ञानमपरं स्मारयतीति नियमेन व्यावृत्तत्वसम्बन्धज्ञानद्वारा तत्तदभावरूपकोटिद्वयं स्मारयन् कोटिद्वयज्ञानसम्पादनद्वारा संशये प्रयोजक इति एतन्मते संशयातिरिक्तानध्यवसायात्मकज्ञानस्यासत्त्वेपि न क्षतिरिति स्वरसः ।

(२) असाधारणधर्मवद्धर्मिज्ञानत्वेन पृथक्संशयहेतुत्वं निराकृत्य विप्रतिपत्तेस्तत्कारणत्वखण्डनाय विप्रतिपत्तिपदार्थमाह विप्रतिपत्तिरपीति । वाक्यद्वयस्वरूपमाह शब्द इत्यादिना तदुभयमित्यन्तेन । अपरन्तदुभयं = शब्दोऽनित्य इति वाक्यद्वयमित्यर्थः । तथाविधवाक्यद्वयजन्यं क्रमिकज्ञानद्वयमपि अयुगपद्भावित्वात्संशयाजनकमित्याह तदुभयजन्यञ्चेति । एकैकज्ञानस्यैकैककोटिज्ञावहेतुत्वे क्रमिकमप्रामाण्यज्ञानास्कंदितमेकैककोटिज्ञानं स्यात् न तु संशयरूपमिति भावः ।

(३) पृथगिति । तथा च वाक्यद्वयजन्यशाब्दबोधानन्तरं तत्समानाकारं मानसज्ञानं हेतुत्वेन परिकल्प्य क्षणविलम्बेन संशयस्वीकारे तत्स्थले शब्दत्वस्यासाधारणस्योपस्थितत्वात्तदादाय, परक्षणे वा सत्त्वादिकं साधारणधर्ममादाय संशयस्याङ्गीकारेण विप्रतिपत्तिर्न पृथगुक्तेत्यर्थः ।

(४) अननुगतत्वादिति । तादृशवैजात्यं कार्यतावच्छेदकं न भवति सकलकार्याव्यापकत्वात्.

थाच संशयो न त्रिविधो न वा पञ्चविधः किन्त्वेकविध एव, प्र-
कारान्तरेण तु द्वैविध्यं सूत्रकृदेव स्पष्टयति । ननु जिज्ञासाजनक-
ज्ञानं संशय इति न लक्षणम् अनध्यवसायेऽपि गतत्वात्, संस्का-
रजनकज्ञानं संशय इत्यपि निर्विकल्पकसाधारणं विशिष्टज्ञानत्वेन
संशयस्यापि संस्कारजनकत्वात्, संशयत्वञ्च जातिरपि न लक्षणं
(१)धर्म्यंशे संशयत्वाभावेन तदंशे तज्जात्यभावात् जातेश्चाव्याप्य-
वृत्तित्वानभ्युपगमात् इति चेत्, एकस्मिन् धर्मिणि विरोधिनाना-
प्रकारकं ज्ञानं संशय इति तल्लक्षणात् ॥ १७ ॥

द्विविधः संशयो बहिर्विषयकोऽन्तर्विषयकश्च । बहिर्विषकोऽपि
दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च । तत्र दृश्यमानधर्मिको यथा
ऊर्द्ध्वत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति । अ-
दृश्यमानधर्मिको यथा अरण्ये झाटाद्यन्तरिते गोगवयादिपिण्डे वि-
षाणमात्रदर्शनात् अयं गौर्गवयो वेति । वस्तुतस्तत्रापि विषाणध-
र्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति ।
(२)विवक्षामात्रात्तु द्वैविध्याभिधानम् । (३)यत् सामान्यं संशय-
हेतुस्तदनेकत्र दृष्टं संशायकम् एकत्र धर्मिणि वा दृष्टं संशयहेतुरि-
त्यत्र प्रथमां विधामाह—

दृष्टश्च दृष्टवत् ॥ १८ ॥

दृष्टमूर्द्ध्वत्वं संशयहेतुः । दृष्टवदिति वतिप्रत्ययः तेन दृष्टाभ्यां
स्थाणुपुरुषाभ्यां तुल्यं वर्त्तते पुरोवर्त्तिनि यदूर्द्ध्वत्वं तद्दृष्टं संशय-
हेतुरित्यर्थः ॥ १८ ॥

एकधर्मिविषयं यद्दृष्टं तदुदाहरति—

कश्चित्संशयः साधारणधर्मवद्धर्मिज्ञानजन्यः प्रधानविधिकोटिः कश्चित्तु प्रधाननिषेधकोटिः कश्चिच्च
प्रधानोभयकोटिरित्येतेषामनुगमासम्भवादित्यर्थः । अव्यहितोत्तरत्वनिवेशे च गौरवादित्याशयः ।
असाधारणधर्मादीनां कारणत्वानुभवेन गौरवस्य प्रामाणिकतया नायन्दोष इति न्यायसूत्रपक्षपातिनः ।

(१) धर्म्यंश इति । वह्न्यंशे संशयात्मकस्यापि पर्वतांशे निश्चयात्मकस्यैव पर्वतो वह्नि-
मान्नवेति संशयस्य स्वीकारात् इत्यर्थः ।

(२) विवक्षामात्रादिति । विषाणमात्रदर्शनोत्तरसन्देहस्य दृश्यमाणधर्मिकत्वेपि गोबलीवर्द-
न्यायेन विषाणधर्मिकान्यदृश्यमानधर्मिकत्वं तदन्यदृश्यमानधर्मिकत्वं चेति कौचिद्धर्मावाश्रित्य
विभाजकेच्छामात्रेण द्विधोक्तिर्बहिर्विषयस्य संशयस्येत्यर्थः ।

(३) बाह्यान्तर्विषयभेदेन संशयद्वैविध्यमुक्त्वा कारणभेदेन तदाह यदिति ।

रणो धर्मोऽनध्यवसायात्मकज्ञानजनक इति नोक्तः । (१)यद्वा असाधारणस्यापि व्यावृत्तिद्वारा कारणत्वं सपक्षविपक्षव्यावृत्तिः साधारणधर्म एवेति नोक्तः । (२)विप्रतिपत्तिरपि विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयं शब्दो नित्य इत्यपरं तदुभयं, तदुभयजन्यञ्च ज्ञानद्वयमयुगपद्भावित्वात् सम्भूय न संशायकमतस्तत्र शब्दत्वादिरसाधारणः, सत्त्वप्रमेयत्वादिः साधारणो वा धर्मः संशायक इति (३)पृथङ्नोक्ता ।

समानतन्त्रे गौतमीयेऽनध्यवसायज्ञानस्यानभ्युपगमात् असाधारणो धर्मः संशयकारणत्वेनोक्तः । विप्रतिपत्तेर्विरुद्धवाक्यद्वयस्यान्वयव्यतिरेकशालितया संशयकारणत्वमुक्तम् । न्यायभाष्ये च उपलभ्यमानत्वं यत् संशयकारणमुक्तं सदप्युपलभ्यते असदप्युपलभ्यते इति उपलभ्यमानमिदं सदसद्वेति, यच्चानुपलभ्यमानत्वं सदपि नोपलभ्यते मूलककीलकोदकादि, असदपि नोपलभ्यते गगनारविन्दादि, तथाच पञ्चविधः संशय इति । तदेतत्सामान्यमेवेति सामान्यप्रत्यक्षादित्यनेनैव गतार्थम् । न्यायवार्त्तिकेऽपि यत् कारणभेदेन संशये त्रित्वमुक्तं तदपि न सम्भवति व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैवासम्भवात् । न हि तृणारणिमणिजन्यवन्हौ वैजात्यवदत्रापि वैजात्यं कल्पनीयं संशयत्वावच्छिन्नकार्य्यं प्रति समानधर्मत्वेनैव कारणतायाः कल्पनात् । यच्च प्रधानविधिकोटित्वप्रधाननिषेधकोटित्वादि वैजात्यमुक्तम्, (४)तदननुगतत्वान्नावच्छेदकम् ।

---

(१) नव्यमतेन समाधत्ते यद्वेति । असाधारणधर्मोऽपि एकसम्बधिज्ञानमपरं स्मारयतीति नियमेन व्यावृत्तत्वसम्बन्धज्ञानद्वारा तत्तदभावरूपकोटिद्वयं स्मारयन् कोटिद्वयज्ञानसम्पादनद्वारा संशये प्रयोजक इति एतन्मते संशयातिरिक्तानध्यवसायात्मकज्ञानस्यासत्त्वेपि न क्षतिरिति स्वरसः ।

(२) असाधारणधर्मवद्धर्मिज्ञानत्वेन पृथक्संशयहेतुत्वं निराकृत्य विप्रतिपत्तेस्तत्कारणत्वखण्डनाय विप्रतिपत्तिपदार्थमाह विप्रतिपत्तिरपीति । वाक्यद्वयस्वरूपमाह शब्द इत्यादिना तदुभयमित्यन्तेन । अपरन्तदुभयं = शब्दोऽनित्य इति वाक्यद्वयमित्यर्थः । तथाविधवाक्यद्वयजन्यं क्रमिकज्ञानद्वयमपि अयुगपद्भावित्वात्संशयाजनकमित्याह तदुभयजन्यञ्चेति । एकैकज्ञानस्यैकैककोटिज्ञानहेतुत्वे क्रमिकप्रामाण्यज्ञानास्कंदितमेकैककोटिज्ञानं स्यात् न तु संशयरूपमिति भावः ।

(३) पृथगिति । तथा च वाक्यद्वयजन्यशाब्दबोधानन्तरं तत्समानाकारं मानसज्ञानं हेतुत्वेन परिकल्प्य क्षणविलम्बेन संशयस्वीकारे तत्स्थले शब्दत्वस्यासाधारणस्योपस्थितत्वात्तदादाय, परक्षणे वा सत्त्वादिकं साधारणधर्ममादाय संशयस्याङ्गीकारेण विप्रतिपत्तिर्न पृथगुक्तेत्यर्थः ।

(४) अननुगतत्वादिति । तादृशवैजात्यं कार्यतावच्छेदकं न भवति सकलकार्याव्यापकत्वात्.

तथाच संशयो न त्रिविधो न वा पञ्चविधः किन्त्वेकविध एव, प्रकारान्तरेण तु द्वैविध्यं सूत्रकृदेव स्पष्टयति । ननु जिज्ञासाजनकज्ञानं संशय इति न लक्षणम् अनध्यवसायेऽपि गतत्वात्, संस्काराजनकज्ञानं संशय इत्यपि निर्विकल्पकसाधारणं विशिष्टज्ञानत्वेन संशयस्यापि संस्कारजनकत्वात्, संशयत्वञ्च जातिरपि न लक्षणं (१)धर्म्यंशे संशयत्वाभावेन तदंशे तज्जात्यभावात् जातेश्चाव्याप्यवृत्तित्वानभ्युपगमात् इति चेत्, एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय इति तल्लक्षणात् ॥ १७ ॥

द्विविधः संशयो बहिर्विषयकोऽन्तर्विषयकश्च । बहिर्विषकोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च । तत्र दृश्यमानधर्मिको यथा ऊर्द्ध्वत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति । अदृश्यमानधर्मिको यथा अरण्ये झाटाद्यन्तरिते गोगवयादिपिण्डे विषाणमात्रदर्शनात् अयं गौर्गवयो वेति । वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति । (२)विवक्षामात्रात्तु द्वैविध्याभिधानम् । (३)यत् सामान्यं संशयहेतुस्तदनेकत्र दृष्टं संशायकम् एकत्र धर्मिणि वा दृष्टं संशयहेतुरित्यत्र प्रथमां विधामाह—

दृष्टश्च दृष्टवत् ॥ १८ ॥

दृष्टमूर्द्ध्वत्वं संशयहेतुः । दृष्टवदिति वतिप्रत्ययः तेन दृष्टाभ्यां स्थाणुपुरुषाभ्यां तुल्यं वर्त्तते पुरोवर्त्तिनि यदूर्द्ध्वत्वं तद्दृष्टं संशयहेतुरित्यर्थः ॥ १८ ॥

एकधर्मिविषयं यद्दृष्टं तदुदाहरति—

कश्चित्संशयः साधारणधर्मवद्धर्मिज्ञानजन्यः प्रधानविधिकोटिः कश्चित्तु प्रधाननिषेधकोटिः कश्चिच्च प्रधानोभयकोटिरित्येतेषामनुगमासम्भवादित्यर्थः । अव्यहितोत्तरत्वनिवेशे च गौरवादित्याशयः । असाधारणधर्मादीनां कारणत्वानुभवेन गौरवस्य प्रामाणिकतया नायन्दोष इति न्यायसूत्रपक्षपातिनः ।

(१) धर्म्यंश इति । वह्न्यंशे संशयात्मकस्यापि पर्वतांशे निश्चयात्मकस्यैव पर्वतो वह्निमान्नवेति संशयस्य स्वीकारात् इत्यर्थः ।

(२) विवक्षामात्रादिति । विषाणमात्रदर्शनोत्तरसन्देहस्य दृश्यमाणधर्मिकत्वेपि गोबलीवर्दन्यायेन विषाणधर्मिकान्यदृश्यमानधर्मिकत्वं तदन्यदृश्यमानधर्मिकत्वं चेति कौचिद्धर्मावाश्रित्य विभाजकेच्छामात्रेण द्विधोक्तिर्बहिर्विषयस्य संशयस्येत्यर्थः ।

(३) बाह्यान्तर्विषयभेदेन संशयद्वैविध्यमुक्त्वा कारणभेदन तदाह यदिति ।

यथादृष्टमयथादृष्टत्वाच ॥ १९ ॥

संशयहेतुरिति शेषः । चकारः पूर्वोक्तसमुच्चयार्थः । अयथादृष्टत्वाद्धेतोर्यथादृष्टमपि संशायकम् यथा-चैत्रो यथादृष्टः केशवान्, कालान्तरे अयथादृष्टः केशविनाकृतो दृष्ट इत्यर्थः । क्रमेण तत्रैव चैत्रे वस्त्रावृतमस्तके दृष्टे सति भवति संशयश्चैत्रोऽयं सकेशो निष्केशो वेति । तत्र हि चैत्रत्वं समानो धर्मः संशायकः स चैकत्रैव दृष्ट इत्यभिन्न एव धर्मिणि दृष्टः संशयहेतुः ॥ १९ ॥

उपलभ्यमानत्वं समानमेव धर्मं संशयकारणमाह—

विद्याऽविद्यातश्च संशयः ॥ २० ॥

विद्येति । आन्तरसंशयो हि विद्याऽविद्याभ्यां भवति यथा मौहूर्त्तिकः सम्यगादिशति चन्द्रोपरागादि, असम्यगपि । तत्र स्वज्ञाने संशयोऽस्य जायते सम्यगादिष्टमसम्यग्वेति । (१)यद्वा ज्ञानं हि क्वचिद्विद्या भवति क्वचिच्चाविद्या अप्रमा भवति, तथाच ज्ञायमानत्वात् सदिदमसद्वेति संशयो जायते । पुनः संशयग्रहणमिहापि सामान्यप्रत्यक्षादेव संशयो न तु निमित्तान्तरादिति सूचनार्थम् । तथाच "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" इति गौतमीये लक्षणे उपलब्ध्यनुपलब्ध्यव्यवस्थेत्यस्य पृथगेव संशयकारणत्वं (२)कैश्चिदुक्तं तन्निरस्तम् ॥ २० ॥

एवं लक्षणतः स्वरूपतश्च परीक्षाप्रथमाङ्गं संशयं व्युत्पाद्य इदानीं परीक्षाविषयं शब्दं धर्मिणं दर्शयन्नाह—

श्रोत्रग्रहणो योऽर्थः स शब्दः ॥ २१ ॥

श्रोत्रं ग्रहणं ग्रहकरणं यस्य स श्रोत्रग्रहणः, अर्थ इति धर्मीत्यर्थः । तथाच शब्दवृत्तिधर्मेषु श्रोत्रग्राह्येषु शब्दत्वतारत्वादिगुणत्वसत्त्वादिषु (३)नातिव्याप्तिः । अर्थपदेन धर्मिपरेण (४)जातिधर्मि-

---

(१) यद्वेति । सूत्रोक्तविद्याविद्यात इत्यस्य भावप्रधाननिर्देशत्वेन विद्यात्वाविद्यात्वाभ्यामित्यर्थः तथा चेदं ज्ञानं प्रमात्वाप्रमात्वसहचरितज्ञायमानत्ववदिति ज्ञानादिदं प्रमा न वेति सन्देह इत्यर्थः ।

(२) कैश्चिद्भाष्यकारैरित्यर्थः ।

(३) नातिव्याप्तिरिति । शब्दत्वादौ धर्मित्वाभावादिति भावः ।

(४) जातीति । समवायेन जातिमात्राश्रयत्वामित्यर्थः ।

त्वम् अभिप्रेतम् अतः स्फोटनामा शब्दसमवेतः शब्दो नास्तीति सूचितम्। नन्वेकं पदम् एकं वाक्यमिति प्रतीतिबलादवश्यं स्फोटोऽङ्गीकर्त्तव्यः, न हि बहुवर्णात्मके पदे बहुवर्णात्मके वा वाक्ये भवत्येकत्वप्रत्ययः। स्फोट इति चार्थस्फुटीकरणाधीना संज्ञा। वर्णानां प्रत्येकं तावदर्थप्रत्ययाजनकत्वमेव, मिलनन्त्वेकवक्तृकाणामाशुतरविनाशिनामसम्भवीति स्फोटादेवार्थप्रत्ययः, तज्ज्ञानमन्तरेणार्थस्फुटीभावाभावात्। स च स्फोटो यद्यपि पदभावेनावस्थितेषु सर्वेष्वेव वर्णेषु तथापि चरमवर्णे स्फुटीभवति। मैवम्। सङ्केतवद्वर्णत्वं पदत्वं तथा च सङ्केतबलादेव पदादर्थप्रतीतौ किं स्फोटेन। (१)वर्णानामबहूनामप्येकार्थप्रतिपादकत्वमेकं धर्ममभिप्रेत्य एकं पदमिति भाक्तो व्यवहारः एवं वाक्ये ऽपि। यदि वर्णातिरिक्तः पदात्मा कश्चित् प्रत्यक्षतो गृह्येत स्वीक्रियेतापि स्फोटः सोऽयं स्फोटवादस्तुच्छत्वादुपेक्षितः सूत्रकृता ॥ २१ ॥

तदेवं शब्दे धर्मिण्युपस्थिते गुणत्वे सत्येव तस्याकाशलिङ्गत्वम्। अतो गुणत्वव्यवस्थापनाय त्रिकोटिकं संशयमुपपादयन्नाह—

तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्य उभयथा दृष्टत्वात् ॥ २२ ॥

शब्दे संशय इति शेषः। शब्दे शब्दत्वं श्रोत्रग्राह्यत्वं चोपलभ्यते, तच्च तुल्यजातीयेषु त्रयोविंशतौ गुणेषु अर्थान्तरभूतेषु द्रव्येषु कर्मसु च विशेषस्य व्यावृत्तेः उभयथा उभयत्र दर्शनात् 'शब्दः किं गुणो द्रव्यं कर्म वेति' संशयं जनयति। सामान्यविशेषसमवायकोटिकत्वन्तु सत्त्वकारणवत्त्वादिवैधर्म्यदर्शनान्न भवति। ननु चासाधारणधर्मस्यानध्यवसायजनकत्वात् संशयजनकत्वं प्रतिषिद्धम् शब्दत्वं श्रोत्रग्राह्यत्वञ्चासाधारण एव धर्मः कथं संशयं जनयिष्यतीति चेत्सत्यम्। व्यावृत्तिरस्य सजातीयासजातीयसाधारणीति व्यावृत्तेः साधारणस्यैव धर्मस्य संशयजनकत्वेनोक्तत्वात्।

---

(१) वर्णविशिष्टवर्णत्वं पदत्वम् वै० अव्यहितोत्तरत्वसम्बन्धेन। उक्तपदं तज्ज्ञानं वा शक्तिज्ञानसाहाय्येनैवार्थं बोधयति ततश्च संसर्गावगाही शाब्दबोधः एवं च वर्णानामाशुतरविनाशित्वेपि न क्षतिरित्याशयेनाह वर्णानामिति।

(१)शब्दत्वप्रतियोगिकी व्यावृत्तिः समानो धर्मः उभयगतव्यावृत्तिप्रतियोगित्वञ्च शब्दत्वमसाधारणो धर्मः । तदुक्तं 'विशेषस्योभयथा दर्शनादिति'। अत्र हि विशेषस्य व्यावृत्तेरुभयत्र सजातीये विजातीये च दर्शनस्य संशयहेतुत्वेनोपादानात् स च समान एव धर्म इति ॥ २२ ॥

तदेवं संशयं दर्शयित्वा द्रव्यत्वकोटिव्युदासायाह—

एकद्रव्यत्वान्न द्रव्यम् ॥ २३ ॥

एकं द्रव्यं समवायि यस्य तदेकद्रव्यं द्रव्यञ्च किमप्येकद्रव्यसमवायिकारणकं न भवतीति द्रव्यवैधर्म्यान्नायं शब्दो द्रव्यमित्यर्थः ॥ २३ ॥

ननु कर्मैकद्रव्यमेव तथाच शब्दः कर्म स्यादित्यत आह—

नापि कर्माऽचाक्षुषत्वात् ॥ २४ ॥

प्रत्ययस्य शब्दविषयकस्याचाक्षुषत्वात् (२)चक्षुर्भिन्नबहिरिन्द्रियजन्यत्वादित्यर्थः । तथा च शब्दत्वं न कर्मवृत्ति चाक्षुषप्रत्यक्षावृत्तिजातित्वात् रसत्वादिवदिति भावः ॥ २४ ॥

ननु शब्दः कर्म आशुतरविनाशित्वात् उत्क्षेपणादिवदिति चेदत्राह—

गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् ॥ २५ ॥

अपवर्गः आशुनाशः स च गुणत्वेऽपि द्वित्वादिवदाशुभाविनाशकसन्निपाताधीन इति कर्मभिः साधर्म्यमात्रमस्य न तु कर्मत्वमेव । त्वदुक्तहेतोराशुतरविनाशित्वस्य द्वित्वज्ञानसुखदुःखादिभिरनैकान्तिकत्वमिति भावः ॥ २५ ॥

ननु सिध्यतु शब्दो गुणस्तथापि नासावाकाशलिङ्गम्। आकाशं हि तदाऽनुमापयेत् यदि तस्य कार्य्यः स्यात् । किन्तु नित्य एवायं, कदाचिदनुपलम्भस्तु व्यञ्जकाभावप्रयुक्त इत्याशङ्क्याह—

---

(१) ननु व्यावृत्तिर्नाम सामानाधिकरण्यरूपः सम्बन्ध एव वाच्यस्तस्य च किञ्चित्प्रतियोगिकत्वाकिञ्चिदनुयोगिकत्वानियतत्वाद्व्यावृत्तत्वे तदभावात्प्रमेयत्वादिवत्तस्य साधारणत्वेपि न सम्बन्धतेत्याशङ्क्याह शब्दत्वेति। वृत्त्यनियामकसम्बन्धरूपस्य व्यावृत्तत्वस्य सम्बन्धज्ञानद्वारा एकसम्बन्धिज्ञानमपरस्मारकमितिनियमेन सामानाधिकरण्यवत् परस्परमेव प्रतियोग्यनुयोगिप्रतियोगि भवतीति भावः। उभयेति । गुणत्वद्रव्यत्वादिनिष्ठव्यावृत्तिप्रतियोगित्वं यस्य तादित्यर्थः ।

(२) चक्षुर्भिन्नेति । चक्षुरजन्यत्वादित्युक्तौ वायुस्पन्दे व्यभिचारस्तद्वारणाय चक्षुर्भिन्नेति ।

सतो लिङ्गाभावात् ॥ २६ ॥

यदि हि उच्चारणात् प्रागूर्द्ध्वं शब्दः सन् स्यात् तदा सतोऽस्य लिङ्गं प्रमाणान्तरं स्यात् । न चाश्रवणदशायां शब्दसत्त्वे प्रमाणमस्ति, तस्मात् कार्य्य एवायं न व्यङ्ग्य इति ॥ २६ ॥

इतश्च न व्यङ्ग्योऽसावित्याह—

नित्यवैधर्म्यात् ॥ २७ ॥

नित्येन सहास्य शब्दस्य वैधर्म्यमुपलभ्यते यतश्चैत्रो वक्तीत्यावृतोऽपि चैत्रमैत्रादिर्वचनेनानुमीयते । न च व्यञ्जकः प्रदीपादिर्व्यङ्ग्येन घटादिना कचिदनुमीयते, तस्माज्जन्य एवायं न व्यङ्ग्य इति भावः ॥ २७ ॥

व्यङ्ग्यत्वे बाधकमुक्त्वा सम्प्रत्यनित्यत्वे हेतुमाह—

अनित्यश्चायं कारणतः ॥ २८ ॥

कारणत उत्पत्तेर्दृष्टत्वादिति शेषः । उपलभ्यते हि भेरीदण्डसंयोगादिभ्यः प्रादुर्भवन् शब्दः, तथाचोत्पत्तिमत्त्वादनित्योऽयमिति । यद्वा कारणत इति कारणवत्त्वहेतुमुपलक्षयति ॥ २८ ॥

ननु च कारणवत्त्वं शब्दस्य स्वरूपासिद्धमत आह—

न चासिद्धं विकारात् ॥ २९ ॥

शब्दस्य कारणवत्त्वमसिद्धमिति न वाच्यम् तीव्रमन्दादिभावेन विकारस्य दर्शनात् भेरीदण्डाभिघातस्य तीव्रतया तीव्रस्य मन्दतया मन्दस्य शब्दस्योपलम्भात् ।, न ह्यभिव्यञ्जकतीव्रत्वाद्यधीनोऽभिव्यङ्ग्यतीव्रत्वादिः । तथाच कारणतो विकारादनुमीयते जन्योऽयं न त्वभिव्यङ्ग्य इति ॥ २९ ॥

ननु व्यञ्जकस्यैवायं महिमा यत्तीव्रमन्दादिभावेनाभिव्यनक्ति भेरीदण्डाद्यभिहतो वायुरेव तीव्रो मन्दश्च तथा प्रत्ययमाधत्ते अत आह—

अभिव्यक्तौ दोषात् ॥ ३० ॥

शब्दस्याभिव्यक्तौ समानदेशानां समानेन्द्रियग्राह्याणां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं दोषः स्यात् । न च तादृशानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं कचिद् दृष्टम् । (१)अत्र यदि तथा न स्वीक्रियेत तदा

(१) अत्राभिव्यक्तिपक्षे इत्यर्थः ।

ककाराभिव्यक्तौ सर्ववर्णाभिव्यक्तिप्रसङ्गः । ननु समानदेशानामपि सत्त्वनरत्वब्राह्मणत्वानां स्वरूपभेद-संस्थान-योनिव्यङ्ग्यानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं दृष्टमेवेति चेन्न तेषां समानदेशत्वाभावात् । न हि यावान् देशः सत्त्वस्य तावानेव नरत्वस्य ब्राह्मणत्वस्य वा ॥ ३० ॥

इतश्च नाभिव्यङ्ग्यतेत्याह—

संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः ॥ ३१ ॥

संयोगात् भेरीदण्डादिसंयोगात्, विभागात् वंशे पाट्यमाने । तत्र संयोगस्तावन्नाद्यस्य शब्दस्य कारणं तदभावात् तस्मात् वंशदलद्वयविभागो निमित्तकारणं दलाकाशविभागश्चासमवायिकारणम् । यत्र च दूरे वीणादावुत्पन्नः शब्दः तत्र सन्तानक्रमेण उत्पद्यमानः शब्दः कर्णशष्कुल्यवच्छिन्नमाकाशदेशमासादयन् गृह्यते तेन शब्दादपि शब्दनिष्पत्तिरिति ॥ ३१ ॥

अनित्यत्वे हेत्वन्तरं समुच्चिनोति—

लिङ्गाच्चानित्यः शब्दः ॥ ३२ ॥

(१)वर्णात्मकः शब्दोऽनित्यः जातिमत्त्वे सति श्रोत्रग्राह्यत्वात् वीणादिध्वनिवदित्यर्थः ॥ ३२ ॥

इदानीं नित्यत्वे सिद्धान्तिनोक्तान् हेतून् दूषयितुमाह—

(२)द्वयोस्तु प्रवृत्त्योरभावात् ॥ ३३ ॥

तुशब्दः पूर्वोक्तव्यवच्छेदकः पूर्वपक्षाभिव्यक्त्यर्थः । द्वयोराचार्यान्तेवासिनोरध्यापनेऽध्ययने च प्रवृत्तिर्दृश्यते तस्या अभावात् अभावप्रसङ्गात् । अध्यापनं हि सम्प्रदानं सम्प्रदीयते गुरुणा शिष्याय वेदः स यदि स्थिरो भवति तदा तस्य सम्प्रदानं सम्भवति । ननु सम्प्रदीयमानं गवादि दातृप्रतिग्रहीत्रोरन्तराल उपलभ्यते, न च वेदादि गुरुशिष्ययोरन्तराले उपलभ्यत इति नाध्यापनं सम्प्रदानमिति चेत् अन्तरालेऽपि तत्रस्थपुरुषश्रोत्रेण तदुपलम्भात् । किञ्चाभ्यासादपि शब्दस्य नित्यता, यथा पञ्चकृत्वो रूपं पश्यतीति स्थिरस्य रूपस्याभ्यासो दृष्टः तथा दशकृत्वोऽधीतोऽनुवाकः विंशतिकृत्वोऽधीत इत्यभ्यासः स्थैर्ये शब्दस्य प्रमाणम् । सिद्धे च

---

(१) वर्णात्मकं इति । प्राचीनमतेऽसाधारण्यवारणाय शब्दत्वसामानाधिकरण्येनानित्यत्वसाधनम् ।

(२) मीमांसकमतोक्तानित्यत्वसाधकहेतून् सूत्रत्रयेणाह द्वयोरित्यादिना ।

स्थैर्य्ये विनाशकानुपलब्धेः "तावत् कालं स्थिरश्चैनं कः पश्चान्नाशयिष्यति" इति नित्यतैव पर्य्यवसन्नेति भावः ॥ ३३ ॥

हेत्वन्तरं शब्दस्य नित्यत्वे आह—

प्रथमाशब्दात् ॥ ३४ ॥

"त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति प्रथमोत्तमयोः सामिधेन्योस्त्रिरुच्चारणं स्थैर्य्यं विनाऽनुपपन्नमित्यर्थः ॥ ३४ ॥

शब्दनित्यत्वे हेत्वन्तरमाह—

सम्प्रतिपत्तिभावाच्च ॥ ३५ ॥

सम्प्रतिपत्तिः प्रत्यभिज्ञा तद्भावात् तत्सद्भावादित्यर्थः। प्रतिपत्तिशब्दादेव तद्विशेषस्य प्रत्यभिज्ञाया लाभात् सम्पूर्वः सत्यत्वमाह। तथाच यैव गाथा मैत्रेणोच्चारिता तामेवायमुच्चरति तमेव श्लोकं पुनः पुनः पठति उक्तमेव वचनं पुनः पुनरभिधत्से यदेव वाक्यं परारि परुच्च त्वयोक्तं तदेवेदानीमपि ब्रूषे स एवायं गकार इत्यादिप्रत्यभिज्ञाबलात् स्थैर्य्यं शब्दस्येति ॥ ३५ ॥

सर्वानिमान् हेतून् दूषयन्नाह—

(१)सन्दिग्धाः सति बहुत्वे ॥ ३६ ॥

सन्दिग्धा अनैकान्तिका इत्यर्थः। तदुक्तं—"विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्" इति। तथा च बहुत्वे नानात्वेऽपि अध्ययनमभ्यसनं प्रत्यभिज्ञानञ्च दृष्टमित्यनैकान्तिकत्वं हेतूनाम्। तथाहि नृत्यमधीते नृत्यमभ्यस्यति द्विरनृत्यत् यदेव नृत्यं परुदकार्षीरैषमोऽपि तदेव करोषि यदेव नृत्यमेकेन चारणेन कृतं तदेवायमपि करोतीति नृत्ये दृष्टत्वात्, तस्य च कर्मविशेषस्य त्वयाऽपि स्थैर्य्यानभ्युपगमात्॥ ३६॥

ननु पञ्चाशद्वर्णा अष्टाक्षरो मन्त्रः त्र्यक्षरो मन्त्रः अष्टाक्षराऽनुष्टुबित्यादिसङ्ख्या कथं? वर्णानामनित्यत्वे उच्चारणभेदेनानन्त्यसम्भवादित्यत आह—

सङ्ख्याभावः सामान्यतः ॥ ३७ ॥

सङ्ख्यायाः पञ्चाशदादिसङ्ख्याया भावः सद्भावः सामान्यतः कत्वगत्वादिजातित इत्यर्थः। ककारादीनामानन्त्येऽपि कत्वगत्वाद्य-

(१) एकसूत्रेणैव सर्वान् हेतून् दूषयति सन्दिग्धा इति सूत्रेण। सन्दिग्धपदस्यानैकान्तिकार्थत्वे प्रमाणमाह तदुक्तमिति। परुदतीत ऐषमो वर्तमान इत्यर्थः।

वच्छिन्नानां पञ्चाशत्त्वं त्रित्वमष्टत्वं वा द्रव्यगुणादीनामान्तर्गणिकभेदेनानन्त्येपि नवत्वचतुर्विंशतित्वादिवदिति भावः।

ननु स एवायं गकार इति प्रत्यभिज्ञैव स्थैर्य्यसाधिका, न चैषा तीव्रो गकारो मन्दो गकार इति प्रतीत्या विरुद्धधर्मं गोचरयन्त्या बाध्यते तीव्रत्वादेस्तत्रौपाधिकत्वात्। न चोपाधिभेदादपि भेदो माभूत् तर्हि जवातापिञ्छादिसंयोगान्नीलपीतादिभावेन प्रथमानः स्फटिकमणिरपि नाना, कृपाणमणिदर्पणेषु दीर्घादिभावेन भासमानं मुखमपि वा नाना न भासेत। ननु कस्यायं तीव्रत्वादिधर्मो गकारोपाधिक इति चेन्न वायुधर्मो नादधर्मो ध्वनिधर्मो वा भविष्यति किं तत्र विशेषचिन्तया। त्वयापि तारत्वादेः कत्वगत्वादिना परापरभावानुपपत्त्या स्वाभाविकत्वाभ्युपगमादिति चेत्।

नैवम्। उत्पन्नो गकारः, नष्टो गकारः, श्रुतपूर्वो गकारो नास्ति, निवृत्तः कोलाहल इत्यादिविरोधिप्रतीतौ सत्यामपि चेत् इयं प्रत्यभिज्ञा न निवर्त्तते तदास्या जातिविषयताकल्पनात्। अन्यथा व्यक्तिस्थैर्य्यमालम्बमानायामस्यां सत्यामुक्तविरोधिप्रत्यया एव नोत्पद्येरन्। न चायं वायुधर्मस्तद्धर्माणां श्रोत्राविषयत्वात्। नापि नादधर्मः, नादो यदि वायुरेव तदा दोषस्योक्तत्वात् अन्यस्य निर्वक्तुमशक्यत्वात्। नापि ध्वनिधर्मः, शङ्खादिध्वनावनुपलभ्यमानेऽपि गकारे तारत्वादिप्रतीतेः। (१)स्वाभाविकत्वे तु न जातिसाङ्कर्य्यं गत्वादिव्याप्यस्य तस्य नानात्वाभ्युपगमात्। किञ्च शुकसारिकामनुष्यप्रभवेषु गकारादिषु स्फुटतरा रूपभेदप्रथाऽस्ति, एवं स्त्रीपुंसप्रभवेषु स्त्रीपुंसभेदप्रभवेषु च, यतः काण्डपटाद्यावृता अपि शुकादयोऽनुमीयन्ते। औपाधिकत्वन्त्वस्य नानुभूयमानोपाधिनिबन्धनं कुङ्कुमारुणा तरुणीतिवत्। नाप्यौपपत्तिकमौपाधिकत्वम् उपपत्तेस्तादृशप्रमाणस्याभावादिति सङ्क्षेपः॥३७॥

इति वैशेषिकसूत्रोपस्कारे शाङ्करे द्वितीयाध्यायस्य द्वितीयमाह्निकम्।

समाप्तश्चायं द्वितीयोऽध्यायः।

---

(१) ननु नैयायिकैस्तारत्वादिधर्मा गकारादौ स्वाभाविका वाच्यास्तथा चातारगकारगतगत्वाभाववत्खकारवृत्तितारत्वगत्वयोस्तारगकारे सत्त्वेन साङ्कर्यं स्यादित्यभिप्रायेणाशंक्य समाधत्ते स्वाभाविकत्वेत्वित्यादिना।

तृतीयाध्याये प्रथमाह्निकम् ।

तदेवं द्वितीयाध्याये बहिर्द्रव्यपरीक्षामुपपाद्य उद्देशक्रमादिदानीमात्मपरीक्षायै पीठमारचयितुमाह—

प्रसिद्धा इन्द्रियार्थाः ॥ १ ॥

इन्द्रियाणामर्था गन्धरसरूपस्पर्शशब्दा बाह्यैकेकेन्द्रियग्राह्याः । तत्र "श्रोत्रग्रहणो योऽर्थः स शब्द" इति शब्दप्रसिद्धौ दर्शितायामर्थाद्गन्धादौ स्पर्शपर्य्यन्ते प्रसिद्धिर्दर्शितेत्यर्थः । तथाहि घ्राणग्रहणो योऽर्थः स गन्धः, रसनग्रहणो योऽर्थः स रसः, (१)चक्षुर्मात्रग्रहणो योऽर्थः तद्रूपम्, त्वगिन्द्रियमात्रग्रहणो योऽर्थः स स्पर्शः । सर्वत्र चार्थशब्देन धर्मी भावभूत उच्यते तेन गन्धत्वादौ गन्धाद्यभावे च नातिव्याप्तिः, तदेवं घ्राणग्रहणवृत्तिगुणत्वावान्तरजातिमत्त्वं गन्धत्वम् । एवं रसादावपि वाच्यम्, तेन नातीन्द्रियगन्धाद्यनुपग्रहः ॥ १ ॥

इन्द्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह—

इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः ॥ २ ॥

हेतुर्लिङ्गमर्थान्तरस्य आत्मनः । इन्द्रियार्थेभ्य इति । (२)इन्द्रियेभ्योऽर्थेभ्यश्च रूपादिभ्यस्तद्वद्भ्यश्च यदर्थान्तरम् आत्मा तस्य लिङ्गमित्यर्थः । यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितम् तथापीन्द्रियार्थप्रसिद्धे रूपादिसाक्षात्कारस्य प्रसिद्धतरतया ताद्रूप्येणैव लिङ्गत्वमुक्तम् । तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्य्यत्वात् घटवत् गुणत्वाद्वा क्रियात्वाद्वा । सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदिक्रियावत् । यच्च प्रसिद्धेः करणं तदिन्द्रियम् । तच्च कर्तृप्रयोज्यं करणत्वात् वास्यादिवत् । तथा यत्रेयं प्रसिद्धिराश्रिता, यः घ्राणादीनां करणानां प्रयोक्ता स आत्मा ॥ २ ॥

---

(१) चक्षुर्मात्रेति । रूपवद्द्रव्येऽतिव्याप्तिवारणाय मात्रपदम् ।

(२) इन्द्रियेभ्य इति । भूतान्तरापेक्षया इन्द्रियाणामात्मसारूप्येपि भेदप्रतिपादनाय, प्रत्यक्षाविषयत्वलक्षणसाधर्म्येण दिगादिसङ्ग्रहाय चेन्द्रियेभ्य इति पृथगुपात्तम् । यद्यपि प्रसिद्धेः पक्षतया हेतुत्वकथनमयुक्तम् तथाऽपि हेतुपदमत्रानुमितिजनकपरामर्शविशेष्यपरामिति नानुपपत्तिरिति भावः ।

ननु शरीरमिन्द्रियाणि वा प्रसिद्धेराश्रयोऽस्तु, प्रसिद्धिं प्रति तदुभयान्वयव्यतिरेकयोः स्फुटतरत्वात् किं तदन्याश्रयकल्पनया। तथाहि चैतन्यं शरीरगुणः तत्कार्य्यत्वात् तद्रूपादिवत्। एवमिन्द्रियगुणत्वेऽपि वाच्यमित्याशङ्क्याह—

सोऽनपदेशः ॥ ३ ॥

अपदेशो हेतुः तदाभासोऽनपदेशः । तथाच तत् कार्य्यत्वं प्रदीपजन्यज्ञानादावनैकान्तिकत्वादनपदेश इत्यर्थः ॥ ३ ॥

ननु तत्कार्यत्वं चैतन्यत्वावच्छिन्नस्यैव कार्यत्वं विवक्षितं प्रदीपादीनाञ्च समस्तमेव (१)चैतन्यं न कार्यमिति न व्यभिचार इत्याशङ्क्याह—

कारणाज्ञानात् ॥ ४ ॥

शरीरकारणानां करचरणादीनां तदवयवानां वा अज्ञानात् (२)ज्ञानशून्यत्वादित्यर्थः । पृथिव्यादिविशेषगुणानां हि कारणगुणपूर्वकता दृष्टा तथा च शरीरकारणेषु यदि ज्ञानं स्यात्तदा शरीरेऽपि सम्भाव्येत, न चैवम्। नन्वस्तु शरीरकारणेष्वपि चैतन्यमिति चेन्न ऐकमत्याभावप्रसङ्गात्। न हि बहूनाञ्चेतनानामैकमत्यं दृष्टम्, करावच्छेदेनानुभूतस्य करच्छेदेऽस्मरणप्रसङ्गात्, यतो "नान्यदृष्टं स्मरत्यन्यः" इति। किञ्च शरीरनाशे तत्कृतहिंसादिफलानुपभोगप्रसङ्गात्। न हि चैत्रेण कृतस्य पापस्य फलं मैत्रो भुङ्क्ते ततश्च कृतहानिरकृताभ्यागमश्च स्यात् ॥ ४ ॥

ननु शरीरकारणेषु सूक्ष्ममात्रया भानमस्ति शरीरे तु स्फुटमतो नाकारणगुणपूर्वकता न चैकमत्यानुपपत्तिरित्याशङ्क्याह—

कार्य्येषु ज्ञानात् ॥ ५ ॥

यदि हि शरीरमूलकारणेषु परमाणुषु चैतन्यं स्यात् तदा तदारब्धेषु कार्य्येषु घटादिष्वपि स्यात्। किञ्च पार्थिवविशेषगुणानां सर्वपार्थिववृत्तिताया व्याप्तेः कार्य्येष्वपि घटादिषु चैतन्यं स्यान्न च तत्र चैतन्यमुपलभ्यते इत्यर्थः ॥ ५॥

---

(१) चैतन्यमिति । तथा च ज्ञाननिष्ठदेहकार्यत्वं हेतुरित्यर्थः। व्यतिरेकेण घटादेर्दृष्टान्तत्वसम्भवात् इति शङ्कातात्पर्यम् ।

(२) ज्ञानशून्यत्वादिति । एवं च ज्ञानं न देहविशेषगुणः अपाकजत्वे सति अकारणगुणपूर्वकत्वाच्छब्दवदित्यनुमानेन ज्ञानस्य देहगुणत्वाभावसिद्धिरित्यर्थः। देहकार्यत्वहेतुश्चाप्रयोजक इति भ।व॰।

ननु घटादावपि सूक्ष्ममात्रया चैतन्यमस्त्येवेत्याशङ्क्याह—

अज्ञानाच्च ॥ ६ ॥

सर्वैः प्रमाणैरज्ञानात् कुम्भादौ न चैतन्यमित्यर्थः। सर्वप्रमाणागोचरस्याप्यभ्युपगमे शशविषाणादेरप्यभ्युपगमप्रसङ्गः। न हि घटादौ चैतन्यं केनापि प्रमाणेन ज्ञायत इति ॥ ६ ॥

ननु श्रोत्रादिभिः करणैरधिष्ठाताऽनुमीयते इत्युक्तं, तदयुक्तम् न हि श्रोत्रादिभिरात्मनस्तादात्म्यं तदुत्पत्तिर्वा, न च (१)ताभ्यामन्तरेणाविनाभावसिद्धिः,न चाविनाभावमन्तरेणानुमितिरित्यत आह—

अन्यदेव हेतुरित्यनपदेशः ॥ ७ ॥

हेतुः साध्यादन्य एव भवति न तु साध्यात्मा साध्याविशेषप्रसङ्गात्, तस्मात्तादात्म्यघटितो हेतुरहेतुरनपदेश इत्यर्थः ॥ ७ ॥

ननु श्रोत्रादिभिरिन्द्रियैरात्मनो यथा न तादात्म्यं तथा तदुत्पत्तिरपि नास्ति नहि वह्नेर्धूम इव आत्मनः श्रोत्रादिकरणमुपपद्यते इत्यत आह—

अर्थान्तरं ह्यर्थान्तरस्यानपदेशः ॥ ८ ॥

हि यतः कार्य्यं धूमादि यथा रासभादेरर्थान्तरन्तथा कारणाद्वह्न्यादेरप्यर्थान्तरमेव। तथा चार्थान्तरत्वाविशेषात् धूमो रासभं न गमयति किन्तु वह्निमेव गमयतीत्यत्र (२)स्वभावविशेष एव नियामकः। स च स्वभावो यदि कार्य्यादन्यस्यापि भवति तदा सोऽ(३)प्यदेशो भवत्येव। तथा च कार्य्यमविवक्षितस्वभावभेदम् अनपदेशः। तथा च तादात्म्यतदुत्पत्ती एवाविनाभावः तयोरेवाविनाभावपर्य्यवसानम् ताभ्यां समानोपायो वा (४)तदुभयमात्रग्रहाधीनग्रहो वेति स्वशिष्यव्यामोहनाय परिभाषामात्रमिति भावः ॥ ८ ॥

सम्प्रत्यविनाभावस्य तदुभयव्यभिचारमेव स्फुटयितुमाह—

संयोगि समवाय्येकार्थसमवायि विरोधि च ॥ ९ ॥

शरीरं त्वग्वत् शरीरत्वादित्ययं हेतुः संयोगी। वृद्धिक्षयवद्द्रव्य-

---

(१) ताभ्यामिति। तदात्मनस्तदुत्पादकस्यैव वा हेतुत्वमिति सांख्यमतेनेयमाशङ्केत्यर्थः।

(२) स्वभावविशेष इति। स चानौपाधिकत्वं सामानाधिकरण्यं वेत्यग्रे वक्ष्यते।

(३) अपदेश इति। हेतुरित्यर्थः।

(४) अविनाभाव इति शेषः।

सहजावरणं हि त्वगित्युच्यते। तच्च न शरीरस्य कार्य्यं कारणं वा, किन्तु सहोत्पत्तिकमात्रं नियतसंयोगवत्। एवं समवायि यथाकाशं परिमाणवद् द्रव्यत्वात् घटादिवदिति। अत्र परिमाणं साध्यं द्रव्यत्वेनाकाशसमवायिना धर्मेण साध्यते। यद्वा परिमाणतारतम्यं क्वचिद्विश्रान्तमित्यनेनाणुत्वं परिमाणविशेषः सिद्धः। (१)तेन तदाश्रयः परमाणुरनुमीयते। शब्दादिना त्वाकाशस्य, ज्ञानादिना त्वात्मनोऽनुमानं कार्य्येणैव कारणानुमानमिति नोदाहृतम्॥ ९॥

एकार्थसमवायिनं सूत्रकृदुदाहरति—

कार्य्यं कार्य्यान्तरस्य॥ १०॥

कार्य्यं रूपं कार्य्यान्तरस्य स्पर्शस्य (२)लिङ्गम्। उपलक्षणञ्चैतत् अकार्य्यमप्याकाशैकत्वम् आकाशैकपृथक्त्वे लिङ्गम्। एवं परममहत्त्वे॥ १०॥

विरोधिलिङ्गमुदाहरति—

विरोध्यभूतं भूतस्य॥ ११॥

अभूतं वर्षं, भूतस्य वाय्वभ्रसंयोगस्य लिङ्गम्। एवं (३)स्फोटादेर्विरोधी मन्त्रपाठः। तथाचाभूतमनुत्पन्नं स्फोटादि भूतस्य मन्त्रपाठस्य लिङ्गम्॥ ११॥

विरोधिलिङ्गस्योदाहरणान्तरमाह—

भूतमभूतस्य॥ १२॥

भूतं स्फोटादिकम् अभूतस्य मन्त्रपाठस्य लिङ्गम्। एवं भूतो वाय्वभ्रसंयोगोऽभूतस्य वर्षस्य लिङ्गम्। एवं भूतो दाहोऽभूतस्य मैण्यादिसमवधानस्य लिङ्गमेवमन्यदप्यूह्यम्॥ १२॥

लिङ्गान्तरमुदाहरति—

---

(१) तेनेति। अणुपरिमाणं क्वचिदाश्रितं परिमाणत्वात् गगनपरिमाणवदित्यनेन समवायिलिङ्गेनानुमानेनेतरबाधसहकृतेन परमाणुसिद्धिरिति। अत्र तादात्म्यकार्ययोरभावादविनाभावन तदुभयनियतत्वमिति भावः।

(२) लिङ्गमिति। तथा च रूपादौ स्पर्शाद्यभेदस्य तत्कार्यत्वस्य चाभावात् व्याप्तेस्तदुभयनैयत्यं बाधितमिति भावः।

(३) स्फोटादेरिति। स्फोटो विषविकारः। मन्त्रपाठे स्फोटो न भवतीति तस्य भूतमन्त्रपाठे लिङ्गत्वेत्यर्थः।

भूतो भूतस्य ॥ १३ ॥

विद्यमानेनैव विरोधिना विद्यमानस्यैव विरोधिनः क्वचिदनुमानम् यथा विस्फूर्जन्तमहिं दृष्ट्वा झाटान्तरितस्य नकुलस्य। अत्र हि विस्फूर्जद्बहिर्भूतो विद्यमानो झाटान्तरितो नकुलोऽपि विद्यमान एवेति भवति भूतो भूतस्य लिङ्गमित्यर्थः। वर्षवाय्वभ्रसंयोगस्य तु नैकस्मिन् काले विद्यमानता न वा स्फोटमन्त्रपाठयोरिति ॥ १३ ॥

इदानीं परिगणनस्य प्रयोजनमाह—

प्रसिद्धिपूर्वकत्वादपदेशस्य ॥ १४ ॥

प्रसिद्धिः स्मर्य्यमाणा व्याप्तिः, अपदेशो हेतुवचनं, तेन स्मर्यमाणव्याप्तिविशिष्टो हेतुर्हेत्ववयवेनोपनयावयवेन वोच्यते इति भवति प्रसिद्धिपूर्वकोऽपदेश इति। तथाच श्रोत्रादिना करणेनाधिष्ठातुः, ज्ञानादिना च गुणेन तदाश्रयस्यात्मनो यदनुमानमुक्तम् तत्र सर्वत्र व्याप्तिरस्ति, त्वया तु शरीरकार्य्यत्वेन हेतुना ज्ञानस्य यच्छरीरगुणत्वं साधितं तत्र न व्याप्तिरिति भावः।

ननु केयं व्याप्तिः ?

(१)न तावदव्यभिचरितः सम्बन्धः अव्यभिचारस्य साध्यात्यन्ताभावसामानाधिकरण्यानधिकरणत्वस्य(२) केवलान्वयिन्यप्रसिद्धेः। (३)साध्यानधिकरणानधिकरणत्वस्यापि (४)केवलान्वयिन्यसम्भवात् धूमादेरपि यत्किञ्चित्साध्यानधिकरणाधिकरणत्वात्।

(५) नाप्यविनाभावः। स हि साध्यं विनाऽभावो वा हेतोः,

---

(१) मीमांसकव्याप्तिं दूषयति नेति।

(२) द्रव्यं सत्त्वादित्यत्र सत्तायां द्रव्ये न द्रव्यत्वाभावसमानाधिकरण्यामिति प्रत्ययात् अव्याप्यवृत्तेर्द्रव्यत्वाभावसामानाधिकरण्यस्य सत्तायामभावसत्त्वादतिव्याप्तिवारणाय तादृशसामानाधिकरण्याभावमपहाय साध्यात्यन्ताभावसामानाधिकरण्याधिकरणत्वाभावो गृहीतः, अव्याप्यवृत्तेरधिकरणता तु नाव्याप्यवृत्तिरिति तद्व्युदासः।

(३) साध्यानधिकरणानधिकरणत्वस्येति। साध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वरूपस्य साधवद्भेदव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वरूपस्य वा सिंहव्याघ्रोक्तलक्षणद्वयात्मकस्येत्यर्थः।

(४) साध्यवद्भेदसाध्याधिकरणत्वाभावयोः सामान्याभावरूपतया निवेशे केवलान्वयिनि, यत्किञ्चित्साध्यवद्भेदादिनिवेशे च वह्निमान्धूमादित्यादावप्रसिद्धिरित्याह केवलान्वयिनीति।

(५) बौद्धोक्तव्याप्तिं प्रदर्श्य निरस्यति नापि इति।

अविना साध्यान्वये सति भावो वा ? धूमस्यापि क्वचिद्रासभाभावेऽभावात्, रासभसत्त्वे सत्त्वाच्च । (१)नियतव्यतिरेको नियतश्चान्वयो विवक्षित इति चेत्, न नियमस्यैव निरूप्यमाणत्वात् ।

(२)नापि कार्त्स्न्येन सम्बन्धः स यदि कृत्स्नस्य साध्यस्य साधनसम्बन्धः, स विषमव्याप्ते धूमादावपि नास्ति । अथ कृत्स्नस्य साधनस्य साध्यसम्बन्धः, सोऽप्येकस्य साध्यस्य कृत्स्नसाधने सम्बन्धाभावादनुपपन्नः । अथ कृत्स्नस्य साध्यस्य कृत्स्नेन साधनेन सम्बन्धः, एतदप्ययुक्तम् न हि कृत्स्नेन साधनेन कृत्स्नस्य साध्यस्य क्वचिदपि सम्बन्धः सम्भवति, प्रत्येकमेव साध्यसाधनयोः सम्बन्धात्, विषमव्याप्ते चाव्याप्तेः ।

(३)नापि स्वाभाविकः सम्बन्धः । स्वभावो हि स्वस्य भावो वा स्वमेव भावो वा, तत्र तज्जन्यत्वञ्चेत्तद्धितार्थः, तदा समवायलक्षणायां व्याप्तावव्याप्तेः । तदाश्रितत्वञ्चेत्तद्धितार्थः, (४)तदापि समवायेऽव्याप्तिः, न हि समवायः क्वचिदाश्रितः, संयोगस्यापि हेतुधर्मधूमत्वाद्यनाश्रितत्वात् हेतुधर्मधूमत्वाद्यजन्यत्वाच्च ।

(५) नाप्यनौपाधिकः सम्बन्धः । उपाधेरेव दुर्वचत्वात् (६) । सुवचत्वेऽपि दुर्ग्रहत्वात्, सुग्रहत्वेऽप्यन्योन्याश्रयात् । साध्यव्यापकत्वे सति साधनाव्यापकत्वादेर्व्याप्तिग्रहाधीनग्रहत्वात् ।

---

(१) नियतेति । तथा चोक्तधूमरासभाविनाभावस्य सार्वत्रिकत्वाभावान्न दोष इत्यर्थः ।

(२) लीलावतीकारोक्तव्याप्तिं दूषयति नापि इति ।

(३) वाचस्पतिमतं निरसितुमाह नापि स्वाभाविक इति । सम्बन्धः सामानाधिकरण्यम् तच्च वह्निनिरूपितं धूमे स्वाभाविकं, वह्नौ च धूमसामानाधिकरण्यमार्द्रेन्धनप्रयुक्तमित्यौपाधिकमिति नातिव्याप्तिरित्यर्थः ।

(४) स्वस्य भाव इत्यादिनोभयव्युत्पत्त्या हेतुतावच्छेदकहेतुस्वरूपोभयकल्पेपि भाव इत्यत्र टिकनप्रत्ययस्य जन्यार्थकत्वपक्षे सत्तावान्द्रव्यत्वादित्यादौ अव्याप्तिम्प्रदर्श्याश्रितत्वपक्षेपि दोषमाह तदापीति । समवायस्य स्वातिरिक्तसम्बन्धप्रतियोगित्वाभावेनाश्रितत्वं नास्ति इत्यर्थः ।

(५) आचार्यमतं दूषयन्नाह नाप्यनौपाधिक इति ।

(६) दुर्वचत्वादिति । उपाधिलक्षणं यावत्स्वाधिकरणनिरूपितवृत्तित्ववत्साध्याधिकरणीभूतयावन्निरूपितवृत्तित्ववत्त्वे सति साधनाधिकरणीभूतयावद्वृत्तिभिन्नं स्वमेवेति स्वत्वघटितं कार्यम् तथा च स्वत्वस्याननुगमाद्दुर्वचमित्यर्थः । कथंचित्तस्यानुगतत्वमङ्गीकृत्य सुवचत्वेऽपि द्रव्यं सत्त्वादित्यादौ गुणवत्त्वरूपोपाधेः यावत्सु साध्याधिकरणेषु वृत्तित्वं युगसहस्रेणापि गृहीतुमशक्यमित्याशयेनाह दुर्ग्रहत्वादिति । ननु साध्यव्यापकत्वे सति साधनाव्यापक एवोपाधिर्वाच्यस्तथा च न दुर्ग्रहतेत्यत आह सुग्रहत्वेपीति ।

(१)नापि सम्बन्धमात्रं व्याप्तिः । व्यभिचारिसम्बन्धस्यापि देशविशेषकालविशेषगर्भतया व्याप्तिरूपत्वेऽपि, तज्ज्ञानस्यानुमितावतन्त्रत्वात् अनुमितिकारणीभूतज्ञानविषयव्याप्तेरेव निरूपयितुमुचितत्वात् ।

नापि साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। वह्नेरपि धूमवन्निष्ठात्यन्ताभावप्रतियोगित्वात् न हि धूमवति महानसे पर्वतीयवह्नेर्नात्यन्ताभावः । (२)इदं संयोगि द्रव्यत्वादित्यादौ संयोगात्यन्ताभावस्य साधनसमानाधिकरणत्वादव्यापकताप्रसङ्गात् । प्रतियोगिविरुद्धस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः संयोगात्यन्ताभावस्य प्रतियोगिविरुद्धत्वाभावादिति चेन्न संयोगात्यन्ताभावस्यापि प्रतियोगिविरुद्धत्वात् अन्यथाऽवच्छेदभेदकल्पनावैयर्थ्यात् न हि कृतकत्वानित्यत्वयोर्वृत्त्यर्थमवच्छेदभेदः कल्प्यते। (३)नापि साध्यवैयधिकरण्यानधिकरणत्वम् । केवलान्वयिनि साध्यवैयधिकरण्याप्रसिद्धेः साध्यानधिकरणाधिकरणत्वं हि तत् । नापि यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः वह्नित्वस्यापि धूमसम्बन्धितावच्छेदकत्वात् । अधिकदेशवृत्तितया तन्न तथेति चेत् व्यापकतावच्छेदकस्याधिकदेशवृत्तेरप्यभ्युपगमात् धूमत्वस्यापि गगनतलावलम्बिधूमवृत्तितयाऽधिकदेशवृत्तित्वात् । अतएव तद्वारणार्थं (४)विशेषणमिति चेत्, तर्हि यद् व्याप्यतावच्छेदकं तदेव सम्बन्धितावच्छेदकत्वेनाभिमत-

---

(१) नैयायिकैकदेशिमतानि दूषयति नापि सम्बन्धमात्रमिति। ननु सम्बन्धमात्रस्य व्याप्तित्वे द्रव्यं सत्त्वात्कालस्तन्नामान् गोरूपादित्यादावपि हेतौ तत्सत्त्वात् व्याप्तिः स्यादत आह व्यभिचारीति। तथा च द्रव्यत्वव्यभिचार्यपि सत्त्वं तद्व्यभिचार्यपि वा गोरूपं जातित्वावच्छिन्नं गोस्पर्शत्वावच्छिन्नं वा न व्यभिचरति सत्त्वस्य जात्यभाववदवृत्तित्वात् गोरूपस्य च गोस्पर्शाभाववदवृत्तित्वाच्चेति देशकालविशेषगर्भं व्याप्यत्वमपीष्टमेवेति भावः ।

(२) प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यपर्यन्तनिवेशे उक्तदोषवारणेऽप्यव्याप्तिरित्याह इदमिति ।

(३) सिंहव्याघ्रोक्तं पूर्वसूचितं लक्षणद्वयं प्रदर्श्य दूषयति नापि साध्यवैयधिकरण्येति ।

(४) विशेषणमिति । वह्नित्वे सम्बन्धितावच्छेदकत्वरूपव्याप्तिसत्त्वेऽपि व्याप्यतावच्छेदत्वरूपविशेषणाभावात् नातिव्याप्तिरिति भावः । आत्माश्रय इति । तथा च व्याप्यतावच्छेदकं विशिष्टधूमत्वं व्याप्तिरपि उक्तविधैवेति स्वस्मिन्स्वावच्छेदकत्वादात्माश्रय इत्यर्थः ।

मित्यभिमतं तथा चात्माश्रयः। एवञ्च यत्सामानाधिकरण्यावच्छेदकरूपवत्त्वं यस्य तस्य (१)सा व्याप्तिरित्यप्युक्तदोषाक्रान्तमिति चेत्,

(२)अत्रोच्यते अनौपाधिकः सम्बन्धो व्याप्तिः। अनौपाधिकत्वन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यम्, (३)यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगिकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यं वा। (४)यावत्साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यमिति निरुक्तिद्वयार्थः। (५)यावत्साध्यव्यापकव्यापकत्वं वा। (६)बहुव्रीहिणा दुर्ग्रहमिदमिति चेत् अत एव तत्र भूयोदर्शनापेक्षा तर्कापेक्षा च। (७)यद्वा साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। अत्यन्ताभावश्च वह्नित्वादिसामान्यावच्छिन्नप्रतियोगिताको विवक्षितः तेन महानसीयधूमे पर्वतीयवह्न्यत्यन्ताभावसामानाधिकरण्येऽपि न

---

(१) सेति। यद्धर्मावच्छिन्ननिरूपितं यद्रूपावच्छिन्नं यत्सामानाधिकरण्यं तद्धर्मावच्छिन्नविधेयकतद्रूपावच्छिन्नहेतुकानुमितिजनकतावच्छेदकं तद्व्याप्तिरिति सामानाधिकरण्यरूपव्याप्तिरपि उक्तदोषाक्रान्तेत्यर्थः। इदमुपलक्षणम्। उक्तव्याप्तेः नानात्वेन स्मृतमहानसीयवह्निसामानाधिकरण्यस्य पर्वतवृत्तिधूमेऽसत्त्वात् पर्वतीयवह्निसामानाधिकरण्यस्य प्रागननुभवात् परामर्शासम्भव इति सत्तावान् जातेरित्यादावव्याप्तिरपि दोषो बोध्यः। विशेषस्तु विशेषव्याप्त्यादौ द्रष्टव्यः।

(२) सिद्धान्तमाह अत्रोच्यत इत्यादिना। यथाश्रुते उक्तदोषात्तदर्थमाह यावदिति। स्वपदं हेतुपरम्। धूमवान् वह्नेरित्यादौ वह्निव्यभिचारिणो आर्द्रेन्धनसंयोगस्य धूमेन व्यभिचाराभावान्नातिव्याप्तिः।

(३) ननु व्यभिचारित्वमभाववद्वृत्तित्वं वृत्तिता च वैशिष्ट्यरूपावच्छेदकभेदेनापि न भिन्ना गुणे गुणकर्मान्यत्वविशिष्टसत्तेतिप्रतीतेः तथा च द्रव्यं विशिष्टसत्त्वादित्यत्र विशिष्टसत्ताया गुणादिवृत्तित्वादव्याप्तिरत आह यावत्स्वसमानाधिकरणेति। अधिकरणताया निरूपकतावच्छेदकभेदेन भिन्नत्वान्नाव्याप्तिरित्यर्थः।

(४) नन्वेवमपि स्वसमानाधिकरणविशिष्टाभावादिकमादायाव्याप्तिरत आह यावत्साधनेति।

(५) प्रकारान्तरेणानौपाधिकत्वं निर्वक्ति यावत्साध्येति।

(६) बहुव्रीहिणेति। यावन्ति साध्यव्यापकानि व्यापकानि यस्येति बहुव्रीहिणा स्वव्यापकयावत्साध्यव्यापकसम्बन्धीति प्रतीयते तस्य च स्वत्वघटितत्वेनातीतादिसाधारणहेतुतावच्छेदकावच्छिन्ने दुर्ग्रहत्वमित्यर्थः। समाधत्ते अत एवेति। तथा च तर्कादिना व्यभिचारे निरस्ते हेतुतावच्छेदकावच्छिन्ने व्याप्तिग्रहे बाधकाभाव इति भावः।

(७) लाघवादाह यद्वेति। साधनसामानाधिकरणेत्यस्य साधनतावच्छेदकावच्छिन्नसमानाधिकरणेत्यर्थः नातो द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः। वह्नित्वावच्छिन्नस्य साध्यतावच्छेदकत्वे तद्व्यक्तिर्नास्तीत्यभावमादाय नाव्याप्तिरित्यापि बोध्यम्।

दोषः, धूमवति वह्निर्नास्तीति प्रतीतेरनुदयात् । (१)द्रव्यत्वन्तु संयोगित्वात्यन्ताभावासमानाधिकरणमेव, न हि भवति द्रव्यं न संयोगीति प्रतीतिः, संयोगानां प्रत्येकमव्याप्यवृत्तित्वेऽपि संयोगित्वसामान्यस्य व्याप्यवृत्तित्वात् तस्यैव च व्यापकत्वात् । नन्वनौपाधिकत्वमुपाधिविरहः उपाधिरेव दुष्परिकलनीय इति चेन्न साध्यव्यापकत्वे सति साधनाव्यापकस्योपाधित्वात् । तदुक्तम्—

साधने सोपाधिः साध्ये निरुपाधिरुपाधिः ।

ननु केवलसाध्यव्यापकोपाध्यव्यापकमेतत् । यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वम्, (२)स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वम्, न ह्युद्भूतरूपवत्त्वं प्रत्यक्षत्वव्यापकम् आत्मनि गुणकर्मादौ च प्रत्यक्षे तदभावात्, नापि शाकपाकजत्वं श्यामत्वव्यापकम् काककोकिलजलदजम्बूफलादौ श्यामे तदभावादिति चेन्न (३)पर्य्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वस्य तथा विवक्षितत्वात् । पर्य्यवसितञ्च साध्यं यद्धर्मावच्छेदेनोपाधेर्व्यापकत्वमभग्नं तद्धर्मावच्छिन्नम्, प्रकृते वह्निर्द्रव्यत्वावच्छेदेन प्रत्यक्षत्वस्योद्भूतरूपवत्त्वं व्यापकम्, अन्वयव्यतिरेकाभ्यां गृहीतम्, औत्पत्तिकनरश्यामत्वावच्छिन्नं साध्यं प्रति चरकसुश्रुतादौ शाकपाकजत्वस्य व्यापकत्वावधारणादेवमन्यत्रा(४)प्यूह्यम् । (५)ननु नायमुपाधिपदवाच्यः, यद्धर्मोऽन्यत्र भासते स उपाधिः यथा स्फटिकादौ जवाकुसुमादि विषमव्याप्तोपाधौ च व्याप्यत्वाभावात्तद्धर्मस्य सा-

---

(१) ननु द्रव्यं संयोगीत्यादावव्याप्तिः संयोगाभावस्य द्रव्यत्वसामानाधिकरण्यादत आह द्रव्यत्वमिति । तथा च संयोगविशेषाभावे द्रव्यवृत्तित्वेपि तत्सामान्याभावे द्रव्यावृत्तित्वान्नाव्याप्तिरित्यर्थः । ननु तथापि कपिसंयोग्येतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगसामान्याभावस्य मूलावच्छेदेन वृक्षे सत्त्वादिति चेन्न स्वानिरूपिताधिकरणत्वस्य साध्यतावच्छेदकसम्बन्धेन विवक्षितत्वात् ।

(२) पक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्य वायुः प्रत्यक्ष इत्यादावुद्भूतरूपवत्त्वोपाधौ सत्त्वादाह स श्याम इति ।

(३) समाधत्ते पर्य्यवसितेति । तथा च सामानाधिकरण्यसम्बन्धेन यत्किञ्चिद्धर्मविशिष्टसाध्यव्यापकत्वे सतीत्यर्थे नोक्ताव्याप्तिरित्याशयः ।

(४) अन्यत्रेति । ध्वंसो विनाशी जन्यत्वादित्यादौ भावत्वादिरूपोपाधिरेवं निर्वाच्यः ।

(५) साध्यसमनियत एव धर्म उपाधिर्वाच्यः न तु तद्व्यापकः अन्यधर्मिकभ्रमविषयीभूतधर्माश्रयत्वस्योपाधिपदप्रवृत्तिनिमित्ततया लोके उपाधिपदप्रयोगात्तथा च साधनत्वाभिमते समारोप्यमाणायाः साध्यव्याप्तेर्य आश्रयस्तस्यैवोपाधित्वमुचितमित्याशयेनाशङ्कते नन्विति ।

धनाभिमतेऽनवभासनादिति चेत्, सत्यम् समव्याप्त एवार्द्रेन्धनप्रभववह्निमत्त्वादौ मुख्य उपाधिपदप्रयोगः, अन्यत्र तु गौणः। गुणश्च व्यभिचारोन्नायकत्वम्, यद्धि यद्व्यापकव्यभिचारि तस्य तद्व्यभिचारित्वनियमात्, भवति च साध्यव्यापकस्योपाधेर्व्यभिचारि साधनम्, अतः (१)साध्यव्यभिचारीति। यद्व्यापकाव्याप्यं यत् तत् तदव्याप्यम् इति व्याप्यत्वासिद्ध्युन्नायकत्वं वा। सत्प्रतिपक्षोत्थापकत्वं वा पक्षे उपाधेः साध्यव्यापकस्याभावात् साध्याभावसाधनात्। तदुक्तं-

वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः।
पर्य्यवसितं नियमयन् दूषकताबीजसाम्यात्॥ इति।

उन्नीयते चायं (२)बाधव्यभिचारानुकूलतर्काभावप्रतिकूलतर्कैः। (३)यत्तु यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिरिति। तत्र तृतीया न करणे न हेतौ न प्रकारे न लक्षणे। न च यद्व्यभिचारित्वेन ज्ञातेन साधनस्य साध्यव्यभिचारित्वं ज्ञायते इति पूरणीयम् अज्ञायमानोपाध्यव्यापनात् स्फुटव्यभिचारस्थलोपाध्यव्यापनात्। योग्यतागर्भा तु दुर्निरूपा, व्यभिचारोन्नायकत्वमव्यवस्थाप्य उपा-

(१) साध्यव्यभिचारीति। प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्ये उद्भूतरूपव्यभिचारित्वात्प्रमेयत्ववत्, मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वव्यभिचारित्वात् द्रव्यत्वादिवदिति व्यभिचारोन्नायकत्वमित्यर्थः।

(२) बाधेति। बाधोन्नीतो यथा वह्निरनुष्णः कृतकत्वादित्यादौ पक्षेतरत्वरूपः। व्यभिचारोन्नीतश्च धूमवान् वह्निरित्यादौ आर्द्रेन्धनादिरूपः। अनुकूलतर्काभावोन्नीतश्च पूर्वोक्तो वायुः प्रत्यक्ष इत्यादौ उद्भूतरूपादिः। प्रतिकूलतर्केण च ध्वंसो विनाशीत्यादौ विनाशित्वसाधने घटोन्मज्जनप्रसङ्गरूपेणोन्नीतो भावत्वादिरूप इत्यर्थः।

(३) मणिकारोक्तोपाधिलक्षणं प्रदर्श्य दूषयति यत्त्वित्यादिना। करण इति। साध्यव्यभिचारित्वस्य समवायादिरूपत्वे नित्यत्वात् संयोगादिरूपत्वेऽपि उपाधिव्यभिचारित्वस्य तदजनकत्वात् तज्जनकव्यापाराभावाच्चेति भावः। न हेतौ इति। हेतुत्वं ज्ञापकत्वं कारणत्वं वोभयथापि उपाधिव्यभिचारे ज्ञापकत्वाभावात् नित्यसम्बन्धादिरूपव्यभिचारस्य कारणत्वाभावाच्च न तृतीयार्थ इत्यर्थः। न प्रकार इति। प्रकारतारूपस्य तस्य व्यभिचारादिरूपनिर्विषयकपदार्थेऽन्वयायोगात्। न लक्षण इति। लक्षणत्वं व्यावर्तकत्वम्। व्यावर्तकश्च धर्मो विशेषणमुपलक्षणं वा। विद्यमानः सन् व्यावर्तको विशेषणं यथा पुरुषादौ दण्डादिः। अविद्यमानः सन् व्यावर्तकस्तु उपलक्षणं यथा तापसादेः कालान्तरीणं जटाकमण्डल्वादि। उभयस्याप्यत्रासम्भवः साधननिष्ठोपाधित्वस्य साध्यव्यभिचरितत्वरूपविशेष्यतावच्छेदकसामानाधिकरण्यविरहात् तथा च तृतीयाऽनुपपन्नेत्यर्थः।

ध्युद्भावनाशक्यत्वाच्च । (१)पक्षेतरत्वन्तु उपाधिलक्षणाक्रान्तमपि स्वव्याघातकत्वान्नोपाधिः यथा पक्षे सन्दिग्धानैकान्तिकत्वम् । यदि हि तत्र न सन्देहस्तदा न पक्षता, यदि पक्षता तदा सन्देहस्यावश्यकतया सन्दिग्धानैकान्तिकत्वध्रौव्यात् । अवशिष्टं मयूखेऽन्वेष्टव्यम् ॥ १४ ॥

इदानीं वृत्तानां वर्त्तिष्यमाणानाञ्च हेतूनां हेत्वाभासाद्विवेकाय हेत्वाभासप्रकरणमारभमाण आह—

अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः ॥ १५ ॥

(२)अप्रसिद्ध इति । अव्याप्तोऽगृहीतव्याप्तिको विपरीतव्याप्तिकश्च विरुद्धः । एतेन (३)व्याप्यत्वासिद्धविरुद्धयोः संग्रहः । असन् इति । पक्षेऽसन् अपक्षधर्म इत्यर्थः । स च क्वचित् (४)स्वरूपविरहात् क्वचित् सन्देहसिषाधयिषयोरभावात् सिद्धसाधने । (५)सन्दिग्ध इति । पक्षे साध्यसदसत्त्वकोटिकसंशयजनकः । स च संशयः समा-

---

(१) पक्षेतरत्वन्त्विति । बाधे नीतपक्षेतरत्वमेवोपाधिरित्यर्थः । पक्षेतरत्वमात्रस्योपाधित्वे सर्वत्र तस्य सम्भवादनुमानमात्रोच्छेदापत्त्या सन्दिग्धानैकान्तिकत्ववन्न दूषकत्वमिति भावः ।

(२) सूत्रे प्रथमानपदेशपदं हेत्वाभाससामान्यलक्षणसूचनायेति बोध्यम् । तच्चाग्रे स्वयं वक्ष्यते गौणहेत्वाभासान्तरप्रदर्शनाय वा तेऽप्यग्रे वक्ष्यन्त इत्याशयेन कण्ठतस्तद्विचारमपहाय व्याचष्टे अप्रसिद्ध इति ।

(३) व्याप्यत्वासिद्धेति । व्याप्यत्वासिद्धिश्च हेतुतावच्छेदकतया प्रमितिविषये व्याप्तिप्रमितिविरहः । यद्रूपावच्छिन्ननिरूपितविषयताकनिश्चयत्वं प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नो हेतुरिति यावत् । नचैवं साधारणादेरसिद्धत्वापत्तिरिति वाच्यम् इष्टत्वात् असिद्ध्यादिदोषमादायैव हेत्वाभासविभजनात् । साधारण्याद्यनिरूपितत्वेनोक्तविषयतानिवेशाच्च न दोषाभेदोऽपि इति बोध्यम । साध्यासिद्धिहेत्वासिद्धी च निरुक्तलक्षणाक्रान्ते इति भावः । विरुद्धेति । स्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्याभाववत्त्वकत्वं विरोधः तद्वांश्च हेतुर्विरुद्ध इत्यर्थः व्याप्यत्वासिद्धिविरोधयोरन्यतरत्वेनाप्रसिद्ध्यनुगम इति भावः ।

(४) स्वरूपेति । पक्षे हेत्वभावात् स्वरूपासिद्धिः, पक्षे पक्षतावच्छेदकाभावादाश्रयासिद्धिर्वा । सन्देहेति । पक्षे सन्देहसिषाधयिषारूपोभयपक्षताभावाच्च सिद्धसाधनमपीत्यर्थः । तद्वांश्च हेतुरसिद्ध इति भावः । आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धत्वमित्यर्थः ।

(५) सन्दिग्ध इति । सव्यभिचार इति शेषः । प्रकृतपक्षधर्मिकसाध्यतदभावज्ञाननिष्ठसंशयत्वप्रयोजककोटिद्वयादिव्यावृत्तरूपवत्त्वं सव्यभिचारत्वम् । तच्च रूपं व्यभिचारिणि साध्यतदभावसाहचर्यादिकं सत्प्रतिपक्षे च विरोधिपरामर्शकालीनपरामर्शविषयत्वम् । कोटिद्वयव्यावृत्तत्वेनेत्यनेन प्रयोजकान्तरव्युदासः तेन कोटिद्वयादौ नातिव्याप्तिरत एव वक्ष्यति सत्प्रतिपक्षोऽपि अनैकान्तिकादौ पर्यवस्यतीति । साधारणादिभेदेन चास्य उदाहरणानि स्वयमेव वक्ष्यन्ते ।

नधर्मदर्शनात् क्वचिदसाधारणधर्मदर्शनात् क्वचित् (१)पक्ष एव हेतोः साध्यतदभावसाहचर्य्यदर्शनात् । आद्यः साधारणानैकान्तिकः । द्वितीयस्त्वसाधारणानैकान्तिकः । तृतीयोऽनुपसंहारी ॥ १५ ॥

तत्र व्याप्यत्वासिद्धविरुद्धस्वरूपासिद्धानामुदाहरणमाह—

यस्माद्विषाणी तस्मादश्वः ॥ १६ ॥

यत्र रासभपिण्डं पक्षीकृत्यायमसावश्वः विषाणित्वात् यस्तु नाश्वो नासौ विषाणी, यथा शशशृगालनरवानरादिरिति व्यतिरेकसहचारदर्शनाहितव्यामोहः प्रयुङ्क्ते । तत्र व्याप्यत्वासिद्धस्वरूपासिद्धविरुद्धानामुदाहरणमिदम् ॥ १६ ॥

अनैकान्तिकमुदाहरति—

यस्माद्विषाणी तस्माद्गौरिति चानैकान्तिकस्योदाहरणम् ॥ १७ ॥

यत्र महिषं पक्षयित्वा अयं गौर्विषाणित्वादिति साधयति तत्र साधारणानैकान्तिकता(२) । यदा त्वाकाशं नित्यं शब्दाश्रयत्वादिति साधयति तदाऽस्यासाधारणानैकान्तिकता । एवं शब्दोऽनित्यः शब्दत्वादित्याद्यप्यगृह्यमाणदशायामसाधारणानैकान्तिकमेव, यदा तु विपक्षबाधकतर्कावतारात् पक्ष एव साध्यं सिध्येत् तदा सपक्षवृत्तिताज्ञानदशायां सद्धेतुरेव पक्षस्यापि सपक्षत्वात् । (३)तत्र व्याप्तपक्षधर्मतयाऽप्रमितोऽसिद्धः । स च त्रिविधः व्याप्यत्वासिद्धः

---

(१) यद्यपि साध्यसन्देहाक्रान्तविश्वकत्वेन ज्ञायमानोऽनुपसंहारी न साध्यतदभावकोटिकसंशयजनकस्तथापि पक्षान्तर्भावेन साध्यतदभावसहचरिततया ज्ञायमान एव संशयजनको भवतीति नानुपसंहारिण्यव्याप्तिरित्याशयेनाह पक्ष इति । येन रूपेण सन्देहजनकत्वं तस्यैव विभाजकत्वमिति न नियम इति तात्पर्यम् ।

(२) अनैकान्तिकतेति । साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् । साध्याभाववद्वृत्तित्वं साधारणत्वं तच्च व्याप्तिज्ञानप्रतिबन्धकं यथा महिषो गौर्विषाणित्वादिति । सर्वसपक्षविपक्षव्यावृत्तत्वमसाधारणत्वम् तादृशोभयव्यावृत्तत्वग्रहस्य साध्यतदभावोभयव्याप्तिग्रहप्रतिबन्धद्वारा दूषकत्वम् यथाऽऽकाशं नित्यं शब्दाश्रयत्वादिति । अत्यन्ताभावाप्रतियोगिसाध्यकत्वमनुपसंहारित्वम् तस्य च व्यतिरेकव्याप्तिग्रहप्रतिबन्धद्वारा दूषकत्वम् यथा गौः प्रमेयं विषाणित्वादिति ।

(३) तत्रेति । अप्रसिद्ध इति सूत्रे । आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धित्वम् । स्वरूपासिद्ध इति । पक्षे हेत्वभावात् ह्रदो द्रव्यं धूमादित्यत्र पक्षे व्याप्यत्वाभिमतस्य हेतोरभावज्ञाने साध्यव्याप्यहेतुमत्पक्षज्ञानरूपपरामर्शप्रतिबन्धः फलम् । व्याप्यत्वासिद्ध इति । वह्निमान् नीलधूमादित्यत्र गुरुतया नील-

स्वरूपासिद्धः आश्रयासिद्धश्च । तत्रागृहीतव्याप्तिको व्याप्यत्वासिद्धः, सत्या एव व्याप्तेरग्रहात् व्याप्तेरभावाच्च उभयथापि । तेनानुकूलतर्काभावादयोऽसिद्धभेदाः । स चायमसमर्थविशेषणा,-समर्थविशेष्या,-समर्थोभय-सन्दिग्धासमर्थविशेषण-सन्दिग्धासमर्थविशेष्य-सन्दिग्धासमर्थोभय-भेदप्रपञ्चेन सहस्रधा भिद्यते । सर्वत्र चात्र सिद्धिविरह एवोद्भाव्यः ।

अत्रेदं तत्त्वम् । हेतुस्तावत् केवलान्वय्यन्वयव्यतिरेकिकेवलव्यतिरेकिभेदात्त्रिविधः । तत्र सर्वधर्मिगतो धर्मः केवलान्वयी, यथा प्रमेयत्वा,-भिधेयत्व-विशेष्यत्व-विशेषणत्व-नित्यद्रव्यात्यन्ताभावा,-श्रयनाशनाश्यगुणा(१)दिध्वंसात्यन्ताभावादयः । नह्यस्ति तादृशं किञ्चित्, यत्रैते धर्मा न विद्यन्ते । तथाच सर्वगतत्वम् अत्यन्ताभावाप्रतियोगित्वं वा केवलान्वयित्वम् । (२)एतेषाञ्च स्वात्मवृत्तित्वेऽपि न दोषः तदुक्तम्—

प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नते यतः ॥ इति ।

केवलान्वयिसाध्यको हेतुः केवलान्वयी । अस्य च पक्षसत्त्वसपक्षसत्त्वाबा(३)धितत्वासत्प्रतिपक्षितत्वानि चत्वारि रूपाणि गमकत्वौपयिकानि । अन्वयव्यतिरेकिणस्तु हेतोर्विपक्षासत्त्वेन सह पञ्च । केवलव्यतिरेकिणः (४)सपक्षसत्त्वव्यतिरेकेण चत्वारि । तथाच यस्य हेतोर्यावन्ति रूपाणि गमकतौपयिकानि तदन्यतररूपहीनः स हेतुराभासः । एवञ्च गमकतौपयिकान्यतररूपशून्यत्वं हेत्वाभासत्वम्, तेनान्यतररूपशून्यत्वस्य निश्चयवत्सन्दे-

---

धूमत्वस्य हेतुतानवच्छेदकत्वेन व्याप्यत्वासिद्धिरिति । आश्रयासिद्धिरिति । पक्षे पक्षतावच्छेदकाभावो आश्रयासिद्धिः । काञ्चनमयः पर्वतो वह्निमानित्यत्र पर्वतो न काञ्चनमय इति ज्ञाने काञ्चनमयपर्वते परामर्शप्रतिबन्धद्वारा तस्या दूषकत्वम् ।

(१) गुणादीति । संयोगाभावादिरादिपदग्राह्योऽर्थः ।

(२) यो हि यत्र वर्तते स तस्माद्भिन्नः घटतद्रूपादिवदिति व्याप्त्या प्रमेयत्वस्य स्ववृत्तितया स्वभिन्नत्वापत्तिरिति दोषं परिहरति एतेषामिति । तत्र प्रमाणमाह तदुक्तमिति । प्रमाणगम्या वृत्तिता न भेदाभेदगम्येति तदर्थः ।

(३) अबाधितत्वेति । अत्राबाधितत्वं स्ववृत्त्यभावप्रतियोगितावच्छेदकत्वसम्बन्धेन पक्षविशिष्टं यत्तदन्यसाध्यतावच्छेदकत्वं तेन केवलान्वयिनि बाधाप्रसिद्धावपि न क्षतिः ।

(४) सपक्षसत्त्वव्यतिरेकेणेति । व्यतिरेकिणि यथाऽन्वयसहचारं विनाऽनुमितिस्तथोपदर्शितं प्राक् ।

होऽप्यनुमितिप्रतिबन्धकः वादिहेतोरसाधकतासाधकश्च । न च केवलान्वयिकेवलव्यतिरेकिणोर्हेत्वोरन्यतररूपशून्यतया हेत्वाभासत्वापत्तिः, केवलान्वयिनि विपक्षासत्त्वस्य केवलव्यतिरेकिणि सपक्षसत्त्वस्य गमकत्वौपयिकत्वाभावात् । (१)एवञ्चाश्रयासिद्धस्वरूपासिद्धभागासिद्धानां पक्षसत्त्वरूपविरहादाभासत्वम् । व्याप्यत्वासिद्धविरुद्धसाधारणानैकान्तिकानां विपक्षासत्त्वरूपवैकल्यात् । असाधारणानैकान्तिकानुपसंहारिणोः सपक्षसत्त्ववैकल्यात् । बाधितसत्प्रतिपक्षितयोरबाधितत्वासत्प्रतिपक्षितत्वविरहात् । एवं सोपाधिकत्वाप्रयोजकत्वयोरपि विपक्षासत्त्वनिश्चयाभावादगमकत्वम् । अनुकूलतर्काभावप्रतिकूलतर्कयोरपि विपक्षासत्त्वनिश्चयविरहात् । एवं साध्यविकलसाधनविकलोभयविकलदृष्टान्ताभासानां यदि हेत्वाभासविधया दोषत्वं तदा सपक्षसत्त्वानिश्चयात्, यदि स्वातन्त्र्येण दृष्टान्ताभासतया तथापि द्वारं हेतोः सपक्षसत्त्वानिश्चय एव । अनुपदर्शितान्वयानुपदर्शितव्यतिरेकाविपरीतोपदर्शितान्वयविपरीतोपदर्शितव्यतिरेकास्तु न्यूना,-प्राप्तकाल-निग्रहस्थानपर्य्यवसन्ना एव आत्माश्रयान्योन्याश्रयचक्रकानवस्थास्तु व्याप्तिनिश्चयं विघटयन्तः सपक्षसत्त्वविपक्षासत्त्वान्यतररूपविकला एव हेत्वाभासतामासादयन्ति । तत्र पक्षे साध्यसदसत्त्वकोटिकसंशयजनको हेत्वाभासः सव्यभिचारः । पक्षे साध्याभावनिश्चयफलको हेत्वाभासो विरुद्धः । व्याप्तिपक्षधर्मताप्रमितिविरहोऽसिद्धः । बाधसत्प्रतिपक्षौ तु काश्यपीये मते न स्वतन्त्रौ । तत्र बाध (२)आश्रयासिद्धावनैकान्तिके वा पर्यवस्यात । तदुक्तं "बाधायामपक्षधर्मो हे

(१) उक्तगमकरूपसत्तया मुख्यगौणहेत्वाभासानाह एवमिति । तेषु विपक्षासत्त्वाद्यनिश्चयेन हेत्वाभासत्वव्यवहार इति भावः । एवं च विपक्षासत्त्वादिप्रमितिविरोधित्वगुणयोगात् व्यभिचारादेरिव सोपाधित्वादीनामपि दोषत्वं गौणमस्त्येवेति प्राञ्चः । सोपाधित्वानुकूलतर्काभावादीनामनुमितिपरामर्शयोः साक्षादप्रतिबन्धकत्वेन व्यभिचारप्रत्यक्षहेत्विन्द्रियसंनिकर्षादेरिव परमुखनिरीक्षकतया न हेत्वाभासतेति चिन्तामणिकाराः ।

(२) आश्रयासिद्धाविति । पक्षे साध्याभावो बाधस्तथा चाश्रय एवासिद्ध इत्यर्थः । एवञ्चात्रापि पक्षसत्त्ववैकल्यमाश्रयासिद्धाविवेति भावः । साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचार इव बाधेपि सपक्षसत्त्ववैकल्यादनैकान्तिको बाध इत्याहानैकान्तिके वेति । तथा च सर्वत्र हेत्वाभासान्तरसङ्कीर्ण एव बाध इत्यभिप्रायः प्राञ्चाम् । नव्यास्तु उत्पत्तिकालावच्छिन्नो घटो गन्धवान्पृथिवीत्वादित्यादिकमसङ्कीर्णबाधोदाहरणमस्त्येवेति बाधोऽपि हेत्वाभासोऽङ्गीकार्य एवेत्याहुः ।

तुरनैकान्तिको वा" इति। सत्प्रतिपक्षोऽप्यन्यतरत्र व्याप्त्यादिसंशयमापादयन् अनैकान्तिकादावेव पर्यवस्यति।

वृत्तिकारस्तु "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" इति सूत्रस्थचकारस्य बाधसत्प्रतिपक्षसमुच्चयार्थतामाह। तेन "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाः पञ्च हेत्वाभासाः" इति गौतमीयमेव मतमनुधावति। परन्तु "विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्" इत्याद्यभिधानात् सूत्रकारस्वरसो हेत्वाभासत्रित्वे, चकारस्तूक्तसमुच्चयार्थ इति तत्त्वम्। ग्रन्थगौरवभयात् प्रपञ्चो न कृतो मयूखे विस्तरोऽन्वेष्टव्यः॥ १७॥

इदानीं हेत्वाभासविवेचनस्य फलमाह—

(१)आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत् ॥१८॥

आत्मेन्द्रियार्थसन्निकर्षात्तावज्ज्ञानमुत्पद्यते तच्चात्मनि लिङ्गम् असिद्धविरुद्धानैकान्तिकेभ्योऽन्यत् अनाभासमित्यर्थः। तथाहि ज्ञानमात्मन्युभयथा लिङ्गम्, ज्ञानं क्वचिदाश्रितं कार्यत्वाद्रूपादिवदिति वा, प्रत्यभिज्ञारूपतया वा योऽहमद्राक्षं सोऽहं स्पृशामीति। तत्र ज्ञानगतं कार्यत्वं नासिद्धं यन्निष्पद्यत इत्यभिधानात्। न विरुद्धं (२)सामान्यतो दृष्टेऽत्र विरोधाभावात्। न चानैकान्तिकम् तत एव। तथाच स्वगतकार्यत्वगुणत्वद्वारा सामान्यतोदृष्टेन ज्ञानमेवात्मनि लिङ्गम्। प्रत्यभिज्ञानन्तु भिन्नकर्तृकेभ्यो व्यावर्त्तमानमेककर्तृकतायां पर्यवस्यति। न च (३)बुद्धिचैतन्येऽपि कार्यकारणभावनिबन्धनमेव

---

(१) आत्मेति। आत्ममूर्तसंयोगस्याप्रत्यक्षस्यानुमितिकारणव्याप्त्याद्यप्रतिपादनादननुमित्या चासिद्धिवारणायेन्द्रियार्थेति। इन्द्रियार्थसंयोगध्वंसे व्यभिचारवारणायात्मेति। तथा चात्मसहितादिन्द्रियार्थसन्निकर्षाद्यदुत्पद्यते तत्प्रत्यक्षात्मकज्ञानमेवेति नासिद्धिव्यभिचाराविति भावः।

(२) सामान्यतो दृष्टेनेति। सामान्यतोदृष्टानुमाने उपस्थितयावद्धेतुसजातीये साध्यसजातीयव्याप्तिज्ञानात्प्रकृतहेतौ पक्षवृत्तित्वज्ञानाच्च प्रकृतसाध्यविरोधिव्याप्त्यात्मकविरोधस्य तदविघटकत्वान्न दोषतेति भावः। तत एवेति = उक्तज्ञानसत्त्वेन प्रकृतसाध्यासामानाधिकरण्यरूपव्यभिचारस्य तदविघटकत्वादेवेत्यर्थः।

(३) बुद्धीति। क्षणिकविज्ञानमेवात्मेति बौद्धमतेनेयमाशङ्का। नन्वेवं तर्हि मैत्रदृष्टस्यानुसन्धानं चैत्रस्य स्यात्तत्राह कार्यकारणेति। तथा च चैत्रमैत्रयोस्तदभावान्नोक्तदोष इति बौद्धाभिप्रायः।

प्रतिसन्धानम्, (१)शिष्यगुरुबुद्ध्योरपि प्रतिसन्धानप्रसङ्गात्। उपादानोपादेयभावस्तत्र नास्ति स च प्रतिसन्धानप्रयोजक इति चेदुपादानत्वस्य द्रव्यधर्मतया बुद्धावसम्भवात्, सम्भवे वा बुद्धीनां क्षणिकतया पूर्वानुभूतप्रतिसन्धानानुपपत्तेः। न हि पूर्वबुद्ध्या उत्तरासु बुद्धिषु कश्चित् संस्कार आधीयते, स्थिरस्य तस्य त्वयाऽनभ्युपगमात्। क्षणिकबुद्धिधारारूपस्य च कालान्तरस्मृतौ प्रतिसन्धाने वाऽसामर्थ्यात्। (२)आलयविज्ञानसन्तानः प्रवृत्तिविज्ञानसन्तानादन्य एव स्मर्त्ता च प्रतिसन्धाता चेति चेत्, स यदि स्थिरः तदा सिद्धं नः समीहितम्। क्षणिकबुद्धिधारारूपश्चेत् तदा पूर्वदोषानतिवृत्तेः, न हि तत्रापि स्थिरः कश्चित् संस्कारः। किञ्च प्रवृत्तिविज्ञानातिरिक्ते तत्र प्रमाणाभावः। अहमिति बुद्धिधारैव प्रमाणमिति चेत् भवतु तत्र यदि प्रवृत्तिविज्ञानान्यालयविज्ञानमेव चेदुपादत्ते तदा प्रवृत्तिविज्ञानानामुपादानताविरहे निमित्तताऽपि न स्यात्, उपादानताव्याप्तत्वान्निमित्ततायाः। माऽस्तु निमित्तताऽपीति चेत् तर्हि सत्त्वमपि गतम्, अर्थक्रियाकारित्वस्य सत्त्वलक्षणत्वात्। प्रवृत्तिसन्तानालयविज्ञानसन्तानाभ्यां सम्भूय सन्तानद्वयमुपादीयत इति चेत् तर्हि किमपराद्धमवयविसंयोगादिभिः, व्यासज्यवृत्तितायास्त्वयाप्यभ्युपगमात्। तस्माज्ज्ञानेनाश्रयतयाऽनुमितमात्मानं प्रतिसन्धानं स्थिरत्वेन साधयतीति न किञ्चिदनुपपन्नम्।

(३)यद्वा नित्या बुद्धिर्नात्मानं कारणत्वेन गमयितुमर्हतीति-साङ्ख्यमतनिरासाय सूत्रमिदमुपतिष्ठते "आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्"। बुद्धितत्त्वं यत्त्वयोच्यते तज्ज्ञानमेव, बुद्धिरुपलब्धिर्ज्ञानमिति हि पर्य्यायाभिधानं तच्चात्मादिसन्निकर्षादुत्पन्नम्, अन्यदेव त्वदभ्युपगतादन्तःकरणादित्यर्थः। तथाच भवति

(१) उत्तरयति शिष्येति। एवञ्च गुरुशिष्यबुद्ध्योः प्रयोज्यप्रयोजकभावाद्गुर्वनुभूतं शिष्योपि स्मरेदित्यर्थः।

(२) आलयेति। ते च विज्ञाने बौद्धकारिकायामुक्ते—

तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ॥ इति ॥

(३) प्रकृतिरेव कर्त्री न त्कारणमात्मेति साङ्ख्यमतनिरासपरतया वा सूत्रं विवृणोति यद्वेति।

तत् आत्मनो लिङ्गमिति भावः ॥ १८ ॥

आत्मन्यनुमानमभिधाय इदानीं परात्मानुमानमाह—

प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् ॥१९॥

प्रत्यगात्मनीति । स्वात्मनीत्यर्थः । इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च हिताहितप्राप्तिपरिहारफलके शरीरकर्मणी चेष्टालक्षणे जन्येते । तथाच परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् । स च प्रयत्न आत्मजन्यः आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मानुमानम् ॥ १९ ॥

इति शाङ्करे वैशेषिकसूत्रोपस्कारे तृतीयाध्यायस्याद्यमाह्निकम् ।



तृतीयाध्याये द्वितीयाह्निकम् ।

(१) हेतुहेत्वाभासविवेकः आह्निकार्थः । इदानीमात्मपरीक्षाशेषं वर्त्तयिष्यन् उद्देशक्रमलङ्घनेन मनःपरीक्षामवतारयन्नाह—

आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् ॥ १ ॥

मनोगतिमात्मनो लिङ्गं वक्ष्यति । तद् यदि मनो ज्ञानकरणत्वेन मूर्त्तत्वेन च परीक्षितं भवति तदा यत्प्रेरितं मनः इन्द्रियान्तरादभिमतविषयग्राहिणि इन्द्रिये सम्बध्यते स आत्मेति सिद्धं भवतीत्येतदर्थं क्रमलङ्घनम् । आत्मेन्द्रियार्थसन्निकर्षे सति यस्मिन् इन्द्रियसन्निकृष्टे ज्ञानस्य भावः उत्पादः, असन्निकृष्टे ज्ञानस्याभावोऽनुत्पादस्तन्मन इत्यर्थः । ननु मनोवैभवेऽपि (२)करणधर्मत्वादेव ज्ञानायौगपद्यमुपपद्यते, (३)किञ्च मनो विभु विशेषगुणशून्यद्रव्यत्वात् कालवत्, ज्ञानासमवायिकारणसंयोगाधारत्वादात्मवत्, स्पर्शात्यन्ताभाववत्त्वादाकाशवदित्यादि वैभवसाधकं प्रमाणमिति चेत्, मैवम् यदि मनो विभु स्यात्तदा सर्वेन्द्रियसन्निकृष्टात्ततः सर्वेन्द्रियकमेकमेव ज्ञानं स्यात् । कार्य्यविरोधान्नैवमिति चेन्न न हि सामग्री विरोधाविरोधमाकलयति येन चाक्षुषत्वरासनत्वादिविरोधाय बिभ्येत्, चित्ररूपवत् चित्राकारमेव वा स्यात् । भवत्येव दीर्घशष्कुलीभक्षणस्थले इति चेन्न तत्रापि (४)व्यासङ्गदर्शनात् । तर्हि रूपरसगन्धस्पर्शान् युगपत् प्रत्येमीति कथमनुव्यवसाय इति चेन्न

---

(१) हेत्विति । अष्टद्रव्यातिरिक्तद्रव्यरूपात्मसाधकहेतूनामनात्मभूतदेहादावात्मत्वसाधकहेत्वाभासानां च विवेचनमाह्निकार्थ इत्यर्थः ।

(२) करणधर्मत्वादिति । एकं करणमेकदैकत्रैवैकक्रियामेव जनयति नानेकामिति नियमेन ज्ञानायौगपद्यं स्यादिति भावः ।

(३) ननु चक्षुराद्यवच्छेदेन भिन्नदेशीयशब्दवत् परमाणाविव विजातीयाग्निसंयोगवदनेकां क्रियां जनयेदत आह किञ्चेति । स्पर्शात्यन्ताभाववत्त्वादिति । अत्र तृतीयहेतौ द्रव्यत्वे सतीति विशेषणं देयम् नातो गुणादौ व्यभिचार इत्यर्थः । इत्यादीति नित्येन्द्रियत्वादिरादिपदग्राह्यो हेतुः ।

(४) व्यासङ्गदर्शनादिति । प्रत्यक्षान्तरविरोधिप्रत्यक्षोपधायकः संयोगविशेषो व्यासङ्गपदार्थः । स च दीर्घशष्कुलीभक्षणस्थले कस्यचिन्मनसो रसनेन्द्रियेण सह तादृशसंयोगेन रसाऽनुभव कस्यचिद्वा घ्राणेन्द्रियसंयोगान्नवशरावगन्धानुभवे पुरुषकालादिभेदेन निश्चीयत इति भावः ।

शीघ्रसञ्चारिमनोजनितेषु पञ्चसु स्मृत्युपनीतज्ञानेषु यौगपद्याभिमानात् । व्यासङ्गोऽपि करणधर्माधीन इति चेन्न (१)उक्तोत्तरत्वात् । बुभुत्साधीनो व्यासङ्ग इति चेन्न सर्वबुभुत्सायां सर्वविषयकसर्वोदयप्रसङ्गात् । बुभुत्साया अपि अभिमतार्थग्राहीन्द्रियमनःसम्बन्धमात्रफलकत्वात्, तस्माज्ज्ञानायौगपद्यान्यथानुपपत्त्या सिध्यति अणु मनः । ततो धर्मिग्राहकमानबाधिताः(२) वैभवहेतवः । किञ्च मनोवैभवे पादे मे सुखं शिरसि मे वेदनेति प्रादेशिकत्वं सुखादीनां न स्यात् विभुकार्य्याणामसमवायिकारणावच्छिन्नदेशे उत्पादनियमात् । तथापि सुखादीनामणुदेशापत्तिरिति चेन्न असमवायिकारणं विभुकार्य्यं स्वदेशे जनत्येवेति नियमात्, तथाच निमित्तचन्दनाद्यवच्छेदादधिकदेशेऽपि जननाविरोधात् । ममापि निमित्तसमवधानानुरोध इति चेन्न (४)उक्तनियमभङ्गप्रसङ्गात् । (५)किञ्चात्मना विभुना मनसः संयोगोऽपि कथं स्यात् । अजोऽसाविति चेन्न विभागस्याप्यजत्वप्रसङ्गात् । अवच्छेदभेदेनोभावव्यविरुद्धाविति चेन्न संयोगविभागयोरवच्छेदभेदस्य स्वकारणाधीनत्वात् अजयोस्तु तदभावादिति दिक् ॥१॥

ननु सुखाद्युपलब्धिः करणसाध्या क्रियात्वात् रूपोपलब्धिवदित्याद्यनुमानात् युगपज्ज्ञानानुत्पत्त्या वा यन्मनः सिद्धं तत्करणतया तथाच तस्य द्रव्यत्वं नित्यत्वञ्च कुत इत्यत आह—

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ २ ॥

यथाऽवयविद्रव्यानुमितो वायुपरमाणुर्गुणवत्त्वात् क्रियावत्त्वाच्च द्रव्यम्, तथा युगपज्ज्ञानानुत्पत्त्याऽनुमितं मनो गुणवत्त्वाद् द्रव्यं, न हि तस्य इन्द्रियसंयोगमन्तरेण ज्ञानोत्पादकं येन गुणवत्त्वं न

---

(१) उक्तोत्तरत्वादिति । 'नहिसामग्रीत्यादिना' सकलेन्द्रियसंयोगसामग्र्यां सत्यामेकेनैव संयोगो नान्येन, सकलसंयोगसत्त्वेपि एकमेव प्रत्यक्षं नान्यादिति वा न युक्तमित्यस्योक्तत्वादित्यर्थः ।

(२) धर्मिग्राहकमानबाधिता इति । चाक्षुषज्ञानवतो मैत्रस्य स्वविषयसम्बद्धं घ्राणं स्वविषयसाक्षात्कारहेतुसंयोगशून्यं चाक्षुषद्रव्यज्ञानकालीनस्वविषयसाक्षात्काराजनकत्वादिन्द्रियसम्बद्धघटादिवदित्याद्यनुमानेन विभुत्वबाधाद्धेतुबाध इत्यर्थः ।

(४) उक्तनियमभङ्गप्रसङ्गादिति । असमवायिकारणं विभुसमवेतकार्यं स्वावच्छिन्नप्रदेशे जनयत्येवेति प्रागुक्तनियमभङ्गप्रसङ्गादित्यर्थः ।

(५) ननु निमित्तसापेक्षस्यासमवायिनो हेतुत्वाङ्गीकारे नोक्तदोष इत्यत आह किञ्चेति ।

स्यात्। किञ्च सुखादिसाक्षात्कारः इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदितीन्द्रियत्वेन मनः सिद्धम्। इन्द्रियत्वञ्च ज्ञानकरणमनःसंयोगाश्रयत्वमित्ययत्नसिद्धमेव मनसो द्रव्यत्वम्। नित्यत्वञ्च तस्यानाश्रितत्वात्। तस्यावयवकल्पनायां प्रमाणाभावादनाश्रितत्वमिति ॥ २ ॥

तत् किं प्रतिशरीरमेकमनेकं वेति सन्देहे निर्णायकमाह—

प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम् ॥ ३ ॥

मनः प्रतिशरीरमिति शेषः। यद्येकैकस्मिन्नपि शरीरे बहूनि मनांसि स्युस्तदा ज्ञानप्रयत्नानां यौगपद्यं स्यात्। (१)यत्तु नर्त्तकीकरचरणाङ्गुलीषु युगपत् कर्मदर्शनाद् युगपदेव बहवः प्रयत्ना उत्पद्यन्ते इति मतम्। तदयुक्तम्, मनसः शीघ्रसञ्चारादेव तदुपपत्तेः अविनश्यदवस्थयोग्यात्मविशेषगुणानां यौगपद्यानभ्युपगमात्। एतेनैकस्मिन्नपि शरीरे पञ्च मनांसि तेषां द्वित्रिचतुःपञ्चानां तत्तदिन्द्रियसंयोगे द्वे त्रीणि चत्वारि पञ्च वा ज्ञानानि युगपज्जायन्ते इति मतं निरस्तम् (२)कल्पनागौरवप्रसङ्गात्। यौगपद्याभिमानस्तु समर्थित एव। रसनेन्द्रियावच्छेदेन त्वगिन्द्रियसम्बन्धेन मनसस्तिक्तो गुड इति ज्ञानद्वययौगपद्यापत्तिरपि करणधर्मत्वादेव नास्ति। द्वित्रिच्छिन्नगोधाभुजगादावपि अवयवद्वये कर्म खड्गाद्यभिघाताद्वा मनस आशु सञ्चाराद्वा तदानीमेवादृष्टेन (३)पण्डमनोन्तरग्रहणाद्वा। यत्तु मनोऽवयव्येव जलौकावत् तत्सङ्कोचविकाशाभ्यां ज्ञानयौगपद्यायौगपद्ये इति, तत् तदवयवकल्पनागौरवप्रतिहतमिति दिक् ॥ ३ ॥

इदानीं क्रमलङ्घनप्रयोजनमादर्शयन्नेवात्मपरीक्षाशेषं वर्त्तयिष्यन्नाह—

प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि ॥ ४ ॥

प्रसिद्धिर्ज्ञानमेव केवलमात्मनो लिङ्गमिति न मन्तव्यम् प्राणाद-

---

(१) मणिकारमतं दूषयितुं तद्दर्शयति यत्त्विति।

(२) कल्पनागौरवेति। सकलमनोभिरेकप्रत्यये जनयितव्ये क्रियायौगपद्यं संयोगयौगपद्यं च स्वीकार्यम् ततश्च तत्तत्प्रत्यक्षयौगपद्यवारणाय प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः संख्याधिक्यं चाङ्गीकार्यमिति गौरवादित्यर्थः।

(३) पण्डमनोन्तरग्रहणेति। मुक्तजीवसङ्गपरिभ्रष्टं संसाराप्रयोजकं मनः पण्डमनं इत्यर्थः।

योऽपि सन्ति आत्मनो लिङ्गानि। तथाहि शरीरान्तश्चारिणि समीरणे (१)प्राणापानलक्षणे ऊर्द्धाधोगती उत्क्षेपणावक्षेपणे मुसलादाविव प्रयत्नं विनाऽनुपपद्यमाने यस्य प्रयत्नाद् भवतः स नूनमात्मा। न हि तिर्यग्गमनस्वभावस्य वायोरेवं स्वभावविपर्ययो विना प्रयत्नात्। न च विरुद्धदिक्क्रिययोर्वाय्वोः सलिलयोरिवोर्द्धगतिः स्यादिति वाच्यम् एवं सत्यूर्द्धगमनमेव स्यान्न त्वधोगमनं फूत्कारादौ वा तिर्यग्गमनम्। तथाचास्ति कश्चिद्, यः प्रयत्नेन वायुमूर्द्धमधो वा प्रेरयति। सुषुप्तिदशायां कथं प्राणापानयोरुर्द्धाधोगती इति चेन्न तदानीं योग्यप्रयत्नाभावेऽपि प्रयत्नान्तरस्य सद्भावात्। स एव जीवनयोनिः प्रयत्न इत्युच्यते।

एवं निमेषोन्मेषावपि शरीरस्याधिष्ठातारमनुमापयतः। तथाहि निमेषस्तावत् अक्षिपक्ष्मणोः संयोगजनकं कर्म। उन्मेषस्तयोरेव विभागजनकं कर्म। एते च कर्मणी नोदनाभिघातादिदृष्टकारणमन्तरेण निरन्तरमुत्पद्यमाने प्रयत्नं विना नोत्पद्येते। यथा दारुपुत्रकनर्तनं कस्यचित् प्रयत्नात् तथाऽक्षिपक्ष्मनर्तनमपि, तेन प्रयत्नवाननुमीयते।

एवं जीवनमप्यात्मलिङ्गम्। तथाहि जीवनपदेन लक्षणया जीवनकार्यं वृद्धिक्षतभग्नसंरोहणादि लक्षयति। तथाच यथा गृहपतिर्भग्नस्य गृहस्य निर्माणं करोति लघीयो वा गृहं वर्द्धयति, तथा देहाधिष्ठाता गृहस्थानीयस्य देहस्याहारादिना वृद्धिमुपचयं करोति क्षतञ्च भेषजादिना प्ररोहयति भग्नञ्च करचरणादि संरोहयति तथाच गृहपतिरिव देहस्याप्यधिष्ठाता सिध्यतीति।

एवं मनोगतिरप्यात्मलिङ्गम्। तथाहि मनस्तावन्मूर्तमणु चेति पूर्वप्रकरणे साधितम्। तस्य चाभिमतविषयग्राहिणि इन्द्रिये निवेशनम् इच्छाप्रणिधानाधीनम्। तथाच यस्येच्छाप्रणिधाने मनः प्रेरयतः स आत्मेत्यनुमीयते यथा गृहकोणावस्थितो दारकः कन्दुकं लाक्षागुटकं वा गृहाभ्यन्तर एव इतस्ततः प्रेरयति। ननु दारुपुत्रनर्त्तयिता गृहपतिर्दारको वा न शरीरादन्यो यो दृष्टान्तः स्यात्, किञ्च शरीरमेव चैतन्याश्रयः अहङ्कारास्पदत्वात्,

(१) प्राणेति। यद्यपि प्राणादीनां प्रयत्नद्वारैणैवात्मलिङ्गत्वम् तथापि परात्मानुमाने प्रयत्नस्यापि कर्मणा साधनीयतया प्रयत्नापेक्षया कर्मणः प्राधान्यतासूचनाय तेषां पृथग्ग्रहणम्।

भवति हि गौरोऽहं स्थूलोऽहमित्याद्यहङ्कारसामानाधिकरण्येन प्रत्ययः। यत्तु बाल्येऽनुभूतं यौवने वार्द्धक्ये वा स्मरति तत्र चैत्रमैत्रवच्छरीरभेदेऽपि स्मरणं न स्यात् "नान्यदृष्टं स्मरत्यन्यः" इति। तत्र चैत्रमैत्रयोर्भिन्नसन्तानत्वेन प्रतिसन्धानं माऽस्तु बाल्यकौमारभेदेऽपि सन्तानैकत्वात् कार्यकारणभावेन प्रतिसन्धानमुपपत्स्यत इति। तत्र ब्रूमः पित्राऽनुभूतस्य पुत्रेणापि स्मरणप्रसङ्गः। तत्र शरीरभेदग्रहो बाधक इति चेत्, वृद्धेन बालशरीराच्छेदेनैव स्वशरीरस्य ग्रहात् प्रतिसन्धानानुपपत्तेः, अनुपलब्धपितृकस्य बालस्य शरीरभेदाग्रहस्यापि सत्त्वात्। मम शरीरमिति ममकारसामान्येनाहङ्कारस्य भानात् ममात्मेत्यत्रापि तथेति चेन्न तत्र ममकारस्यौपचारिकत्वात् राहोः शिर इति वद्भेदेऽपि षष्ठ्युपपत्तेः, (१)हिंसादिफलञ्च कर्त्तरि न स्यात् शरीरस्यान्यान्यत्वात्, पातकमिच्छतो भूतचैतनिकस्य कृतहानमकृताभ्यागमश्च दोष इति दिक्।

इन्द्रियान्तरविकारात्। खल्वपि दृश्यते हि नागरङ्गस्य चिरविल्वस्य वा रूपविशेषसहचरितं रसविशेषमनुभूय पुनस्तादृशं फलमुपलभमानस्य रसगर्द्धिप्रवर्त्तिनो दन्तोदकसंप्लवः। स च नाम्लरसानुमितिमन्तरेण, अनुमितिर्न व्याप्तिस्मृतिमन्तरेण, सा च न संस्कारं विना, स च न व्याप्त्यनुभवमन्तरेण, स च न भूयोदर्शनमन्तरेणेति इयं ज्ञानपरम्परा नैकं कर्त्तारमन्तरेण कार्यकारणभूता सम्भवतीति। तथाच गौतमीयं सूत्रम् "इन्द्रियान्तरविकारात्" अ० ३ आ १ सू० १२ इति।

सुखादयश्च ज्ञानवदेवात्मलिङ्गानि द्रष्टव्याः। तथाहि सुखादिकं क्वचिदाश्रितं द्रव्याश्रितं वा कार्यवस्तुत्वात् गुणत्वाद्वा रूपादिवदितरेतरबाधसहकृतं सामान्यतो दृष्टमेव अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं विषयीकरोति। न हि 'पृथिव्याद्यष्टकानाश्रिता इच्छा द्रव्याश्रितेति' प्रतिज्ञा अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं प्रकारमनादाय पर्य्यवस्यति। यत्र तु प्रथमं न बाधावतारस्तत्राष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं व्यतिरेकिसाध्यमिति विभागः। व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति तु तुच्छम्, येन विना प्रतीतिर्न पर्य्यवस्यति तस्यैव तत्र प्रकारत्वात्। अन्यथा द्व्यणुकं

(१) तर्हि मम शरीरमित्यत्रापि राहोः शिर इति वद्भेदे एव षष्ठी स्यादत आह हिंसेति।

कार्य्यं नाश्रितं सत् क्वचिदाश्रितम् अवयवित्वादित्यादावकार्य्याश्रि-तत्वप्रकारिकाऽनुमितिर्न स्यात् ॥ ४ ॥

ननु सिध्यतु आत्मा स्थिरः, स तु नित्य इति कुतः, कुतश्च द्रव्यमित्यत आह—

तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ५ ॥

यथा वायुपरमाणोरवयवकल्पनायां न प्रमाणमतो नित्यत्वं तथात्मनोऽपि । यथा गुणवत्त्वाद्वायुपरमाणुर्द्रव्यं तथात्माऽपीत्यर्थः ॥ ५ ॥

पूर्वपक्षमाह—

यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ ६ ॥

सन्निकर्षे सति अयं यज्ञदत्त इति चेत् प्रत्यक्षं नास्ति (१)तदा दृष्टं प्रत्यक्षतो गृहीतव्याप्तिकं लिङ्गं नास्ति । यथा वह्निना प्रत्यक्षेण सहचरितो गृहीतो धूमो वह्नौ दृष्टं लिङ्गं तथात्मसाधकं लिङ्गं दृष्टं नास्तीत्यर्थः ॥ ६ ॥

ननु प्रत्यक्षदृष्टव्याप्तिकस्य दृष्टलिङ्गस्याभावेऽपि सामान्यतो दृष्टमेव लिङ्गं भविष्यति, न हि ततो नानुमितिरित्याशङ्क्य पुनः पूर्वपक्षी आह—

(२)सामान्यतो दृष्टाच्चाविशेषः ॥ ७ ॥

सामान्यतो दृष्टमपि लिङ्गं भवति न तु तत आत्मत्वेन अष्टद्रव्यातिरिक्तद्रव्यत्वेन वा स्यादात्मसिद्धिः, किन्तु तेनेच्छादीनां क्वचिदाश्रितत्वमात्रं सिध्येत् तच्च नात्ममननौपयिकमित्यर्थः । तदेतदाह अविशेष इति ॥ ७ ॥

तत् किं 'योऽपहतपाप्मा स आत्मा' इत्याद्यागमोऽनर्थक एवेत्याशङ्क्य स एवाह—

---

(१) तदेति । यज्ञदत्तशरीरे चक्षुरादिसन्निकर्षे सत्यपि तदधिष्ठातर्यात्मनि तदभावादित्यर्थः । एतेन साध्यस्य क्वचिदप्यप्रत्यक्षत्वेन पूर्ववदनुमानासम्भवः प्रदर्शितः, प्रत्यक्षगृहीतव्याप्तिकं हि लिङ्गं पूर्ववदुच्यत इति भावः ।

(२) सामान्यत इति । चकारः शेषवदनुमानबोधकः । तथा च क्वचिदाश्रितत्वमात्रसाधकसामान्यतोदृष्टस्यानुमानस्याविशेषत्वे शेषवज्जन्याभावविधेयकानुमानमपि कैमुतिकेनाविशेषमित्यर्थः ।

तस्मादागमिकः ॥ ८ ॥

आगममात्रसिद्ध एवात्मा नत्वनुमेयः दृष्टसामान्यतोदृष्टयोर्लिङ्गयोरभावात् । तस्मात् सम्यगुपनिषदां श्रवणात् तत्त्वसाक्षात्कार उत्पद्यते न तु मननप्रणालिकया । तथाच मननप्रयोजनकमिदं तन्त्रमतन्त्रम् । दृष्टं हि भूतदशकनदीसन्तरणादावुपदेशमात्रादेव साक्षात्कारि ज्ञानम् ॥ ८ ॥

तदेवं त्रिभिः सूत्रैः पूर्वपक्षे सिद्धान्तवाद्याह—

अहमितिशब्दस्य व्यतिरेकान्नागमिकम् ॥ ९ ॥

नागममात्रं प्रमाणमात्मनि (१)किन्त्वहमितिपदमात्मपदं वा साभिधेयं पदत्वात् घटादिपदवत् इत्यनुमानादप्यात्मसिद्धिः । ननु पृथिव्याद्येव तदभिधेयं स्यादित्यत आह--व्यतिरेकादिति। पृथिव्यादितोऽहमिति पदस्य व्यतिरेकाद्यावृत्तेरित्यर्थः । न हि भवत्यहं पृथिवी अहमापः अहन्तेजः अहं वायुः अहमाकाशम् अहं कालः अहं दिक् अहं मन इति व्यपदेशः प्रत्ययो वा । शरीरे भवतीति चेन्न परशरीरेऽपि तत्प्रसङ्गात् । स्वशरीरे भवतीति चेन्न स्वस्यात्मभिन्नस्यानिरुक्तेः, मम शरीरमिति वैयधिकरण्येन प्रत्ययाच्च । नन्विदमपि सामान्यतोदृष्टमेव तच्च विशेषापर्यवसन्नमिति दूषितमेवेति चेन्न अहम्पदेऽहन्त्वमात्मत्वमेव प्रकारः, तथाच पक्षधर्मताबलादेवाहन्त्वस्य प्रवृत्तिनिमित्तत्वं पर्यवसन्नं तच्चानन्यसाधारणमेवेति विशेषसिद्धेः । एवं सामान्यतो दृष्टादपि बाधसहकृताद्विशेषसिद्धिः । यच्चोक्तं 'श्रवणादेव साक्षात्कारः किमनेनेति' तदयुक्तम्, न हि मननमन्तरेण (२)सङ्कसुकस्याश्रद्धामलक्षालनम्, न च तदन्तरेण तत्र निदिध्यासनाधिकारः, न च निदिध्यासनमन्तरेण सवासनमिथ्याज्ञानोन्मूलनक्षमस्तत्त्वसाक्षात्कारः । अभ्यासादेव हि का-

---

(१) शब्दस्येति सूत्रस्थशब्दपदस्य वाक्यपरत्वे वाक्ये शक्त्यनङ्गीकर्तृमते बाधः स्यात्तद्वारणाय तदर्थमाहाहमितिपदमिति ।

ननु अस्मच्छब्दस्यात्मसामान्यपरत्वे चैत्रोच्चारितादहंपदान्मैत्रस्यापि बोधः स्यात् इति उच्चारयित्रात्मन्येव तच्छक्तिर्वाच्येति तत्पक्षकानुमितौ नात्मसामान्यसिद्धिरित्याशंक्याहात्मपदं वेति । आत्मत्वप्रकारकबोधजनकसङ्केतवत्पदमित्यर्थः ।

(२) सङ्कसुकेति । सङ्कसुकोऽस्थिरप्रकृतिः "सङ्कसुरोऽस्थिरे" इति कोशात् ।

मातुरस्याकस्मात् कामिनीसाक्षात्कारः। न हि शाब्दमानुमानिकं वा ज्ञानं मिथ्याज्ञानोन्मूलनक्षमं दिङ्मोहादौ दृष्टमिति भावः। ननु तथापि परोक्षे आत्मनि कथं सङ्केतग्रहः (दृष्टो ह्ययं घटपद वाच्य इति प्रत्यक्षे सङ्केतग्रह) इति चेत ? क एवमाह नात्मा प्रत्यक्ष इति, किन्तु मनसा संयोगप्रत्यासत्त्यात्मग्रहः। कथमन्यथाऽहं सुखी जानामीच्छामि यते दुःखीत्यादिप्रत्ययः(१)। नह्ययमवस्तुकः सन्दिग्धवस्तुको वा, नीलादिप्रत्ययवत् अस्यापि निश्चितवस्तुकत्वात्। न च लैङ्गिकः, लिङ्गज्ञानमन्तरेणापि जायमानत्वात्। नापि शाब्दः, तदनुसन्धानानुविधानात्। प्रत्यक्षाभासोऽयमिति चेत, तर्हि क्वचिदनाभासविषयोऽपि नह्यप्रमितमारोप्यते इत्यावेदयिष्यते ॥ ९ ॥

एवञ्चेत् किमनुमानेनेति पूर्वपक्षवादी आह—

(२)यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति ॥१०॥

इति शब्दो ज्ञानप्रकारमाह। दृष्टमिति भावे-क्तप्रत्ययान्तम्, अन्वक्षमित्यध्यक्षम्। तेनाथमर्थः-अयं देवदत्तः अयं यज्ञदत्त इति प्रकारकं दृष्टं दर्शनं अध्यक्षमेवास्ति यदि किमनुमानप्रयासेन "न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः" ॥ १० ॥

अत्र सिद्धान्त्याह—

दृष्टयात्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः ॥ ११ ॥

दृष्टे प्रत्यक्षेण गृहीते आत्मनि लिङ्गे (३)सम्भूतसामग्रीके सति एक एव एकवैषयिक एव प्रत्ययः। प्रत्यय इति निरस्तसमस्तविभ्रमाशङ्कित्वमाह। कुत एवमित्यत आह-दृढत्वात् प्रमाणसंप्लवेनान्यथाभावशङ्कानिवर्तनपटुत्वात्। तत्र दृष्टान्तमाह-प्रत्यक्षवदिति। यथा दूरात्तोयप्रत्यक्षे सत्यपि संवादार्थं बलाकालिङ्गेनापि तदनुमानम्। तदुक्तम् "प्रत्यक्षपरिकलितमप्यनुमानेन बुभुत्सन्ते तर्करसिकाः"

---

(१) द्वेष्मीत्यादिप्रत्यय इति पाठान्तरम्।

(२) यदीति सूत्रम्। इति प्रत्यक्षं तर्हि कृतमनुमानेनेति शेषः।

(३) सम्भूतेति। प्रमान्तरकारणकलापसमवधाने इति सूत्रस्थलिङ्गपदार्थः।

इति। इदमत्राकूतम्-यद्यात्मा कदाचित् प्रत्यक्षे चैतसे भासत एव तथापि अहं गौरः अहं कृशः इत्यादिविरोधिप्रत्ययान्तरतिरस्कृतो न तथा स्थेमानमासादयति विद्युत्सम्पातसञ्जातज्ञानवत्, तत्र लिङ्गं अनन्यथासिद्धेन ज्ञानान्तरमुत्पद्यमानं पूर्वज्ञान(विषय)मेव स्थिरीकरोति। (१)किञ्च "श्रोतव्यो मन्तव्यः"इत्यादिविधिबोधितस्यात्ममननस्य इष्टसाधनत्वावगतौ अनुमित्सयाऽवश्यमात्मानुमानप्रवृत्तिः, तद्व्यतिरेके निदिध्यासनासम्भवे साक्षात्काराभावेऽपवर्गासम्भवादिति भावः। अहं देवदत्तोऽहं यज्ञदत्त इति प्रतीतिद्वयाभिधानमात्मनः प्रत्यात्मवेदनीयत्वं सूचयितुम् ॥ ११ ॥

ननु यदि यज्ञदत्तोऽहमिति प्रत्यय आत्मनि तदा यज्ञदत्तो गच्छतीति गमनसामानाधिकरण्यभानमनुपपन्नमित्यत आह—

देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः ॥ १२ ॥

अस्ति हि अहं गौरः अहं स्थूल इति प्रत्ययः, अस्ति च मम शरीरमिति भेदप्रत्ययः। तत्र देवदत्तो गच्छतीति गतिसामानाधिकरण्यानुभवो व्यवहारश्च भाक्तः, ममेति प्रत्ययस्य यथार्थत्वात्। यद्यपि देवदत्तत्वं शरीरवृत्तिर्जातिस्तेन देवदत्तो गच्छतीति मुख्य एव प्रयोगो यथार्थ एव च प्रत्ययः तथापि देवदत्तपदं तदवच्छिन्नात्मनि प्रयुक्तश्चेत् तदौपचारिको बोद्धव्यः ॥ १२ ॥

अत्र शङ्कते—

सन्दिग्धस्तूपचारः ॥ १३ ॥

तुशब्दः पूर्वपक्षद्योतकः। आत्मशरीरयोस्तावदहमितिप्रत्ययः प्रयोगश्च दृश्यते तत्र क्व मुख्यः क्व वौपचारिक इति सन्देहः ॥ १३ ॥

समाधत्ते—

अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः ॥ १४ ॥

अर्थान्तरमात्मस्वरूपं प्रत्यक्षं यत्र प्रत्यये स प्रत्ययोऽर्थान्तरप्र-

---

(१) ननु प्रत्यक्षात्मकसिद्धिज्ञानस्यानुमितौ प्रतिबन्धकत्वात्कथमनुमितिरितआह किंचेति। तथा चोत्तेजकसिषाधयिषासत्त्वात्पक्षतानिर्वाहेणानुमितिः स्यादेवेति भावः।

त्यक्षः । अयमर्थः—अहमिति प्रत्ययस्य प्रत्यगात्मनि स्वात्मनि भावात् परत्र परात्मनि अभावात् अर्थान्तरे स्वात्मन्येव मुख्यः कल्पयितुमुचितः । यदि तु शरीरे मुख्यः स्यात् तदा बहिरिन्द्रियजः स्यात् । न हि शरीरं मानसप्रत्यक्षं मानसश्चायमहमिति प्रत्ययः बहिरिन्द्रियव्यापारमन्तरेणापि जायमानत्वात्, अहं दुःखी अहं सुखी जाने यते इच्छाम्यहमिति योग्यविशेषगुणोपहितस्यात्मनो मनसा विषयीकरणात् । नायं लैङ्गिको लिङ्गानुसन्धानमन्तरेणापि जायमानत्वात् । न शाब्दः शब्दाकलनमन्तरेणापि जायमानत्वात् । तस्मान्मानस एव, मनसश्च बहिरस्वातन्त्र्येण शरीरादावप्रवृत्तेरिति भावः । (१)किञ्च यदि शरीरे स्यात् परशरीरे स्यात्, स्वात्मनि यदि स्यात् तदापि परात्मनि स्यादिति चेन्न परात्मनः परस्यातीन्द्रियत्वात् तद्विशेषगुणानामयोग्यत्वात्, योग्यविशेषगुणोपग्रहेण तस्य योग्यत्वात् । न केवलमात्मन इदं शीलं किन्तु द्रव्यमात्रस्य, द्रव्यं हि योग्यविशेषगुणोपग्रहेणैव प्रत्यक्षं भवति । आकाशमपि तर्हि शब्दोपग्रहणे प्रत्यक्षं स्यादिति चेत्, स्यादेवं यदि श्रोत्रं द्रव्यग्राहकं भवेत्, आकाशं वा रूपवत् स्यात् । आत्मनोऽपि नीरूपत्वं तुल्यमिति चेत्, बहिर्द्रव्यमात्र एव प्रत्यक्षतां प्रति रूपवत्त्वस्य तन्त्रत्वात् । प्रत्यगित्ययं शब्दोऽन्यव्यावृत्तमाह ॥ १४ ॥

पुनः शङ्कते—

देवदत्तो गच्छतीत्युपचारादभिमानात्तावच्छरीरप्रत्यक्षोऽहङ्कारः ॥ १५ ॥

अहङ्कारोऽहमिति प्रत्ययः । स च शरीरप्रत्यक्षः शरीरं प्रत्यक्षं विषयो यत्र स शरीरप्रत्यक्षः । देवदत्तो गच्छतीत्युपचारात्तावत् प्रयोगः प्रत्ययो वा त्वया समाहितः । स चोपचार (२)आभिमानिकः यतोऽहं गौरः अहं कृशः सौभागिनोऽहं पुनरुक्तजन्मेत्यादयः प्रत्ययाः प्रयोगाश्चोपचारेण समन्वयितुमशक्या इत्यर्थः ॥ १५ ॥

सिद्धान्तमाह—

---

(१) शरीरस्याहंप्रत्ययाविषयत्वे बाधकमाह किञ्चेति ।

(२) आभिमानिक इति । अवास्तव इत्यर्थः ॥

सन्दिग्धस्तूपचारः ॥ १६ ॥

तुशब्दोऽयं सिद्धान्तमभिव्यनक्ति । उपचारोऽयमाभिमानिकः किन्तु शरीर एवायमहम्प्रत्यय इति यदुक्तं तत्रापि सन्देह एवेत्यर्थः । तथाच प्रत्ययस्यो(१)भयत्रापि कूटसाक्षित्वेन विशेषावधारणाय यतितव्यम् तत्र यत्ने क्रियमाणे निमीलिताक्षस्याप्यहमिति-प्रत्ययदर्शनात् शरीराभिन्ने बहिरिन्द्रियागोचरे वस्तुनि स मन्तव्यः । शरीरे भवन् परशरीरेऽपि स्यात, चक्षुर्नैरपेक्ष्येण च न स्यात् । अहं कृशः स्थूलो वा सुखीति कथं सामानाधिकरण्यमिति चेन्न सुखाद्यवच्छेदकत्वेनापि तत्र शरीरभानसम्भवात् सिंहनादवदिदं गहनमितिवत्, अहन्त्वमात्रं शरीरे समारोप्यते मनसोपस्थितम्, त्वगिन्द्रियोपनीतमौष्ण्यम् उष्णं जलम् उष्णं शरीरमितिवत् ॥ १६ ॥

सिद्धान्तमुपबृंहयन्नाह—

न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः ॥ १७ ॥

ज्ञानमिति योग्यं सुखदुःखादिकमात्मगुणमुपलक्षयति । यथा यज्ञदत्तविष्णुमित्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपि (२)भिन्नमेव । तथाच यथा यज्ञदत्तस्येदं शरीरं तथा यज्ञदत्तस्य ज्ञाने सुखादौ वाऽनुत्पन्ने(३) अहं सुखी जाने यते इच्छामीति ज्ञानादिकं(४)विषयो भवति योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादीनामपि प्रत्यक्षत्वसम्भवात् । न च सम्भवति, तस्मात् ज्ञानसुखादीनां शरीरादन्य एवाश्रयो वक्तव्य इति भावः । शरीरविशेषात् शरीरस्य भेदादित्यर्थः । (५)तथाच शरीरभेदं प्राप्य ज्ञानं न

---

(१) उभयत्रेति । अहं प्रत्ययस्य शरीरे तद्भिन्ने चात्मसाक्षितायास्तुल्यत्वाद्विशेषावधारणमावश्यकमिति भावः ।

(२) भिन्नमेवेति । शरीरगुणाद्भिन्नमेवेत्यर्थः । (३) समुत्पन्न इति पाठान्तरम् ।

(४) विषयो भवतीति । इदं शरीरं यथा विषयो भवति ज्ञानादिकं तथा भवेदिति योजना । अस्मदादिशब्दस्य शरीरवाचकत्वे इदं शरीरमिति प्रत्यक्षस्यात्मविषयकत्वेनात्मप्रत्यक्षज्ञानादिप्रत्यक्षयोस्तुल्यसामग्रीत्वेन इदं शरीरमिति प्रत्यक्षकालेऽहं जाने इत्यादिरूपज्ञानादिप्रत्यक्षापत्तिरिति भावः ।

(५) भावार्थमुक्त्वा सूत्राक्षरार्थमाह तथाचेति । ज्ञानानवच्छेदकं शरीरं विषयीकुर्वतः प्रत्यक्षस्य ज्ञानादिकं न विषय इति भावः ।

तु विषय इति, ल्यब्लोपे पञ्चमी ॥ १७ ॥

नन्वात्मा न प्रत्यक्षः नीरूपद्रव्यत्वात् निरवयवद्रव्यत्वाद्वा आकाशवत्, तथाचाहं कृशो गौर इति बुद्धेः शरीरमेव विषयो वाच्यः, क्वचिदहं सुखीत्यादिधीरपि यद्यप्यस्ति, तथाप्याश्रयमन्तरेण भासमानानां सुखादीनां शरीरे समारोप इत्येव कल्पयितुमुचितम्, यथोष्णं सुरभि जलम् इत्याश्रयमन्तरेण प्रतीयमानयोरौष्ण्यसौरभयोर्जले समारोपः । न त्वेतदनुरोधेन जलप्रत्ययस्यापि प्रसिद्धजलमन्तरेणान्यविषयत्वम्, तथाऽहमित्यप्यहन्त्वं शरीर एव वास्तवम्, सुखादिकन्तु कदाचित्तत्रारोप्यते तेनात्मनि प्रत्यक्षाकारं ज्ञानं नास्त्येव । सुखाद्याधारत्वेन यत् कल्पनीयं तदागमसिद्धं भवतु न तत्रापि ग्रह इत्यत आह—

अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ॥ १८ ॥

अयमर्थः । अहं सुखी अहं दुःखीति प्रत्ययो नागमिको न शाब्दो नापि लैङ्गिकः शब्दलिङ्गयोरनुसन्धानमन्तरेणापि जायमानत्वात् । प्रत्यक्षत्वे च नीरूपत्वं निरवयवत्वञ्च यद्बाधकमुक्तं तद्बहिरिन्द्रियप्रत्यक्षतायां भवति तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात्, मानसप्रत्यक्षता च तदन्तरेणापि । ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह-शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेरिति । यथा क्षित्यादिषु द्रव्येषु शब्दस्य (१)व्यतिरेकोऽव्यभिचारी नियतस्तेन तदाश्रयस्याष्टद्रव्यातिरिक्तस्याकाशरूप(स्य) विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अष्टद्रव्यातिरिक्तेन भवितव्यम् । नन्वेतावताऽप्यानुमानिक एव आत्मा न तु प्रत्यक्ष इत्यत आह-अहमिति । मुख्ययोग्याभ्यामिति । अहमितीतिकारेण ज्ञानाकारमाह, तेनाहमिति ज्ञानं शब्दलिङ्गानुसन्धानमन्तरेण निमीलिताक्षस्य यदुत्पद्यते तन्मुख्येन (२)अहन्त्ववता योग्येन, प्रमाणसिद्धेन उपपादनीयम्, न तु शरीरा-

---

(१) व्यतिरेकं इति । अभाव इत्यर्थः ।

(२) अहन्त्ववतेति । तथा च सूत्रस्थाहमितिपदं भावप्रधाननिर्देशपरम् । प्रमाणसिद्धाहन्त्ववतेत्यर्थः ।

सन्दिग्धस्तूपचारः ॥ १६ ॥

तुशब्दोऽयं सिद्धान्तमभिव्यनक्ति । उपचारोऽयमाभिमानिकः किन्तु शरीर एवायमहम्प्रत्यय इति यदुक्तं तत्रापि सन्देह एवेत्यर्थः । तथाच प्रत्ययस्यो(१)भयत्रापि कूटसाक्षित्वेन विशेषावधारणाय यतितव्यम् तत्र यत्ने क्रियमाणे निमीलिताक्षस्याप्यहमिति-प्रत्ययदर्शनात् शरीराभिन्ने बहिरिन्द्रियागोचरे वस्तुनि स मन्तव्यः । शरीरे भवन् परशरीरेऽपि स्यात, चक्षुर्नैरपेक्ष्येण च न स्यात् । अहं कृशः स्थूलो वा सुखीति कथं सामानाधिकरण्यमिति चेन्न सुखाद्यवच्छेदकत्वेनापि तत्र शरीरभानसम्भवात् सिंहनादवदिदं गहनमितिवत्, अहन्त्वमात्रं शरीरे समारोप्यते मनसोपस्थितम्, त्वगिन्द्रियोपनीतमौष्ण्यम् उष्णं जलम् उष्णं शरीरमितिवत् ॥ १६ ॥

सिद्धान्तमुपबृंहयन्नाह—

न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः ॥ १७ ॥

ज्ञानमिति योग्यं सुखदुःखादिकमात्मगुणमुपलक्षयति । यथा यज्ञदत्तविष्णुमित्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपि (२)भिन्नमेव । तथाच यथा यज्ञदत्तस्येदं शरीरं तथा यज्ञदत्तस्य ज्ञाने सुखादौ वाऽनुत्पन्ने(३) अहं सुखी जाने यते इच्छामीति ज्ञानादिकं(४)विषयो भवति योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादीनामपि प्रत्यक्षत्वसम्भवात् । न च सम्भवति, तस्मात् ज्ञानसुखादीनां शरीरादन्य एवाश्रयो वक्तव्य इति भावः । शरीरविशेषात् शरीरस्य भेदादित्यर्थः । (५)तथाच शरीरभेदं प्राप्य ज्ञानं न

---

(१) उभयत्रेति । अहं प्रत्ययस्य शरीरे तद्भिन्ने चात्मसाक्षितायास्तुल्यत्वाद्विशेषावधारणमावश्यकमिति भावः ।

(२) भिन्नमेवेति । शरीरगुणाद्भिन्नमेवेत्यर्थः ।

(३) समुत्पन्न इति पाठान्तरम् ।

(४) विषयो भवतीति । इदं शरीरं यथा विषयो भवति ज्ञानादिकं तथा भवेदिति योजना । अस्मदादिशब्दस्य शरीरवाचकत्वे इदं शरीरमिति प्रत्यक्षस्यात्मविषयकत्वेनात्मप्रत्यक्षज्ञानादिप्रत्यक्षयोस्तुल्यसामग्रीत्वेन इदं शरीरमिति प्रत्यक्षकालेऽहं जाने इत्यादिरूपज्ञानादिप्रत्यक्षापत्तिरिति भावः ।

(५) भावार्थमुक्त्वा सूत्राक्षरार्थमाह तथाचेति । ज्ञानानवच्छेदकं शरीरं विषयीकुर्वतः प्रत्यक्षस्य ज्ञानादिकं न विषय इति भावः ।

तु विषय इति, ल्यब्लोपे पञ्चमी ॥ १७ ॥

नन्वात्मा न प्रत्यक्षः नीरूपद्रव्यत्वात् निरवयवद्रव्यत्वाद्वा आकाशवत्, तथाचाहं कृशो गौर इति बुद्धेः शरीरमेव विषयो वाच्यः, क्वचिदहं सुखीत्यादिधीरपि यद्यप्यस्ति, तथाप्याश्रयमन्तरेण भासमानानां सुखादीनां शरीरे समारोप इत्येव कल्पयितुमुचितम्, यथोष्णं सुरभि जलम् इत्याश्रयमन्तरेण प्रतीयमानयोरौष्ण्यसौरभयोर्जले समारोपः । न त्वेतदनुरोधेन जलप्रत्ययस्यापि प्रसिद्धजलमन्तरेणान्यविषयत्वम्, तथाऽहमित्यप्यहन्त्वं शरीर एव वास्तवम्, सुखादिकन्तु कदाचित्तत्रारोप्यते तेनात्मनि प्रत्यक्षाकारं ज्ञानं नास्त्येव । सुखाद्याधारत्वेन यत् कल्पनीयं तदागमसिद्धं भवतु न तत्रापि ग्रह इत्यत आह—

अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ॥ १८ ॥

अयमर्थः । अहं सुखी अहं दुःखीति प्रत्ययो नागमिको न शाब्दो नापि लैङ्गिकः शब्दलिङ्गयोरनुसन्धानमन्तरेणापि जायमानत्वात् । प्रत्यक्षत्वे च नीरूपत्वं निरवयवत्वञ्च यद्बाधकमुक्तं तद्बहिरिन्द्रियप्रत्यक्षतायां भवति तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात्, मानसप्रत्यक्षता च तदन्तरेणापि । ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह-शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेरिति । यथा क्षित्यादिषु द्रव्येषु शब्दस्य (१)व्यतिरेकोऽव्यभिचारी नियतस्तेन तदाश्रयस्याष्टद्रव्यातिरिक्तस्याकाशरूप(स्य) विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अष्टद्रव्यातिरिक्तेन भवितव्यम् । नन्वेतावताऽप्यानुमानिक एव आत्मा न तु प्रत्यक्ष इत्यत आह-अहमिति । मुख्ययोग्याभ्यामिति । अहमितीतिकारेण ज्ञानाकारमाह, तेनाहमिति ज्ञानं शब्दलिङ्गानुसन्धानमन्तरेण निमीलिताक्षस्य यदुत्पद्यते तन्मुख्येन (२)अहन्त्ववता योग्येन, प्रमाणसिद्धेन उपपादनीयम्, न तु शरीरा-

---

(१) व्यतिरेक इति । अभाव इत्यर्थः ।

(२) अहन्त्ववतेति । तथा च सूत्रस्थाहमितिपदं भावप्रधाननिर्देशपरम् । प्रमाणसिद्धाहन्त्ववतेत्यर्थः ।

दिना, तत्रेच्छाया व्यतिरेकाव्यभिचारात् । मुख्ययोग्याभ्यामित्यनन्तरम् उपपादनीयमिति पूरणीयम् । आत्मनि प्रमाणानि बहूनि ग्रन्थगौरवभिया त्यक्तानि मयूखेऽन्वेष्टव्यानि ॥ १८ ॥

आत्मपरीक्षाप्रकरणं समाप्य इदानीमात्मनानात्वप्रकरणमारभते तत्र पूर्वपक्षसूत्रम्—

सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ॥ १९ ॥

एक एव आत्मा चैत्रमैत्रादिदेहभेदेऽपि । कुतः ? सुखदुःखज्ञानानां निष्पत्तेरुत्पत्ते(१)रविशेषात्, सर्वशरीरावच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरविशिष्टैव यतः । यद्यात्मभेदसाधकं लिङ्गान्तरं भवेत्तदा सिध्येदात्मभेदः । न च तदस्ति. (२)यथा तत्तत्प्रदेशावच्छेदेन शब्दनिष्पत्तावपि शब्दलिङ्गाविशेषादेकमेवाकाशम्, यौगपद्यादिप्रत्ययलिङ्गाविशेषादेक एव कालः, पूर्वापरादिप्रत्ययलिङ्गाविशेषादेकैव दिक् ॥ १९ ॥

सिद्धान्तमाह—

व्यवस्थातो नाना ॥ २० ॥

नाना आत्मानः । कुतः ? (३)व्यवस्थातः । व्यवस्था प्रतिनियमः यथा कश्चिदाढ्यः, कश्चित् रङ्कः, कश्चित् सुखी, कश्चिद् दुःखी, कश्चिदुच्चाभिजनः, कश्चिन्नीचाभिजनः, कश्चिद्विद्वान्, कश्चित् जाल्म इतीयं व्यवस्था आत्मभेदमन्तरेणानुपपद्यमाना साधयत्यात्मनां भेदम् । न च जन्मभेदेन बाल्यकौमारवार्द्धक्यभेदेन वा, एकस्याप्यात्म-

---

(१) अविशेषादिति । आत्मत्वमेकमात्रवृत्ति सुखाश्रयमात्रवृत्तित्वात् इत्यनेनैकात्मसिद्धिरिति भावः । नन्वयं हेतुरात्मत्वस्य जीवपरमात्मसाधारण्ये व्यभिचारी परमात्मनि सुखानङ्गीकारात् । तदसाधारण्ये सुखस्य परमात्मगुणत्वाङ्गीकारमते जीवपरमात्मगतद्वित्वसंख्यायां व्यभिचारीत्यत आह दुःखेति । तथा चात्मत्वं न परमात्मसाधारणमिति भावः । ननु जीवैक्यसिद्धावपि जीवपरमात्मनोरैक्यासिद्धिरेवेति कुत आत्मैक्यमित्यत आह ज्ञानेति । तथा च जीवपरमात्मगतमात्मत्वं पक्षः ज्ञानाश्रयमात्रवृत्तित्वादिति हेतुरिति च न व्यभिचारादिदोष इति भावः । तत्पुरुषीयसुखादिर्दृष्टान्तः ।

(२) लिङ्गाविशेषादित्यपि हेतुरिति पूर्वोक्तं स्मारयन्नाह यथेति ।

(३) आढ्यशरीराधिष्ठित आत्मा तत्कालिकप्रतीतिविषयरङ्काधिष्ठितात्माभिन्नः तत्कालीनरङ्कताजनकादृष्टवद्भिन्नत्वात् घटवत् जीवः परमात्मभिन्नः असर्वज्ञत्वात् घटवदित्यनुमानप्रयोगोऽत्र बोध्यः ।

नो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभेदेऽपि स्यादिति वाच्यम् (१)कालभेदेन विरुद्धधर्माध्याससम्भवात् ॥ २० ॥

(२)प्रमाणान्तरमाह—

शास्त्रसामर्थ्याच्च ॥ २१ ॥

शास्त्रं श्रुतिः, तयाऽप्यात्मनो भेदप्रतिपादनात्। श्रूयते हि "द्वे-ब्रह्मणी वेदितव्ये" इत्यादि । तथा "द्वा सुपर्णा सयुजा सखाया स-मानं वृक्षं परिषस्वजाते" इत्यादि च(३) ॥ २१ ॥

इति श्रीशाङ्करे कणादसूत्रोपस्कारे तृतीयाध्यायस्य द्वितीयाह्निकम्।
समाप्तश्चायं तृतीयोऽध्यायः ।

---

(१) कालभेदेनेति। देशवृत्तौ कालस्यावच्छेदकत्वादित्यर्थः ।

(२) एकं विज्ञानमानन्दमित्यादिश्रुतावात्मैक्यं प्रतिपादितं तथा च नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्याद्यनुमानवदागमविरोधादात्मभेदकमनुमानमप्रमाणमित्यतः शास्त्रप्रामाण्यदर्शकं सूत्रमवतारयन्नाह प्रमाणान्तरमिति ।

(३) नच "तत्त्वमसि श्वेतकेतो, ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतिविरोधः स्यादिति वाच्यम् तत्त्वमसीत्यस्या अभेदेन तदीयत्वप्रतिपादने, ब्रह्मविदित्यस्याश्च निर्दुःखत्वेन साम्यप्रतिपादने तात्पर्यात् अन्यथा "निरञ्जन"इति श्रुतिरसङ्गता स्यादित्यनवद्यम् ।

चतुर्थाध्याये प्रथमाह्निकम् ।

पृथिव्यादीनां नवानामुद्देशं लक्षणपरीक्षां निर्वर्त्य प्रकृतेर्मूलकारणतां साङ्ख्याभिमतां निराचिकीर्षुः परमाणूनां मूलकारणत्वं पृथिव्याद्यन्तर्भावञ्च सिषाधयिषुर्नित्यत्वसामान्यलक्षणं तावदाह—

सदकारणवन्नित्यम् ॥ १ ॥

न कारणवदकारणवत् पदसंस्कारात् । तदेवं घटादीनां व्यवच्छेदः । तथापि प्रागभावेऽतिव्याप्तिरित्यत आह-सदिति । (१)सत्तायोगीत्यर्थः ।· समवायविशेषपदार्थयोः सत्त्यैकार्थसमवाय एव सत्तायोगः, सामान्यान्तरस्य सत्तायाश्च सत्प्रत्ययविषयतैव सत्तायोगः, स च प्रत्ययो वस्तुस्वरूपमात्रनिबन्धन इत्यन्यदेतत् । (२)न चान्यत्रापि तथैवास्तु किं सत्तयेति वाच्यम् अनुगतमतेस्तत्सिद्धेरुक्तत्वात् ॥ १ ॥

नित्यसामान्यमभिधायेदानीं परमाणुमधिकृत्याह—

तस्य कार्यं लिङ्गम् ॥ २ ॥

तस्य परमाणोः कार्यं घटादि लिङ्गम् । तथाच गौतमीयं सूत्रम्-"व्यक्तात् व्यक्तस्य निष्पत्तिः प्रत्यक्षप्रामाण्यात्" अ० ४ आ० १ सू० ११ इति । अवयवावयविप्रसङ्गस्तावदनुभूयते स यदि निरवधिः स्यात् तदा मेरुसर्षपयोः परिमाणभेदो न स्यात्, अनन्तावयवारब्धत्वाविशेषात् । न च परिमाणप्रचयाविशेषाधीनो विशेषः स्यादिति वाच्यम् सङ्ख्याविशेषाभावा(३)त्तयोरप्यनुपपत्तेः । प्रलयावधिः स्यादिति चेत् अन्त्यस्य कस्यचिन्निरवयवत्वे प्रलयस्यैवानुपपत्तेः, अवयवविभागविनाशयोरेव

---

(१) सत्तायोगीति । सत्तासम्बन्धीत्यर्थः । स च सम्बन्धस्समवायसामानाधिकरण्यान्यतररूपो वाच्यः । प्रत्येकं तथात्वे सामान्यादावव्याप्तेः । सामानाधिकरण्यं च समवायघटितमेव बोध्यं नातः प्रागभावे यथाकथंचित्समानाधिकरणेऽतिव्याप्तिः । समवायस्यापि स्वात्मकस्वरूपसम्बन्धेन वृत्तित्वात्समवायघटितसामानाधिकरण्यम् अव्याहतमित्याह समवायेत्यादिना ।

(२) शङ्कते न चेति । अन्यत्र द्रव्यादावपि वस्तुस्वरूपनिबन्धन एव सत्प्रत्ययोऽस्त्वित्यर्थः ।

(३) तयोरिति । परिमाणविशेषप्रचयविशेषयोरित्यर्थः ।

द्रव्यनाशकत्वात् । विभागश्च नावधिः तस्यैकाश्रयत्वानुपपत्तेः । तस्मान्निरवयवं द्रव्यमवधिः स एव परमाणुः । न च त्रसरेणुरेवावधिः, (१)तस्य चाक्षुषद्रव्यत्वेन महत्त्वादनेकद्रव्यवत्त्वाच्च, महत्त्वस्य चाक्षुषप्रत्यक्षत्वे कारणत्वम् अनेकद्रव्यवत्त्वमादायैव, अन्यथा महत्त्वमेव न स्यात् कस्य कारणत्वम्भवेत् । न च त्रसरेणोरवयवा एव परमाणवः; महद्द्रव्यारम्भकत्वेन तेषामपि सावयवत्वानुमानात् तन्तुवत् कपालवच्च । तस्मात् यत् कार्य्यद्रव्यं तत् सावयवम्, यच्च सावयवं तत् कार्य्यं द्रव्यम् । तथाच यतोऽवयवात् कार्य्यत्वं निवर्त्तते तत्र सावयवत्वमपीति निरवयवपरमाणुसिद्धिः । तदुक्तं प्रशस्तदेवाचार्य्यैः "सा च द्विविधा नित्या चानित्या च" इति ॥ २ ॥

इदानीं परमाणौ रूपादिसिद्धये प्रमाणमाह—

कारणभावात् कार्य्यभावः ॥ ३ ॥

रूपादीनां कारणे सद्भावात् कार्य्ये सद्भावः, कारणगुणपूर्वका हि कार्य्यगुणा भवन्ति घटपटादौ तथा दर्शनादित्यर्थः ॥ ३ ॥

इदानीं सर्वानित्यतावादिनिराकरणायाह—

अनित्य इति विशेषतः प्रतिषेधभावः ॥ ४ ॥

विशेषत इति षष्ठ्यन्तात्तसिः । (तथाच) विशेषस्य नित्यस्य प्रतिषेधस्तदा स्यात् यद्यनित्य इति प्रत्ययः शब्दप्रयोगश्च न स्यात् नञ उत्तरपदार्थनिषेधार्थत्वात् तत् कथं नित्याभावेऽनित्य इति स्यात्, भवति च ततो नित्यमस्तीति सिद्धम् । (२)यद्वा अनित्य इति न नित्यः परमाणुरित्यनेन प्रकारेण नित्यस्य त्वया प्रतिषेधः कर्तव्यः । अनेन च प्रकारेण प्रतिषेधो न सिध्यति सिद्ध्यसिद्धिप्रतिहतत्वात् । सूत्रञ्चैवं योजनीयम्—अकारः स्वतन्त्र एव प्रतिषेधवचनः "अमानोनाः प्रतिषेधवचनाः" इति तथाचानित्य इति न नित्य इत्यर्थः । प्रतिषेधभावः प्रतिषेधस्वरूपं तेन न नित्य इति विशेषस्य नित्यस्य प्रतिषेधस्वरूपम्, तच्च न सम्भवतीति शेषः ॥ ४ ॥

---

(१) तस्येति । तथ च चाक्षुषद्रव्यत्वेन त्रसरेणोः सावयवत्वासिद्धिरित्यर्थः अनुमानप्रयोगस्तु वायुपरमाणुसिद्धौ प्रदर्शितः ।

(२) यदानदेत्यध्याहारेण गौरवादर्थान्तरं सूत्रस्याह यद्वेति ।

ननु परमाणुर्न नित्यः मूर्तत्वात् घटवत्, एवं रूपवत्त्वरसवत्त्वादयः प्रत्येकं हेतव उन्नेयाः, एवं षट्केन युगपद्योगात् परमाणोः (१)षडंशता तथाच सावयवत्वात् अव्याप्यवृत्तिसंयोगाश्रयत्वात्। किञ्च परमाणोर्मध्ये यद्याकाशमस्ति तदा सच्छिद्रत्वेनैव सावयवत्वम्, अथ नास्ति, तदाकाशस्यासर्वगतत्वप्रसङ्गः। किञ्च छायावत्त्वात् (२)आवृत्तिमत्त्वात्। अपिच यत् सत् तत् क्षणिकमित्यादिक्षणिकत्वसाधकानुमानादपि परमाणोरनित्यता, तथा चैतावती चेदनुमितिपरम्परा तदा कथमुच्यते परमाणुर्नित्य इत्यत आह—

अविद्या ॥ ५ ॥

परमाणोरनित्यत्वविषया सर्वाण्यनुमितिः अविद्या भ्रमरूपा आभासप्रभवत्वात्। आपाततो (३)धर्मिग्राहकमानबाधः सर्वत्र विपक्षबाधकप्रमाणशून्यत्वाद्याप्यत्वासिद्धिः क्वचित् स्वरूपासिद्धिरित्यादि समानतन्त्रेऽन्वेष्टव्यम् ॥ ५ ॥

ननु यदि परमाणुरस्ति कथमिन्द्रियेण न गृह्यते रूपवत्त्वस्पर्शवत्त्वादयश्चेन्द्रियकत्वप्रयोजकास्त्वयैवोपपादिता इत्यत आह—

महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः ॥ ६ ॥

महति महत्त्ववति द्रव्ये महच्छब्दात् परिमाणवाचकात् (४)गुणवाचकानां मतुपो लोपात्। अनेकद्रव्यवत्त्वादिति। अनेकं द्रव्यमाश्रयो यस्य तदनेकद्रव्यम्, तद् यस्यास्ति तदनेकद्रव्यवत् तद्भा-

---

(१) षडंशतेति। मध्यस्य परमाणोरुपर्यधःपार्श्वस्थितैः परमाणुभिर्यः संयोगस्तत्र मध्यस्य पूर्वेण यः संयोगो नासौ मध्यपश्चिमपरमाण्वाश्रितः। एवं मध्यपश्चिमपरमाणुसंयोगो नैव मध्यमपूर्वपरमाण्वाश्रय एवमन्यत्रापीति षडंशता न्यायवार्तिकादौ द्रष्टव्या।

(२) आवृत्तिमत्त्वादिति। आवृत्तिः स्पन्दनविशेष इत्यर्थः। तथा चैतैर्न्यायसूत्रपूर्वपक्षप्रथोक्तैर्हेतुभिरनित्यत्वसिद्धौ कथं नित्यत्वं परमाणावित्यर्थः।

(३) धर्मिग्राहकेति। तद्ग्राहकमानं च 'तस्य कार्यं लिङ्गम्' इति सूत्रोक्तोपस्कारोक्तं 'निरवयवं द्रव्यमवधि'रित्यादिनोक्तं, तेन बाधः व्यापकस्य निवृत्त्या निरवयवत्वेन अनित्यत्वस्य व्याप्यस्य बाध इत्यर्थः। विपक्षेति। विपक्षबाधकप्रमाणमनुकूलतर्कादिरूपम्। क्वचित् सावयवत्वादिहेतौ स्वरूपासिद्धिरिति। निरवयवत्वेनाभ्युपगते सावयवत्वाभावात्। मूर्तत्वादिहेतौ मनोऽन्तर्भावेण व्यभिचारादिरादिपदार्थः। समानतन्त्रे गौतमीयेऽन्वेष्टव्यम् तत्रैव दोषविस्तारो द्रष्टव्य इत्यर्थः।

(४) महच्छब्दः कथं परिमाणवाचको महत्त्वशब्दस्य तथात्वादत आह गुणवाचकानामिति। शुक्लादिशब्दानामिवेति भावः।

वस्तस्मात् अनेकद्रव्यवत्त्वात्। एवं सति वायुरपि प्रत्यक्षः स्यादत उक्तं–रूपाच्चेति। उद्भूतादनभिभूतादिति वक्ष्यते। उपलब्धिरिति। बहिरिन्द्रियेणेति शेषः। तथाच परमाणोर्महत्त्वाभावादनुपलब्धिरित्युक्तं भवति। अनेकद्रव्यवत्त्वञ्च अनेकद्रव्याश्रिताश्रितत्वम्, (१)अवयवबहुत्वाधीनमहत्त्वाश्रयत्वं वा। (२)न च महत्त्वेनैवानेकद्रव्यवत्त्वमन्यथासिद्धमिति वाच्यम् वैपरीत्यस्यापि सम्भवात्। जन्येन जनकस्यान्यथासिद्धर्न तु जनकेन जन्यस्येति चेन्न (३)जन्यजनकयोर्युगपदन्वयव्यतिरेकग्रहेऽन्यथासिद्ध्यभावात्, अन्यथा भ्रामणादिना दण्डादीनामन्यथासिद्धिप्रसङ्गात्। महत्त्वोत्कर्षात् प्रत्यक्षतोत्कर्षो दूरादाविति चेन्न अनेकद्रव्यवत्त्वोत्कर्षस्यापि तत्र सम्भवाद्विनिगमनाविरहात् किञ्च मर्कटकीटसूत्रजाले हस्तचतुष्टयादिमिते दूरादप्रत्यक्षे मर्कटमात्रप्रत्यक्षताऽनेकद्रव्यवत्त्वोत्कर्षाधीनैव महत्त्वोत्कर्षस्य जाले वर्त्तमानत्वात्। एवं (४)सूक्ष्मतन्तुघटितपटादौ दूरत्वे महत्त्वोत्कर्षेऽपि स्वल्पपरिमाणमुद्गरादिप्रत्यक्षे द्रष्टव्यम्॥ ६॥

नन्वेवमपि मध्यन्दिनोल्काप्रकाशस्य चाक्षुषस्य रश्मेर्वायोर्वा (५)स्पर्शसमवायेन रूपसमवायिनो महतश्चोपलम्भः स्यात् अत आह–

सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः॥ ७॥

रूपसंस्कारपदेन रूपसमवायो रूपोद्भवो रूपानभिभवश्च विवक्षितः। तेन यद्यपि वायौ य एव स्पर्शसमवायः स एव रूपसमवायः

---

(१) उद्भूतरूपसहचरितयोर्महत्वानेकद्रव्यवत्त्वयोरन्वयव्यतिरेकयोस्तुल्यत्वेऽपि द्रव्यचाक्षुषं प्रति अनेकद्रव्यवत्त्वस्योभयत्वस्य वा न कारणता किन्तु लाघवान्महत्त्वस्येत्याशयेनाह अवयवबहुत्वेति।

(२) प्रथमकल्पोक्तमनेकद्रव्यवत्त्वस्य कारणत्वं खण्डयितुं न युक्तमित्यभिप्रायेणाह नचेत्यादिना। जन्येनेति। जनकजनकस्यैवान्यथासिद्धत्वादिति भावः।

(३) जनकजनकतयैव यस्य कार्यनियतपूर्ववृतित्वं तदेवान्यथासिद्धं नतु स्वातन्त्र्येण कुलालजनकत्वेनान्यथासिद्धस्यापि कुलालत्वेन कारणत्वादित्याशयेनाह जन्येति।

(४) सूक्ष्मतन्त्विति। सूक्ष्मतन्तुघटितपटादौ महत्वोत्कर्षे सत्यपि दूरत्वे सति यत्स्वल्पपरिमाणानां मुद्गरादीनां तत्पटादिदेशवृत्तीनां प्रत्यक्षम् अर्थात् तत्पटादीनाञ्चाप्रत्यक्षं तस्मिन्ननेकद्रव्यवत्त्वाधीनत्वं द्रष्टव्यम्।

(५) स्पर्शसमवायेनेति। स्पर्शसमवायभिन्नरूपसमवायवतो महतो वायोरुपलम्भः स्यादित्यर्थः।

तथापि रूपनिरूपितो नास्ति तत्र रूपात्यन्ताभावसत्त्वात् । चाक्षुषे च रश्मौ रूपसंस्कारः रूपोद्भवो नास्ति, मध्यन्दिनोल्काप्रकाशे च रूपसंस्कारो रूपानभिभवो नास्ति इति न तेषां प्रत्यक्षता । एवं ग्रीष्मोष्मभर्जनकपालानलकनकादिषु रूपसंस्काराभाव उन्नेयः ।

वृत्तिकृतिस्तु रूपञ्च रूपसंस्कारश्चेत्येकरूपपदलोपः तेन रूपाभावाद्वायोरनुपलब्धिः रूपसंस्काराभावाच्चक्षुरादीनामनुपलब्धिरित्याहुः ॥ ७ ॥

एवं परमाणुनित्यताप्रकरणानन्तरं परमाणुलिङ्गतयोपोद्घातसङ्गत्या बहिर्द्रव्यप्रत्यक्षताप्रकरणं समाप्य उपोद्घातेन गुणप्रत्यक्षताप्रकरणं वर्तयिष्यन्नाह—

अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः ॥८॥

रूपगतो विशेषो रूपविशेषः तच्चोद्भूतत्व(१)मनभिभूतत्वं रूपत्वञ्च तस्माद्रूपस्योपलब्धिः । नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं गृह्येतेत्यत उक्तमनेकद्रव्यसमवायादिति । अनेकपदं भूयस्त्वपरं तेनानेकानि भूयांसि द्रव्याणि आश्रयतया यस्य तदनेकद्रव्यं त्रसरेणुप्रभृति तत्समवायात् घटाद्योऽप्यवयवद्वयारब्धाः परम्परयाऽनेकद्रव्याश्रया एव, रसस्पर्शादौ रूपत्वविरहात् चाक्षुषत्वाभावः चाक्षुषे तेजसि च उद्भूतत्वविरहात् । (२)उद्भवः रूपादिविशेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः । नन्वेवं शुक्लत्वसुरभित्वशीतत्वकटुत्वादिभिरपि (३)परापरभावानुपपत्तिरेव, तत्तद्व्याप्यतन्नानात्वकल्पने तु कल्पनागौरवम् उद्भवपदस्य नानार्थत्वञ्चेति चेन्न वाह्यैकैकेन्द्रियग्रहणयोग्य(४)गुणत्वस्यैवोपाधेरुद्भवत्वात् तदुपाधिविर-

---

(१) अनभिभूतत्वमिति । पुरुषकालादिभेदभिन्नस्याभिभूतत्वस्य प्रत्यक्षविशेषप्रतिबन्धकतया तत्तदभावस्यानभिभूतत्वस्य तत्तत्प्रत्यक्षकारणत्वमतेनेदम् ।

(२) उद्भव इति । भावप्रधानोऽयं निर्देशः ।

(३) परापरेति । उद्भूतशुक्लादिकमादाय साङ्कर्यं स्यादिति भावः । कल्पनागौरवमिति । कार्यकारणभावे व्यभिचारवारणाय चाक्षुषगतवैजात्यम्, अव्यवहितोत्तरत्वगर्भे वा कार्यतावच्छेदकमपि कल्पनीयमिति भावः ।

(४) गुणत्वस्यैवेति । तथा च वाह्यैकैकेन्द्रियग्राह्यविशिष्टविशेषगुणत्वमेवोद्भूतत्वं नतु जातिरिति । वैशिष्ट्यञ्च स्वावृत्तिवाह्येन्द्रियविभाजकरूपवत्करणकग्रहणायोग्यत्वविशिष्टस्ववृत्तीन्द्रियविभाजकधर्मवत्करणकग्रहणयोग्यत्वसम्बन्धेन ।

हस्यैवानुद्भवत्वात् । अनुद्भवाभाव एव उद्भव इति (१)केचित् । तच्चिन्त्यम्, अनुद्भवस्याप्येवं व्यवस्थापयितुमशक्यत्वात् । अतीन्द्रियविशेषगुणत्वमनुद्भूतत्वमिति चेत्, एवं तर्हि ऐन्द्रियकविशेषगुणत्वस्यैवोद्भवत्वापत्तेः । ऐन्द्रियकत्वावच्छेदकं किमिति चेत्, (२)तुल्यम् । (३)विशेषगुणेष्वेकैवोद्भूतत्वं जातिः गुणगतजातौ परापरभावानुपपत्तिर्न दोषायेत्यपि वदन्ति ॥ ८ ॥

(४)स्पर्शातिरिक्तानां रूपसामानाधिकरण्यमेव बहिरिन्द्रियग्राह्यताप्रयोजकमिति रूपप्रत्यक्षसामग्रीमभिधाय तामन्यत्रातिदिशन्नाह—

तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ॥ ९ ॥

तेनेति रूपप्रत्यक्षज्ञानेनेत्यर्थः । यथा रूपविशेषात् रूपत्वानभिभूतत्वोद्भूतत्वाद्रूपोपलब्धिस्तथा रसविशेषात् रसत्वानभिभूतत्वोद्भूतत्वलक्षणात् रसोपलब्धिः, एवमितरत्रापि योज्यम् । अनेकद्रव्यसमवायश्चातिदेश्यः । घ्राणरसनत्वगिन्द्रियाणामनुद्भवाद्गन्धरसस्पर्शानामग्रहणम्, पाषाणादावनुद्भवाद्गन्धरसयोः,—तद्भस्मनि तयोरुपलम्भात् । तयोः पाषाणादावुपलम्भ एव (५)न तु स्पष्ट इत्येके । विसक्तावयवाप्यद्रव्यरूपानुद्भवात्तदग्रहणम् । एवं रसस्यापि । उष्णजले तेजोरूपस्यानुद्भवात् स्पर्शस्य चाभिभवात्, विततकर्पूरचम्पकादौ रूपरसस्पर्शानामनुद्भवादनुपलम्भः । कनकादौ रूपमुद्भूतमेव शुक्लत्वभास्वरत्वे परमभिभूते । रूपमप्यभिभूत-

---

(१) केचिदिति । गङ्गेशोपाध्याया इत्यर्थः । दूषयति तच्चिन्त्यमिति । अत्रेदं चिन्त्यते । अथ उद्भवे शुक्लत्वादिव्याप्यनानाजातिस्वीकारे व्यभिचारवारणाय नानाकार्यकारणभावोऽङ्गीकर्तव्यः अनुद्भूतत्वस्य जातित्वे तु तदभावकूटमादाय चाक्षुषकार्यकारणभावो ह्येक एवांगीकार्य इति लाघवमेवेति कथं केचिन्मतेऽस्वरस इति ? नैवम् अभावकूटस्य कारणतावच्छेदकत्वे विशेष्यविशेषणभावे विनिगमनाविरहाद्गुरुतरकार्यकारणभावबाहुल्यमेवेति तत्रास्वरस इति भावः ।

(२) तुल्यमिति । भवन्मते इन्द्रियग्राह्यतानवच्छेदकरूपातीन्द्रियत्वस्यानिर्वचनीयत्वे योग्यत्वमपि अनिर्वचनीयम् । सन्निकर्षादिकारणसामग्रीसत्त्वेऽभिभवाद्यसत्त्वे च प्रत्यक्षाविषयत्वमतीन्द्रियत्वमिति निर्वचने चास्माकमपि तदनाश्रयत्वमेव योग्यत्वमिति समानत्वादिति भावः ।

(३) साङ्कर्यस्य जातिबाधकत्वमनङ्गीकुर्वतां मतमाह विशेषगुणेष्विति ।

(४) स्पर्शेति । इदमादिसूत्रद्वयोक्तरसादिकर्मान्तानामिति शेषः ।

(५) नत्विति । न स्पष्टः नानुव्यवसायगृहीत इति भावः । एके इति । मणिकारादय इत्यर्थः ।

मित्येके। कनकग्रहणन्तु रूपान्तरसाहचर्यात्। अभिभवश्च बलवत्सजातीयग्रहणकृतमग्रहणं न तु बलवत्सजातीयसम्बन्धमात्रम्, बलवत्सजातीयसम्बन्धस्याप्यग्रहणनिरूप्यतया अग्रहणस्यैवोपजीव्यत्वात्। न चाग्रहणप्रयोजकत्वेन बलवत्सजातीय एवोपजीव्यः, अग्रहणस्य ग्रहणप्रागभावस्य तदत्यन्ताभावस्य वा (१)तदप्रयोज्यत्वात्, ग्रहणध्वंसस्य च तत्राभावात्। तवापि तर्हि बलवत्सजातीयग्रहणकृतमग्रहणमनुपपन्नमेवेति चेत्, अस्त्वेवम्, (२)तथापि सजातीयस्य बलवत्त्वे दुर्बलत्वे वा तादृशसम्बन्धसत्त्वे वा ग्रहणाग्रहणे एव प्रयोजके इति स एवाभिभवपदार्थः॥ ९॥

ननु गुरुत्वमप्यनेकद्रव्यसमवेतं रूपमहत्त्वसमानाधिकरणञ्चेति कथं न प्रत्यक्षमत आह—

तस्याभावा(३)दव्यभिचारः॥ १०॥

तस्य रूपत्वादेः सामान्यस्य उद्भवस्य च गुरुत्वेऽभावान्न गुरुत्वं प्रत्यक्षम्। ननु माभूत् तत्र रूपत्वादिकं तथापि तत्प्रत्यक्षं स्यादत आह अव्यभिचार इति। एकैकेन्द्रियग्राह्यत्वं प्रति रूपत्वादीनां पञ्चानां जातीनाम् अव्यभिचारो नियम एव। यत्रैव रूपत्वादिपञ्चकान्यतमं तत्रैव बाह्यैकेन्द्रियग्राह्यत्वं तद्व्यतिरेकादित्यर्थः। सूत्रे तु गुरुत्वाधिकारस्यास्फुटत्वात् प्रशस्तदेवैरतीन्द्रियेषु मध्ये परिगणितमपि (४)वल्लभाचार्य्यैः स्पार्शनमुक्तं गुरुत्वम्॥ १०॥

एवमेकैकेन्द्रियग्राह्यानभिधाय द्वीन्द्रियग्राह्यानाह—

---

(१) तदप्रयोज्यत्वादिति। बलवत्सजातीयाप्रयोज्यत्वादित्यर्थः।

(२) तथापीति। इदमत्र तात्पर्यम्। ग्रहणप्रागभावादेरपि प्रतियोगिसामग्र्यादिविघटनद्वारा बलवत्सजातीयग्रहणं प्रयोजकमेव, सजातीयस्य तत्प्रयोजकत्वमपि ग्रहद्वारैव न तु स्वतः, पित्तदूषितनेत्रस्य रजतादौ श्वैत्यग्रहणस्य सजातीयग्रहणप्रयोज्यताया दृष्टत्वात्। नच तत् सजातीयमात्रप्रयोज्यं तत्सम्बन्धमात्रप्रयोज्यम् वा पुरुषान्तरस्यापि किञ्चित्सजातीयसम्बन्धमादाय श्वैत्यग्रहणप्रसङ्गात्। एवं च बलवत्सजातीयग्रहणं तत्प्रयोज्याग्रहणञ्च सजातीयबलवत्त्वादिज्ञापकतया बलवत्सजातीयतत्सम्बन्धयोरुपजीव्यं भवति तद्विनिर्मोकेण बलवत्सजातीयतत्सम्बन्धयोर्दुर्वचतया तद्घटित एवाभिभवपदार्थ इत्यर्थः।

(३) अव्यभिचार इति। चाक्षुषत्वस्येति शेषः।

(४) वल्लभाचार्यैरिति। चाक्षुषसामग्रीसत्त्वेपि यदि न गुरुत्वचाक्षुषं तदा व्यभिचारः स्यान्न तु सामग्र्यभावप्रयुक्तकार्यविरहेणेति तैर्गुरुत्वस्य स्पार्शनमुक्तमिति भावः।

संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायात् चाक्षुषाणि॥११॥

एतेषां चाक्षुषत्वे स्पार्शनत्वे वा परस्परानपेक्षत्वसूचनायासमासः। यद्यपि महत्त्वापेक्षाऽस्ति तथापि न परिमाणत्वेन। चकारः स्नेहद्रवत्ववेगानामुपसङ्ग्रहार्थः । चाक्षुषाणीति,–स्पार्शनत्वमप्युपलक्षयति। यद्वा चकार एव चाक्षुषाणि चेत्यत्रापि योज्यः। सङ्ख्या,– इति बहुवचनम् एकत्वादिकाः सर्वा एव सङ्ख्याः सङ्गृह्णाति। एकत्वं सामान्यमेव न तु गुणं इति चेत्, तद् यदि द्रव्यमात्रवृत्ति तदा द्रव्यत्वेन सहान्यूनानतिरिक्तवृत्तित्वम् । अथ गुणकर्मणोरपि वर्तते तदा सत्तया सहा(१)न्यूनानतिरिक्तवृत्तित्वम् । कथं तर्हि गुणादावप्येकत्वादि प्रत्यय इति चेत्, आरोपितेनैकत्वेन, एकार्थसमवायप्रत्यासत्त्या सम्यगेवैकत्वप्रत्ययो वा। तदेतदेकत्वं नित्यद्रव्येषु नित्यम् अनित्येषु च कारणैकत्वासमवायिकारणकम् । द्वित्वादिकन्तु अपेक्षाबुद्धिजन्यम् । अपेक्षाबुद्धिश्च नानैकत्वसमूहालम्बनरूपा, सजातीययोर्विजातियियोर्वा द्रव्ययोश्चक्षुषा सन्निकर्षे ॥ ११ ॥

एतावन्त्येव कर्मपर्यन्तानि अभिप्रेत्याह—

अरूपिष्वचाक्षुषाणि ॥ १२ ॥

रूपरहितद्रव्येषु वर्तमानानि कर्मपर्यन्तानि सङ्ख्यादीन्यचाक्षुषाणि, न स्पार्शनानीत्यपि द्रष्टव्यम्। अप्रत्यक्षाणीति नोक्तम्, तथा सत्यात्मैकत्वमपि प्रत्यक्षं न स्यात् ॥ १२ ॥

रूपादीनामेकैकेन्द्रियग्राह्यत्वं सङ्ख्यादीनां द्वीन्द्रियग्राह्यत्वं सुखादीनां मानसत्वं, तथाच सत्तागुणत्वयोः सामान्ययोः सर्वेन्द्रियग्राह्यत्वमायातमित्याह—

एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम्॥१३॥

व्यक्तिग्रहणयोग्यतैव जातिग्रहणयोग्यता । व्यक्तयश्च यथायथं यदि सर्वैन्द्रियैर्गृह्यन्ते तदा जात्योरपि गुणत्वसत्तयोः सर्वेन्द्रियग्राह्यत्वं पर्यवसन्नमित्यर्थः ॥ १३ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे चतुर्थाध्यायस्याद्यमाह्निकम् ।

---

(१) अन्यूनानतिरिक्तवृत्तित्वमिति । समनियतवृत्तित्वाद्घटत्वकलशत्ववदुभयस्य जातित्वं बाधितमित्यर्थः ।

चतुर्थाध्याये द्वितीयमाह्निकम् ।

स्पर्शवद्द्रव्यपरीक्षार्थे चतुर्थाध्याये मूलकारणपरमाणुपरीक्षानन्तरं कार्यद्वारा स्पर्शवन्त्येव द्रव्याणि परीचिक्षिषुराह—

तत् पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम् ॥ १ ॥

तत्र शरीरत्वं (१)प्रयत्नवदात्मसंयोगासमवायिकारणवत् क्रियावदन्त्यावयवित्वम् उपाधिभेदः, न तु शरीरत्वं जातिः पृथिवीत्वादिना परापरभावानुपपत्तेः । इन्द्रियत्वञ्च (२)स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वम्, (३)शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं वा । नक्तञ्चरनयनरश्मिस्तु (४)तेजोऽन्तरमेव । चक्षुष्ट्वे तु शब्दरूपेतरोद्भूतविशेषगुणानाश्रयत्वे सतीति देयम्, न त्विन्द्रियत्वं जातिः, पृथिवीत्वादिना परापरभावानुपपत्तेः । विषयत्वञ्च यद्यपि प्रतीयमानतया भोगसाधनत्वम्, तच्च लौकिकसाक्षात्कारविषयत्वमेव द्रव्यगुणकर्मसामान्याभावसाधारणम्, तथापि सूत्रानुरोधात् लौकिकसाक्षात्कारविषयकार्य्यद्रव्यत्वं (५)द्रष्टव्यम् । पृथिव्यादिकार्य्यद्रव्यं त्रिविधमिति हि सूत्रम्, तथाच विषयत्वमपि न जातिः ॥ १ ॥

---

(१) प्रयत्नवदिति । घटादावतिव्याप्तिवारणायासमवायिकारणवदित्यन्तम् । हस्तादौ तद्वारणाय विशेष्यम् ।

(२) स्मृत्यजनकेति । प्रत्यक्षसामान्यकारणव्युदासाय स्मृत्यजनकेति । ज्ञानपुरीतन्नाडीसंयोगव्युदासाय ज्ञानकारणेति । द्रव्येन्द्रियसंयोगवारणाय मन इति ।

(३) चक्षुर्विशेषस्य मनःसंयोगे कदाचित्स्मृतिजनकत्वाङ्गीकारे तत्राव्याप्तिवारणाय कल्पान्तरमाह शब्देतरेति । आत्मन्यतिव्याप्तिवारणाय सत्यन्तम् । श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति । रूपमादाय चक्षुष्यव्याप्तिवारणायोद्भूतपदम् । संयोगमादायासम्भववारणाय विशेषपदम् । चक्षुरवयवसंयोगस्य चक्षुःसंयोगद्वारा द्रव्यचाक्षुषजननयोग्यतयाऽतिव्याप्तिवारणाय मनःपदम् । कालादावतिव्याप्तिवारणाय ज्ञानकारणमिति ।

(४) इन्द्रियाघटकमित्यर्थः तथाचोद्भूतरूपसत्त्वेपि न व्यभिचार इति भावः ।

(५) द्रष्टव्यमिति । तथाच द्व्यणुके नाव्याप्तिरित्यर्थः ।

इदानीं शरीरस्य त्रैभौतिकत्वचातुर्भौतिकत्वप्रवादं निराकर्त्तुमाह—

प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते ॥ २ ॥

(१)"गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं"अ०३आ०१सू०३० यदि शरीरं भवेत् तदाऽप्रत्यक्षं भवेत् यथा प्रत्यक्षाप्रत्यक्षाणां वायुवनस्पतीनां संयोगोऽप्रत्यक्षस्तथा शरीरमप्यप्रत्यक्षं स्यादिति दृष्टान्तद्वारकं सूत्रम्। पञ्चात्मकं न विद्यत इति। शरीरमिति शेषः। क्लेदपाकादयस्तु उपष्टम्भकजलानलगता एव। चातुर्भौतिकोऽप्येवम्। नन्वस्तु त्रैभौतिकम् त्रयाणां भूतानां प्रत्यक्षत्वादिति चेन्न विजातीयारम्भस्य प्रतिषेधात्। एकस्य गुणस्यावयविनि गुणानारम्भकत्वात्। तद् यदि पृथिवीजलाभ्यामारम्भः स्यात् तदा तदारब्धमगन्धमरसञ्च स्यात्, एवं पृथिव्यनलाभ्यामगन्धमरूपमरसञ्च स्यात्, पृथिव्यनिलाभ्यामगन्धमरसमरूपमस्पर्शञ्च स्यादित्यादूह्यम्॥ २ ॥

एतदेवाह—

गुणान्तराप्रादुर्भावाच्च न त्र्यात्मकम् ॥ ३ ॥

पृथिव्यप्तेजसां प्रत्यक्षाणामेवारब्धं शरीरं प्रत्यक्षं स्यादपि, यदि तत्र गुणान्तरं कारणगुणपूर्वकं प्रादुर्भवेत्, न त्वेतदस्ति एकस्य गन्धादेरनारम्भकत्वस्योक्तत्वात्। तथाच न त्र्यात्मकमपि शरीरं न रूपवद्भूतत्रयारब्धमपीत्यर्थः॥ ३ ॥

कथं तर्ह्येकस्मिन्नेव शरीरे पाकादीनामुपलम्भ ? इत्यत आह—

अणुसंयोगस्त्वप्रतिषिद्धः ॥ ४ ॥

मिथः पञ्चानां भूतानां परस्परमुपष्टम्भकतया संयोगो न निषिध्यते, किन्तु विजातीययोरण्वोर्द्रव्यं प्रत्यसमवायिकारणं संयोगो नेष्यते, तथाच तदुपष्टम्भात् पाकादीनां शरीरे भवत्युपलम्भ इति। तर्हि किम्प्रकृतिकमिदं मानुषशरीरमित्यत्र गौतमीयं सूत्रमुपतिष्ठते-"पार्थिवं तद् विशेषगुणोपलब्धेः" अ०३आ०१सू०३१। पृथिवीविशेषगुणो गन्धो मानुषशरीरे आनाशमनपायी दृश्यते, पाकाद-

---

(१) इदं न्यायसूत्रं प्रक्षिप्तमिति केचित्।

यस्तु शुष्कशरीरे नोपलभ्यन्ते इति तेषामौपाधिकत्वं गन्धस्य स्वाभाविकत्वमिति पार्थिवत्वव्यवस्थितेः ॥ ४ ॥

शरीरं विभजते—

तत्र शरीरं द्विविधं योनिजमयोनिजञ्च ॥ ५ ॥

तत्र पार्थिवाप्यादिशरीरेषु मध्ये पार्थिवं शरीरं द्विविधम्। के ते द्वे विधे इत्यत्राह योनिजमयोनिजञ्चेति। आप्यतैजसवायवीयशरीराणां वरुणादित्यवायुलोकेषु प्रसिद्धानामयोनिजत्वमेव। अयोनिजत्वं शुक्रशोणितसन्निपातानपेक्षत्वम्। अयोनिजञ्च देवानामृषीणाञ्च, श्रूयते हि "ब्रह्मणो मानसा मन्वादयः" इति। कारणमन्तरेण कथं कार्य्यमिति चेत् योनेः शरीरत्वावच्छेदेनाकारणत्वात् उष्मजकृमिमशकादिशरीरे व्यभिचारात्, संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरापेक्षयाऽस्मदादिशरीराणामन्यादृशत्वात्। योनिजमपि द्विविधं जरायुजमण्डजञ्च। जरायुजं मानुषपशुमृगाणां गर्भाशयस्य जरायुत्वात्। पक्षिसरीसृपाणामण्डजं परितः सर्पणशीलत्वात्, सर्पकीटमत्स्यादयोऽपि सरीसृपा एव। यद्यपि वृक्षादयोऽपि शरीरभेदा एव भोगाधिष्ठानत्वात्, न खलु भोगाधिष्ठानत्वमन्तरेण जीवन-मरण-स्वप्न-जागरण-भेषजप्रयोग-वीजसजातीयानुवन्धानुकूलोपगम-प्रतिकूलापगमादयः सम्भवन्ति। वृद्धिक्षतभग्नसंरोहणे च भोगोपपादके स्फुटे एव, आगमोऽप्यस्ति—

नर्मदातीरसम्भूताः सरलार्जुनपादपाः।
नर्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम्॥

इत्यादिः।

श्मशाने जायते वृक्षः कङ्कगृध्रादिसेवितः।

इत्यादिश्च, तथापि चेष्टावत्त्वमिन्द्रियवत्त्वञ्च नोद्भिदां स्फुटतरमतो न शरीरव्यवहारः ॥ ५ ॥

अयोनिजशरीरोत्पत्तिकारणमाह—

अनियतदिग्देशपूर्वकत्वात् ॥ ६ ॥

अनियतदिग्देशाः परमाणवो धर्मविशेषजनितकर्माणस्तत्पूर्वकत्वादयोनिजशरीराणाम् ॥ ६ ॥

ननु परमाणूनां कर्म विना कथं द्रव्यासमवायिकारणं संयोगः, कथं वा संयोगमन्तरेण द्रव्योत्पत्तिरत आह—

धर्मविशेषाच्च ॥ ७ ॥

अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म तेन च कर्मणा सम्भूय परमाणवो द्व्यणुकादिप्रक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्ते इत्यर्थः । उपलक्षणञ्चैतत् अधर्मविशेषाच्च क्षुद्रजन्तूनामुष्मजानां मशकादीनां यातनामयानि शरीराण्युत्पद्यन्ते इत्यपि द्रष्टव्यम् ॥ ७ ॥

देवर्षीणामयोनिजे शरीरे प्रमाणान्तरमाह—

समाख्याभावाच्च ॥ ८ ॥

समाख्या अन्वर्था संज्ञा श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धा । तथाहि-"दुर्वासःप्रभृतयो मानसाः अहङ्कारेभ्यः समभवदङ्गिरा" (१)इत्यादिका, तयाऽपि ज्ञायते सन्त्ययोनिजानि शरीराणि देवर्षीणामिति ॥ ८ ॥

प्रमाणान्तरमाह—

संज्ञाया आदित्वात् ॥ ९ ॥

सर्गादौ या ब्रह्मादिसंज्ञा आदिभूता प्राथमिकी तया ज्ञायते अस्त्ययोनिजं शरीरमिति, नहि तदा ब्रह्मणो मातापितरौ स्तः याभ्यां ब्रह्मादिसंज्ञा कृता स्यादिति भावः ॥ ९ ॥

उपसंहरति—

सन्त्ययोनिजाः ॥ १० ॥

(२)शरीरविशेषा इति शेषः ॥ १० ॥

उपसंहृतेऽतिदार्ढ्यार्थं प्रमाणान्तरमाह—

वेदलिङ्गाच्च ॥ ११ ॥

वेदो मन्त्रः स च लिङ्ग्यते ज्ञाप्यतेऽनेनेति वेदलिङ्गं ब्राह्मणम्, ततोऽप्ययोनिजं शरीरं प्रतिपद्यते इत्यर्थः । तथाहि ब्राह्मणम्-"प्र·

---

(१) इत्यादिकेति । प्रजापतेर्यश्चोरुत उद्भूतः साऽयमौर्वः, नारायणस्योरुदेशादुत्पन्नोर्वशी, भृगुर्भर्जनात्, योयमार्चिर्षि जातः सोयमत्रिरित्यादिका पुराणादिप्रसिद्धा समाख्याऽऽदिपदेन माह्या ।

(२) शरीरविशेषा इति । मन्वादीनामित्यर्थः ।

जापतिः प्रजा अनेका असृजत् स तपोऽतप्यत प्रजाः सृजेयमिति स मुखतो ब्राह्मणमसृजत् बाहुभ्यां राजन्यमूरुभ्यां वैश्यम् पद्भ्यां शूद्रम्" इति। वेदोऽपि-"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादिः । तदेवं योनिजमयोनिजञ्च पार्थिवशरीरमुक्तम्। आप्यं तैजसं वायवीयञ्चायोनिजमेव शुक्रशोणितयोर्नियमेन पार्थिवत्वात्, पार्थिवेन च पाथसीयानारम्भात्।

इन्द्रियन्तु पार्थिवं घ्राणं सर्वप्राणभृत्साधारणं जलाद्यनभिभूतैः पार्थिवभागैरारब्धं घ्राणम् । घ्राणं पार्थिवं (१)रसाद्यव्यञ्जकत्वे सति गन्धव्यञ्जकत्वात् मृगमदगन्धव्यञ्जककुक्कुटोच्चारवत्। एवं रसनमाप्यं रूपाद्यव्यञ्जकत्वे सति रसस्यैव व्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकसलिलवत्। एवञ्चक्षुस्तैजसं रसाद्यव्यञ्जकत्वे सति रूपस्यैव व्यञ्जकत्वादालोकवत् । त्वगिन्द्रियं वायवीयं गन्धाद्यव्यञ्जकत्वे सति स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनवातवत् ।

विषयस्तु पार्थिवो मृत्पाषाणस्थावरलक्षणः । तत्र भूप्रदेशाः प्राकारेष्टकादयो मृद्विकाराः, अद्रिमणिहीरकगैरिकादयः पाषाणाः, स्थावरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतयः। आप्यास्तु विषयाः सरित्समुद्रहिमकरकादयः । तैजसस्तु विषयो भौमदिव्योदर्य्याकरजभेदाच्चतुर्विधः । भौमं काष्ठेन्धनप्रभवम् । दिव्यम् अबिन्धनं विद्युदादि । उदर्य्यम् अन्नादिरसार्जनक्षमं जाठरम्। आकरजञ्च हिरण्यादि। वायवीयस्तु विषयः उपलभ्यमानस्पर्शाश्रयो वायुः । वायोश्चतुर्थः कार्य्यः प्राणाख्यः शरीरे(२) रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदादपानादिसंज्ञां लभत इति ॥ ११ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे चतुर्थाध्यायस्य द्वितीयमाह्निकम्।

समाप्तश्चायं चतुर्थोऽध्यायः।

---

(१) रसाद्यव्यंजकत्वे सतीति । परकीयरसादीत्यर्थः तेन स्वरसव्यंजके दृष्टान्ते नासिद्धिः । नवशरावगंधव्यंजकजले व्यभिचारवारणाय सत्यन्तम् । तस्य सक्तुरसव्यंजकतया न दोषः । सांनिकर्षे तद्वारणाय द्रव्यत्वे सतीति । एवमन्यत्र ।

(२) प्राणोऽन्तः शरीर इति पाठान्तरम् ।

पञ्चमाध्याये प्रथमाह्निकम् ।

कर्मपरीक्षा पञ्चमाध्यायार्थः । प्रयत्ननिष्पाद्यकर्मपरीक्षा प्रथमाह्निकार्थः । तत्राप्युत्क्षेपणप्रकरणम्, अप्रयत्नसिद्धोत्क्षेपणप्रकरणम्, पुण्यहेतुकर्मप्रकरणम्, पुण्यपापोदासीनकर्मप्रकरणञ्च । चेष्टाविशेषमधिकृत्याह—

आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥ १ ॥

संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म . तस्य च कर्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम्, प्रयत्नश्च निमित्तकारणम् । इयमेव चेष्टा, प्रयत्नवदात्मसंयोगासमवायिकारणक्रियायाश्चेष्टात्वात्, (१)स्वासमवेतस्वातिरिक्तस्पर्शवदन्यप्रयत्नजन्यक्रियाया वा ॥ १ ॥

हस्तोत्क्षेपणमुक्त्वा तदधीनं मुसलोत्क्षेपणमाह—

तथा हस्तसंयोगाच्च मुसले कर्म ॥ २ ॥

चकारेण गुरुत्वं निमित्तकारणान्तरं समुच्चिनोति । तथेति । तादृशमुत्क्षेपणरूपमेवेत्यर्थः । यद्वा तथाहस्तसंयोगादुत्क्षेपणवद्धस्तसंयोगादित्यर्थः । अत्र च प्रयत्नवदात्मसंयुक्तेन हस्तेन मुसलस्य संयोगोऽसमवायिकारणम्, मुसलं समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे ॥ २ ॥

उदूखलाभिहतस्य मुसलस्याकस्माद् यदुत्पतनं जायते तत्र कारणमाह—

---

(१) चेष्टासामान्यमुक्त्वा तद्विशेषमाह स्वासमवेतेति । स्वं चेष्टाश्रयं तदसमवेतस्तदतिरिक्तश्च स्पर्शवान् तदन्यसम्बन्धी यः प्रयत्नस्तज्जन्यक्रियाया या चेष्टात्वादित्यर्थः । चेष्टा नाम शरीरतदवयवसमवेतः क्रियाविशेषः स च शरीरावच्छिन्नप्रयत्नादुपपद्यते कार्मुकाकर्षणच्छिन्नशरादिक्रियाया शरीरावच्छिन्नप्रयत्नजन्यत्वेऽपि न तत्र चेष्टात्वमिति तद्वारणाय स्पर्शवदन्येति । कस्यापि प्रयत्नस्य स्पर्शवदन्यत्वावच्छिन्नत्वाभावादसम्भववारणाय स्पर्शवति विशेषणद्वयं स्वासमवेतस्वातिरिक्तेति । प्रथमविशेषणानुक्तौ शरीरस्यावयवातिरिक्तस्पर्शवदन्यत्वाभावात्तत्प्रयत्नजन्यचेष्टायामव्याप्तिः, अन्त्यतदनुक्तौ च शरीरचेष्टायामव्याप्तिः शरीरासमवेतत्वे सति स्पर्शवत्त्वादिति तद्द्वयम् ।

अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥ ३ ॥

अत्र यद्यपि मुसलेन उत्पतता हस्तस्य संयोगोऽप्यस्ति तथाऽपि स संयोगोऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम् । कुत एवमित्यत आह व्यतिरेकादिति । प्रयत्नस्य व्यभिचारादित्यर्थः । यदि तदा प्रयत्नः स्यात् मुसलस्यैवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुसलस्य धारणमेव भवेत् चेष्टाधीनं मुसलस्य पुनरुत्पतनं वा भवेत् इति भावः ॥ ३ ॥

मुसलेन सहोत्पततो हस्तस्य कर्मणि कारणविशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्तुमाह—

तथात्मसंयोगो हस्तकर्मणि ॥ ४ ॥

मुसलेन सहोत्पततो हस्तस्य कर्मणि आत्मसंयोगः प्रयत्नवदात्मसंयोगस्तथा अकारणमित्यर्थः । अकारणमिति पूर्वसूत्रस्थं तथेत्यतिदिश्यते ॥ ४ ॥

कुतस्तर्हि हस्ते तदोत्पतनमत आह—

अभिघातान्मुसलसंयोगाद्धस्ते कर्म ॥ ५ ॥

यथा मुसले उत्पतति मुसलमुखस्थं लोहमुत्पतति तथा हस्तोऽपि तदोत्पतति । अत्राभिघातशब्देन अभिघातजनितः (१)संस्कार उच्यते उपचारात् । उत्पतनो मुसलस्य पटुतरेण कर्मणा अभिघातसहकृतेन स्वाश्रये मुसले संस्कारो जनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुसलसंयोगादसमवायिकारणाद्धस्तेऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणकम्, अवशो हि हस्तो मुसलेन सहोत्पततीति भावः ॥ ५ ॥

ननु शरीरे शरीरावयवे वा यत् कर्मोत्पद्यते तत्र प्रयत्नवदात्मसंयोगः कारणं प्रकृते कथं न तथेत्यत आह—

आत्मकर्म हस्तसंयोगाच्च ॥ ६ ॥

आत्मशब्दः शरीरावयवपरं उपचारात् । अन्वयानुपपत्तिरेवो-

(१) संस्कार इति । वेगाख्य इत्यर्थः ।

पचारबीजम् । तथाचात्मनः शरीरावयवस्यापि हस्तस्य यत् कर्म तत् हस्तमुसलसंयोगात् । चकाराच्च वेगसमुच्चयः । हस्तकर्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति । स च क्वचित् प्रयत्नवदात्महस्तसंयोगः, क्वचिद्वेगवन्मुसलादिहस्तसंयोगो (१)यथा वातुलस्य शरीरावयवकर्मेति भावः ॥ ६ ॥

प्रयत्नानधीनकर्मप्रकरणमारभते—

संयोगाभावे गुरुत्वात् पतनम् ॥ ७ ॥

संयोगपदेन प्रतिबन्धकमात्रमुपलक्षयति, तेन प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम्–अधःसंयोगफलिका क्रिया जायते । तत्र गुरुत्ववति फलादौ प्रतिबन्धकः संयोगः, विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः, काण्डादौ क्षिप्ते संस्कार एव पतनप्रतिबन्धकः । एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः । अभिध्यानादिना विषादेरन्तरिक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिरेव वा प्रतिबन्धकस्तेषामपि संयोगपदेन सङ्ग्रहः ॥ ७ ॥

ननु गुरुत्वाद् यदि पतनं तदा लोष्टादेरुत्क्षिप्तस्य क्वचिदूर्ध्वं क्वचिच्च तिर्य्यग्गमनं कथम्भवेदित्यत आह—

नोदनविशेषाभावान्नोर्द्ध्वं न तिर्य्यग्गमनम् ॥ ८ ॥

गुरुत्ववतोऽपि लोष्टकाण्डादेर्यदूर्ध्वं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतरान्नोदनात् ' तथाच फलपक्षिबाणादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यङ् वोर्द्ध्वं गमनमिति (२)भावः ॥ ८ ॥

ननु नोदनविशेष एव कुत उत्पद्यते तत्राह—

प्रयत्नविशेषान्नोदनविशेषः ॥ ९ ॥

नोदनविशेषादुदसनविशेषः ॥ १० ॥

तिर्य्यक् ऊर्द्ध्वं दूरम् आसन्ने वा क्षिपामीतीच्छाकारणकः प्रयत्न-

---

(१) द्विविधं हस्तसंयोगमभिधाय द्वितीयस्य दृष्टान्तमाह यथेति । तथाच वातुलहस्तकम्पे वायुतदवयवसंयोगः कारणमित्यर्थः । एवं च वेगवन्मुसलेत्युपलक्षणम् प्रयत्नवदात्मातिरिक्तवेगवद्द्रव्यसंयोगजन्योऽपि ग्राह्य इत्यर्थः ।

(२) भाव इति । तथाचोर्ध्वतिर्यग्गमने प्रति नोदनं कारणमिति सूत्रार्थः ।

विशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादे-रूर्ध्वं तिर्यक् च गमनमुपपद्यते । उदसनं-दूरोत्क्षेपणम् ॥ ९ ॥ १० ॥

उदूखलाभिघातात् मुसलेन सह हस्ते यत् कर्म उत्पन्नं तत्तावत् प्रयत्नपूर्वकं न भवति, नापि पुण्यपापहेतुरतस्तत्तुल्यतां बालकस्य क्रीड़ाकरचरणादिचालनं यत्तत्रातिदिशति—

हस्तकर्मणा दारककर्म व्याख्यातम् ॥ ११ ॥

बालकस्य यद्यपि करचरणादिचालनं प्रयत्नपूर्वकमेव तथापि हिताहितप्राप्तिफलकं न भवति न वा पुण्यपापहेतुरित्यतिदेशार्थः॥११॥

इदानीं प्रयत्नपूर्वकेऽपि कर्मणि यत्र न पुण्यपापहेतुत्वं तत्र दारककर्मतुल्यतामतिदिशन्नाह—

तथा दग्धस्य विस्फोटने ॥ १२ ॥

आततायिना केनाऽप्यगारे दाह्यमाने तत्र दग्धस्य पुरुषस्य विस्फोटे वह्निकृते जाते सति तस्याततायिनो वधानुकूलेन प्रयत्नेन हस्तादौ यत् कर्म जनितं तन्न पुण्यहेतुर्न वा पापहेतुः । (१)यथाहुः—

नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहा ।
क्षेत्रदारापहारी च षडेते आततायिनः ॥ १२ ॥

इदानीं यत्नं विना यानि कर्माणि भवन्ति तान्याह—

यत्नाभावे प्रसुप्तस्य चलनम् ॥ १३ ॥

प्रसुप्तस्येति चैतन्याभावदशामुपलक्षयति । तेन मूर्च्छितस्य जीवतोऽचैतन्येऽपि वायुकृतं चलनं द्रष्टव्यमत्र ॥ १३ ॥

शरीरकर्माणि व्याख्याय तदितराण्याह—

तृणे कर्म वायुसंयोगात् ॥ १४ ॥

तृणपदेन वृक्षगुल्मलतावतानादिकं सर्वमुपलक्षयति ॥ १४ ॥

अदृष्टाधीनं कर्म परिगणयन्नाह—

मणिगमनं सूच्यभिसर्पणमदृष्टकारणकम् ॥ १५ ॥

मणिपदेन कांस्यादिकमुपलक्षयति । तेनाभिमन्त्रितं मणिकांस्या-

---

(१) आहुरिति । मनुस्मृतिकारा इत्यर्थः ।

दि तस्कराभिमुखं यद् गच्छति तत्र गमने मण्यादि समवायिकारणम्, अदृष्टवत्तस्करात्ममणिसंयोगोऽसमवायिकारणम्, तस्करस्य पापं निमित्तकारणम्। सूच्यभिसर्पणमिति। सूचीपदेन लोहमात्रं तृणञ्चोपलक्षयति। तथाचायस्कान्ताभिमुखं यत् सूच्यादेर्गमनं तृणकान्ताभिमुखं यत् तृणस्य गमनं तत्र सूच्यादि समवायिकारणम्, यस्य हितमहितं वा तेन तृणसूच्यादिगमनेन तददृष्टवदात्मसंयोगोऽसमवायिकारणम्, तददृष्टमेव निमित्तकारणम्। एवमन्यदप्यूह्यम्। तद् यथा वह्नेरूर्द्ध्वज्वलनं वायोस्तिर्यग्गमनं सर्गादौ परमाणुकर्मादि ॥ १५ ॥

ननु शरविहङ्गमालातचक्रादीनामुपरमपर्य्यन्तमेकमेव कर्म नाना वेति संशये निर्णयहेतुमाह—

इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे (१)हेतुः ॥ १६॥

इषाविति षष्ठ्यर्थे सप्तमी। इदमत्राकूतम्—वेगेन गच्छतां शरादीनां कुड्यादिसंयोगानन्तरं शरादौ सत्येव गत्युपरमो दृश्यते। अत्राश्रयनाशस्तावन्न तन्नाशकः आश्रयस्य विद्यमानत्वात्। विरोधिगुणान्तरञ्च नोपलभ्यते, तेन स्वजन्यः संयोग एव कर्मनाशक इत्युन्नीयते। स च संयोगश्चतुर्थक्षणे जातः पञ्चमक्षणे कर्म नाशयति। तथाहि—कर्मोत्पत्तिरथ विभागः अथ पूर्वसंयोगनाशः उत्तरसंयोगः कर्मनाशः। तेनायुगपत्संयोगविशेषाः कर्मनानात्वज्ञापका इत्यर्थः। संयोगविशेषा इति। संयोगे विशेषः स्वजन्यत्वमेव अन्यथा संयोगमात्रस्य कर्मनाशकत्वे कर्म क्वचिदपि न तिष्ठेत् ॥ १६ ॥

नोदननिष्पाद्यकर्मप्रकरणानन्तरं संस्कारनिष्पाद्यकर्मप्रकरणमारभते—

नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च ॥ १७ ॥

पुरुषप्रयत्नेनाकृष्टया पतञ्जिकया(२) नुन्नस्येषोराद्यं कर्म जायते,

---

(१) हेतुरिति। एकवचनमार्षम् हेतव इति विवक्षणीयम्। तथाच कर्मणः स्वजन्यस्वचतुर्थक्षणोत्पन्नोत्तरसंयोगनाश्यत्वनियमात्पञ्चमादिक्षणावस्थानासम्भवाच्छरस्याद्यगमनमारभ्य पतनपर्यन्तमेकस्य कर्मणः स्थित्यसम्भवेन भिन्नभिन्नानि स्वस्वजन्योत्तरसंयोगनाश्यानि कर्माणि जायन्ते इत्यवश्यमङ्गीकार्यमिति सूत्रतात्पर्यम्।

(२) पतंजिकेति। इषुक्षेपणयन्त्रविशेषः।

तत्र नोदनमसमवायिकारणम्, इषुः समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे। तेन चाद्येन कर्मणा समानाधिकरणो वेगाख्यः संस्कारो जन्यते। स च वेगेन गच्छतीति प्रत्यक्षसिद्ध एव। तेन संस्कारेण तत्रेषौ कर्म जायते तत्रासमवायिकारणं संस्कारः, समवायिकारणमिषुः, निमित्तकारणन्तु तीव्रो नोदनविशेषः। एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेण उत्तरोत्तरः कर्मसन्तानो जायते स्वजन्योत्तरसंयोगेन कर्मणि नष्टे संस्कारेण कर्मान्तरजनजादेक एव संस्कारः कर्मसन्तानजनकः न तु कर्मसन्तानवत् संस्कारसन्तानोऽप्यभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह-तथोत्तरमुत्तरञ्चेति, तत्कर्मकारिताच्च संस्कारादित्येकवचनञ्च। (१)न्यायनये तु कर्मसन्तानवत् संस्कारसन्तानस्वीकारे(२) गौरवम्। यत्तु युगपत् प्रक्षिप्तशरयोरेकस्य तीव्रो वेगोऽपरस्य तु मन्दः, तत्र नोदनतीव्रत्वमन्दत्वे निमित्तम्॥ १७॥

ननु संस्कार एक एव चेत् कर्मसन्तानजनकस्तदा कदाचिदपि शरपातो न स्यात् कर्मजनकस्य संस्कारस्य सत्त्वादित्यत आह—

संस्काराभावे गुरुत्वात् पतनम्॥ १८॥

गुरुत्वन्तावत् पतनकारणमनुवर्त्तमानमेव। तच्च गुरुत्वं संस्कारेण प्रतिरुद्धं पतनं नाजीजनत्। अथ प्रतिबन्धकाभावे तदेव गुरुत्वं पतनं करोतीत्यर्थः॥ १८॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे पञ्चमाध्यायस्य प्रथममाह्निकम्।

---

(१) न्यायनयेत्विति। एकस्यैव संस्कारस्य नानाकर्मजनकत्वे एकैककर्मणः कर्मान्तरप्रतिबन्धकत्वं वाच्यमन्यथा पूर्वोत्तरवर्त्तिसकलकर्मणां युगपदुत्पत्तिः स्यादिति तत्तद्व्यक्तित्वेन प्रतिबन्ध्यप्रतिबन्धकभावापेक्षया तत्तत्संस्कारव्यक्तित्वेन विशेषकार्यकारणभावाभ्युपगम एव ज्यायानिति नैयायिकाः।

(२) संस्कारसन्तानोऽभ्युपगम्यते तत्र नानासंस्कारस्वीकारे इति पाठान्तरम्।

पञ्चमाध्याये द्वितीयाह्निकम् ।

नोदनादिनिष्पाद्यकर्मपरीक्षाप्रकरणम् । तत्राह—

नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १ ॥

नोदनं संयोगविशेषः—येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतुर्न भवति, यः संयोगः (१)शब्दनिमित्तकारणं न भवति वा । यः संयोगः शब्दनिमित्तकारणं भवति यज्जनितं कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः । ताभ्यामपि प्रत्येकं कर्म जन्यते । पङ्काख्यायां पृथिव्याञ्चरणेन नोदनात् चरणाभिघाताच्च कर्म जायते तत्र पङ्कः समवायिकारणम्, नोदनाभिघातौ यथायथमसमवायिकारणम्, गुरुत्ववेगप्रयत्ना यथासम्भवं निमित्तकारणम् । संयुक्तसंयोगादिति । नोदनादभिघाताद्वा पङ्के (२)कर्म तत्पङ्कस्थिते घटादावपि तत्समकालमेव कर्मदर्शनात् ॥ १ ॥

ननु भूकम्पादौ नोदनाभिघातावन्तरेण जायमाने किमसमवायिकारणमत आह—

तद्विशेषेणादृष्टकारितम् ॥ २ ॥

तदिति पृथिवीकर्म परामृशति । पृथिव्यामेव कर्म यदि विशेषेण आशयेन(३) भवति तदाऽदृष्टकारितम्, तेन भूकम्पेन यस्य दुःखं सुखं वा भवति अदृष्टवत्तदात्मसंयोगस्तत्रासमवायिकारणम्, भूः समवायिकारणम्, अदृष्टं निमित्तकारणम् ।

---

(१) ननु विभागहेतुर्न भवतीत्यनुपपन्नं पूर्वं नोदनविशेषादुदसनमित्युक्तेर्नोदनविशेषस्य विभागहेतुत्वात् अत आह शब्दनिमित्तेति । तथाचोदसनहेतोरपि शब्दनिमित्तकारणत्वाभावोऽस्त्येव संयोगविशेषरूपनोदनस्येति भावः ।

(२) पंके कर्मेति । यत्कर्म तत्पादसंयुक्तपङ्कतत्संयोगादसमवायिकारणात् भवतीत्यर्थः । इदमुपलक्षणम् संयुक्तसंयुक्तसंयोगादेवं संयोगान्तरप्रक्षेपादित्यपि द्रष्टव्यम् । इदमेवाभिप्रेत्याह पंकस्थिते घटादावपीत्यनेन । पङ्ककर्मसमकालं पङ्कस्थितघटतदुपरिस्थितशरावतन्निष्ठबिल्वफलादावपि कर्मदर्शनादित्यर्थः ।

(३) आशयेनेति । आशयोऽत्र भोगः । एवं च यत्पृथिव्यां भूकम्पादिकर्म यत्पुरुषस्य सुखाय दुःखाय वा भवति तददृष्टकारितमित्यर्थः । अतिशयेनेति पाठान्तरम् तच विशेषपदार्थपरम् बोध्यम् ।

तत्र नोदनमसमवायिकारणम्, इषुः समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे। तेन चाद्येन कर्मणा समानाधिकरणो वेगाख्यः संस्कारो जन्यते। स च वेगेन गच्छतीति प्रत्यक्षसिद्ध एव। तेन संस्कारेण तत्रेषौ कर्म जायते तत्रासमवायिकारणं संस्कारः, समवायिकारणमिषुः, निमित्तकारणन्तु तीव्रो नोदनविशेषः। एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेण उत्तरोत्तरः कर्मसन्तानो जायते स्वजन्योत्तरसंयोगेन कर्मणि नष्टे संस्कारेण कर्मान्तरजननादेक एव संस्कारः कर्मसन्तानजनकः न तु कर्मसन्तानवत् संस्कारसन्तानोऽप्यभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह—तथोत्तरमुत्तरञ्चेति, तत्कर्मकारिताच्च संस्कारादित्येकवचनञ्च। (१)न्यायनये तु कर्मसन्तानवत् संस्कारसन्तानस्वीकारे(२) गौरवम्। यत्तु युगपत् प्रक्षिप्तशरयोरेकस्य तीव्रो वेगोऽपरस्य तु मन्दः, तत्र नोदनतीव्रत्वमन्दत्वे निमित्तम्॥ १७॥

ननु संस्कार एक एव चेत् कर्मसन्तानजनकस्तदा कदाचिदपि शरपातो न स्यात् कर्मजनकस्य संस्कारस्य सत्त्वादित्यत आह—

संस्काराभावे गुरुत्वात् पतनम्॥ १८॥

गुरुत्वन्तावत् पतनकारणमनुवर्त्तमानमेव। तच्च गुरुत्वं संस्कारेण प्रतिरुद्धं पतनं नाजीजनत्। अथ प्रतिबन्धकाभावे तदेव गुरुत्वं पतनं करोतीत्यर्थः॥ १८॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे पञ्चमाध्यायस्य प्रथममाह्निकम्।

---

(१) न्यायनयेत्विति। एकस्यैव संस्कारस्य नानाकर्मजनकत्वे एकैककर्मणः कर्मान्तरप्रतिबन्धकत्वं वाच्यमन्यथा पूर्वोत्तरवर्तिसकलकर्मणां युगपदुत्पत्तिः स्यादिति तत्तद्व्यक्तित्वेन प्रतिबन्ध्यप्रतिबन्धकभावापेक्षया· तत्तत्संस्कारव्यक्तित्वेन विशेषकार्यकारणभावाभ्युपगम एव ज्यायानिति नैयायिकाः।

(२) संस्कारसन्तानोऽभ्युपगम्यते तत्र नानासंस्कारस्वीकारे इति पाठान्तरम्।

पञ्चमाध्याये द्वितीयाह्निकम् ।

नोदनादिनिष्पाद्यकर्मपरीक्षाप्रकरणम् । तत्राह—

नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १ ॥

नोदनं संयोगविशेषः—येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतुर्न भवति, यः संयोगः (१)शब्दनिमित्तकारणं न भवति वा । यः संयोगः शब्दनिमित्तकारणं भवति यज्जनितं कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः । ताभ्यामपि प्रत्येकं कर्म जन्यते । पङ्काख्यायां पृथिव्याञ्चरणेन नोदनात् चरणाभिघाताच्च कर्म जायते तत्र पङ्कः समवायिकारणम्, नोदनाभिघातौ यथायथमसमवायिकारणम्, गुरुत्ववेगप्रयत्ना यथासम्भवं निमित्तकारणम् । संयुक्तसंयोगादिति । नोदनादभिघाताद्वा पङ्के (२)कर्म तत्पङ्कस्थिते घटादावपि तत्समकालमेव कर्मदर्शनात् ॥ १ ॥

ननु भूकम्पादौ नोदनाभिघातावन्तरेण जायमाने किमसमवायिकारणमत आह—

तद्विशेषेणादृष्टकारितम् ॥ २ ॥

तदिति पृथिवीकर्म परामृशति । पृथिव्यामेव कर्म यदि विशेषेण आशयेन(३) भवति तदाऽदृष्टकारितम्, तेन भूकम्पेन यस्य दुःखं सुखं वा भवति अदृष्टवत्तदात्मसंयोगस्तत्रासमवायिकारणम्, भूः समवायिकारणम्, अदृष्टं निमित्तकारणम् ।

---

(१) ननु विभागहेतुर्न भवतीत्यनुपपन्नं पूर्वं नोदनविशेषादुदसनमित्युक्तेर्नोदनविशेषस्य विभागहेतुत्वात् अत आह शब्दनिमित्तेति । तथा चोदसनहेतोरपि शब्दनिमित्तकारणत्वाभावोऽस्त्येव संयोगविशेषरूपनोदनस्येति भावः ।

(२) पंके कर्मेति । यत्कर्म तत्पादसंयुक्तपङ्कसंयोगादसमवायिकारणात् भवतीत्यर्थः । इदमुपलक्षणम् संयुक्तसंयुक्तसंयोगादेः [illegible] । इदमेवाभिप्रेत्याह पंकस्थिते घटादावपीत्यनेन । [illegible] कर्मदर्शनादित्यर्थः ।

(३) आशयेनेति । [illegible] सुखाय दुःखाय वा भवति [illegible] बोध्यम् ।

यद्वा तदा नोदनाभिघातौ परामृशति । विशेषो व्यतिरेकः। तथाच नोदनाभिघातव्यतिरेकेण यत् पृथिव्यां कर्म तददृष्टकारितमित्यर्थः ॥ २ ॥

इदानीं द्रवद्रव्यसमवेतकर्मपरीक्षाप्रकरणम् । तत्राह—

अपां संयोगाभावे गुरुत्वात् पतनम् ॥ ३ ॥

अपां यत् पतनं वर्षणरूपं तद्गुरुत्वासमवायिकारणकम् । तत् संयोगस्य मेघसंयोगस्याभावे सति भवति, तेन संयोगाभावस्तन्निमित्तकारणमित्यर्थः ॥ ३ ॥

तेषामेव वृष्टिबिन्दूनामन्योन्यसंयोगजनकं कर्म कथमत आह—

द्रवत्वात् स्यन्दनम् ॥ ४ ॥

क्षितौ पतितानामपां बिन्दूनां परस्परं संयोगेन महज्जलावयवि स्रोतोरूपं यज्जायते तस्य यत् स्यन्दनं दूरसंसरणं तत् द्रवत्वादसमवायिकारणादुत्पद्यते गुरुत्वान्निमित्तकारणादप्सु समवायिकारणेषु ॥ ४ ॥

ननु यदि भूमिष्ठानामपाम् ऊर्द्ध्वं गमनं भवति तदा गुरुत्वात् पतनवर्षणं सम्भाव्यते, तदेव तु कुत इत्यत आह—

नाड्यो वायुसंयोगादारोहणम् ॥ ५ ॥

कारयन्तीति शेषः यदपामूर्द्ध्वमारोहणं तत् नाड्यः सूर्य्यरश्मय एव आरोहयन्त्यप इत्यर्थः । क्वचित् पाठो नाड्यवायुसंयोगादिति। स च नाड्यो नाड़ीसम्बन्धी यो वायुसंयोग इत्युपपादनीयः ॥ ५ ॥

ननु सूर्य्यरश्मीनां कथमयं महिमा यत् भूमिष्ठा अप ऊर्द्ध्वं नयन्तीत्यत आह—

नोदनापीडनात् संयुक्तसंयोगाच्च ॥ ६ ॥

नोदनेन बलवद्वायुनोदनेन आपीडनादास्कन्दनात् वायुसंयुक्ता रश्मयस्तत्संयुक्ता आप ऊर्द्ध्वं धावन्ति यथा स्थालीस्था अपः क्वथ्यमानाः वायुनुन्नवह्निरश्मय ऊर्द्ध्वं नयन्ति । चकार इवार्थस्तत्र च उपमानं स्थालीस्था एवापो द्रष्टव्याः ॥ ६ ॥

ननु मूले सिक्तानामपां वृक्षाभ्यन्तरेणोर्द्ध्वगमनम् अभितः, तत्र न नोदनाभिघातौ नवाऽऽदित्यरश्मयः प्रभवन्ति, तत् कथं तदित्यत्राह–

वृक्षाभिसर्पणमित्यदृष्टकारितम् ॥ ७ ॥

अभितः सर्पणमभिसर्पणं तदभिसर्पणं मूले निषिक्तानामपां वृक्षे तददृष्टकारितं पत्रकाण्डफलपुष्पादिवृद्धिकृतं सुखं दुःखं वा येषामात्मनाम् अदृष्टवत्तदात्मसंयोगादसमवायिकारणात् अदृष्टान्निमित्तादप्सु समवायिकारणेषु तत् कर्म भवति येन कर्मणा आप ऊर्द्ध्वं गत्वा वृक्षं वर्द्धयन्तीत्यर्थः ॥ ७ ॥

नन्वपां सांसिद्धिकद्रवत्वं लक्षणमुक्तं तादृशानामेवापामूर्द्ध्वमधस्तिर्य्यक् च गमनमुपपादितं हिमकरकादीनाञ्च शैत्यादप्त्वमविवादसिद्धम्, तत् कथं तेषां संघातः काठिन्यम्, कथञ्च विलयनमित्यत आह--

अपां संघातो विलयनञ्च (१)तेजःसंयोगात् ॥ ८ ॥

दिव्येन तेजसा प्रतिबन्धादाप्याः परमाणवो द्व्यणुकमारभमाणा द्व्यणुकेषु द्रवत्वं नारभन्ते ततो द्रवत्वशून्यैरवयवैर्द्व्यणुकादिप्रक्रमेण द्रवत्वशून्या हिमकरकादय आरभ्यन्ते तेन तेषां काठिन्यमुपलभ्यते। नन्वेवं हिमकरकादीनामाप्यत्वे किं प्रमाणमत उक्तं–विलयनञ्च तेजःसंयोगादिति। तेजःसंयोगेन बलवता हिमकरकारम्भकपरमाणूनां क्रिया क्रियातो विभागस्तत आरम्भकसंयोगनाशपरम्परया हिमकरकादिमहावयविनाशस्तत्र द्रवत्वप्रतिबन्धकतेजःसंयोगविगमात् त एव परमाणवः द्व्यणुकेषु द्रवत्वमारभन्ते। ततो द्रवत्ववता हिमकरकादीनां विलयनं तत्र च बलवत्तेजोऽनुप्रवेशो निमित्तम् ॥८॥

ननु बलवद्दिव्यतेजोऽनुप्रवेशस्तत्र इत्यत्र किं प्रमाणमित्यत आह–

तत्र विस्फूर्जथुर्लिङ्गम् ॥ ९ ॥

तत्र दिव्यासु अप्सु दिव्यानां तेजसामनुप्रवेशे विस्फूर्जथुर्लिङ्गं वज्रनिर्घोष एव लिङ्गमित्यर्थः। आत्यन्तिकविद्युत्प्रकाशस्तावत्प्रत्यक्ष एव तदनुपदञ्च स्फूर्जथुः सोऽपि प्रत्यक्ष एव, तेनानुमीयते यस्मान्मेघात् करकाः प्रादुर्भवन्ति तत्र दिव्यन्तेजो विद्युद्रूपमनुप्र-

(१) तेजस्संयोगेति। दिव्यन्तेजोऽत्र तडित्। तत्संयोगात् तद्योगतारतम्यादपां मेघस्थादिजलानां संघातो द्रवत्वं चेत्यर्थः।

विष्टं तदुपष्टम्भेन करकारम्भिकाणामपां द्रवत्वप्रतिबन्ध इति ॥ ९ ॥

अत्रैव प्रमाणान्तरमाह—

वैदिकञ्च ॥ १० ॥

अपां मध्ये तेजोऽनुप्रवेश आगमसिद्ध एवेत्यर्थः । तथाहि-"आपस्ता अग्निं गर्भमादधीरन्, या अग्निं गर्भं दधिरे सुवर्णम्" इत्यादि ॥ १० ॥

ननु विस्फूर्जथुः कथमुत्पद्यते संयोगविभागौ शब्दयोनी तौ च नानुभूयेते इत्यत आह—

अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥ ११ ॥

विस्फूर्जथुरिति शेषः । अद्भिः स्तनयित्नोः (१)संयोगविभागौ निमित्तकारणीभूय स्तनयित्नोरेवाकाशेन संयोगादसमवायिकारणादाकाशे समवायिकारणे शब्दं गर्जितं जनयतः । क्वचिच्च वायुबलाहकसंयोगविभागौ निमित्तकारणे बलाहकवियत्संयोगविभागावसमवायिकारणे । कर्मकारणाधिकारेऽपि प्रासङ्गिकमिदमुक्तम् ।

यद्वा मेघाकाशसंयोगे विभागे वा शब्दासमवायिकारणे कारणम् अपामेव नोदनाभिघातजनितं कर्मेति सूचितं, कर्मण एवाधिकारप्राप्तत्वात् ॥ ११ ॥

पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् ॥ १२ ॥

भूकम्पं प्रत्यदृष्टवदात्मसंयोगः कारणमुक्तम्, तत्रैवाकस्मिकदिग्दाहहेतोस्तेजसः आकस्मिकवृक्षादिक्षोभहेतोश्च प्रभञ्जनस्य कर्म यत् संजायते तत्राप्यदृष्टवदात्मसंयोगोऽसमवायिकरणम्, वायुतेजसी समवायिकारणम्, अदृष्टं निमित्तकारणमित्यर्थः । कर्मशब्दस्य द्व्यावृत्तिर्महोल्कादिकर्मसूचनार्था ॥ १२ ॥

अदृष्टवदात्मसंयोगासमवायिकारणकं कर्मान्तरमाह—

अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्यक्पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ॥ १३ ॥

आद्यमिति । सर्गाद्यकालीनमित्यर्थः । तदा नोदनाभिघातादी-

---

(१) संयोगविभागाविति । वायुकृताविति शेषः । तथाच मेघगर्भजलानां वाय्वावर्त्तितानामन्योन्याभिघाताद्वाय्वभिघाताद्वा विस्फूर्जथुर्भवतीति भावः ।

नामभावात् अदृष्टवदात्मसंयोग एव तत्रासमवायिकारणम् । आद्य-मूर्द्ध्वज्वलनम् आद्यं तिर्य्यक्पवनमिति । इतरेषां ज्वलनपवनकर्मणां वेगासमवायिकारणकत्वमेव मन्तुमुचितं दृष्टे कारणे सत्यदृष्टकल्पनानवकाशात् ॥ १३ ॥

अनाद्यं (मनः) कर्माधिकृत्याह—

हस्तकर्मणा मनसः कर्म व्याख्यातम् ॥ १४ ॥

मुसलोत्क्षेपणादौ यथा प्रयत्नवदात्मसंयोगासमवायिकारणकं हस्तकर्म तथाऽभिमतविषयग्राहिणीन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रयत्नवदात्मसंयोगासमवायिकारणकमेव । यद्यपीन्द्रियं मनो न साक्षात्प्रयत्नविषयस्तथापि मनोवहनाडीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या । नाड्यास्तु त्वगिन्द्रियग्राह्यत्वमङ्गीकर्त्तव्यम्, अन्यथा प्राणवहनाडीचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न (१)सम्भवेत् ॥ १४ ॥

ननु मनसि कर्म उत्पद्यत इत्यत्रैव न प्रमाणमत आह—

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे ॥ १५ ॥

सुखदुःखे इत्युपलक्षणं ज्ञानप्रयत्नाद्यपि द्रष्टव्यम् । मनसो वैभवं पूर्वमेव निराकृतम्, अणुत्वञ्च साधितम्, युगपज्ज्ञानानुत्पत्तिश्च मनसो लिङ्गमित्युक्तम्, तेन तत्तदिन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म न भवेत्, न भवेच्च पादे मे सुखं शिरसि मे वेदनेत्याद्याकारोऽनुभव इत्यर्थः । यद्यपि मनःसन्निकर्षाधीनः सर्वोऽप्यात्मविशेषगुणस्तथापि सुखदुःखे तीव्रसंवेगितयाऽतिस्फुटत्वादुक्ते ॥ १५ ॥

नन्वेवं यदि चपलं मनस्तदा चित्तनिरोधाभावाद्योगं विनानात्मसाक्षात्कारो, न वा तमन्तरेण मोक्ष इति शास्त्रारम्भवैफल्यमत आह—

तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः स योगः ॥ १६ ॥

विषयेष्वलम्प्रत्ययवत उदासीनस्य बहिरिन्द्रियेभ्यो व्यावृत्तं मनो

---

(१) न सम्भवेदिति । अशनादिरूपं प्राणवहनाडीकर्म न स्यात्तत्र प्रवृत्तेः प्राणवहनाडीत्वाद्यप्रत्यक्षहेतुकत्वादित्यर्थः ।

यदात्मस्थमात्ममात्रनिष्ठं भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् कर्म मनसि नोत्पद्यते स्थिरतरं मनो भवति स एव योगः। चित्तनिरोधलक्षणत्वाद् योगस्य। तदनारम्भ इति। मनसः कर्मानारम्भ इत्यर्थः।

(१)यद्वा तत्पदेन सुखदुःखे एवाभिधीयेते प्रक्रान्तत्वात्। दुःखाभाव इति। दुःखाभावसाधनत्वाद्योग एव दुःखाभावः "अन्नं वै प्राणा" इतिवत्।

(२)यद्वा दुःखस्याभावो यत्रेति बहुव्रीहिः, शरीरस्येति शरीरावच्छिन्नस्यात्मनः, स योग इति प्रसिद्धिसिद्धतया तत्पदम्, अयं स योगः।

(३)यद्वात्मपदेनात्र प्राण उच्यते उपचारात् प्राणानुमेयत्वादात्मनः। तथाच प्राणवहनाड्यां कर्मणा प्राणकर्मापि जायते।

(४)यद्वा जीवनयोनियत्नवदात्मप्राणसंयोगासमवायिकारणकं प्राणकर्म। जीवनयोनिश्च यत्नोऽतीन्द्रियः प्राणसञ्चारानुमेयः, कथमन्यथा सुषुप्त्यवस्थायामपि श्वासप्रश्वासगतागतमिति भावः॥१६॥

ननु प्राणस्य मनसश्च कर्म यदि प्रयत्ननिमित्तकं तदा प्राणमनसी यदा मरणावस्थायामपसर्पतः—देहाद्बहिर्भवतः, देहान्तरोत्पत्तौ तत्र पुनरुपसर्पतः—प्रविशतः, तत्र प्रयत्नाभावात्तदुभयमनुपपन्नम्, अशितपीतं भक्तपानीयादि तस्यापि शरीरावयवोपचयहेतुर्यः संयोगस्तज्जनकं यत् कर्म यच्च गर्भवासदशायां संयोगविभागजनकं कर्म तेषां कथमुत्पत्तिरत आह—

अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥ १७ ॥

अत्र 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति' नपुंसकनिर्दे-

---

(१) सम्प्रज्ञातसाधारणं योगं दर्शयन्नाह यद्वेति। तथाच मनस आत्मस्थत्वेऽपि निदिध्यासनपरम्परोपयोगिमनःकर्मसम्भवेऽपि न योगत्वहानिरिति भावः।

(२) ननु दुःखाभावपदस्य तत्साधनपरत्वे लक्षणापत्तिरित्याशंक्याह यद्वा दुःखस्येति।

(३) अर्थान्तरमाह सूत्रस्य यद्वात्मपदेनेति। तदनारम्भे प्राणकर्मानारम्भे मनसि आत्मस्थे प्राणस्थे सतीत्यर्थः इदमेवाह तथाचेति।

(४) मनःपदस्यात्मपरत्वाभिप्रायेणाह यद्वा जीवनेति। मनसि—आत्मनि, आत्मस्थे-प्राणस्थे सति, सः-सुषुप्त्यादावनुभूयमान, अनारम्भः—प्राणकर्म भवतीति सूत्राक्षरार्थः। कल्पद्वयेपि शरीरावच्छिन्नस्य प्राणस्यात्मनो वा दुःखाभावहेतुर्यः स योग इति अन्त्यदलार्थः।

शः। (१)संयोगपदञ्च तत्कारणे कर्मणि लाक्षणिकम्। अपसर्पणं देहारम्भककर्मक्षये देहादेव प्राणमनसोरुत्क्रमणम्, उपसर्पणञ्च देहान्तरोत्पत्तौ तत्र प्राणमनसोः प्रवेशनम्, अशितपीतादिसंयोगहेतुश्च कर्म, कार्य्यान्तरं गर्भशरीरं तत्संयोगहेतुश्च यत् कर्म तत् सर्वमदृष्टवदात्मसंयोगासमवायिकारणकम्। इतिकारेण धातुमलकर्मणामप्यदृष्टवदात्मसंयोगासमवायिकारणकत्वं सूचयति॥ १७॥

ननु देहान्तरोत्पत्तेरावश्यकत्वञ्चेत्तदा कथं मोक्ष इत्यत आह—

तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः॥ १८॥

इदमत्राकूतं-योगबलेनात्मतत्त्वसाक्षात्कारे सति तेन च सवासनमिथ्याज्ञाने ध्वस्ते तन्निबन्धनानां रागद्वेषमोहानां दोषाणामपायात् प्रवृत्तेरपाये तन्निबन्धनस्य जन्मनोऽपाये तन्निबन्धनस्य दुःखस्यापाय इति तावद्वस्तुगतिः। तत्र योगिनो योगजधर्मबलेन तत्तद्देशकालतत्तुरगमतङ्गजभुजङ्गविहङ्गमादिदेहोपभोग्यसुखदुःखासाधारणकारणधर्माधर्मनिकुरम्बमालोच्य तत्तत्कायव्यूहं निर्वाह्य भोगेन पूर्वोत्पन्नधर्माधर्मयोः क्षयः, निवृत्तदोषस्य धर्माधर्मान्तरानुत्पत्तावपूर्वशरीरान्तरानुत्पत्तौ पूर्वशरीरेण सहात्मनो यः संयोगाभावः स एव मोक्षः तदभाव इति। अनागतशरीरानुत्पादे संयोगाभाव इत्यर्थः। नन्वियमवस्था प्रलयसाधारणीत्यत आह-अप्रादुर्भाव इति। यदनन्तरं शरीरादेः पुनः प्रादुर्भावो न भवतीत्यर्थः। स मोक्ष इति। तस्यामवस्थायां यो दुःखध्वंसः स मोक्ष इत्यर्थः॥ १८॥

ननु तमसोऽपि द्रव्यस्य कर्म दृश्यते चलति छायेतिप्रत्ययात्, तत्र न प्रयत्नो न वा नोदनाभिघातौ न वा गुरुत्वद्रवत्वे न वा संस्कारस्तथा च निमित्तान्तरं वक्तव्यं तच्च नानुभूयमानमित्यत आह—

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावस्तमः॥ १९॥

एतेन नवैव द्रव्याणीत्यवधारणमप्युपपादितम। द्रव्यनिष्पत्तिस्तावत् स्पर्शवद्द्रव्याधीना। न च तमसि स्पर्शोऽनुभूयते। न चानुद्भूत एव स्पर्शः, रूपोद्भवे स्पर्शोद्भवस्यावश्यकत्वात्। पृथिव्यामयं

(१) सूत्रेऽदृष्टकारितानीत्युक्त्या संयोगादीनामदृष्टहेतुकत्वम् तन्मूलकर्मणाञ्चादृष्टवदात्मसंयोगहेतुकत्वमित्याशयेनाह संयोगपदं चेति।

नियमः तमस्तु दशमं द्रव्यमिति चेन्न द्रव्यान्तरस्य नीलरूपानधिकरणत्वात् नीलरूपस्य च गुरुत्वनान्तरीयकत्वात्, रसगन्धनान्तरीयकत्वाच्च । यथाऽऽकाशं शब्दमात्रविशेषगुणं तथा तमोऽपि नीलरूपमात्रविशेषगुणं स्यादिति चेन्न चाक्षुषत्वविरोधात्। यदि हि नीलरूपवन्नील रूपमेव वा तमः स्यात् वाह्यालोकप्रग्रहमन्तरेण चक्षुषा न गृह्येत ॥ १९ ॥

तर्हि गतिप्रतीतिः किन्निबन्धनेत्यत आह—

तेजसो द्रव्यान्तरेणावरणाच्च ॥ २० ॥

गच्छता द्रव्यान्तरेणावृते तेजसि पूर्वदेशानुपलम्भादग्रिमदेशे चोपलम्भात्तेजोऽभावस्य गच्छद्द्रव्यसाधर्म्याद् गतिभ्रमो न तु वास्तवी तत्र गतिरित्यर्थः, अन्वयव्यतिरेकाभ्यां तथा प्रतीतेः । उद्भूतरूपवद्यावत्तेजःसंसर्गाभावस्तमः ॥ २० ॥

एवं द्विसूत्रकं प्रासङ्गिकं तमःप्रकरणं समाप्य कर्मशून्यताप्रकरणमाह—

दिक्कालावाकाशञ्च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥२१॥

चकारादात्मसङ्ग्रहः । क्रियावता वैधर्म्यं दिगादीनाममूर्तत्वं मूर्त्त्यनुविधानात् क्रियायाः ॥ २१ ॥

गुणकर्मणोर्निष्क्रियत्वमाह—

एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २२ ॥

एतेनेति । क्रियावद्वैधर्म्येणेत्यर्थः । क्रियावद्वैधर्म्यममूर्तत्वं गुणकर्मणोरपीति ते अपि निष्क्रियत्वेन व्याख्याते इत्यर्थः ॥ २२ ॥

ननु गुणकर्मणी यदि निष्क्रिये तदा ताभ्यां द्रव्यस्य कथं सम्बन्धः? संयोगसम्बन्धः सम्भाव्येत स च (१)कर्माधीन एवेत्यत आह—

निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २३ ॥

निष्क्रियाणां गुणकर्मणां समवाय एव सम्बन्धः, स च कर्मभ्यो निषिद्धः तस्य सम्बन्धस्य उत्पत्तिरेव नास्ति दूरे तु कर्माधीनतेत्यर्थः ॥ २३ ॥

---

(१) कर्माधीन इति । तथा च गुणकर्मणोर्निष्क्रियत्वमनुपपन्नमित्यर्थः ।

ननु यद्यमूर्त्तत्वात् गुणाः कर्मसमवायिकारणं न भवन्ति तदा गुणैर्गुणाः कर्माणि च कथमुत्पद्यन्ते न हि समवायिकारणातिरिक्तत्वरूपेणापि कारणता सम्भवतीत्यत आह—

कारणन्त्वसमवायिनो गुणाः ॥ २४ ॥

गुणा असमवायिकारणं न तु समवायिकारणमपि येन कर्माधाराः स्युः । सा चासमवायिकारणता क्वचित् कार्य्यैकार्थसमवायात् यथाऽऽत्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागशब्दानां शब्दे । क्वचित् कारणैकार्थसमवायात् यथा कपालादिरूपादीना घटादिरूपादिषु ॥ २४ ॥

ननु इह कर्मोत्पद्यते इदानीं कर्मोत्पद्यते इत्यादिप्रतीतिबलात् दिक्कालावपि कर्मसमवायिकारणे एव, कथमन्यथा तत्र तयोराधारतेत्यत आह—

गुणैर्दिग् व्याख्याता ॥ २५ ॥

यथा गुरुत्वादयो गुणा न कर्मसमवायिकारणममूर्तत्वात् तथा दिगपि न कर्मसमवायिकारणममूर्तत्वादेवेत्यर्थः । आधारता तु समवायितामन्तरेणापि, कुण्डे बदराणि, कुण्डे दधि, वने सिंहनाद इत्यादिवदुपपद्यत इति भावः ॥ २५ ॥

उक्तेनैवाभिप्रायेणाह—

कारणेन कालः ॥ २६ ॥

निष्क्रियत्वेन व्याख्यात इति परिणम्यानुषङ्गः । कारणेनेति भावप्रधानो निर्देशः, तेन निमित्तकारणत्वेनाधारमात्रं कर्मणः कालो न तु समवायीत्यर्थः ॥ २६ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे पञ्चमाध्यायस्य
द्वितीयमाह्निकम् ।
समाप्तश्चायं पञ्चमोऽध्यायः ।

षष्ठाध्याये प्रथमाह्निकम् ।

संसारमूलकारणयोर्धर्माधर्मयोः परीक्षा षष्ठाध्यायार्थः । धर्माधर्मौ च "स्वर्गकामो यजेत" "न कलञ्जं भक्षयेत्" इत्यादिविधिनिषेधबलकल्पनीयौ(१) विधिनिषेधवाक्ययोः प्रामाण्ये सति स्याताम् । (२)तत्प्रामाण्यञ्च वक्तुर्यथार्थवाक्यार्थज्ञानलक्षणगुणपूर्वकत्वादुपपद्यते (३)स्वतः प्रामाण्यस्य निषेधादतः प्रथमं वेदप्रामाण्यप्रयोजकगुणसाधनमुपक्रमते—

बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ १ ॥

वाक्यकृतिर्वाक्यरचना सा बुद्धिपूर्वा—वक्तृयथार्थवाक्यार्थज्ञानपूर्वा (४)वाक्यरचनात्वात् नदीतीरे पञ्चफलानि सन्तीत्यस्मदादिवाक्यरचनावत् । वेद इति,—वाक्यसमुदाय इत्यर्थः । तत्र समुदायिनां वाक्यानां कृतिः पक्षः । न चास्मदादिबुद्धिपूर्वकत्वेनान्यथासिद्धिः, "स्वर्गकामो यजेत" इत्यादाविष्टसाधनतायाः (५)कार्य्यताया वा

---

(१) कल्पनीयाविति । यागः स्वजन्यव्यापारवत्त्वसम्बन्धेन फलजनकः फलोत्पत्तिप्राक्क्षणावृत्तित्वे सति फलजनकत्वात् स्मृतिजनकानुभववत् इत्यनुमानेनानुमेयावित्यर्थः ।

(२) तत्प्रामाण्यं चेत्यादि । तज्जन्यप्रमात्वं चेत्यर्थः । तद्वाक्यजन्यशाब्दप्रमायां तद्वाक्यवक्तृनिष्ठतद्वाक्यार्थविषयकयथार्थज्ञानस्य कारणत्वात् तादृशज्ञानरूपगुणपूर्वकत्वेन तच्छाब्दबोधे प्रमात्वोपपत्त्या तत्करणे प्रामाण्यस्याव्याहतत्वादिति भावः ।

(३ स्वत इति । ज्ञानसामान्यसामग्रीमात्रादित्यर्थः । अप्रमाया अपि ज्ञानसामान्यसामग्रीजन्यत्वेन प्रमात्वापत्त्या प्रमाया ज्ञानसामान्यसामग्रीमात्रजन्यत्वस्य नैयायिकैरनङ्गीकारादिति भावः ।

(४) वाक्यरचनात्वादिति । प्रमाणवाक्यरचनात्वादिति तदर्थः, तेन विप्रलम्भकवाक्ये न व्यभिचारः । आकाङ्क्षादिमत्पदसमूहरूपाया रचनायाश्च वक्तृयथार्थवाक्यार्थज्ञानपूर्वकत्वं चेत्थम्—प्रथमतो वक्तुर्वाक्यार्थविषयकयथार्थज्ञानं ततस्तत्प्रमाविषयकज्ञानं ततोऽन्यस्य वाक्यार्थप्रमा भवत्वितीच्छा ततोऽन्यदीयवाक्यार्थप्रमारूपस्वेष्टसाधनताज्ञानात् वाक्येच्छा ततः कृतिसाध्यताज्ञानसहकृताद्वाक्यरूपेष्टसाधनताज्ञानात्कण्ठाभिघातचिकीर्षा ततस्तत्प्रवृत्तिः, ततः कंठाभिघातरूपोच्चारणं ततः प्रमाणशब्दात्मकवाक्योत्पत्तिरिति । इदन्तु नव्यमतेन तन्मते शाब्दबोधे वाक्यार्थयथार्थज्ञानवदुच्चरितत्वनिश्चयवत् शाब्दप्रमायां वाक्यार्थयथार्थज्ञानवदुच्चरितत्वप्रमाया हेतुत्वात् । हेतुभूतप्रमायाश्च वक्तुर्यथार्थज्ञानं विनाऽनुपपत्तिः इति सुधीभिर्विभावनीयम् ।

(५) कार्यताया इति । इदं गुरुमतम् तत्र लिङः कार्ये शक्तिस्वीकारात् । तेन यजेतेत्यत्र यागः कृति साध्य इति प्रवृत्त्युपयोगी बोधो भवति येन पुरुषो यागे प्रवर्तते । इष्टसाधनता तु नैयायिकमतेनाख्यातार्थः तन्मते त्विष्टसाधनताज्ञानेनैव यागे पुरुषस्य प्रवृत्तिर्भवति । तथा च तदिष्टस्य स्वर्गस्यास्मदादिबुद्ध्यगोचरत्वात् वेदेनैव यागे स्वर्गसाधनत्वमवगम्यत इति भावः ।

अस्मदादिबुद्ध्यगोचरत्वात् । (१)तेन स्वतन्त्रपुरुषपूर्वकत्वं वेदे सिद्ध्यति । वेदत्वञ्च (२)शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम्॥१॥

प्रकारान्तरेण वेदवाक्यानां बुद्धिपूर्वकत्वमाह—

ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २ ॥

ब्राह्मणमिह वेदभागस्तत्र यत् संज्ञाकर्म नामकरणं (३)तत् व्युत्पादकस्य बुद्धिमाक्षिपति, यथा लोके लम्बकर्ण-दीर्घनास-लम्बग्रीवादिनामकरणम् ॥ २ ॥

प्रकारान्तरमाह—

बुद्धिपूर्वो ददातिः ॥ ३ ॥

"स्वर्गकामो गां दद्यात्" इत्यादौ यद्दानप्रतिपादनं तद्दानेष्टसाधनताज्ञानजन्यम् । ददातिरिति धातुनिर्देशो धात्वर्थं दानमुपलक्षयति ॥ ३ ॥

प्रमाणान्तरमाह—

तथा प्रतिग्रहः ॥ ४ ॥

प्रतिग्रहप्रतिपादिका अपि श्रुतयो बुद्धिपूर्विकाः । प्रतिग्रहपदं स्वविषयां श्रुतिमुपलक्षयति । तेन भूम्यादिप्रतिग्रहप्रतिपादिकाः श्रुतयः प्रतिग्रहीतुः श्रेयःसाधनतापराः । कृष्णसारचर्मादिप्रतिग्रह-

---

(१) तेन इतरबाधसहकृतेन वाक्यार्थयथार्थज्ञानवद्वक्तृत्वेन ।

(२) शब्देति । शब्दज्ञानातिरिक्तं तदुपजीविप्रमाणातिरिक्तं च यत्प्रमाणं तज्जन्यप्रमितिविषयार्थको यस्तदन्यत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यो यः प्रमाणशब्दस्तत्त्वमित्यर्थः । व्यासादिचाक्षुषजन्ये दृष्टार्थकभारतादावतिव्याप्तिवारणाय सत्यन्तम् । असम्भववारणाय जन्यान्तं प्रमितिविशेषणम् । शब्दज्ञानारिक्तत्वमात्रस्य प्रमाणविशेषणत्वे वेदस्यानुमितिविषयार्थकत्वादसम्भवः, शब्दोपजीविप्रमाणातिरिक्तत्वमात्रस्यापि विशेषणत्वेऽसम्भवः वेदात्मकशब्दज्ञानेन प्रमाणेन शब्दज्ञानोपजीविप्रमाणातिरिक्तेन वेदार्थस्य प्रमापणादतस्तद्द्वयोपादानम् । विशेष्यभागे चाजन्यान्तविशेषणं वेदार्थनिश्चयोत्तरप्रतीतादृष्टार्थकभारतभागविशेषेष्वतिव्याप्तिवारणाय देयम् । निरर्थकशब्देऽतिव्याप्तिवारणाय प्रमाणमिति शब्दविशेषणम् । शब्दज्ञानोपजीविपरामर्शेऽतिव्याप्तिं निरसितुं शब्दपदम् ।

(३) अत्र "व्युत्पादनमिति यावत् तत्सिद्धेर्ज्ञानस्य लिङ्गमनुमापकमित्यर्थः । तथाहि "योऽरोदीत् स रोदीत् रुद्रः किल रुरोदेत्यादि" ब्राह्मणे रोदनकर्तृत्वेन रुद्र इति नाम व्युत्पादितम् । तच्च व्युत्पादनमिति" अधिकः पाठो दृश्यतेऽन्यपुस्तकेषु । स च सिद्धिलिङ्गमित्यस्य व्याख्यानरूपः केनचिदधुना प्रक्षिप्त इति प्रतिभाति प्राचीनलिखितपुस्तकेष्वनाधिगमात् इति चिन्त्यम् ।

प्रतिपादिकाः श्रुतयः प्रतिग्रहीतुरनिष्टसाधनताबोधिकाः । न चेष्टानिष्टसाधनते अर्वाचीनपुरुषबुद्धिगोचरौ भवितुमर्हतः ॥ ४ ॥

इदानीं "शास्त्रदेशितं फलमनुष्ठातरि" इति जैमिनीयं सूत्रं संवादयन्नाह—

आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ॥ ५ ॥

आत्मान्तरगुणानां यागहिंसादिपुण्यपापानाम् आत्मान्तरे यौ सुखदुःखात्मकौ गुणौ तयोरकारणत्वात् । एवञ्च प्रत्यात्मनिष्ठाभ्यामेव धर्माधर्माभ्यां सुखदुःखे न व्यधिकरणाभ्यामन्यथा येन यागहिंसादिकं न कृतं तस्य तत फलं स्यादिति कृतहानिरकृताभ्यागमश्च प्रसज्यते ।

(१)ननु नायं नियमः पुत्रेष्टिपितृयज्ञादौ व्यभिचारात् । तथाहि पुत्रेण कृतस्य श्राद्धादेः पितरि फलश्रवणात्, पित्रा च कृतायाः पुत्रेष्टेः पुत्रे फलश्रवणात् । न च स्वर्गभागिपितृकत्वस्य तेजस्विपुत्रकत्वस्य च फलस्य पुत्रपितृगामितया सामानाधिकरण्यमेवेति वाच्यम्, श्रुतिविरोधात् पितृतृप्त्यादेः पुत्रतेजस्वितादेरेव फलस्य श्रवणात् फलान्तरस्य च गौरवपराहतत्वात् । (२)अस्तु तर्ह्यपूर्वं फलं कर्त्तरि स्वर्गस्तु पितरीति चेन्न, व्यापारस्य फलसामानाधिकरण्यनियमात्, (३)अन्यथा श्राद्धानन्तरं मुक्ते पुत्रे पितुः स्वर्गो न स्यात् । (४)न स्यादिति चेन्न मुक्ते पितरि साक्षादपि श्राद्धात् फलं न स्यादिति तुल्यत्वात् ।

---

(१) शास्त्रदेशितं फलमनुष्ठातरीति मीमांसकनियमे व्यभिचारमाशङ्कते नन्विति । पुत्रेष्टीति । पितृयज्ञस्य पुत्रसापेक्षतया प्रथमं पुत्रेष्ट्युल्लेखेपि पितृयज्ञस्याग्रे गौरवप्रदर्शनाय प्रथमं व्यभिचारविवरणम् ।

(२) पूर्वपश्चिमते कश्चिच्छंकते अस्त्विति । तथाचापूर्वं यागहिंसादिकर्त्रैकत्रैवेति नियमपराभङ्गः । दूषयति व्यापारस्येति । करणव्यापारयोः सामानाधिकरण्यवादिना भवतापि फलव्यापारयोः सामानाधिकरण्यमङ्गीकार्यम् इत्याशयः ।

(३) अन्यथा व्यापारफलसामानाधिकरण्यास्वीकारे । नेति । अपूर्वाभावात्स्वर्गो न स्यादिति शेषः ।

(४) इष्टापत्तिमाशङ्कते नस्यादितीति । दूषयति मुक्तेत्यादिना । तुल्यत्वादिति । अयमभिप्रायः । यागादिफलं गौणमुख्यभेदेन द्विविधम् । गौणं कारणरूपं, मुख्यं कार्यरूपं सुखादि । तत्र यथा कारणाभावात्कार्यानुदयस्तथा कार्यानुत्पादे कारणमपि निष्फलमिति समानम् । तथाच यथा मुक्ते पुत्रेऽपूर्वाभावात्पितुः स्वर्गाभाव इति भवता आपत्तिर्दत्ता तथा पितरि मुक्ते स्वर्गरूपमुख्यफलाभावात्कर्मवैफल्यं स्यादिति विधेरप्रामाण्यं तुल्यमेवेति ।

(१)नैवम् । "शास्त्रदेशितं फलमनुष्ठातरि" इत्यस्योत्सर्गत्वात् क्वचिद् बलवता बाधकेनापोद्यत्वात्, प्रकृते च पितृपुत्रगतफलश्रवणस्यैव बाधकत्वात् । तथा (२)सत्यतिप्रसङ्ग इति चेन्न तादृशश्रुतेरेवातिप्रसङ्गनिवारकत्वात् ।

(३)यत्तु महादानादौ स्वर्गमात्रमेव फलं तच्च यदुद्देशेन क्रियते तद्गतमपि फलं जनयतीति ।

तत्तुच्छम्, तत्रोत्सर्गे बाधकाभावात् बाधकाभावसहितोत्सर्गस्य नियमत्वात्, राजादीनामुपवासाद्यनुष्ठानानापत्तेः (४)परद्वारैव तत्तत्कर्मणां स्वगतफलमुद्दिश्यानुष्ठानसम्भवात् । सम्यग्गृहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिरूपे च फले नियम एव (५)प्रातिस्विकफलाभिप्रायेण तूत्सर्गाभिधानात् ।

(६)वृत्तिकारास्तु "शास्त्रदेशितम्" इत्यादिर्नियम एव । पित्रादीनान्तु यत् फलं तच्छ्राद्धादौ ब्राह्मणानामाशीर्मन्त्रानुभावात्, "कृतार्थास्ते पितरो भूयासुः" इति ,पितृयज्ञे । पुत्रेष्टौ तु सन्तुष्टानामृत्विजामाशीर्दानात्-"तेजस्वी वर्चस्व्यन्नादस्ते पुत्रो भूयात्" इत्यादेः,-

---

(१) नैयायिकः सिद्धान्तेन समाधत्ते नैवमिति । तथाच क्वचिद्व्यभिचारेपि शास्त्रदेशितम् इत्यादिसामान्यशास्त्रस्य विशेषेतरपरत्वान्न व्याघात इत्यर्थः ।

(२) अतिप्रसङ्ग इति । पितृयज्ञफलस्य पितरि सत्त्वेन तत्र कारणव्यापारयोरभावाद्व्यभिचार इत्यर्थः ।

(३) मणिकारमतं दूषयितुमाह यत्त्विति । न स्वगतस्वर्ग एव फलमिति मात्रशब्दार्थः । दूषयति उत्सर्ग इति । शास्त्रदेशितमित्यादि सामान्यशास्त्रे इत्यर्थः ।

(४) परद्वारैवेति । ननु परद्वारापि व्रतादि कारयन्तीति इष्टापत्तिरेवेति चेन्न ।

गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाऽशुद्धा तदा केन कारयेत्क्रियते सदा ? ॥
काम्योपवासे प्रक्रान्ते अन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जनात् ॥

इत्यादिशास्त्रेणाशौचादावपि व्रतपरित्यागस्यानौचित्यप्रदर्शनेन बाधकाभावेपि परकर्तृकोपवासादिप्रसक्तिः स्यादिति ध्येयम् ।

(५) प्रातिस्विकेति । प्रत्येककर्मफलाभिप्रायेणैवोत्सर्गस्य सत्त्वात्पितृयज्ञादावपि कर्त्तरि पुत्रादौ ब्रह्मलोकादिप्राप्तिरूपं फलमस्त्येवेति प्राचां तात्पर्यम् ।

(६) मणिमन्त्रादिन्यायेन पित्रादितृप्तिमङ्गीकुर्वतां वृत्तिकाराणां मतमाह वृत्तिकारास्त्विति ।

जाङ्गलिकमन्त्रपाठादिव सर्पदष्टस्य विषापहरणमित्याहुः(१) ॥ ५ ॥

अदुष्टानां यथाशास्त्रमनुवर्तमानानां भोजनात्तृप्तानामाशीर्दानात् तत् फलं न तु दुष्टानां पात्रत्वेन निषिद्धानामपि कुण्डगोलकप्रभृतीनामित्याह—

तद्दुष्टभोजने न विद्यते ॥ ६ ॥

तदित्याशीर्दानफलं परामृशति, दुष्टा ब्राह्मणाः पात्रानधिकारिणो यत्र श्राद्धे भोज्यन्ते तत्र पितरि तत् फलं न विद्यते न भवतीत्यर्थः। श्राद्धफलमेव वा न भवति पितरीत्यर्थः ॥ ६ ॥

के ते दुष्टा इति दुष्टलक्षणमाह—

दुष्टं हिंसायाम् ॥ ७ ॥

हिंसायामिति निषिद्धकर्ममात्रोपलक्षणम्। तेन निषिद्धे कर्मणि प्रवृत्तं पुरुषं दुष्टं विजानीयादित्यर्थः ॥ ७ ॥

न केवलं दुष्टब्राह्मणस्य श्राद्धे निमन्त्रितस्य भोजनेन फलाभावः किन्तु पापमपि भवतीत्याह—

तस्य समभिव्याहारतो दोषः ॥ ८ ॥

तस्य निषिद्धे कर्मणि प्रवृत्तस्य ब्राह्मणस्य समभिव्याहारात् एकपङ्क्तिभोजनसहशयनसहाध्ययनादि(२)लक्षणात् दोषः पापमित्यर्थः ॥ ८ ॥

तत् किमदुष्टसमभिव्याहारादपि दोष एव ? नेत्याह—

तददुष्टे न विद्यते ॥ ९ ॥

तत् पापमदुष्टे यथाशास्त्रं व्यवहरमाणे ब्राह्मणे श्राद्धे भोजिते न विद्यते न भवतीत्यर्थः ॥ ९ ॥

ननु सत्पात्राप्रतिलम्भे यत्र श्राद्धदानादौ प्रथमं दुष्टा एव निमन्त्रिताः क्रमेण तु सत्पात्रप्रतिलम्भे किं विधेयमित्यत्राह—

पुनर्विशिष्टे प्रवृत्तिः ॥ १० ॥

श्राद्धे प्रतिग्रहे वा विशिष्टा यथाशास्त्रमनुवर्तमाना यदि लभ्यन्ते

---

(१) आहुरित्यनेनास्वरसः सूचितः स च कार्यकारणभावस्य पृथक्कल्पनापत्तिस्तन्मत इति।

(२) लक्षणादिति। संसर्गादित्यर्थः।

तदा निमन्त्रितानपि निन्द्यान् परिहृत्य तानेव (१)भोजयेत्। "न निमन्त्रितान् प्रत्याचक्षीत" इति तु सत्पात्रपरम्। निन्द्यांस्तु निमन्त्रितान् द्रविणदानादिना सन्तोषयेत्॥ १०॥

यत्र स्वापेक्षया विशिष्टा न लभ्यन्ते श्राद्धदानादौ तत्राह—

समे हीने वा प्रवृत्तिः॥ ११॥

समे स्वसदृशे, हीने स्वापेक्षया गुणादिना न्यूने, अदुष्टे पात्रे श्राद्धदानादौ प्रवृत्तिस्तेषामेवाशीर्दानात् पितरि सुखमित्यर्थः। निषिद्धानां परं त्यागो न त्वदुष्टानां समहीनानामपीति भावः॥ ११॥

श्राद्धे दानादौ च सम्प्रदानसाद्गुण्येन धर्मोत्पत्तिमभिधाय तादृशादपादानादपि धर्मोत्पत्तिमतिदिशति—

(२)एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम्॥ १२॥

यथोत्तरं धर्मोत्कर्षः, हीनादपि भूम्यादिप्रतिग्रहे, समादपि, स्वापेक्षया विशिष्टादपि धार्मिकात् धर्म इत्यर्थः। परस्वादानं परस्मात् स्वस्य धनस्यादानं प्रतिग्रहः।

वृत्तिकारास्तु परस्वादानं चौर्य्यादिना परस्वग्रहणं व्याख्यातम्। तथाच श्रुतिः–'शूद्रात् सप्तमे वैश्याद्दशमे क्षत्रियात् पञ्चदशे ब्राह्मणात् प्राणसंशये" इति। क्षुधापीडितमात्मानं कुटुम्बं वा रक्षितुं सप्त दिनान्याहारमप्राप्य शूद्रभक्ष्यापहारः कार्य्यः, एवं दश दिनान्याहारमप्राप्य वैश्यात्, पञ्चदश दिनान्याहारमप्राप्य क्षत्रियात्, प्राणसंशये ब्राह्मणात् भक्ष्यापहरणं न दोषायेत्याहुः॥ १२॥

न केवलं प्राणसंशये परस्वादानं न निषिद्धं किन्तु तस्यां दशायामपहर्तुं ये न प्रयच्छन्ति तेषां वधोऽपि कार्य्यो न तावता धर्महानिरधर्मप्रादुर्भावो वेत्याह—

(३)तथा विरुद्धानां त्यागः॥ १३॥

तस्यां दशायां विरुद्धानां विपरीतमाचरतां त्यागो वधः कार्य्य

---

(१) भोजयेदिति। पूर्वकृतस्य वन्ध्यत्वात् पुनः श्राद्धं कुर्यादित्यर्थः।

(२) एतेनेति। दानस्थलीयन्यायेन, परस्वादानं प्रतिग्रहो, व्याख्यातमुक्तप्रायमिति। तथाच न्यूनसमविशिष्टेभ्यः प्रतिग्रहः कर्तव्यस्तत्रापि फलतारतम्यं न तु कदाचिद् दुष्टत्वमित्यभिप्रायः।

(३) आततायिनमायान्तं हन्यादेवाविचारयन्नित्यादिवचनात्कानिचिन्नियतकर्माण्यपि न पापवहानीत्यभिप्रायेणाह तथेति। तथाऽनिषिद्धानीत्यर्थः।

इत्यर्थः। तदुक्तम्—

कर्मणा येन केनापि मृदुना दारुणेन वा।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत्॥ इति॥ १३॥

ननु चाविशेषेणैव परस्य वधः, नेत्याह—

हीने परे त्यागः॥ १४॥

यदि स्वस्माद्धीनः परो भवति योऽपहर्त्तुं न ददाति तस्य शूद्रादेस्त्यागो वधः॥ १४॥

सममधिकृत्याह—

समे आत्मत्यागः परत्यागो वा॥ १५॥

यदि स्वसदृशो ब्राह्मण एव विरोधी भवति तदात्मन एवोपवासादिना त्यागोऽवसादः कर्तव्यः। यदि स्वस्य कुटुम्बस्य वा रक्षाप्रकारो न दृश्यते विरोधी च समो भवति तदा तस्यैव त्यागो वध इत्यर्थः॥ १५॥

तत् किं स्वापेक्षया यदि विशिष्टो भवति विरोधी तदा तस्यापि वध एव कार्यः? नेत्याह—

विशिष्टे आत्मत्याग इति॥ १६॥

स्वापेक्षया विशिष्टे वेदाध्ययनादिना उत्कृष्टे विरोधिनि आत्मन एव त्यागो विधेयः। प्राणसंशये सत्यप्यात्ममरणमेवाभिप्रेयात् न तु ब्राह्मणं हन्यादित्यर्थः। इतिराह्निकपरिसमाप्तौ॥ १६॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे षष्ठाध्यायस्य
प्रथममाह्निकम्।

षष्ठाध्याये द्वितीयाह्निकम् ।

एवं पूर्वाह्निके वैदिकी प्रमा गुणजन्येति तदुत्पत्तौ गुणाभिधानम्, "शास्त्रदेशितं फलमनुष्ठातरि" इति विवेचनम्, निषिद्धाचरणेऽपि प्रत्यवायानुत्पत्तिः कस्याञ्चिद्दशायामित्यस्य विवेचनञ्च वृत्तम्। अधुना "यतोऽभ्युदयनिःश्रेयससिद्धिः" इति द्वितीयं सूत्रं व्याचिख्यासुर्विशेषतो धर्मोत्पत्तिपरीक्षायां वर्त्तिष्यमाणायामाह--

दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्युदयाय॥१॥

दृष्टप्रयोजनानि कृषिवाणिज्यराजसेवादीनि, अदृष्टप्रयोजनानि यागदानब्रह्मचर्य्यादीनि, एतेषां कर्मणां मध्ये यत्र दृष्टं प्रयोजनं नोपलभ्यते तत्रादृष्टं प्रयोजनं कल्पनीयम्, तच्चाभ्युदयाय तत्त्वज्ञानाय(१)। यद्वा अभ्युदयायेति चतुर्थी प्रथमार्थे तेन फलमभ्युदय इत्यर्थः। अदृष्टं फलमपूर्वमेव तद् यदि योगजं तदाऽभ्युदय आत्मसाक्षात्कारः। यदि च यागदानादिजं तदाऽभ्युदयः स्वर्गः। तत्रापि यथा दोग्धि पचतीत्यादिक्रिया सद्यःफलिका, वपति कर्षतीत्यादिक्रिया च विलम्बभाविफला, तथा यजति ददाति ब्रह्मचर्य्यं चरतीत्यादिक्रिया तावत् सद्यःफलिका न भवति तादृशस्य फलस्यानुपलब्धेः। न च धार्मिकतया ज्ञानाल्लाभादिकमेव फलम्, प्रच्छन्नं ब्रह्मचर्यादि चरतां तत्फलानुद्देशात् तस्माच्चिरभाविस्वर्गादिकमेव फलं तच्चाशुतरविनाशिन्याः क्रियाया (२)न साक्षादित्यान्तरालिकं क्रियाफलयोः समानाधिकरणमपूर्वं पर्य्यवस्यति ॥ १ ॥

अदृष्टफलानि कर्माणि परिसङ्ख्यष्टे—

अभिषेचनो-पवास-ब्रह्मचर्य्य-गुरुकुलवास-वानप्रस्थ-यज्ञ-दान-प्रोक्षण-दिङ्-नक्षत्र-मन्त्र-काल-नियमाश्चादृष्टाय ॥ २ ॥

अदृष्टायेत्यदृष्टलक्षणाय फलाय, अदृष्टद्वारा स्वर्गापवर्गलक्षणा-

---

(१) तत्त्वज्ञानाय स्वर्गाय वेति अधिकः पाठः पुस्तकान्तरेषूपलभ्यते।

(२) न साक्षादिति। तथाच स्वर्गादिफलमवश्यं यागादेरङ्गीकार्यम्। तज्जनकत्वञ्चाशुतरविनाशिनां कर्मणामसम्भवीति तद्व्यापारभूतं मुकृतापूर्वमङ्गीकार्यमिति तात्पर्यम्।

य फलाय वा। एतेनादृष्टफलकश्रौतस्मार्त्तसकलकर्मोपसङ्ग्रहः। तत्राभिषेचनं-स्नानं-"गङ्गायां स्नायात्" इत्यादिविधिविधेयम्। उपवासः-'एकादशीमुपवसेत्' इत्यादिविधिविधेयः। ब्रह्मचर्यं-सामान्यत एव धर्मसाधनम्। गुरुकुलवासो-ब्रह्मचारिणां वेदाध्ययनमहानाम्नयादिव्रतार्थः। वानप्रस्थं-वयः परिणामे वनं प्रस्थितानां यत् कर्म। यज्ञो-"राजसूयवाजपेयादिः"। दानं "गां दद्यात्" इत्यादिविधिविधेयम्। प्रोक्षणं-"व्रीहीन् प्रोक्षति" इत्यादिविधिविधेयम्। दिक्-"प्राचीनप्लवने यजेत" "प्राङ्मुखोऽन्नानि भुञ्जीत" इत्यादिविधिविधेया। नक्षत्रं-श्राद्धादौ मघादि। मन्त्रः-आपोहिष्ठेत्यादिः। कालः-"मासि मासि मासि वोऽशनम्" "अमावास्यायामपराह्णे दद्यात्" "ग्रीष्मे पञ्चतपाः" "वसन्तेऽग्नीनादधीत" इत्यादिविधिविधेयः। नियमो-वर्णाश्रमिणां यथाशास्त्रमनुष्ठानम्। तदेवं धर्मस्य आत्मा समवायिकारणम्, श्रद्धा स्वर्गादिलक्षणप्रयोजनज्ञानञ्च निमित्तकारणमनुसन्धेयम् ॥ २ ॥

एवं धर्मसाधनमभिधाय अधर्मसाधनमपि समुच्चिन्वन्नाह—

चातुराश्रम्यमुपधा अनुपधाश्च ॥ ३ ॥

चतुर्णामाश्रमाणां समानं यद्धर्मसाधनं तत्तावत् पूर्वसूत्रेणैवोक्तमिति शेषः। उपधाः भावस्य श्रद्धाया दोषाः, अनुपधाः श्रद्धाया भावस्यादोषाः तेऽपि धर्माधर्मयोः साधनानि यथास्वमूहनीयानि। उपधापदेनाधर्मसाधनानि सर्वाण्युपसंगृहीतानि ॥ ३ ॥

उपधानुपधे लक्षणतो विवेचयन्नाह—

भावदोष उपधाऽदोषोऽनुपधा ॥ ४ ॥

भावः—इच्छा—रागः(१), प्रमादोऽश्रद्धामदमानासूयाप्रभृतयो भावदोषा उपधापदेनोच्यन्ते, श्रद्धा मनःप्रसादो देशितकर्मानुष्ठानाध्यवसाय इतिकर्तव्यतापरिच्छेदश्चानुपधा। तदेतयोर्धर्माधर्मनिमित्तकारणत्वमुक्तम् ॥ ४ ॥

शुच्यशुचिनी चोपधानुपधे। तत्र शुच्यशुचिनी विवेचयति—

(१) इच्छा राग इति भावशब्दपर्यायौ श्रद्धाविशेष इत्यर्थः, तस्य प्रमादादयो दोषा उपधापदवाच्या इति भावः। अनुपधा इति। भावस्यादोषा इत्यर्थस्ते चोक्ताः श्रद्धादय एवेति भावः।

यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितञ्च तच्छुचि ॥ ५ ॥

इष्टं श्रुत्या स्मृत्या च यद्रूपादिकं विहितं यस्य द्रव्यस्य तत्तथा। तत्र रूपम्-"अरुणया एकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति" "श्वेतं छागलमालभेत"(१)इत्यादौ। प्रोक्षितं-मन्त्रेणोदकसिक्तम्। अभ्युक्षितं-विना मन्त्रमुदकसिक्तम् । चकारान्न्यायतो लब्धम् तच्च-"याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्" इत्यादिनियमविधिबोधितम् ॥ ५ ॥

अशुचिलक्षणमाह—

अशुचीति शुचिप्रतिषेधः ॥ ६ ॥

यद्द्रव्यं शुचि तद्विपरीतमशुचीत्यर्थः । अप्रशस्तरूपरसगन्धस्पर्शममन्त्रप्रोक्षितमनभ्युक्षितं निषिद्धजलाभ्युक्षितं वा अन्यायागतम् कृषिवाणिज्यागतं ब्राह्मणस्य द्रव्यमशुचीत्यर्थः ॥ ६ ॥

अशुच्यन्तरमाह—

अर्थान्तरञ्च ॥ ७ ॥

प्रशस्तरूपरसगन्धस्पर्शमपि प्रोक्षितमभ्युक्षितं न्यायार्जितञ्च यत्तत्रापि वाग्दुष्टञ्च भावदुष्टं च (२)यत्तदप्यशुचीत्यर्थः ॥ ७ ॥

इदानीं धर्माधर्मौ प्रति सहकार्यन्तरमाह—

अयतस्य शुचिभोजनादभ्युदयो न विद्यते नियमाभावात् विद्यते वाऽर्थान्तरत्वाद् (३)यमस्य ॥ ८ ॥

अयतस्य यमरहितस्यासंयतस्येति यावत् । "हस्तौ पादौ प्रक्षाल्याचम्य वाग्यतो भुञ्जीत, भोक्ष्यमाणः प्रयतोऽपि द्विराचामेत्" इत्यादिबोधितयमरहितस्य भोजनं नाभ्युदयाय किन्तु पापाय। कुत एवमित्यत आह-नियमाभावात् । नियमस्य सहकारिणोऽभा-

(१) इत्यादाविति। स्वादूनि मधुराणि चेत्यादिस्मृतिरादिपदग्राह्या।

(२) चेत्तदप्यशुचीति पाठान्तरम्।

(३) यमस्येति। यमपदमुपलक्षणं तेन नियमोऽपि गृहीतः, तथाच यमनियमसहितं शुचिभोजनं धर्मं, तद्रहितन्त्वधर्मं जनयतीति भावः।

य फलाय वा। एतेनादृष्टफलकश्रौतस्मार्त्तसकलकर्मोपसङ्ग्रहः। तत्राभिषेचनं-स्नानं-"गङ्गायां स्नायात्" इत्यादिविधिविधेयम्। उपवासः-'एकादशीमुपवसेत्' इत्यादिविधिविधेयः। ब्रह्मचर्य-सामान्यत एव धर्मसाधनम्। गुरुकुलवासो-ब्रह्मचारिणां वेदाध्ययनमहानाम्नचादिव्रतार्थः। वानप्रस्थं-वयः परिणामे वनं प्रस्थितानां यत् कर्म। यज्ञो-"राजसूयवाजपेयादिः"। दानं "गां दद्यात्" इत्यादिविधिविधेयम्। प्रोक्षणं-"व्रीहीन् प्रोक्षति" इत्यादिविधिविधेयम्। दिक्-"प्राचीनप्लवने यजेत" "प्राङ्मुखोऽन्नानि भुञ्जीत" इत्यादिविधिविधेया। नक्षत्रं-श्राद्धादौ मघादि। मन्त्रः-आपोहिष्ठेत्यादिः। कालः-"मासि मासि मासि वोऽशनम्" "अमावास्यायामपराह्णे दद्यात्" "ग्रीष्मे पञ्चतपाः" "वसन्तेऽग्नीनादधीत" इत्यादिविधिविधेयः। नियमो-वर्णाश्रमिणां यथाशास्त्रमनुष्ठानम्। तदेवं धर्मस्य आत्मा समवायिकारणम्, श्रद्धा स्वर्गादिलक्षणप्रयोजनज्ञानञ्च निमित्तकारणमनुसन्धेयम्॥ २॥

एवं धर्मसाधनमभिधाय अधर्मसाधनमपि समुच्चिन्वन्नाह—

चातुराश्रम्यमुपधा अनुपधाश्च॥ ३॥

चतुर्णामाश्रमाणां समानं यद्धर्मसाधनं तत्तावत् पूर्वसूत्रेणैवोक्तमिति शेषः। उपधाः भावस्य श्रद्धाया दोषाः, अनुपधाः श्रद्धाया भावस्यादोषाः तेऽपि धर्माधर्मयोः साधनानि यथास्वमूहनीयानि। उपधापदेनाधर्मसाधनानि सर्वाण्युपसंगृहीतानि॥ ३॥

उपधानुपधे लक्षणतो विवेचयन्नाह—

भावदोष उपधाऽदोषोऽनुपधा॥ ४॥

भावः—इच्छा—रागः(१), प्रमादोऽश्रद्धामदमानासूयाप्रभृतयो भावदोषा उपधापदेनोच्यन्ते, श्रद्धा मनःप्रसादो देशितकर्मानुष्ठानाध्यवसाय इतिकर्तव्यतापरिच्छेदश्चानुपधा। तदेतयोर्धर्माधर्मनिमित्तकारणत्वमुक्तम्॥ ४॥

शुच्यशुचिनी चोपधानुपधे। तत्र शुच्यशुचिनी विवेचयति—

(१) इच्छा राग इति भावशब्दपर्यायौ श्रद्धाविशेष इत्यर्थः, तस्य प्रमादादयो दोषा उपधापदवाच्या इति भावः। अनुपधा इति। भावस्यादोषा इत्यर्थस्ते चोक्ताः श्रद्धादय एवेति भावः।

यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितञ्च तच्छुचि ॥ ५ ॥

इष्टं श्रुत्या स्मृत्या च यद्रूपादिकं विहितं यस्य द्रव्यस्य तत्तथा। तत्र रूपम्-"अरुणया एकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति" "श्वेतं छागलमालभेत"(१)इत्यादौ। प्रोक्षितं-मन्त्रेणोदकासिक्तम्। अभ्युक्षितं-विना मन्त्रमुदकासिक्तम्। चकारान्न्यायतो लब्धम् तच्च-"याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्" इत्यादिनियमविधिबोधितम् ॥ ५ ॥

अशुचिलक्षणमाह—

अशुचीति शुचिप्रतिषेधः ॥ ६ ॥

यद्द्रव्यं शुचि तद्विपरीतमशुचीत्यर्थः। अप्रशस्तरूपरसगन्धस्पर्शममन्त्रप्रोक्षितमनभ्युक्षितं निषिद्धजलाभ्युक्षितं वा अन्यायागतम् कृषिवाणिज्यागतं ब्राह्मणस्य द्रव्यमशुचीत्यर्थः ॥ ६ ॥

अशुच्यन्तरमाह—

अर्थान्तरञ्च ॥ ७ ॥

प्रशस्तरूपरसगन्धस्पर्शमपि प्रोक्षितमभ्युक्षितं न्यायार्जितञ्च यत्तत्रापि वाग्दुष्टञ्च भावदुष्टं च(२)यत्तदप्यशुचीत्यर्थः ॥ ७ ॥

इदानीं धर्माधर्मौ प्रति सहकार्यन्तरमाह—

अयतस्य शुचिभोजनादभ्युदयो न विद्यते नियमाभावात् विद्यते वाऽर्थान्तरत्वाद् (३)यमस्य ॥ ८ ॥

अयतस्य यमरहितस्यासंयतस्येति यावत्। "हस्तौ पादौ प्रक्षाल्याचम्य वाग्यतो भुञ्जीत, भोक्ष्यमाणः प्रयतोऽपि द्विराचामेत्" इत्यादिबोधितयमरहितस्य भोजनं नाभ्युदयाय किन्तु पापाय। कुत एवमित्यत आह-नियमाभावात्। नियमस्य सहकारिणोऽभा-

(१) इत्यादाविति। स्वादूनि मधुराणि चेत्यादिस्मृतिरादिपदग्राह्या।

(२) चेत्तदप्यशुचीति पाठान्तरम्।

(३) यमस्येति। यमपदमुपलक्षणं तेन नियमोऽपि गृहीतः, तथाच यमनियमसहितं शुचिभोजनं धर्मं, तद्रहितन्त्वधर्मं जनयतीति भावः।

वात् । नियमे सति यत्तदाह—विद्यते वा । यथोक्तयमसाहित्येन भोजने भवत्येवाभ्युदयः । कुत इत्यत आह—अर्थान्तरत्वाद्यमस्य । भोजनादर्थान्तरं यतोऽयमः । तथा च सहकारिकारणं विना न फलसिद्धिस्तस्मिन् सति फलसिद्धिरित्यर्थः ॥ ८ ॥

ननु यममात्रमेव तन्त्रं तर्हि भोजनमतन्त्रमेवेत्यत आह—

असति चाभावात् ॥ ९ ॥

यमे सत्यपि शुचिभोजनेऽसति अभावादभ्युदयस्येति शेषः । तथाच यमो भोजनञ्च द्वयमेव पुण्यकारणमित्यर्थः । भोजनमित्युपलक्षणम् यागदानस्नानहोमादीनामपि श्रौतस्मार्तकर्मणां यमनियमौ सहकारिणौ ॥ ९ ॥

एवं धर्माधर्मप्रादुर्भावं प्रति यमसहकारिणमभिधाय दोषसहकारिणमभिधातुं दोषनिदानमाह—

सुखाद्रागः ॥ १० ॥

स्रक्चन्दनवनितादिविषयसेवनजन्मनः सुखादुत्तरोत्तरं तज्जातीये सुखे तत्साधने वा राग इच्छा सञ्जायते । अहिकण्टकादिजन्मनो दुःखात् तत्र तत्साधने वा द्वेष इत्यपि द्रष्टव्यम् । रागद्वेषमोहाः प्रवर्तकत्वेन दोषा इत्यभिधीयन्ते । तथाच गौतमीयं सूत्रम्—"प्रवर्त्तनालक्षणा दोषाः" अ० १ आ० १ सू० १८ इति ॥ १० ॥

अत्र सुखदुःखे एव यदि रागद्वेषौ जनयतः तदा तयोर्नाशे कथं तौ स्यातामत आह—

तन्मयत्वाच्च ॥ ११ ॥

रागद्वेषौ भवत इति शेषः । विषयाभ्यासजनितो दृढतरः संस्कारविशेषस्तन्मयत्वं यद्वशात् कामातुरस्य कामिनीमलभमानस्य सर्वत्र कामिनीदर्शनम् । एकदा भुजङ्गदष्टस्य तत्र दृढतरसंस्कारतः सर्वत्र भुजङ्गदर्शनम् । तदुक्तम्—

तन्मयत्वं तत्प्रकाशो बाह्याभ्यन्तरतस्तथा । इति ॥ ११ ॥

हेत्वन्तरं समुच्चिनोति—

अदृष्टाच्च ॥ १२ ॥

रागद्वेषाविति शेषः । यद्यप्यदृष्टं साधारणकारणम् तथापि क-

चित्तौ प्रति असाधारणतामप्यनुभजति । यथा तज्जन्मानुभूतकामिनीसुखस्यापि यौवनोद्भेदे कामिनीरागः, अननुभूतभुजङ्गदंशदुःखानामपि भुजङ्गेषु द्वेष इत्याद्यूह्येयम् । न च प्राग्भावीयः संस्कार एवात्र निबन्धनम्, तत्कल्पने तदुद्बोधकल्पने च प्रमाणाभावात् अदृष्टस्यावश्यकल्पनीयत्वात् ॥ १२ ॥

सहकार्य्यन्तरमाह—

जातिविशेषाच्च ॥ १३ ॥

तथाहि मनुष्यजातीयानामन्नादौ रागः, मृगजातीयानां तृणादौ, करभजातीयानां कण्टकादौ । तत्रापि तत्तज्जातिनिष्पादकमदृष्टमेव तन्त्रम् द्वारमात्रन्तु जातिर्जन्मविशेषः। एवं पारावतादीनामुत्करे(१) रागः। तथा महिषजातीयानां तुरङ्गमे द्वेषः, सारमेयाणां शृगाले, नकुलानां भुजङ्गमे इत्याद्यूह्येयम् ॥ १३ ॥

एवं धर्माधर्मनिमित्ततया रागद्वेषनिमित्तानि परिसङ्ख्याय सम्प्रति दोषाणां धर्माधर्मकारणत्वं प्रवृत्तिद्वारेत्याह—

इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः ॥ १४ ॥

विहिते कर्मणि रागनिबन्धना,-निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः। रागनिबन्धना यागादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मम्। तावेतौ रागद्वेषौ संसारमनुवर्तयतः। तथाच गौतमीयं सूत्रम्—"प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः" अ० १ आ० १ सू० १७ इति । वागारम्भो वाचिकी प्रवृत्तिः, सत्यं (२)प्रियं हितमिति पुण्या, असत्यमप्रियमहितमिति पापा । बुद्धिः बुध्यते ज्ञायतेऽनेनेति मन उच्यते, तेन मानसी प्रवृत्तिर्भूतदयादिः। शारीरी प्रवृत्तिर्दानं परिचरणमित्यादिका दशविधा पापा दशविधा पुण्या चेति ॥ १४ ॥

इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावमाह—

---

(१) उत्करो धान्यकणपुञ्जम् । उत्कट इति पाठान्तरम् ।

(२) प्रियामिति स्वाध्यायोऽप्यत्र ग्राह्यः । मानसीति । इयमपि प्रवृत्तिर्द्विविधा पुण्या पापा चेति । दयाऽस्पृहा श्रद्धा चेति पुण्या । परद्रोहः परद्रव्येच्छा नास्तिक्यं चेति पापा । इत्यादिकेति । परित्राणमादिपदग्राह्यम् । विपरीता च शारीरिकी-हिंसास्तेयागम्यागमनरूपेति वाग्बुद्धिशरीराणां प्रवृत्तिर्दशविधेत्यर्थः ।

तत्संयोगो विभागः ॥ १५ ॥

ताभ्यां धर्माधर्माभ्यां संयोगो जन्म (१)अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इहोच्यते । विभागस्तु शरीरमनोविभागो मरणलक्षणः । तथाचायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापरनामा धर्माधर्माभ्यामित्यर्थः । अस्यैव च प्रेत्यभावस्याजरञ्जरीभाव(२) इति वैदिकी संज्ञा ॥ १५ ॥

तदेतस्य प्रेत्यभावस्य जन्ममरणप्रबन्धस्य यत्र च पर्य्यवसानं तं मोक्षं निरूपयितुमाह—

आत्मकर्मसु मोक्षो व्याख्यातः ॥ १६ ॥

अयमेव शरीरमनोविभागः आत्मकर्मसु सत्सु मोक्षो भवतीत्यर्थः । तत्रात्मकर्माणि तावत्-श्रवणं मननं योगाभ्यासो निदिध्यासनमासनं प्राणायामः शमदमसम्पत्तिः आत्मपरात्मसाक्षात्कारो देहदेशान्तरोपभोग्यपूर्वोत्पन्नधर्माधर्मपरिज्ञानं तद्भोगानुरूपनानादेहनिर्माणं तयोर्भोगेन प्रक्षयो रागद्वेषलक्षणदोषतुषारदमादग्रिमधर्माधर्मयोरनुत्पादात् प्रवृत्त्यपाये जन्मापायाद्दुःखापायलक्षणोऽपवर्ग(३)स्तत्र षट्पदार्थीयतत्त्वज्ञानमाद्यमात्मकर्म ॥ १६ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे षष्ठाध्यायस्य
द्वितीयमाह्निकम् ।
समाप्तश्चायं षष्ठाध्यायः ।

---

(१) स्थितिसामान्ये जन्मलक्षणातिव्याप्तिवारणायापूर्वाभिरिति । वेदना प्राणसंघातः । तथाचापूर्वशरीरेन्द्रियप्राणसम्बन्धो जन्मेति फलितम् । द्वित्रिच्छिन्नगोधाभुजगादौ कियत्कालप्राणसम्बन्धिनि खण्डशरीरोत्पत्तौ जन्मलक्षणातिव्याप्तिवारणायेन्द्रियपदम् । यावत्संसारमनुवर्तमानस्य मनोरूपेन्द्रियस्य अपूर्वतायाः शरीरान्तर्भावं विनाऽसम्भवाच्छरीरपदम् । श्वासप्रश्वासहेतुभूतप्रयत्नार्थं मनःप्राणसंयोगस्यावश्यकतया प्राणसंघातार्थकं वेदनापदम् ।

(२) तथा च गौतमीयं सूत्रम्-"पुनरुत्पत्तिः प्रेत्यभावः अ० १ आ० १ सू० १९ इति ।

(३) अत्रापि "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" अ० १ आ० १ सूत्रं २ गौतमीयं द्रष्टव्यम् ।

सप्तमाध्याये प्रथमाह्निकम् ।

संसारमूलकारणतया सर्वोत्पत्तिमन्निमित्तकारणतया भोगसाधनतया चोत्पत्तितः प्रत्यात्मनियतत्वेन परादृष्टस्यापि परस्योपयोगित्वेन च धर्माधर्मौ परीक्ष्येदानीं गुणान् परीचिक्षिषुस्तेषामुद्देशं लक्षणञ्च स्मारयन्नाह—

उक्ता गुणाः ॥ १ ॥

उद्दिष्टा लक्षिता गुणाश्चेत्यर्थः । तत्र रूपादयः सप्तदश कण्ठरवेणोक्ताः चशब्दसमुच्चिताः सप्त, तेन चतुर्विंशतिरपि गुणा उक्ताः । तत्र नित्यवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं गुणत्वम्, समवायिकारणावृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं वा, असमवायिकारणवृत्तिनित्यवृत्तिसाक्षाद्व्याप्यजातिमत्त्वं वा, कार्य्यासमानाधिकरणकर्मावृत्तिजातिमत्त्वं वा ॥ १ ॥

तत्र गुणत्वेन गुणपरीक्षा सप्तमाध्यायार्थः । तत्र प्रथमाह्निके नित्यतया गुणपरीक्षा, अनित्यतया गुणपरीक्षा, पाकजगुणपरीक्षा, सङ्ख्याद्यनेकवृत्तिगुणपरीक्षा, परिमाणपरीक्षा चेति पञ्चप्रकरणानि, तत्र रूपादीनाञ्चतुर्णामनित्यत्वमाह—

पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च(१) ॥ २ ॥

पृथिव्यादीनां वाय्वन्तानामवयविनां रूपादयश्चत्वारो गुणा अनित्याः । यद्यप्यन्येऽपि (२)गुणा अवयविषु वर्त्तमाना अनित्या एव, तथापि तेषामन्यतोऽपि विनाशः । रूपादयश्चत्वारो गुणा आश्रयनाशादेव नश्यन्ति न तु विरोधिगुणान्तरात् । द्रव्यानित्यत्वादिति । द्रव्यस्याश्रयभूतस्यानित्यत्वादाश्रितानामनित्यत्वमित्यर्थः ॥ २ ॥

---

(१) अनित्याश्चेति । चकारेण नित्यजलादिगता नित्या इति सूचितम् । पृथिव्यान्तु अ[illegible] एव पृथिवीपरमाणावपि पीलुवाकनादिभिः पाकाङ्गीकारात् । इदमग्रे स्फु[illegible] ।

(२) गुणा इति । शब्दादय इति शेषः ।

रूपादीनामनित्यत्वे यद्याश्रयानित्यत्वं तन्त्रं तदा नित्याश्रयवृ-
त्तीनां नित्यत्वमित्याक्षेपवललभ्यमित्याह—

एतेन नित्येषु नित्यत्वमुक्तम् ॥ ३ ॥

रूपादीनामेव चतुर्णां नित्येष्वाश्रयेषु वर्त्तमानानां नित्यत्व-
मुक्तम्। एतेनेति। आश्रयानित्यत्वेनानित्यत्वाभिधानेनेत्यर्थः।
वृत्तिकृतस्तु नित्येष्वनित्यत्वमुक्तमित्यकारप्रश्लेषस्तथाच पा-
र्थिवपरमाणुष्वग्निसंयोगान्नाश(१) इति व्याचक्रुः ॥ ३ ॥

तत् किं पार्थिवेऽपि नित्यवृत्तिरूपादीनां नित्यत्वमेवेत्यतो वि-
शिनष्टि—

अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥ ४ ॥

आप्यपरमाणौ रूपरसस्पर्शा नित्याः, तैजसपरमाणौ रूपस्पर्शौ,
वायुपरमाणौ स्पर्शो नित्यः। ननु नित्येऽपि वर्तमानानां
रूपादीनामनित्यत्वे को विरोधः शब्दबुद्ध्यादीनामिव, इत्यतश्चकारेण
गुणान्तराप्रादुर्भावो हेत्वन्तरं सूचितम्। शब्दे हि तीव्रमन्दादिभा-
वेन गुणान्तरप्रादुर्भावोऽनुभूयते, ज्ञानादौ च ज्ञानादिविरोधी सं-
स्कारादिः। आप्यतैजसवायवीयपरमाणुषु रूपादिविरोधि गुणान्तरं
न प्रादुर्भवति, यदि प्रादुर्भवेत्तदा तदारब्धेष्वपि द्व्यणुकादिप्रक्रमे-
णाऽऽप्याद्यवयविष्वपि पूर्वविजातीयं रूपाद्यनुभूयेत। नहि शुक्लरूपवि-
जातीयं रूपं तोयतेजसोर्नवा शीतोष्णस्पर्शविजातीयौ स्पर्शौ, उ-
ष्णं जलं शीतो वायुरित्यादिप्रतीतिस्तूपाधिनिबन्धनेति भावः ॥ ४ ॥

पूर्वं पृथिवीमन्तर्भाव्यानित्येष्वनित्या इत्युक्तमिदानीमाप्यादि-
ष्वेवाह—

अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥ ५ ॥

अवाद्यवयविरूपादय आश्रयनाशादेव नश्यन्ति न तु विरोधि-
गुणान्तरादपीत्यर्थः ॥ ५ ॥

ननु पृथिव्यामवयविरूपायामपि रूपादयोऽग्निसंयोगादेवोत्प-
द्यन्ते नश्यन्ति च, तत् कथमाश्रयनाशमात्रनाश्या इत्यत आह—

(१) नित्येष्वनित्यत्व......मतपाठे एतेनेति उक्तमिति चासङ्गतं स्यादिति ध्येयम्।

कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ ६ ॥

पाकजा इति । रूपरसगन्धस्पर्शा इत्यर्थः । कारणगुणपूर्वका इति । रूपाश्रयस्य घटादेर्यत् समवायिकारणं कपालादि तद्गुणपूर्वकाः । तथाच कपालरूपं कारणैकार्थसमवायप्रत्यासत्त्या घटरूपासमवायिकारणम् । एवं रसादावपि । (१)रूपरसगन्धस्पर्शाः रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः ।

ननु चक्षुर्ग्राह्यत्वमेव रूपत्वमुपाधिरिति चेत् इन्द्रियपातमात्रेण रूपमिति प्रत्ययानुदयप्रसङ्गात् । अननुसंहितोपाधेरुपहितप्रत्ययायोगादिति । उपाधिश्चात्र चक्षुस्तच्चातीन्द्रियम् ग्राह्यत्वञ्च ग्रहणविषयत्वं तदप्यचाक्षुषं रूपत्वविशिष्टप्रतीतेश्च चाक्षुषत्वात् । चक्षुर्मात्रबहिरिन्द्रियग्राह्यगुणत्वं (२)रूपत्वम् । अतीन्द्रियरूपाव्याप्तिरिति चेन्न चक्षुर्मात्रबहिरिन्द्रियग्राह्यजातिमत्त्वस्य विवक्षितत्वात् तादृशी च जाती रूपत्वं नीलत्वादिका चेति । नन्वेकैका एव नीलपीतादिव्यक्तयो नित्या न तु तत्र नीलत्वादिजातय एकव्यक्तिकत्वादिति चेन्न नीलतरनीलतमादिप्रत्ययानुदयप्रसङ्गात् । धावल्यादिसम्भेदाभावकृतस्तत्र तारतम्यव्यवहार इति चेन्न प्रमाणाभावात्, श्यामं रूपं नष्टं रक्तमुत्पन्नमिति प्रतीतेश्च । न च सा समवायोत्पत्तिविनाशकृतेति वाच्यम् समवायस्य तत्रानुल्लेखात्, तस्य नित्यत्वाच्च, घटादेरप्यनित्यतायामेवंसत्यनाश्वासापत्तेः समवायानित्यत्वेनैव (३)तत्राप्यन्यथासिद्धेः सुवचत्वात् ।

ननु नीलपीतादयो गुणा द्रव्याभिन्ना एव धर्मधर्मिणोरभेदादिति चेन्न रूपं घटः स्पर्शो घट इत्यादिव्यवहारप्रसङ्गात् । ननु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादिप्रतीतिरिति चेन्न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपपत्तेः [illegible] भेदे(४) प्रमाणे सति

(१) रूपत्वादेर्जातिरूपतां साधयति रूपेति ।

(२) रूपत्वमिति । तथा चातीन्द्रियचक्षुर्घटितत्वाद् [illegible] चाक्षुषत्वा [illegible] त्वापातेनाचाक्षुषत्वं स्यादित्यर्थः । जात्यपेक्षयोपाधेर्गुरुत्वेन सर्वजाति [illegible] तीन्द्रिय परमाणुरूपे चक्षुर्ग्राह्यत्वरूपोपाधेरभावाच्च नोपाधिरूपं रूपत्वमिति तात्पर्यम् ।

(३) तत्रापीति । घटादावपि समवायोत्पत्तिविनाशाभ्याम् [illegible] त्वोपपत्तौ [illegible]

(४) भेद इति । भेदविषयकप्रमाणसत्तायामित्यर्थः [illegible]

रूपादीनामनित्यत्वे यद्याश्रयानित्यत्वं तन्त्रं तदा नित्याश्रयवृत्तीनां नित्यत्वमित्याक्षेपवललभ्यमित्याह—

एतेन नित्येषु नित्यत्वमुक्तम् ॥ ३ ॥

रूपादीनामेव चतुर्णां नित्येष्वाश्रयेषु वर्त्तमानानां नित्यत्वमुक्तम्। एतेनेति। आश्रयानित्यत्वेनानित्यत्वाभिधानेनेत्यर्थः।

वृत्तिकृतस्तु नित्येष्वनित्यत्वमुक्तमित्यकारप्रश्लेषस्तथाच पार्थिवपरमाणुष्वग्निसंयोगान्नाश(१) इति व्याचक्रुः ॥ ३ ॥

तत् किं पार्थिवेऽपि नित्यवृत्तिरूपादीनां नित्यत्वमेवेत्यतो विशिनष्टि—

अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥ ४ ॥

आप्यपरमाणौ रूपरसस्पर्शा नित्याः, तैजसपरमाणौ रूपस्पर्शौ, वायुपरमाणौ स्पर्शो नित्यः। ननु नित्येऽपि वर्तमानानां रूपादीनामनित्यत्वे को विरोधः शब्दबुद्ध्यादीनामिव, इत्यतश्चकारेण गुणान्तराप्रादुर्भावो हेत्वन्तरं सूचितम्। शब्दे हि तीव्रमन्दादिभावेन गुणान्तरप्रादुर्भावोऽनुभूयते, ज्ञानादौ च ज्ञानादिविरोधी संस्कारादिः। आप्यतैजसवायवीयपरमाणुषु रूपादिविरोधि गुणान्तरं न प्रादुर्भवति, यदि प्रादुर्भवेत्तदा तदारब्धेष्वपि द्व्यणुकादिप्रक्रमेणाऽऽप्याद्यवयविष्वपि पूर्वविजातीयं रूपाद्यनुभूयेत। नहि शुक्लरूपविजातीयं रूपं तोयतेजसोर्नवा शीतोष्णस्पर्शविजातीयौ स्पर्शौ, उष्णं जलं शीतो वायुरित्यादिप्रतीतिस्तूपाधिनिबन्धनेति भावः ॥ ४ ॥

पूर्वं पृथिवीमन्तर्भाव्यानित्येष्वनित्या इत्युक्तमिदानीमाप्यादिष्वेवाह—

अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥ ५ ॥

अवाद्यवयविरूपादय आश्रयनाशादेव नश्यन्ति न तु विरोधिगुणान्तरादपीत्यर्थः ॥ ५ ॥

ननु पृथिव्यामवयविरूप।यामपि रूपादयोऽग्निसंयोगादेवोत्पद्यन्ते नश्यन्ति च, तत् कथमाश्रयनाशमात्रनाश्या इत्यत आह—

(१) नित्येष्वनित्यत्व... [illegible] मतपाठे एतेनेति उक्तमिति चासङ्गतं स्यादिति ध्येयम्।

कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ ६ ॥

पाकजा इति । रूपरसगन्धस्पर्शा इत्यर्थः । कारणगुणपूर्वका इति । रूपाश्रयस्य घटादेर्यत् समवायिकारणं कपालादि तद्गुणपूर्वकाः । तथाच कपालरूपं कारणैकार्थसमवायप्रत्यासत्त्या घटरूपाद्यसमवायिकारणम् । एवं रसादावपि । (१)रूपरसगन्धस्पर्शाः रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः ।

ननु चक्षुर्ग्राह्यत्वमेव रूपत्वमुपाधिरिति चेत् इन्द्रियपातमात्रेण रूपमिति प्रत्ययानुदयप्रसङ्गात् । अननुसंहितोपाधेरुपहितप्रत्ययायोगादिति । उपाधिश्चात्र चक्षुस्तच्चातीन्द्रियम् ग्राह्यत्वञ्च ग्रहणविषयत्वं तदप्यचाक्षुषं रूपत्वविशिष्टप्रतीतेश्च चाक्षुषत्वात् । चक्षुर्मात्रबहिरिन्द्रियग्राह्यगुणत्वं (२)रूपत्वम् । अतीन्द्रियरूपाव्याप्तिरिति चेन्न चक्षुर्मात्रबहिरिन्द्रियग्राह्यजातिमत्त्वस्य विवक्षितत्वात् तादृशी च जाती रूपत्वं नीलत्वादिका चेति । नन्वेकैका एव नीलपीतादिव्यक्तयो नित्या न तु तत्र नीलत्वादिजातय एकव्यक्तिकत्वादिति चेन्न नीलतरनीलतमादिप्रत्ययानुदयप्रसङ्गात् । धावल्यादिसम्भेदाभावकृतस्तत्र तारतम्यव्यवहार इति चेन्न प्रमाणाभावात्, श्यामं रूपं नष्टं रक्तमुत्पन्नमिति प्रतीतेश्च । न च सा समवायोत्पत्तिविनाशकृतेति वाच्यम् समवायस्य तत्रानुल्लेखात्, तस्य नित्यत्वाच्च, घटादेरप्यनित्यतायामेवंसत्यनाश्वासापत्तेः समवायानित्यत्वेनैव (३)तत्राप्यन्यथासिद्धेः सुवचत्वात् ।

ननु नीलपीतादयो गुणा द्रव्याभिन्ना एव धर्मधर्मिणोरभेदादिति चेन्न रूपं घटः स्पर्शो घट इत्यादिव्यवहारप्रसङ्गात् । ननु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादिप्रतीतिरिति चेन्न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपपत्तेः । भेदे(४) प्रमाणे सति

---

(१) रूपत्वादेर्जातिरूपतां साधयति रूपेति ।

(२) रूपत्वमिति । तथा चातीन्द्रियचक्षुर्घटितत्वाद्ग्रहणस्य चाचाक्षुषत्वाद्रूपस्यातीन्द्रियत्वापातेनाचाक्षुषत्वं स्यादित्यर्थः । जात्यपेक्षयोपाधेर्गुरुत्वेन सर्वजातिविलयापत्तेश्चातीन्द्रिये परमाणुरूपे चक्षुर्ग्राह्यत्वरूपोपाधेरभावाच्च नोपाधिरूपं रूपत्वमिति तात्पर्यम् ।

(३) तत्रापीति । घटादावपि समवायोत्पत्तिविनाशाभ्यामनित्यत्वोपपत्तौ नित्यत्वप्रसक्तिरिति भावः ।

(४) भेद इति । भेदविषयकप्रमाणसत्तायामित्यर्थः तथाच तयोरभेदात्कथमुपचार इति भावः ।

कल्पनेयं यथाकथञ्चिदुपपद्यते इति चेन्न चन्दनस्य रूपं चन्दनस्य गन्ध इत्यादिव्यपदेशबलाद्भेदसिद्धेः, पटस्य रूपाभेदे पटवद्रूपमपि त्वगिन्द्रियेण गृह्येत, पटमानयेत्युक्ते यत्किञ्चिद्रूपमानयेत् रूपमानयेत्युक्ते यत्किञ्चिद्‌द्रव्यमानयेत्। अस्तु तर्हि भेदाभेदः अत्यन्तभेदेऽत्यन्ताभेदे च सामानाधिकरण्यानुपपत्तेरिति चेन्न (१)अवच्छेदभेदं विना विरुद्धयोर्भेदाभेदयोरेकत्रासम्भवात्। अन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति नित्याभाववृत्तिधर्मत्वादत्यन्ताभावत्ववदिति चेन्न एकत्र संयोगतदत्यन्ताभावयोः प्रतीतिबलादत्यन्ताभावस्याव्याप्यवृत्तित्वाभ्युपगमात्, अन्योन्याभावे तु तथाप्रतीतेरभावात्।

तदेतद्रूपं पृथिव्यां नानाप्रकारकम्, पाथसि तेजसि च शुक्लमेव। क्वचित् पटादौ च चित्रमपि रूपमधिकम् अन्यथा तदचाक्षुषत्वापातात् रूपवत एव चाक्षुषद्रव्यत्वात्। न च विजातीयरूपै रूपानारम्भः, (२)नीलपीतादीनामारम्भे रूपत्वेनैव साजात्यस्यापेक्षितत्वात् अन्यथा तदचाक्षुषत्वापत्तेरुक्तत्वात्। न चावयवरूपोपग्रहेणैवावयविग्रहः अवयवानामपि चित्रतया नीरूपत्वप्रसङ्गात्, यत्र वा पाकात् परमाणुषु चित्रं रूपं तत्रैव तत्परम्परारब्धपटादौ चित्ररूपोपपत्तेः। न च हरीतक्यां रसोऽपि चित्र इति वाच्यम् हरीतक्या नारसत्वेऽपि दोषाभावात्, षड्रसत्वव्यवहारस्तु तत्तद्रसगुणकारितया। एवं गन्धोऽपि न चित्रः सौरभासौरभवदवयवद्वयस्यानारम्भकत्वात्। कर्कट्यादौ क्वचिदवयवे तैक्त्यं क्वचिन्माधुर्य्यं तथाच कतमो रसः कर्कट्यामिति चेन्माधुर्य्यमेव। गुणविरोधेन कथं तथा स्यादिति चेत् तदवयवे तैक्त्याभावात्। तथाऽनुभवः कथमिति चेत् कर्कटीभक्षणक्षुभितरसनाग्रवर्त्तिपित्तद्रव्यस्य तिक्ततोपलम्भात्, तत एव कदाचिन्मुखमपि तिक्तायते। हरीतक्यामपि कथमियं न गतिरिति चेन्न तदवयवेषु कषायमाधुर्य्यलवणादिनानारसानुभवादित्यलं पल्लवेन।

---

(१) अवच्छेदभेदं विनेति। व्याप्यवृत्तेरन्योन्याभावस्यावच्छेदभेदोऽनुपपन्न इत्यर्थः।

(२) नीलपीतादीति। तथाच रूपत्वेन कारणत्वाद्विजातीयरूपैश्चित्ररूपानङ्गीकारेपि अवयवगताचित्ररूपेण तदुत्पत्त्या बाधकाभावादन्यथाऽचाक्षुषत्वापत्तिरवयविन इति भावः। नव्यास्तु चित्रं रूपं नाङ्गीकुर्वन्ति अवयवविशेषगतरूपभेदेनैवावयविग्रहणस्य सुकरत्वादन्यथा चित्ररसापत्तिः स्यादिति प्राहुः।

तच्च रूपं (१)नयनसहकारि । नन्वेवं वायौ रूपाभावस्य तमसश्च कथं चाक्षुषतेति चेन्न भावग्रह एव रूपस्य नयनसहकारित्वात्, विषयालोकचक्षुषां (२)त्रयाणामपि रूपाणि चाक्षुषप्रतीतिप्रयोजकानि ।

रसोऽपि रसत्वजातिमान् । रसत्वं रसनेन्द्रियमात्रजन्यसाक्षात्कारविषयजातिः तादृशजातिमत्त्वञ्च रसत्वम् । सोऽयं जीवनपुष्टिबलारोग्यहेतुः(३)रसनसहकारी । रसनेन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसत्वम्, तथासति नातीन्द्रियरसाव्याप्तिः ।

घ्राणमात्रग्राह्यो गुणो गन्धः । घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं(४) गन्धत्वम्, स च सुरभिरसुरभिश्चेति द्विविधः । यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं गन्धत्वम् ।

एवं स्पर्शोऽपि स्पर्शत्वजातिमान् गुणः । त्वगिन्द्रियमात्रग्राह्यगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं स्पर्शत्वम् । द्रव्यचतुष्टयवृत्तिश्चायम् अनुष्णाशीतशीतोष्णभेदात् त्रिविधः ।

इदानीं प्रसङ्गात् पाकजप्रक्रिया चिन्त्यते—तत्र कार्य्यकारणसमुदाय एव पच्यते इति पिठरपाकवादिनः ।

पीलवः—परमाणव एव स्वतन्त्राः पच्यन्ते, तत्रैव पूर्वरूपनाशाग्निमरूपाद्युत्पत्तिः कारणगुणप्रक्रमेण चावयविनि रूपाद्युत्पद्यते इति पीलुपाकवादिनः ।

अत्रेदं तत्त्वम् । आपाके निःक्षिप्तस्य घटादेरामद्रव्यस्य वह्निना नोदनादभिघाताद्वा तदारम्भकेषु परमाणुषु द्रव्यारम्भकसंयोगविरोधिविभागेनारम्भकसंयोगनाशे द्रव्यनाशावश्यम्भावात् । दृश्यते हि स्थाल्यामाहितानां तण्डुलादीनामप्यधःसन्तापनमात्रेण भर्जनात्तदानीमेव नाशः, क्षीरनीरादीनाञ्चात्यन्तमुल्वणता । तथाचापाके

(१) नयनेति । चाक्षुषप्रत्यक्षे सहकारीत्यर्थः ।

(२) त्रयाणामिति । अन्यथा रक्तालोकस्थितशङ्खस्य रक्ततया, पित्तदूषितचक्षुःसन्निकृष्टस्य च पीततया ग्रहणं न स्यादित्यर्थः । नव्यास्तु विषयगतरूपस्यैव कारणत्वम् आलोकादेरपि विषयत्वेन न रक्तालोकस्थशङ्खे रक्तत्वानुपपत्तिरित्याहुः ।

(३) आरोग्यहेतुरिति । अत्र मरणकृशत्वदौर्बल्यान्यपि उपलक्षणीयानि, तेषामपि रसजन्यत्वात् । गन्धादीनामपि रसोपग्रहेणैव जीवनादिहेतुत्वात् न तेषु तदुक्तिः ।

(४) जातिमत्त्वमिति । घ्राणरूपबाह्यैकेन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वार्थकन्तत्पदमन्यथा तस्य निरर्थकत्वापत्तिः स्यात् । अत्रापि अतीन्द्रियगन्धातिव्याप्तिवारणं जातिघटितलक्षणप्रयोजनं ज्ञेयम् ।

त्रसरेणुमारभ्य महावयविपर्य्यन्तं महत्त्वदीर्घत्वे । एवञ्च सर्वाण्यपि द्रव्याणि पारमाणद्वयवन्ति । बिल्वामलकादावणुत्वव्यवहारः समिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारो भाक्तः। भक्तिश्चात्र प्रकर्षभावाभावः । आमलके यः प्रकर्षभावस्तस्याभावः कुवले, बिल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणमुख्योभयभागित्वाद् भक्तिपदवाच्यः। दीर्घत्वह्रस्वत्वे नित्ये न वर्त्तेते इत्येके। परिमाण एव ते न भवत इत्यपरे। महत्सु दीर्घमानीयतामितिवत् महत्सु वर्त्तुलं त्रिकोणञ्चानीयतामिति निर्धारणबलाद्वर्तुलत्वादीनामप्यापत्तेरिति तेषामाशयात् ॥ ८ ॥

इदानीं परिमाणकारणानि परिसञ्चष्टे—

कारणबहुत्वाच्च ॥ ९ ॥

चकारो महत्त्वप्रचयौ समुच्चिनोति । परिमाणमुत्पद्यते इति सूत्रशेषः। तत्र कारणबहुत्वं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात । तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः। एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते । द्वाभ्यां तन्तुभ्यामप्रचिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात्। यत्र च द्वाभ्यां तूलकपिण्डाभ्यां तूलकपिण्डारम्भस्तत्र परिमाणोत्कर्षदर्शनात प्रचयः कारणं बहुत्वस्याभावात्, महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्ष प्रत्यप्रयोजकत्वात् । एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः । तदुक्तं—"द्वाभ्यामेकेन सर्वैर्वा" इति। प्रचयश्च आरम्भकः संयोगः। स च स्वाभिमुखाकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः। स चावयवसंयोगः स्वावयवप्रशिथिलसंयोगापेक्षः परिमाणजनकः 'गुणकर्मारम्भे सापेक्ष' इति वचनात् ॥ ९ ॥

महत्त्वदीर्घत्वे व्युत्पाद्याणुत्वं व्युत्पादयति—

अतो विपरीतमणु ॥ १० ॥

अतः प्रत्यक्षसिद्धान्महतः परिमाणाद्यद्विपरीतं तदणुपरिमाणमित्यर्थः। वैपरीत्यञ्चाप्रत्यक्षत्वात् कारणवैपरीत्याच्च। महत्त्वे हि म-

ह्रस्वबहुत्वप्रचयानां कारणत्वम्। अणुत्वे च कारणगतस्य द्वित्वस्येश्वरापेक्षाबुद्धिजन्यस्य कारणत्वम्। एतेन दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यम्। वैपरीत्यञ्चात्रापि पूर्ववत्॥ १०॥

इदानीं कुवलामलकादावणुत्वव्यवहारो भाक्त इति दर्शयति—

अणु महदिति तस्मिन् विशेषभावात् विशेषाभावाच्च॥ ११॥

इतिशब्दो व्यवहारपरतां दर्शयति। तेन विल्वापेक्षया कुवलमणु कुवलापेक्षयामलकं महत् आमलकापेक्षया बिल्वं महदिति, तावद्व्यवहारोऽस्ति, तत्र महदिति तेषु व्यवहारो मुख्यः। कुत एवमत आह—विशेषभावात् महत्त्वविशेषस्यैव तरतमादिभावेन भावात्, अणुव्यवहारस्तु तेषु भाक्तः। कुत एवमत आह—विशेषाभावात् अणुत्वविशेषस्य तत्राभावात्। अणुत्वं हि कार्य्यं द्व्यणुकमात्रवृत्ति, नित्यं तु परमाणुवृत्ति, कुवलादौ तदभावात्।

यद्वा विशेषस्य महत्त्वकारणस्यैवावयवबहुत्वमहत्त्वप्रचयानां कुवलाद्यवयवेषु भावात् सद्भावात्, विशेषाभावात् विशेषस्य अणुत्वकारणस्य महत्त्वासमानाधिकरणद्वित्वस्य कुवलाद्यवयवेष्वभावादसद्भावादित्यर्थः॥ ११॥

अणुत्वव्यवहारो भाक्त इत्यत्र हेतुमाह—

एककालत्वात्॥ १२॥

महत्त्वमणुत्वञ्च द्वयमप्येकस्मिन् कालेऽनुभूयते, ते च महत्त्वाणुत्वे परस्परविरोधिनी नैकत्राश्रये सह सम्भवतः, अतो महत्त्वकारणसद्भावान्महत्त्वप्रत्ययस्तत्र मुख्योऽणुत्वप्रत्ययप्रयोगौ च भाक्तावित्यर्थः॥ १२॥

महत्त्वप्रत्ययस्य मुख्यत्वे हेतुमाह—

दृष्टान्ताच्च॥ १३॥

दृश्यते तथा वस्तुगत्या महत्स्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारेण भवितव्यमित्यर्थः। यथा वस्तुगत्या शुक्लेष्वेव पटशङ्खस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारः॥ १३॥

नन्वणु महत्परिमाणमिति व्यवहाराबलान्महत्त्वे अपि परिमाणे महत्त्वमणुत्वेऽप्यणुत्वमस्तीति ज्ञायते तत् कथं 'द्रव्यमात्रवृत्तित्वमनयोः कथं वा गुणे गुणवृत्तित्वविरोधो नापद्यत इत्यत आह—

अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ॥ १४ ॥

यथा गुणकर्मणी नाणुत्वमहत्त्ववती तथाऽणुत्वमहत्त्वे अपि नाणुत्वमहत्त्ववती इत्यर्थः। प्रयोगश्च भाक्तो द्रष्टव्यः ॥ १४ ॥

ननु यथा गुणा गुणवन्तः,-कथमन्यथा महान् शब्दः द्वौ शब्दौ एकः शब्दः चतुर्विंशतिर्गुणा इत्यादिव्यवहारः। कर्माण्यपि च कर्मवन्ति प्रतीयन्ते कथमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीति व्यवहारः तथाचाणुत्वमहत्त्वे अपि तद्वती स्यातामित्यत आह—

कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥ १५ ॥

कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणा न तद्वन्तस्तथाऽणुत्वमहत्त्वेऽपि न तद्वती व्यवहारस्तु सर्वत्र भाक्त इत्यर्थः १५ ॥

ननु महान्ति कर्माणि अणूनि कर्माणि महान्तो गुणाः अणवो गुणा इत्यादिव्यवहारादणुत्वमहत्त्ववन्ति कर्माणि तदुभयवन्तश्च गुणाः प्रसक्ता इत्यत आह—

अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥ १६ ॥

यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा न कर्माणि तदुभयवन्ति न वा गुणास्तदुभयवन्त इत्यर्थः। प्रयोगस्तु पूर्ववद्भाक्त इति भावः ॥ १६ ॥

अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति—

एतेन दीर्घत्वह्रस्वत्वे व्याख्याते ॥ १७ ॥

ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती महत्त्वोत्पादकमेव दीर्घत्वोत्पादकमणुत्वोत्पादकमेव ह्रस्वत्वोत्पादकम्। कारणैक्यात् कथं कार्य्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः। यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र ह्रस्वत्वं यत्र नित्यमणुत्वं तत्र नित्यह्रस्वत्वमित्याद्यतिदेशार्थः ॥ १७ ॥

इदानीं विनाशकमाह—

अनित्येऽनित्यम् ॥ १८ ॥

एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात् । घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुभङ्गेऽपि स एवायं घट इति प्रत्यभिज्ञेति चेन्न आश्रयनाशेन तत्र घटनाशावश्यकत्वात्(१), न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य त्रसरेणोस्तदाश्रितस्य चूर्णशर्करादेरविनाश इति युक्तिरभ्युपगमो वा। कथं तर्हि प्रत्यभिज्ञेति चेत्? सैवेयं दीपकलिकेतिप्रत्यभिज्ञानवद्भ्रान्तत्वात् । प्रदीपप्रत्यभिज्ञाऽपि प्रमैव ह्रस्वत्वदीर्घत्वे परमुत्पादविनाशशालिनी इति चेन्न तद्विनाशस्याश्रयविनाशमन्तरेणानुपपत्तेरुक्तत्वात् ॥ १८ ॥

तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्वमपि नश्यतीत्यत आह—

नित्ये नित्यम् ॥ १९ ॥

नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं ,विनाशकाभावात् ॥ १९ ॥

परमाणुपरिमाणस्य वैशेषिकसिद्धां संज्ञामाह—

नित्यं परिमण्डलम् ॥ २० ॥

परिमण्डलमेव पारिमाण्डल्यम्, तदुक्तम्—"अन्यत्र पारिमाण्डल्यादिभ्यः" इति ॥ २० ॥

ननु कुवलामलकादिषु समिदिक्षुप्रभृतिषु च व्यवह्रियमाणमणुत्वं ह्रस्वत्वं वा यदि न पारमार्थिकं तदा पारमार्थिकयोस्तयोः किं प्रमाणमत आह—

---

(१) नच पटाविनाशेपि तन्त्वन्तरसंयोगात्कथं परिमाणाधिक्यमिति वाच्यम् तत्रापि वेमाद्यभिघातेनासमवायिकारणनाशादेव पटनाशस्यावश्यकत्वात् । किञ्च तन्त्वन्तरन्तत्पटावयवे अस्ति न वा ? आद्ये पूर्वं तत्पट एव न स्यात्तत्तन्तुरूपकारणाभावात् । द्वितीये न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशात्पटान्तरोत्पत्तिरिति स्वीकार्यम् । प्रत्यभिज्ञा तु सैवेयं दीपकलिकेतिवद्भ्रमाधीनेति स्वयमनुपदमाहेति सङ्क्षेपः ।

अविद्या च विद्यालिङ्गम् ॥ २१ ॥

विद्यालिङ्गमविद्या। तदयमर्थः—कुवलामलकादावणुत्वज्ञानं समिदिक्षुप्रभृतिषु ह्रस्वत्वज्ञानं तावदविद्या तत्र परमार्थिकाणुत्वह्रस्वत्वयोरभावात्। सर्वत्राप्रमा प्रमापूर्विकैव भवतीत्यन्यथाख्यातिवादिभिरभ्युपगमात्, तथाच सत्यमणुत्वज्ञानं सत्यञ्च ह्रस्वत्वज्ञानमनुमेयमित्यर्थः। एवञ्च भाक्तः शब्दप्रयोगो मुख्यमन्तरेण न भवतीति मुख्येऽणुत्वह्रस्वत्वे क्वचिदवश्यं मन्तव्ये ॥ २१ ॥

द्रव्यत्वेन हेतुनाऽऽकाशादीनामनुमितस्य परिमाणस्य स्वरूपमाह—

विभवान्महानाकाशस्तथाचात्मा ॥ २२ ॥

विभवः सर्वमूर्त्तसंयोगित्वं, तच्च परममहत्त्वमन्तरेणानुपपद्यमानं परममहत्त्व(१)मनुमापयति। दृश्यते चेह वाराणस्यां पाटलिपुत्रे च युगपदेव शब्दोत्पत्तिस्तत्र चैकमेवाकाशं समवायिकारणमित्याकाशस्य व्यापकत्वं सिद्धम्। व्यापकत्वञ्च परममहत्परिमाणयोग एव, नानाऽऽकाशकल्पने गौरवमित्येक एवाकाशोऽभ्युपगन्तव्यः। आकाशस्य प्रदेश इति तु व्यपदेशः प्रदेशवद्भिर्घटादिभिः संयोगनिबन्धनो भाक्तः। भक्तिश्च प्रदेशवद्द्रव्यसंयोगित्वम्। तथात्मेति। यथाकाशं विभवात् सर्वमूर्त्तसंयोगित्वात् परममहत् तथात्मापि परममहान्। यद्यात्मनः सकलमूर्तसंयोगित्वं न भवेत् तदा तेषु तेषु मूर्तेषु अदृष्टवदात्मसंयोगात् क्रिया नोत्पद्येत व्यधिकरणस्यादृष्टस्य प्रत्यासत्त्यपेक्षया क्रियाजनकत्वात्। सा च प्रत्यासत्तिरदृष्टवदात्मसंयोग एव। एवं सञ्चारिणि शरीरे तत्र तत्र ज्ञानसुखादीनामुत्पत्तिरात्मनो वैभवमन्तरेणानुपपन्नेत्यात्माऽपि व्यापकः। स च नाकाशवदेक एव (२)व्यवस्थादर्शनादित्युक्तमिति भावः। तच्च महत्त्वं सातिशयं नित्यञ्च परमाण्वणुत्ववत्। एवमाकाशादौ परमदीर्घत्वं परमाणुषु च परमह्रस्वत्वमूहनीयम् ॥ २२ ॥

---

(१) अनुमापयतीति। तथा चाकाशं परममहत् सर्वमूर्तसंयोगित्वादिति प्रयोगः। आकाशस्य सर्वमूर्तसंयोगित्वाभावे नानादेशावच्छेदेन शब्दोत्पत्त्यसम्भवात्तत्तद्देशाकाशसंयोगस्तत्तच्छब्दासमवायिकारणम् एवञ्चासमवायिकारणसंयोगाश्रयत्वेनाप्याकाशसिद्धिः सूचितेति बोध्यम्। एवमात्मन्यपि।

(२) व्यवस्थादर्शनादिति। व्यवस्थातो नानेति तृतीयाध्यायीयद्वितीयाह्निके व्यवस्था प्रदर्शितेति भावः।

ननु मनो विभु सर्वदा निःस्पर्शद्रव्यत्वादाकाशवत् ज्ञानाद्यसमवायिकारणसंयोगाधारत्वादात्मवदित्याकाशात्मनोः साहचर्येण मनोऽपि किं नोक्तमत आह—

तदभावादणु मनः ॥ २३ ॥

तस्य विभवस्य सर्वमूर्तसंयोगित्वस्याभावादणु मनः। सकलमूर्त्तसंयोगित्वे तु युगपदनेकेन्द्रियसंयोगे ज्ञानयौगपद्यं स्यात्, तथा च (१)व्यासङ्गो न स्यात्। अनुमाने तु मनो यावन्न सिद्धं तावदाश्रयासिद्धे मनःसिद्धिदशायान्तु (२)धर्मिग्राहकमानबाधिते। ननु विभवाभावादेव नाणुत्वं सिध्यति घटादौ व्यभिचारादिति चेन्न विभवाभावेनाव्यापकत्वसाधनात्। तथाचैकस्मिन्देहे मनस्तावदेकं नानाकल्पने गौरवापत्तेः। एकस्याप्यवयवकल्पने कल्पनागौरवान्निःस्पर्शत्वेनानारम्भकत्वाच्चेत्यादियुक्तेरणुत्वसिद्धेरिति भावः ॥ २३ ॥

दिशः परममहत्त्वे युक्तिमाह—

गुणैर्दिग् व्याख्याता ॥ २४ ॥

गुणैः सकलद्वीपवर्त्तिपुरुषसाधारणपूर्वापरादिप्रत्ययरूपैः सकलमूर्तनिष्ठपरत्वापरत्वलक्षणैः(३) दिगपि व्यापकत्वेन व्याख्यातेत्यर्थः। परत्वापरत्वयोरुत्पत्तौ संयुक्तसंयोगभूयस्त्वाल्पीयस्त्वाविषयापेक्षाबुद्धेः कारणत्वस्य (४)वक्ष्यमाणत्वात्। नानादिक्कल्पनस्य कल्पनागौरवप्रतिहतत्वात्। कथं तर्हि दश दिश इति प्रतीतिव्यपदेशाविति चेन्न तत्तदुपाधिनिबन्धनत्वादित्युक्तत्वात् ॥ २४ ॥

कालस्य व्यापकत्वमाह—

कारणे कालः ॥ २५ ॥

परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययकारणे द्रव्ये

---

(१) व्यासङ्ग इति। मनसो विषयान्तरासक्तत्वं व्यासङ्गः। इन्द्रियाणां स्वस्वविषयसम्बन्धे सति यत्किञ्चिदिन्द्रियजन्यज्ञाने सत्यपि इन्द्रियान्तरजन्यज्ञानाभाव इति न स्यादित्यर्थः।

(२) धर्मिग्राहकमानेति। ज्ञानायौगपद्यरूपं यत् अणुमनोग्राहकमानं तेन बाधित इत्यर्थः।

(३) परत्वलक्षणैरिति। तदाश्रयसंयोगैः परत्वापरत्वासमवायिकारणरूपैस्तादृशदिक्पिण्डसंयोगाश्रयतया दिक्सिद्धिरित्यर्थः।

(४) वक्ष्यमाणत्वात् इति। सप्तमाध्यायद्वितीयाह्निके परत्वापरत्वनिरूपणे इति शेषः।

काल इति समाख्या । न चैतादृशः प्रत्ययः सर्वदेशपुरुषसाधारणः कालस्य व्यापकतामन्तरेण सम्भवतीति तस्य व्यापकत्वं परममहत्त्वयोग इत्यर्थः ।

यद्वा इदानीं जात इत्यादिप्रतीतिबलात् सर्वोत्पत्तिमन्निमित्तकारणत्वं कालस्य प्रतीयते तदपि व्यापकत्वाधीनं निमित्तकारणस्य समवाय्यसमवायिकारणप्रत्यासन्नत्वनियमात् ।

यद्वा अतीतानागतवर्तमानव्यवहारः सार्वत्रिक इति सर्वगत एव कालः ।

यद्वा क्षणलवमुहूर्त्तयामदिनाहोरात्रपक्षमासर्त्वयनसंवत्सरादिव्यवहारकारणे द्रव्ये कालाख्येति व्यवहारस्य सार्वत्रिकत्वात् कालः सार्वत्रिक इति परममहान्, तस्य नानात्वकल्पना च कल्पनागौरवप्रतिहतेत्युक्तम् ॥ २५ ॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारे सप्तमाध्यायस्याद्यमाह्निकम् ।

सप्तमाध्याये द्वितीयाह्निकम् ।

द्वितीयाह्निके एकानेकवृत्तिगुणपरीक्षाप्रकरणम् अनेकमात्रवृत्तिगुणपरीक्षाप्रकरणम् प्रसङ्गाच्छब्दार्थसम्बन्धपरीक्षाप्रकरणम् विशेषगुणरहिताविभुसंयोगासमवायिकारणकैकवृत्तिगुणपरीक्षाप्रकरणम् समवायपरीक्षाप्रकरणञ्चेति । तत्र महत्त्वैकार्थसमवायाधीनं सङ्ख्यादीनामपि प्रत्यक्षत्वमिति चोद्देशक्रममतिक्रम्य परिमाणनिरूपणानन्तरं सङ्ख्यां पृथक्त्वञ्च परीक्षितुमाह—

(१)रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् ॥ १ ॥

रूपरसगन्धस्पर्शेति,-सङ्ख्यादिपञ्चकभिन्नगुणोपलक्षणम् । व्यतिरेकादिति-व्यभिचारात् । तदयमर्थः—एको घट इति विशिष्टप्रतीतिर्विशेषणजन्या, तच्च विशेषणं न रूपादि, तद्व्यतिरेकेण जायमानत्वात्, न च घटत्वादिकमेव निमित्तम्, पटेऽपि जायमानत्वात् । न चैकत्वं सत्तावत् सामान्यम्, सत्तया सहान्यूनानतिरिक्तवृत्तित्वात् । न च द्रव्यमात्रसामान्यं तत्, द्रव्यत्वेनान्यूनानतिरिक्तदेशत्वात् । न चान्यूनानतिरिक्तदेशत्वेऽपि प्रतीतिभेदाद्भेदः, प्रतीतिभेदस्य स्वरूपकृतत्वे सत्ताऽपि भिद्येत, विषयभेदकृतत्वे तु विषयभेदानुपपत्तेरुक्तत्वात्, अन्यथा घटत्वकलसत्वयोरपि भेदापत्तेः । न च स्वरूपाभेद एकत्वमिति भूषणमतं युक्तम्, घटस्वरूपाभेदश्चेदेकत्वं तदा पटादावेकत्वप्रत्ययो न स्यात् । स्वरूपभेदो द्वित्वादिकमित्यपि भूषणमतमनुपपन्नम् स्वरूपभेदस्य त्रिचतुरादिसाधारण्येन व्यवहारवैचित्र्यानुपपत्तेरिति भावः ॥ १ ॥

एकत्वतुल्यतयैकपृथक्त्वमपि साधयितुमाह—

तथा पृथक्त्वम् ॥ २ ॥

अपोद्धारव्यवहारस्तावदस्ति—इदमस्मात् पृथगन्यदर्थान्तरमित्याकारः । अपवृज्यावधिमपेक्ष्य य उद्धारो निर्द्धारणं स ह्यपोद्धारः,

---

(१) रूपरसेति । एकत्वं रूपादिभ्योऽर्थान्तरं नतु तत्स्वरूपम्, काल एक इत्यादि प्रतीत्या रूपादिभिन्नो संख्यादिरूपो गुणोऽवश्यमङ्गीकार्यः काले रूपादीनामभावादिति सूत्रार्थः ।

तत्र च न रूपादि तन्त्रं (१)व्यभिचारादवध्यनिरूप्यत्वाच्च । नन्व-न्योन्याभाव एव पृथक्त्वम्, इदमस्मात् पृथगन्यदर्थान्तरमितिवाङ्क्ष्मिति प्रतीतेरन्योन्याभावावलम्बनत्वात् । न, पृथगादिशब्दानां पर्यायत्वेऽपि नान्योन्याभावार्थत्वं तत्र पञ्चमीप्रयोगानुपपत्तेः, इदमस्मात् पृथक् इदमिदं न भवतीतिप्रतीत्योर्भिन्नविषयत्वात् । न चान्योन्याभाववानर्थः पृथक्त्वम् अघटः पट इत्यत्रापि पञ्चमीप्रयोगापत्तेः। ननु पृथगिति-विशिष्ट इति-प्रतीत्योरेकाकारत्वाद्वैशिष्ट्यमेव पृथक्त्वमिति चेन्न मैत्रस्य दण्डवैशिष्ट्यदशायां मैत्रात् पृथगयं मैत्र इत्यपि प्रतीत्यापत्तेः, एवं शब्दविशिष्टे व्योम्नि बुद्धिविशिष्टे चात्मनि पृथक्त्वव्यवहारापत्तेः। अत एव वैधर्म्यमपि न पृथक्त्वं पाकरक्ते घटे श्यामाद्घटात् पृथगयं घट इति व्यवहारापत्तेः, तद्विरोधिधर्मवत्त्वमेव हि तद्वैधर्म्यं तच्च श्यामानन्तरं रक्ततादशायामपि। जातिन च सामान्यमेव पृथक्त्वं सामान्यस्यावध्यनिरूप्यत्वात्। जातिसङ्करप्रसङ्गाच्च,-(२)सन्मात्रवृत्तित्वे सत्तया, द्रव्यमात्रवृत्तित्वे द्रव्यत्वेनान्यूनानतिरिक्तवृत्तित्वापत्तेः ॥ २ ॥

नन्वेकमेकत्वं-रूपादिभ्यः पृथक् पृथक्त्वमिति-व्यवहारादेकत्वेऽप्येकत्वं, पृथक्त्वेऽपि पृथक्त्वमेवं तत्र तथापीत्यत आह—

एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ३ ॥

यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तद्व्यवहारस्तत्र भाक्तस्तथैकत्वैकपृथक्त्वे नैकत्वैकपृथक्त्ववती तद्व्यवहारस्तत्र भाक्त इत्यर्थः। "कर्मभिः कर्माणि" "गुणैर्गुणाः" इत्यपि दृष्टान्तसूत्रद्वयं पूर्वदृष्टान्तसूत्रेणैकवाक्यतापन्नमेवात्र प्रतिभासते यथा कर्माणि न कर्मवन्ति गुणाश्च न गुणवन्तस्तथैकत्वैकपृथक्त्वे न तद्वती इत्यर्थः ॥ ३ ॥

ननु गुणेषु कर्मसु च साधारण एवैकत्वव्यवहारः किमत्र विनिगमकं यद्द्रव्येष्वेवैकत्वं न गुणादिष्वित्यत्राह—

---

(१) व्यभिचारादिति। काल आकाशात्पृथगित्यत्र रूपाद्यभावादित्यर्थः। अवध्यनिरूपितत्वादिति। रूपादीनामिति शेषः।

(२) सङ्करमेवोपपादयति सन्मात्रवृत्तित्वेत्यादिना।

निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते ॥ ४ ॥

सर्वेषामेकत्वं सर्वैकत्वं तन्न विद्यते, कुत इत्यत आह—निःसङ्ख्यत्वात् कर्मगुणानामिति । सङ्ख्याया निष्क्रान्ताः निःसङ्ख्यास्तेषां भावो निःसङ्ख्यत्वम्, तथाच कर्माणि गुणाश्च निःसङ्ख्यानि, सङ्ख्याया गुणत्वेन गुणेषु तावत् सङ्ख्या न विद्यते न वा कर्मसु, गुणानां कर्मसु निषेधात् अन्यथा द्रव्यत्वप्रसङ्गात् । साधितश्च सङ्ख्याया गुणत्वमेकत्वस्य च सङ्ख्यात्वमिति भावः ॥ ४ ॥

तर्हि कथमेकं रूपमेको रस इत्यादिज्ञानमित्यत आह—

भ्रान्तं तत् ॥ ५ ॥

गुणकर्मसु यदेकत्वज्ञानं तद् भ्रान्तमित्यर्थः । सूत्रे च ज्ञानमिति शेषः आक्षिप्तपूर्वपक्षत्वात्(१), प्रयोगस्तु भाक्तः स्वरूपाभेद एव च भक्तिः न च तदेवैकत्वमुक्तोत्तरत्वात् ॥ ५ ॥

ननु द्रव्येष्वप्ययमेकत्वप्रयोगो भाक्तोऽस्तु प्रत्ययस्तु तत्र भ्रान्तः किमेकत्वेनेत्यत आह—

एकत्वाभावाद्भक्तिस्तु न विद्यते ॥ ६ ॥

यदि पारमार्थिकमेकत्वं क्वचिन्नाभ्युपगन्तव्यं तदा न प्रयोगो भाक्तः मुख्यपूर्वकत्वाद्भक्तेः, न वा प्रत्ययो भ्रान्तः प्रमापूर्वकत्वाद्भ्रमस्य, प्रमितं ह्यारोप्यते नाप्रमितम् असत्ख्यातेर्निरासात् अन्यथाख्यातेः साधनादिति भावः ॥ ६ ॥

कार्य्यकारणयोस्तन्तुपटयोरेकत्वमेकपृथक्त्वञ्च,यत एवैकत्वमत एवैकपृथक्त्वमपि न हि स्वस्मादेव स्वं पृथगिति सम्भवति, न हि पटे पाट्यमाने प्रत्येकं तन्तूनामाकर्षे तद्भिन्नः पट उपलभ्यते, यदि तन्तुभिन्नः पटः स्यात् तदा तद्भिन्नतयोपलभ्येत घटवत्, एवं घटेऽपि भग्ने कपालद्वयातिरिक्तस्यानुपलम्भात् घटोऽपि कपालद्वयात्मक एव तदुक्तं—"नान्योऽवयव्यवयवेभ्यः" इति तदिदं साङ्ख्यीयं मतं प्रसङ्गान्निराचिकीर्षुराह—

(१) पूर्वपक्षत्वादिति । ज्ञानस्येत्यर्थः ।

**कार्यकारणयोरेकत्वैकपृथक्त्वाभावादेकत्वैकपृथ-
क्त्वं न विद्यते ॥ ७ ॥**

कार्यं कारणञ्च द्वयमेकं न भवति, कुत एतदित्याह—एकत्वाभा-
वादभेदाभावात्। (१)तर्हि यदेव कार्य्यं तदेव कारणं तन्तवः पट
इति बहुत्वैकत्वयोः सामानाधिकरण्यानुपपत्तेः। भवत्येव सामाना-
धिकरण्यमेकस्यामपि पाथःकणिकायामाप इति प्रयोगात् एकस्याम-
पि योषिति दारा इति प्रयोगादिति चेन्न तत्रावयवबहुत्वमादायोप-
पत्तेः। पाथःपरमाणौ तु प्रकृतिगतं रूपादिबहुत्वमादायेत्येके। (२)श-
ब्दस्वाभाव्यमिदमपर्यनुयोज्यमित्यपरे। न च (३)रण्डाकरण्डा-
वस्थितास्तन्तवः पटव्यपदेशं लभन्ते, न वा धारणाकर्षणे त-
न्तवः प्रत्येकं कर्तुमीशते, न वा कार्य्यं कारणञ्च द्वयमप्येकपृथक्त्वा-
श्रयः परस्परावधिकत्वप्रतीतेः। कुत इत्यत आह—एकपृथक्त्वाभावात्
एकपृथक्त्वमवैधर्म्यं तदभावात् कार्य्यकारणयोरन्योन्यवैधर्म्यानु-
भवात् तन्तुत्वपटत्वयोः घटत्वकपालत्वयोश्च भिन्नबुद्धिव्यपदेशयोः
सार्वलौकिकत्वात्। कथं तर्हि रूपरसगन्धस्पर्शानां न भेदेनोपल-
म्भः ? अत्यन्तसारूप्यात्, क्वचिच्चित्रपटादौ भेदोपलम्भोऽपि, स-
ङ्ख्यापरिमाणादिभेदस्य चातिस्फुटत्वात् ॥ ७ ॥

अनित्ययोरेकत्वैकपृथक्त्वयोः कारणगुणपूर्वकत्वमाह—

एतदनित्ययोर्व्याख्यातम् ॥ ८ ॥

अनित्ययोः सङ्ख्यापृथक्त्वयोः कारणगुणपूर्वकत्वं यद्व्याख्यातं त-
दनित्ययोरेकत्वैकपृथक्त्वयोरेव बोद्धव्यम्, अन्येषां सङ्ख्यापृथक्त्वाना-
मपेक्षाबुद्धिजन्यत्वात्, यथाऽनित्ययोस्तेजोरूपस्पर्शयोः कारणगुण-
पूर्वकत्वं तथैकत्वैकपृथक्त्वयोरप्यनित्ययोरिति भावः। अर्थात् (४)'अ-
नेकद्रव्या द्वित्वादिका परार्द्धान्ता' इत्युपसङ्ख्यानम्, उपसङ्ख्यानान्त-

---

(१) तर्हीति। कार्यकारणयोरभेद इत्यर्थः।

(२) शब्देति। दाराः पुंभूम्नि, आपः स्त्रीभूम्नि इति कोषादिव्युत्पादितस्वभावात्तथा प्रयोग इति भावः।

(३) रण्डाकरण्डेति। रण्डाकरण्डे ओषधिविशेषौ यत्र तन्तव उत्पद्यन्ते इत्यर्थः।

(४) अनेकेति। द्वित्वादिपरार्धान्तसंख्या अनेकद्रव्या नानैकत्वाद्यपेक्षाबुद्धिजन्येत्यर्थः। उपसंख्यानं भाष्यसूत्रं तदिति। तादृशापेक्षाबुद्धिजन्यद्वित्वादिसमानाधिकरणमित्यर्थः।

स्य-'तत्समानाधिकरणश्च द्विपृथक्त्वादिपरार्द्धपृथक्त्वपर्य्यन्तम्'।

तदयं द्वित्वाद्युत्पादविनाशक्रमः-समानजातीययोरसमानजातीययोर्द्रव्ययोश्चक्षुःसन्निकर्षे सति तन्निष्ठैकत्वसङ्ख्ययोर्यत्सामान्यमेकत्वत्वं तयोर्निर्विकल्पकानन्तरं तद्विशिष्टगुणबुद्धिरुत्पद्यते सैव चापेक्षाबुद्धिस्तया तयोर्द्रव्ययोर्द्वित्वमुत्पद्यते, उत्पन्नस्य च द्वित्वस्य यत्सामान्यं द्वित्वत्वं तदालोचनं तेनालोचनेनापेक्षाबुद्धेर्नाशो द्वित्वत्वविशिष्टद्वित्वगुणविषया विशिष्टबुद्धिश्चैकदा भवति, तदग्रिमक्षणे च द्वित्वगुणस्यापेक्षाबुद्धिविनाशाद्विनाशः द्वे द्रव्ये इति द्वित्वविशिष्टद्रव्यज्ञानञ्च युगपदुत्पद्यते, ततस्तस्माद् द्वित्वविशिष्टद्रव्यज्ञानात् संस्कारः।

तदयं संक्षेपः-उत्पत्स्यमानद्वित्वाधारेणेन्द्रियसन्निकर्षः १ ततः एकत्वगुणगतसामान्यज्ञानं २ तत एकत्वत्वसामान्यविशिष्टैकत्वगुणसमूहालम्बनरूपाऽपेक्षाबुद्धिः ३ ततो द्वित्वगुणोत्पत्तिः ४ तद्गतसामान्यस्य ज्ञानं ५ ततस्तत्सामान्यविशिष्टद्वित्वगुणज्ञानं ६ ततो द्वित्वगुणविशिष्टद्रव्यज्ञानं ७ ततः संस्कारः ८ इतीन्द्रियसन्निकर्षमारभ्य संस्कारपर्यन्तमष्टौ क्षणाः।

विनाशक्रमस्तु-एकत्वत्वसामान्यज्ञानस्यापेक्षाबुद्धितो विनाशः द्वित्वत्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशः द्वित्वसामान्यज्ञानस्य च द्वित्वगुणबुद्धितो विनाशः द्वित्वगुणबुद्धेश्च द्वित्वविशिष्टद्रव्यज्ञानात् तस्य च संस्कारात् विषयान्तरज्ञानाद्वेति।

नन्वेकत्वज्ञानात्तद्विशिष्टद्रव्यज्ञानमेव कथं नोत्पद्यते तत्सामग्रीसत्त्वात्, न हि गुणज्ञाने सति द्रव्यज्ञाने विलम्बोऽस्ति तथाच तत एवापेक्षाबुद्धेर्विनाशो तन्नाशाच्च तदग्रिमक्षण एव द्वित्वनाश इति द्वे द्रव्ये इति विशिष्टज्ञानपूर्वक्षण एव द्वित्वविनाशापत्त्या द्वित्वविशिष्टद्रव्यज्ञानस्यानुत्पत्तिरेवेति चेन्न द्वित्वाद्युत्पत्तिसामग्र्यनाभिभूताया एवापेक्षाबुद्धेर्द्रव्यविशिष्टज्ञानजनकत्वनियमात् फलबलेन तथा कल्पनात्। ननु तथापि स्वजनितसंस्कारेणैवापेक्षाबुद्धिविनाशे पुनः स दोषस्तदवस्थ एव, द्वित्वविशिष्टज्ञानपूर्वक्षण एव द्वित्वनाशस्य सम्भवादिति चेन्न केवलगुणज्ञानस्य संस्काराजनकत्वात् न हि केवलो गुणः क्वापि स्मर्यते, सर्वत्र द्रव्योपरागेणैव गुणस्मरणात्। ननु भवत्वेवं तथापि विशिष्टबुद्धिकालेऽपि द्वित्वनाशो विशि-

ष्टप्रतीत्यनुदयस्तदवस्थ एव, नहि वर्तमानावभासिनी विशिष्टप्रतीतिर्विशेषणनाशकाले सम्भवति तथाऽदर्शनादिति चेन्न विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य विशिष्टज्ञानसामग्र्याः प्रकृतेऽपि सम्भवात्। यदि तु विशेषणेन्द्रियसन्निकर्षोऽपि मृग्यते तदा पूर्वक्षणे तस्यापि सत्त्वात् पूर्वक्षणवर्त्तिन एव सन्निकर्षस्य कारणत्वेनाभ्युपगमात्, विशेषणं विशिष्टज्ञानागोचरोऽपि सम्भवति विशिष्टज्ञानजनकज्ञानविषयत्वमात्रमेव हि विशेषणत्वे तन्त्रं न तु विशिष्टज्ञानविषयत्वमपि। उपलक्षणस्याप्येवं विशेषणत्वापत्तिरिति चेन्न प्रत्याय्यव्यावृत्तिसामानाधिकरण्यस्य विशेषणत्वे तन्त्रत्वात्, उपलक्षणन्तु तद्व्यधिकरणम्। एवं यदा देवदत्तगृहे काकवत्ता तदा काको विशेषणं, यदा तु उपरि भ्रमन् असन् तदोपलक्षणम्। एवं सति रूपवति रस इत्यादौ रूपादेरपि विशेषणत्वापत्तिरिति चेन्न इष्टत्वात्। तर्हि तत्रापि रसो वर्त्तेतेति चेन्न विशिष्टवृत्तेर्विशेषणवृत्तित्वानावश्यकत्वात्, न हि विशेषणं विशिष्टमित्येकं तत्त्वम्। द्वित्वनाशकाले विशेषणसम्बन्धो नास्ति कुतो विशिष्टप्रत्यय इति चेन्न अतद्व्यावृत्तेरेव वैशिष्ट्यपदार्थत्वात्, तज्ज्ञानन्तु तत्रापीति न किञ्चिदनुपपन्नमित्याचार्य्याः। एवं द्वित्वोत्पत्तिविनाशवन्त्रित्वोत्पत्तिविनाशावप्यूहनीयौ।

द्वित्वमपेक्षाबुद्धिनाशनाश्यम्, आश्रयनाश-विरोधिगुणान्तराभावे गुणस्य सतोऽविनाशित्वात् चरमज्ञानवत्, चरमज्ञानस्यादृष्टनाशनाश्यत्वात्।

क्वचिदाश्रयनाशादपि नश्यति यत्र द्वित्वाधारावयवकर्मसमकालमेकत्वसामान्यज्ञानम्। यथा अवयवकर्मसामान्यज्ञाने विभागापेक्षाबुद्धी संयोगनाशगुणोत्पत्ती द्रव्यनाशद्वित्वसामान्यज्ञाने तत्र द्रव्यनाशाद्द्वित्वनाशः, सामान्यज्ञानादपेक्षाबुद्धिनाशः, अपेक्षाबुद्धिनाशस्य द्वित्वनाशसमानकालत्वात् कार्य्यकारणसमानभावाभावात् (१)।

यदा तु द्वित्वाधारावयवकर्मापेक्षाबुद्ध्योर्यौगपद्यं तदा द्वाभ्यामाश्रयनाशापेक्षाबुद्धिनाशाभ्यां द्वित्वनाशः। तद्यथा, अवयवकर्मा-

(१) समानभावाभावादिति। तथाचैककालीनविषाणयोरिव द्वित्वाधारावयवकर्मसमकालीनैकत्वज्ञानस्थले नैककालीनापेक्षाबुद्धिनाशस्य द्वित्वनाशकत्वं किन्तु द्रव्यनाशस्येति भावः।

पेक्षाबुद्धी विभागोत्पत्तिद्वित्वोत्पत्ती संयोगनाशद्वित्वसामान्यज्ञाने द्रव्यनाशापेक्षाबुद्धिनाशौ ताभ्यां द्वित्वनाशः प्रत्येकं सामर्थ्यग्रहात् । इयञ्च प्रक्रिया ज्ञानयोर्वध्यघातकपक्षे(१) परमुपपद्यते स एव च पक्षः प्रामाणिकः ।

(२)ननु द्वित्वत्रित्वादीनां सामग्रीसाम्ये कथं कार्य्यवैलक्षण्यं ? द्वाभ्यामेकत्वाभ्यां द्वित्वं त्रिभिरेकत्वैस्त्रित्वमिति चेन्न एकत्वे द्वित्वाद्यभावात् । समवायिकारणगतमेव द्वित्वत्रित्वादिकं तन्त्रमिति चेन्न द्वित्वाद्युत्पत्तेः पूर्वं तत्र द्वित्वाद्यभावात्, तत्रापि कारणचिन्ताया अनिवारणात् अपेक्षाबुद्धावेकत्वेषु च तादृशविशेषस्यानुपलम्भबाधितत्वात्, फलबलेन तत्कल्पने वा द्वित्वादिव्यवहारोऽपि तत एवास्तु किं द्वित्वादिना । अदृष्टविशेषाद्विशेष इति चेदेवं सति द्वित्वारम्भकयाऽपि सामग्र्या कदाचित्त्रित्वं चतुष्ट्वञ्चोत्पद्येतेत्यनियमप्रसङ्गः ।

(३)अत्रोच्यते–प्रागभावविशेषाद्विशेषोपपत्तेः, यथा तुल्यया सामग्र्या पाकजानां रूपरसगन्धस्पर्शानाम । प्रागभावोऽपि साधारण एवेति चेन्न स्वस्वप्रागभावस्यैव कार्य्यं प्रति कारणत्वावधारणात् । यद्वा शुद्धयाऽपेक्षाबुद्ध्या द्वित्वं द्वित्वसहितया त्रित्वमिति नेयम् । शतं पिपीलिकानां मया हतमित्यादौ समवायिकारणाभावे द्वित्वं तावन्नोत्पद्यते तथाच गौणस्तत्र सङ्ख्याव्यवहारो द्रष्टव्यः । सेनावनादौ नियतापेक्षाबुद्ध्यभावाद्बहुत्वमात्रमुत्पद्यते न तु शतसहस्रादिसङ्ख्येति श्रीधराचार्य्याः । एवं सति शतसहस्रादिकोटिकस्तत्र संशयो न स्यात् न स्याच्च महती महत्तरा सेनेति नैवमित्युदयनाचार्य्याः ।

अत्रैवमालोचनीयम्–त्रित्वादिपरार्द्धपर्य्यन्ता सङ्ख्यैव बहुत्वम्, तद्भिन्नं वा सङ्ख्यान्तरम् ? नाद्यः सेनावनादावपि शतसहस्रादिसङ्ख्योत्पत्तिनियमात् । न द्वितीयः त्रित्वादिविलक्षणस्य बहुत्वस्याननुभवात् । तथाच प्रतिनियतैकत्वानालम्बनापेक्षाबुद्धिजनि-

(१) न सहानवस्थानपक्षे इति शेषः । तत्र द्वे द्रव्ये इति द्रव्यज्ञानानुत्पत्तिप्रसङ्ग इति प्रशस्त भाष्ये द्रष्टव्यम् ।

(२) त्रित्वादिसंख्यायां विप्रतिपत्तिमाशङ्कते नन्विति ।

(३) समाधत्ते अत्रोच्यत इति ।

तशतादिसङ्ख्यैव बहुत्वं शताद्यभिव्यक्तिस्तु (१)तत्र न भवति तादृशव्यञ्जकाभावात् ।

वयन्तु ब्रूमः-त्रित्वादिसमानाधिकरणं सङ्ख्यान्तरमेव बहुत्वं त्रित्वादिजनकापेक्षाबुद्धिजन्यं प्रागभावभेदादेवं भावः(२), कथमन्यथा-'बहवस्तावत् सन्ति शतं वा सहस्रं वेति विशिष्य न जानीम' (३)इति । यथैकद्रव्ये महत्त्वं दीर्घत्वञ्च तथैकत्रैवाधिकरणे त्रित्वादिकं बहुत्वञ्च । भवति हि 'शतं वा सहस्रं वा चूतफलान्यानयामीति ?' प्रश्ने बहवस्तावदानीयन्तां किं विशेषजिज्ञासयेति । एवञ्च द्वित्वसहितापेक्षाबुद्ध्या त्रित्वं त्रित्वसहितापेक्षाबुद्ध्या चतुष्ट्वमेवमुत्तरोत्तरोत्तरम्, बहुत्वोत्पत्तौ तु नापेक्षाबुद्धौ पूर्वपूर्वसङ्ख्याविशिष्टत्वनियमः । अत एव सेनावनादिषु बहुत्वमात्रमुत्पद्यते न तु सङ्ख्यान्तरं (४)संशयस्त्वसत्कोटिकोऽपि भवत्येवेति । (५)'तत्समानाधिकरणञ्च पृथक्त्वमिति यथा द्वित्वं तथा द्विपृथक्त्व'मित्यादि । ननु द्वित्वत्रित्वादिसमानाधिकरणैरेकपृथक्त्वैरेव तद्व्यवहारोपपत्तौ किं द्विपृथक्त्वादिनेति चेन्न घटात् पटलोष्टौ पृथगिति-द्विपृथक्त्वस्यान्योन्यावधिकत्वाप्रतीतेः प्रत्येकपृथक्त्वे च तत्प्रतीतेरिति वैधर्म्यात् । न चैवं द्विपरत्वापत्तिः द्वित्वसमानाधिकरणाभ्यां परत्वाभ्यामेव तदुपपत्तेः । यथा पृथक्त्वे परस्परावधिकत्वविरोधस्तथा न परत्वे, द्वाविमौ पराविति द्वाविमौ नीलावतिवदुपपत्तेः समानदेशस्थयोः संयुक्तसंयोगभूयस्त्वसाम्येऽपि दिक्पिण्डसंयोगस्यासमवायिकारणस्य भेदेन भिन्नकार्य्योत्पत्तिसम्भवात् । (६)मिलितयोरेकत्वयोर्द्वित्वं प्रति यथाऽसमवायिकारणत्वं तथा मिलितयोरेकपृथक्त्वयोर्द्विपृथक्त्वं प्रत्यसमवायिकारणत्वसम्भवात् द्रव्यातिरिक्तमेकं कार्य्यं प्रत्यनेकेषां संयोगानां कार्य्यैकार्थसमवायप्रत्यासत्त्या सम्भूयारम्भकत्वादर्शनात् । कारणैकार्थप्रत्यासत्त्या तु बहवस्तन्तुतुरीसंयोगा एकं पटतुरीसंयोगमारभन्त एवेति दिक् । द्वित्वादिविनाशवद्द्विपृथ-

(१) तत्रेति । सेनावनादावित्यर्थः ।　　(२) एवंभेद इति पाठान्तरम् ।

(३) इतीति । इति प्रतीतिरिति शेषः ।

(४) संशय इति । सेनावनादौ शतसहस्रादिसंशय इत्यर्थः ।

(५) तत्समानाधिकरणं चेत्यादि उपसंख्यानान्तरं विवृणोति तत्समानाधिकरणं चेत्यनेन ।

(६)ननु कारणाभावात्कथं द्विपृथक्त्वरूपं कार्यं स्यादतस्तद्दृष्टान्तेनोपपादयति मिलितयोरिति ।

क्त्वादिविनाशोऽप्यूहनीयः ॥ ८ ॥

प्रकरणान्तरमारभते—

अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः ॥ ९ ॥

संयोगे संयुक्तप्रतीतिरबाधिता प्रमाणं कार्य्याणि च,—अवयवसंयोगेषु द्रव्यमग्निसंयोगे पाकजा रूपादयः प्रचये परिमाणविशेषः भेर्य्याकाशसंयोगे शब्द इत्यादूयूह्यम् । न चाविरलोत्पत्तिरेव संयोगः, क्षणभङ्गपरिणामयोर्निरासात् ।

अप्राप्तिपूर्विका प्राप्तिः संयोगः । स चान्यतरकर्मजः–क्रियावता श्येनेन निष्क्रियस्य स्थाणोस्तदभिमुखक्रियारहितस्य सक्रियस्यापि धावतः यथा धावता पुरुषान्तरेण पृष्ठदेशसंयोगः । उभयकर्मजः—मेषयोर्मल्लयोर्वा प्रत्येकं गृहीतसामर्थ्याभ्यामुभाभ्यामेव तज्जननात् । (१)तृतीयस्त्वङ्गुलितरुसंयोगाद्धस्ततरुसंयोगः । स चैकस्मादपि भवति यथा–तन्तुवीरणसंयोगात् पटवीरणसंयोगः । क्वचिद्द्वाभ्यां संयोगाभ्यामेकः संयोगः यथा–द्वाभ्यां तन्तुभ्यामाकाशस्य द्वौ संयोगौ ताभ्यामेक एव द्वितन्तुकपटस्याकाशेन संयोगः । क्वचिच्च बहुभिरपि संयोगैरेकः संयोग आरभ्यते यथा–दशभिस्तन्तुभिराकाशस्य दश संयोगा एकमेव दशतन्तुकपटाकाशसंयोगमारभन्ते । क्वचित् पुनरेकस्मादपि संयोगादसमवायिकारणात् संयोगद्वयमुत्पद्यते यथा–पार्थिवाप्ययोः परमाण्वोः प्रथममनारम्भके संयोगे जाते पार्थिवे परमाणौ पार्थिवपरमाण्वन्तरेण, आप्ये च परमाणावाप्यपरमाण्वन्तरेण, द्व्यणुकद्वयारम्भकं संयोगद्वयमुत्पद्यते, ताभ्यां संयोगाभ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते, तत्र यः पार्थिवाप्यपरमाण्वोरनारम्भकः संयोग उत्पन्नस्तेनैकेनैव पार्थिवपरमाणुनाऽऽप्यद्व्यणुकेनैकः संयोगः आप्यपरमाणुना पार्थिवद्व्यणुकेनापरः संयोगो द्व्यणुकयो रूपाद्युत्पत्तिसमकालमेव जायते, कारणाकारणसंयोगेन कार्य्याकार्य्यसंयोगयोरवश्यं जननात् ।

मूर्त्तैर्विभूनामन्यतरकर्मज एव । विभुनोस्तु न संयोगः कारणाभावात् कर्म तावत्तत्र नास्ति न च कारणं तेन कारणाकार-

---

(१) तृतीय इति । संयोगजस्संयोग इत्यर्थः ।

णसंयोगात् कार्याकार्यसंयोगोऽपि नास्ति । नित्यस्तु संयोगो न सम्भवति अप्राप्तिपूर्विकायाः प्राप्तेः संयोगत्वात् नित्यत्वे तद्विनाशात् एवञ्च सति विभागोप्यजस्तत्र स्यात् । न चेष्टापत्तिः, संयोगविभागयोर्विरोधिनोरविनश्यदवस्थयोरेकत्रानुपपत्तेः । किञ्च संयोगं प्रति प्रयोजिका युतसिद्धिः, न च विभुनोस्तत्सम्भवः । सा हि द्वयोरन्यतरस्य वा पृथग्गतिमात्रं युताश्रयाश्रयित्वं वा ।

विनाशस्तु संयोगस्य समानाधिकरणाद्विभागादाश्रयनाशादपि क्वचित्, यथा तन्तुद्वयसंयोगानन्तरमेकस्य तन्तोरवयवेंऽशौ कर्म जायते तेनांश्वन्तराद्विभागः क्रियते विभागादारम्भकसंयोगनाशस्ततस्तन्तुविनाशस्तन्तुविनाशात् संयोगनाशो यत्र तन्तुद्वयं चिरं संयुक्तं सदनुत्पन्नक्रियं भवति ।

केचित्तु तन्त्ववयवकर्मणा यदा तन्त्वारम्भकसंयोगनाशः क्रियते तदा तन्त्वन्तरे कर्मचिन्तनात् आश्रयनाशविभागाभ्यां युगपदुत्पन्नाभ्यां संयोगो नश्यतीत्याहुः ।

तच्चानुपपन्नं समवायिकारणनाशक्षणे विभागानुत्पत्तेः समवायिकारणस्य कार्यसमकालस्थायित्वानियमात् । (१)स चायं संयोगो द्रव्यारम्भे निरपेक्षो, गुणकर्मारम्भे सापेक्षः, (२)स्वसमानाधिकरणात्यन्ताभावप्रतियोगी तथैवानुभवात् । (३)शाखामात्रावच्छेदेनापि महति न्यग्रोधतरौ वर्त्तमानः कपिसंयोगः "न्यग्रोधतरौ कपिसंयोग" इत्यनुभवात् । (४)अवच्छेदमात्रेणान्यथासिद्धौ पर-

---

(१) सचेति । द्रव्यगुणकर्महेतुस्संयोग इत्यर्थः । तन्तुसंयोगो द्रव्यस्य पटस्यात्ममनःसंयोगो बुद्ध्यादीनां गुणानां प्रयत्नवदात्मसंयोगो हस्तकर्मणश्चेत्याद्युदाहरणं बोध्यम् । तत्र विशेषमाह द्रव्यारंभ इति । द्रव्योत्पत्तौ संयोगः स्वाश्रयं स्वनिमित्तं च विना नान्यदपेक्षत इत्यर्थः, ननु पश्चाद्भाविनं निमित्तान्तरं नापेक्षत इति, अन्यथा श्यामविनाशोत्तरभाविनोऽन्त्यस्य परमाण्वग्निसंयोगस्य पाकजगुणारम्भे निरपेक्षकारणत्वापत्तिप्रसंगात् । गुणकर्मारम्भ इति । रूपादीनामुत्पत्तौ अग्निसंयोग आश्रयमपेक्षते । कर्मारम्भेपि नोदनाभिघातौ स्पर्शवेगावपेक्षत इति गुणकर्मारम्भे सापेक्षत्वम् ।

(२) स्वसमानाधिकरणेति । अव्याप्यवृत्तिरित्यर्थः । तथैवेति । मूले वृक्षः कपिसंयोगवान्न शाखायामित्यनुभवादित्यर्थः ।

(३) ननु मूलशाख एव संयोगतदभावाश्रयौ किमिति नाङ्गीक्रियेते तत्राह शाखामात्रेति ।

(४) ननु तस्यावच्छेदमात्रेण सिद्धौ वृक्षवृत्तिः संयोगोऽन्यथासिद्ध अत आह अवच्छेदमात्रेणेति ।

माणुवृत्तिरापद्येत तथा च नोपलभ्येत । (१)विभूनामप्युपाधिभेद एव प्रदेशस्तदवच्छेदेन वर्त्तमानस्य संयोगस्याव्याप्यवृत्तित्वं परमाणुनिष्ठस्यापि संयोगस्य दिगादयोऽवच्छेदकाश्चिन्तनीयाः ॥ ९ ॥

विभागे संयोगोत्पत्तिप्रकारमतिदिशन्नाह—

एतेन विभागो व्याख्यातः ॥ १० ॥

संयोगवद्विभागोऽप्यन्यतरकर्मज उभयकर्मजो विभागजश्च । श्येनकर्मणा स्थाणुश्येनविभागः, संयुक्तयोर्मल्लयोर्मेषयोर्वा कर्मभ्यां तदुभयविभागः । स चायं कर्मोत्पत्त्यव्यवहितक्षणोत्पत्तिकः अपेक्षणीयान्तराभावात् । तदुक्तं—"संयोगविभागयोरनपेक्षकारणं कर्म" इति । विभागे जननीये आश्रयः, संयोगे च जननीये पूर्वसंयोगनाशश्चापेक्षणीय इति चेन्न स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षत्वस्य कर्मणो निरपेक्षत्वात् । विभागजस्तु विभागो द्विविधः- कारणमात्रविभागजकारणाकारणविभागभेदात् कारणाकारणविभागजकार्याकार्यविभागभेदाच्च । तत्र कारणमात्रविभागात् कारणाकारणविभागो यथा—कपालद्वयविभागात् कपालाकाशविभागः । कारणाकारणविभागाच्च कार्याकार्यविभागो यथा—ऽङ्गुलीतरुविभागाद्धस्ततरुविभागस्ततः शरीरतरुविभाग इति ।

ननु विभाग एव न प्रमाणं संयोगाभाव एव विभागव्यवहारादिति चेन्न संयोगाभावोऽत्यन्ताभावश्चेत् गुणकर्मणोरपि विभागव्यवहारप्रसङ्गात् । द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्तप्रत्ययहेतुरिति चेन्नावयवावयविनोरपि प्रसङ्गात । अकार्यकारणभूतयोर्द्रव्ययोरिति चेत् विन्ध्याहमवतोरपि स्यात् । भवत्येव तत्रेति चेन्न भ्रान्तस्य(२) गुणकर्मणोरपि भावात् अभ्रान्तमधिकृत्य व्यवहारस्य चिन्त्यमानत्वात् । संयोगविनाशो विभाग इति चेत् एकतरसंयोगिनाशेन नष्टे संयोगे तद्व्यवहारप्रसङ्गात् । संयोगिनोर्विद्यमानयोरिति चेत् एकसंयोगनाशानन्तरं पुनः संयुक्तयोः कुवलामलकयोः संयोगदशायामपि विभक्तप्रत्ययप्रस-

(१) ननु एवं परमाण्वादिनिष्ठसंयोगस्यानुपपत्तिस्तस्यावच्छेदकाभावाद्दिगादीनां विभूनां निष्प्रदेशत्वादत आह विभूनामिति ।

(२) भ्रान्तस्येति । तथाच गुणकर्मवत् हिमविन्ध्ययोर्भ्रान्तस्स प्रत्यय इत्यर्थः ।

ङ्गात् तत्र यावदर्थाभावात् । तस्मादस्ति (१)विभागोऽर्थान्तरम् ।

स च गुणः विरोधिगुणान्तरनाश्यः, विरोधिनं समानाधिकरणं गुणमन्तरेण सत्याश्रये गुणनाशानुपपत्तेः । कर्मैव संयोगनाशकं स्यादिति चेन्न विरोधिनो गुणस्य गुणनाशकत्वात् । किञ्च यत्राङ्गुलीहस्तभुजशरीराणां स्वस्वकर्मणा तरुसंयोगस्तत्राङ्गुलीमात्रे समुत्पन्नेन कर्मणाऽङ्गुलीतरुसंयोगनाशसम्भवेऽपि हस्ततरुभुजतरुशरीरतरुसंयोगानामनाशप्रसङ्गात् हस्तादीनामक्रियत्वात् अङ्गुलीकर्मणश्च व्यधिकरणत्वात् । व्यधिकरणस्यापि कर्मणः संयोगनाशकत्वे क्वचिदप्युत्पन्नेन कर्मणा युगपदेव सर्वसंयोगनाशापत्तेः । त्वन्मते तत्र का गतिरिति चेत् अङ्गुलीतरुविभागेन हस्ततरुविभागो जनितो हस्ततरुसंयोगनाशक इत्यभ्युपगमात् । 'व्यधिकरणेनाङ्गुलीकर्मणैव हस्ततरुसंयोगनाशोऽस्तु, न चातिप्रसङ्गः आश्रयाश्रितपरम्परासंयोगस्यैव व्यधिकरणकर्मनाश्यत्वाभ्युपगमादिति' सर्वज्ञेन यदुक्तम्, तदपि न युक्तं,-विरोधिनः समानाधिकरणस्यैव सर्वत्र नाशकत्वानुभवात् बाधकमन्तरेण तत्परित्यागानुपपत्तेः । (२)शब्दविभागौ च विभागकार्यौ, तत्र विभागस्य शब्दासमवायिकारणत्वं मृष्यामहे, न हि वंशे पाठ्यमाने दले च चरणयन्त्रणावष्टब्धे दलान्तरे चोपरिकृष्यमाणे यः शब्दो जायते तत्र दलाकाशविभागादन्यदसमवायिकारणं पश्यामः । न च दवदहनदह्यमानस्फुटद्वेणुचीत्कारे विभागातिरिक्तमसमवायिकारणं पश्यामः । कारणाकारणविभागाच्च कार्याकार्यविभागमनुमन्यामहे कथमन्यथा स्वस्वकर्मजनिताङ्गुलीतरुसंयोगहस्ततरुसंयोगभुजतरुसंयोगशरीरतरुसंयोगानाम-

---

(१) विभाग इति । द्रव्यासमवायिकारणावृत्तित्वे सति एकमात्रवृत्त्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विभागत्वम् । संयोगत्वं द्विमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिभिन्नं जातित्वात् घटत्ववदित्यनुमानेनापि विभागस्यार्थान्तरत्वसिद्धिर्द्रष्टव्या ।

(२) कार्येण कारणानुमानमाह शब्दविभागाविति । चरणेति । एतेन स्फुटद्वेणुटात्कारादयो वाय्वभिघातजन्या न विभागेनेति परास्तम् एकस्मिन् दले चरणावष्टब्धे दलान्तरे च बलवता नुद्यमानेऽभिघातासम्भवात् । नहि तत्र दलेन दलमभिहन्यते विलोमगमनात् नापि तेन वायुरभिहन्यते नुद्यमानत्वात् न वा वायुना दलमभिहन्यते तस्य पूर्वं स्तिमितत्वात् । भवितव्यं च कार्यस्यासमवायिकारणेन स च विभाग एवेति । अत्रैवं प्रयोगः-विवादाध्यासितः शब्दसन्तानः संयोगाद्यतिरिक्तासमवायिकारणकः संयोगाद्यनुपपत्तौ सत्यामुत्पद्यमानत्वात् अवयविरूपवदिति । यद्वा यदेवं न भवति तत्संयोगाद्यनुत्पत्तौ नोत्पद्यते यथा संयोगजः शब्द इति व्यतिरेकी दृष्टान्तो बोध्य इति ।

ङ्गुलीमात्रोत्पन्नकर्मणाऽङ्गुलीतरुविभागे सति अङ्गुलीतरुसंयोगनाशे सत्यपि हस्ततरुसंयोगादीनां नाशः, तत्र हि विभागजविभागपरम्परैव तत्तत्संयोगनाशिकेत्युक्तत्वात्। कारणद्वयविभागपूर्वके तु कारणाकारणविभागे न संप्रत्ययः यतो वंशदले यदुत्पन्नं कर्म तेन दलान्तरविभागवदाकाशादिविभागस्यापि जननसम्भवात् यावद्भिः संयुक्तमासीत् तावद्भिस्तत्कर्मणा विभागस्य दर्शनात्, न ह्यङ्गुल्यामुत्पन्नेन कर्मणाऽङ्गुल्यन्तरविभागवदाकाशादिदेशेभ्योऽपि विभागा न जन्यन्ते कमलदले चोत्पन्नेन कर्मणा दलान्तरविभागवदाकाशादिदेशेभ्यो वा न विभागा आरभ्यन्ते। द्रव्यारम्भकसंयोगाविरोधिनः शतमपि विभागानेकं कर्मारभतां यत्तु कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते न तत् द्रव्यारम्भकसंयोगाविरोधिनमपि यच्च द्रव्यारम्भकसंयोगाविरोधिनं न तद् द्रव्यारम्भकसंयोगविरोधिनमिति ब्रूमः। कुत एतदिति चेत् कार्य्यवैचित्र्येण (१)कारणवैचित्र्यस्यावश्यकत्वात्। (२)ननु कर्मणि वैचित्र्यमावश्यकं तथाचैकं कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागं जनयतु यथा विकसत्कमलकुड्मलादावपरञ्च द्रव्यारम्भकसंयोगविरोधिनमविरोधिनञ्चोभयमिति। मैवम्, कार्य्यविरोधो हि कारणवैचित्र्यकल्पनामूलं स च विरोधः एकस्य द्रव्यारम्भकसंयोगप्रतिद्वन्द्वित्वेन, अपरस्य तु तदप्रतिद्वन्द्वित्वेनेति तथैव वैचित्र्यस्यापि (३)कल्पनौचित्यात्। तच्चेदं वंशदले वर्तमानं कर्म दलद्वयविभागमात्रं जनयति, स च विभागोऽग्रे आकाशादिदेशाद्विभागं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विनं विभागमारभते, तस्य च निरपेक्षस्य विभागजनने कर्मत्वापत्तिरिति द्रव्यनाशविशिष्टं कालमपेक्षते। (४)ननु तदानीमपि कर्मैव

---

(१) कारणवैचित्र्येति। तद्व्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्य तत्प्रतिद्वन्द्विविभागमात्रजनकत्वं किञ्चित्तदविरोधिविभागमात्रजनकत्वमिति। दृष्टं हि विकसत्कमलकुड्मलादौ द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकस्य तत्प्रतिद्वन्द्विविभागाजनकत्वम्। अन्यथा कमलकुड्मलमपि नश्येदिति भावः। तथा च वंशदलकर्म यदि द्रव्यारम्भकसंयोगविरोधिवंशदलाकाशविभागञ्जनयेत् दलद्वयविभागं न जनयेत् तस्य द्रव्यारम्भकसंयोगविरोधात् इति भावः।

(२) नन्विति। तथाचेदृशमेव वैजात्यं स्यात् इति शङ्कार्थः।

(३) कल्पनेति। ईदृशवैजात्यकल्पनेपि विरुद्धकार्यजनकत्वरूपविरोधस्याप्रतिवृत्तेरिति समाधानार्थः।

(४) शङ्कते नन्विति।

तज्जनयतु, (१)अतीतकालत्वात् विभागजनने कर्मणः स्वोत्पत्त्यनन्तर एव कालः। नन्वेवं विभागेन जनिते विभागान्तरे कर्म प्रदेशान्तरसंयोगमपि न जनयेत, न संयोगजननं प्रति कर्मणोऽनतीतकालत्वात् अन्यथा कर्म न नश्येदेव तस्योत्तरसंयोगमात्रनाश्यत्वात्।

सोऽयं विभाग उत्तरसंयोगनाश्यः क्षणत्रयस्थायी। क्वचिदाश्रयनाशनश्यः, तद् यथा–तन्तोरवयवेंऽशौ कर्म तदनन्तरमंशुद्वयविभागस्तदैव तन्त्वन्तरे कर्म ततोऽशुद्वयविभागेन तन्त्वारम्भकसंयोगनाशस्तन्तुकर्मणा च विभागस्ततो द्रव्यारम्भकसंयोगनाशात्तन्तुनाशस्तन्नाशाच्च तन्त्वन्तरकर्मजन्यविभागनाशः। नन्वेवं तन्त्वन्तरोत्पन्नस्य कर्मणो न नाशः स्याद्विनाशकाभावात् उत्तरसंयोगेन हि तन्नाश्येत, विभागे च नष्टे नोत्तरसंयोग इति चेन्न तन्तौ यत् कर्मोत्पन्नं तेन यथा विनश्यदवस्थतन्तोर्विभागो जनितस्तथा तदंशोरपि विभागो जननीयः सोऽप्यारम्भकसंयोगविरोध्येव तेनांशुतन्तुविभागेन तन्त्वाकाशविभागस्तेन चोत्तरसंयोगस्तेन ततः कर्मनाशः(२)। यद्वा यत्र तन्तौ यदा कर्म तदंशावपि तदैव कर्म तच्च कर्म विनश्यदवस्थतन्तुतदवयवाकाशादिदेशाद्युगपदेव विभागानारभते सर्वेषां विभागानामारम्भकसंयोगाविरोधित्वात्, तथा च कारणमंशुरकारणश्चाकाशादि तद्विभागात् कार्यस्य तन्तोरकार्येणाकाशादिना यो विभाग उत्पन्नस्तदनन्तरोत्पत्तिकेन संयोगेन तन्तुसमवेतस्य कर्मणो विनाश इति। क्वचिद्द्वाभ्यां, तद् यथा–तन्तुवीरणयोः संयोगे सति तन्त्ववयवेंऽशौ कर्म वीरणे च कर्मेत्येकः कालः, अंशुकर्मणांऽश्वन्तरविभागस्तेन च संयोगस्य तन्त्वारम्भकस्य विनाशः वीरणकर्मणा च तन्तुवीरणविभागस्तन्तुवीरणसंयोगनाशश्च तन्त्वारम्भकसंयोगनाशश्च तन्त्वारम्भकसंयोगनाशानन्तरं तन्तुनाशस्तन्तुवीरणसंयोगनाशानन्तरं वीरणस्य प्रदेशान्तरसंयोगस्ताभ्यामाश्रयनाशसंयोगाभ्यां विभागनाशः॥ १०॥

ननु संयोगेऽपि संयोगोऽस्तु विभागेऽपि विभाग इति प्रसङ्गनिवारणार्थमाह—

---

(१) उत्तरयाति अतीतकाळत्वादिति।

(२) नष्टनकर्मनाश इति पाठान्तरम्।

संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ११ ॥

यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा संयोगविभागौ न संयोगविभागवन्तौ ॥ ११ ॥

कर्मभिः कर्माणि गुणैर्गुणा अणुत्वमहत्त्वाभ्यामिति ॥ १२ ॥

द्वितीयञ्च सूत्रं व्याख्यातमेव ॥ १२ ॥

ननु द्रव्ययोरवयवावयविनोः संयोगः कथं नेत्यत आह—

युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते ॥ १३ ॥

असम्बन्धयोर्विद्यमानत्वं युतसिद्धिः (१)पृथगाश्रयाश्रितत्वं वा तदभावस्त्ववयवावयविनोरित्यर्थः ॥ १३ ॥

इदानीं प्रसङ्गाच्छब्दार्थयोः साङ्केतिकं सम्बन्धं साधयितुं प्रकरणान्तरम्, तत्र पूर्वपक्षमाह—

गुणत्वात् ॥ १४ ॥

संयोस्येति शेषः । तथाच गुणस्य शब्दस्य गुणः संयोगः कथं स्यात् अर्थेन घटादिनेत्यर्थः ॥ १४ ॥

किञ्च विषयोऽपि क्वचिद्रूपरसादिलक्षणस्तेन संयोगो न सम्भवति गुणे गुणानङ्गीकारादित्याह—

गुणोऽपि विभाव्यते ॥ १५ ॥

गुणोऽपि विषय इति शेषः । गुणोऽपि रूपादिः शब्दस्य विषयो न तु तेन समं संयोगः सम्बन्ध इत्यर्थः ।

यद्वा गुणोऽपि शब्देन विभाव्यते प्रतिपाद्यते तेन च शब्दस्य न संयोगः सम्बन्ध इत्यर्थः ॥ १५ ॥

किञ्च कस्यचिद्वाकाशादेर्द्रव्यस्य नान्यतरकर्मजः संयोगो नोभयकर्मजः शब्दस्यापि निष्क्रियत्वादित्याह--

---

(१) ननु विभुनोरसम्बन्धिनोर्विद्यमानत्वेन युतसिद्धिरस्त्वत आह पृथगाश्रयेति । ययोः संयोगेन भिन्नाधिकरणवृत्तित्वं तावेव युतसिद्धावित्यर्थः । नहि संयोगेन घटाधिकरणात्कपालाधिकरणमतिरिक्तमिति तावयुतसिद्धावित्यभिप्रायः ।

निर्विषयत्वात् ॥ १६ ॥

शब्दस्य कस्यचिदर्थस्य चेति शेषः ॥ १६ ॥

सम्बन्धे बाधकान्तरमाह—

असति नास्तीति च प्रयोगात् ॥ १७ ॥

असत्यपि घटपटादौ—नास्ति गेहे घटः, नास्ति पटः, श्रुतपूर्वो गकारो नास्ति, अभूत् पटः, पटो भविष्यतीत्यादिप्रयोगदर्शनादित्यर्थः। तथाचासता घटादिना शब्दस्य न संयोगो न वा समवाय इति भावः ॥ १७ ॥

किञ्चात इत्यत आह—

शब्दार्थावसम्बन्धौ ॥ १८ ॥

शब्दार्थयोः संयोगश्चेन्नास्ति तदेतदायातं-शब्दार्थावसम्बन्धावेवेत्यर्थः ॥ १८ ॥

ननु संयोगसमवाययोरन्यतरसम्बन्धः कथं न स्यादित्यत आह—

संयोगिनो दण्डात् समवायिनो विशेषाच्च ॥ १९ ॥

दण्डी पुरुषः-हस्ती कुञ्जर-इति प्रत्ययौ स्तः, तत्र प्रथमः संयोगात्, द्वितीयः समवायात् हस्तेऽवयवविशेषे कुञ्जरस्य समवायाधीनः प्रत्ययः। हस्तः समवायितया यस्यास्ति स हस्तीति। विशेषादिति। विशेष एव हस्तादौ समवायसम्बन्धाद्विशेषणत्वं न तु तन्त्वादीनामपि तन्तुमान् पट इत्यादिरवयवविशेषणभावेन प्रत्ययो भवति, एवं घटशब्दवान् घटोऽर्थ इति प्रत्ययो न भवति, तथाच शब्दार्थयोर्न संयोगो नापि समवाय इति भावः ॥ १९ ॥

ननु यदि न संयोगो न वा समवायः शब्दार्थयोस्तर्हि केन सम्बन्धेन शब्दो नियतमर्थं प्रतिपादयतीत्यत आह—

सामयिकः शब्दादर्थप्रत्ययः ॥ २० ॥

सामयिक इति। समय ईश्वरसङ्केतः-अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारः, यः शब्दो यस्मिन्नर्थे भगवता सङ्केतितः स तमर्थं प्रतिपादयति, तथाच शब्दार्थयोरीश्वरेच्छैव सम्बन्धः स एव समयस्तदधीन इत्यर्थः। यथा नकुलदंष्ट्राग्रस्पृष्टा या काचिदोषधिः सा सर्वाऽपि सर्पविषं हन्ति।

स च समयः क्वचिद्व्यवहाराद् गृह्यते, यथा-प्रयोजकेन घटमानयेत्युक्ते प्रयोज्यस्य कम्बुग्रीवावन्तमर्थमानयतो ज्ञानं तावद(१)नुमिनोति तटस्थो बालः-इयमस्य प्रवृत्तिर्ज्ञानजन्या प्रवृत्तित्वात् मत्प्रवृत्तिवत् । तच्च ज्ञानमेतद्वाक्यजन्यमेतदनन्तरभावित्वात्, एतज्ज्ञानविषयोऽयं कम्बुग्रीवावानर्थो घटपदवाच्य इत्या(२)वापोद्वापप्रक्रियया बालस्य घटपदादावर्थे व्युत्पत्तिः ।

क्वचिच्च साक्षादाप्तवाक्यादेव, यथा-ऽयं कम्बुग्रीवावानर्थो घटपदवाच्य इति ।

क्वचिदुपमानात्, यथा-गोसदृशो गवयः, यथा मुद्गस्तथा मुद्गपर्णी, यथा माषस्तथा माषपर्णीत्यादि साधर्म्योपमानात् । क्वचि(३)न्निन्दाकारादपि वाक्यात्, यथा-धिक् करभमतिलम्बौष्ठं दीर्घग्रीवं कठोरकण्टकाशिनमपसदं पशूनामिति निन्दावाक्यश्रवणानन्तरं तादृशपिण्डमुपलभ्यायमसौ करभ इति व्युत्पत्तिः ।

क्वचित् प्रसिद्धपदसामानाधिकरण्यात्, यथा-प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति वाक्यश्रवणानन्तरं भवत्ययमसौ मधुकरपदवाच्यः प्रभिन्नकमलोदरे मधुपानकर्तृत्वात्, यथा वा सहकारतरौ मधुरं पिको रौतीति । (४)तदेतदनुमानं वा शब्द एव वा प्रसिद्धपदसामानाधिकरण्यसामर्थ्याद्व्युत्पादकः, उपमानविशेष एव वा, मधुपानकर्तृत्वस्यं भ्रमरादिव्यक्त्यन्तरसाधर्म्यस्योपनयात् ।

समयश्च जातिमात्रे, व्यक्तेराक्षेपत एवोपस्थितेरिति (५)तौ-

---

(१) अनुमिनोतीति । अस्य गवानयनचेष्टा प्रवृत्तिजन्या चेष्टात्वात् मदीयस्तनपानचेष्टावदिति चेष्टया प्रवृत्तिमनुमायेत्यादिः ।

(२) आवापोद्वापेति । गां बधान घटमानयेति वाक्यघटकगोघटपदयोः क्रियान्तरसम्बन्धावावापाद्वापाविस्यर्थः ।

(३) निन्दाकारादिति । वैधर्म्योपमानादित्यर्थः ।

(४) तदेतादिति । अनुमानमिति स्वमतम् । उपमानविशेष इति केचिन्नैयायिकाः । शब्द एवेति नैयायिकवृद्धाः ।

(५) तौतातिकां इति । भट्टा इत्यर्थः । तन्मते गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयबोधः गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुबर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थगोत्वादेः साकाङ्क्षत्वात् । व्यक्तिबोधस्तूत्तरकालमाक्षेपबललभ्य एवेति । प्रयोगस्तु कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात् । आनयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मतात्वात् इत्यादिः ।

तातिकाः ।

(१)ज्ञातौ व्यक्तौ चोभय(त्र)शक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूपसती प्रयोजिकेति प्राभाकराः ।

समयः शक्तिरेव 'व्यक्त्याकृतिजातयः पदार्थः (अ०२आ०२न्या० सू०६३) इति' (२)वृद्धाः । गवादिपदानामियं गतिः, गुणकर्मादिवाचकपदानान्तु (३)जातिव्यक्ती एवार्थ इति मयूखे विपश्चितम् ॥ २० ॥

इदानीमुद्देशक्रमप्राप्ते परत्वापरत्वे परस्परानुबद्धव्यवहारकारणतया शिष्यबुद्धिवैशद्यार्थं संक्षेपार्थञ्चैकग्रन्थेनाह—

एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च ॥ २१ ॥

परमपरञ्चेति भावप्रधानो निर्देशः । उत्पद्यत इति शेषः । यद्वा परमपरञ्चेति व्यवहार इति शेषः । इतिरध्याहार्य्यम् । एका दिग् ययोस्तावेकदिक्कौ ताभ्यामेकदिक्काभ्यां पिण्डाभ्यामित्यर्थः । तुल्यदेशावप्येकदिक्कौ भवतः न तु ताभ्यां परत्वापरत्वे उत्पद्येते व्यवह्रियेते वेत्यत उक्तं सन्निकृष्टविप्रकृष्टाभ्यामिति । सन्निकर्षः संयुक्तसंयोगाल्पत्वम्, विप्रकर्षस्तद्भूयस्त्वम्, तद्वद्भ्यामित्यर्थः । एतेन समवायिकारणमुक्तम् । दिक्पिण्डसंयोगस्त्वसमवायिकारणम्, तथाहि प्राङ्मुखस्य पुरुषस्य प्राच्यवस्थितयोः पिण्डयोरेकस्मिन् संयुक्तसंयोगभूयस्त्वमपरस्मिन् संयुक्तसंयोगाल्पतरत्वञ्चापेक्ष्य परत्वमपरत्वञ्चोत्पद्यते, (असमवायिकारणमुक्तम्) । सन्निकृष्टविप्रकृष्टाभ्यामिति,–विषयेण विषयिणं प्रत्ययमुपलक्षयति तथाचापेक्षाबुद्धेर्निमित्तकारणत्वमुक्तम् । एकदिगवस्थितयोरेव परत्वापरत्वे उत्पद्येते इति न सर्वत्रोत्पत्तिः । एकस्यैव द्रष्टुरपेक्षाबुद्धिः समुत्पद्यते इति न सर्वथोत्पत्तिः । अपेक्षाबुद्धिनियमान्न सर्वदोत्पत्तिः । (४)कारणशक्ते-

---

(१) जातौ व्यक्तौ चेति । गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दबोधे हेतुः विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य तादात्म्येन गोर्वा नियामकत्वादिति प्राभाकराणामाशयः ।

(२) वृद्धाः वैशेषिकनैयायिकसांप्रदायिका इत्यर्थः । त्रिष्वेकशक्तिलाभाय पदार्थ इत्येकवचनं गौतमसूत्रे प्रदर्शितम् ।

(३) जातिव्यक्ती एवेति । गुणादावाकृत्यभावादिति भावः ।

(४) कारणशक्तेरिति । कारणान्वयव्यतिरेकाभ्यामुत्पन्नयोः परत्वापरत्वयोरिति भावः ।

रुत्पन्नयोः प्रत्यक्षसिद्धत्वान्न परस्पराश्रयत्वम्, अन्यथा हि नोत्पद्येयातां न वा प्रतीयेयातां, परस्परापेक्षायां हि द्वयोरनुत्पत्तिरप्रतीतिश्च स्यात् प्रतीयेते च परत्वापरत्वे, प्रतीतिश्च तयोर्नोत्पत्तिमन्तरेणेति।

एककालाभ्यामिति,–कालिकपरत्वापरत्वे अभिप्रेत्य। तत्रैककालाभ्यामिति,–एको वर्त्तमानः कालो ययोर्युवस्थविरपिण्डयोः तावेककालौ ताभ्यामेककालाभ्यामित्यर्थः। सन्निकर्षोऽल्पतरतपनपरिस्पन्दान्तरितजन्मत्वम्। अत्रापि विषयेण विषयिणीं बुद्धिमुपलक्षयति तेन युवस्थविरपिण्डौ समवायिकारणे, कालपिण्डसंयोगश्चासमवायिकारणम्, अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिरपरत्वे बहुतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिः परत्वे निमित्तकारणम्। एते च परत्वापरत्वे अनियतदिग्देशयोरपि पिण्डयोरुत्पद्येते।

तत्र दैशिकपरत्वापरत्वयोः सप्तधा विनाशः। उत्पादस्तु युगपदेव द्वयोरन्यथाऽन्योन्याश्रयः स्यात्। (१)अपेक्षाबुद्धिनाशात् १ संयोगस्यासमवायिकारणस्य नाशात् २ द्रव्यस्य च समवायिकारणस्य नाशात् ३ निमित्तासमवायिकारणयोर्नाशात् ४ निमित्तसमवायिकारणयोर्नाशात् ५ समवाय्यसमवायिकारणयोर्नाशात् ६ निमित्तनाशासमवायिकारणनाशसमवायिकारणनाशेभ्यः ७।

तत्रापेक्षाबुद्धिनाशात् तावत्–परत्वोत्पत्तिः परत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिविनाशस्तद्विनाशात् परत्वविशिष्टद्रव्यज्ञानकाले परत्वनाशः, द्वित्वनाशवदेव सर्वमूहनीयम्।

असमवायिकारणनाशादपि, तद् यथा–यदैवापेक्षाबुद्धिस्तदैव परत्वाधारे पिण्डे कर्म ततो यदैव परत्वोत्पत्तिस्तदैव दिक्पिण्डविभागस्ततो यदा परत्वसामान्यज्ञानं तदा दिक्पिण्डसंयोगनाशः ततः सामान्यज्ञानादपेक्षाबुद्धिनाशस्तदैव दिक्पिण्डसंयोगनाशात् परत्वापरत्वयोर्नाशः। तत्र चापेक्षाबुद्धिनाशस्य परत्वनाशसमकालत्वान्न तन्नाशकत्वम्। नन्वसमवायिकारणानाशादपि गुणनाशे आत्ममनःसंयोगनाशादपि संस्कारादृष्टादीनां विनाशे बहु (२)व्याकुलं स्यादिति चेन्न विप्रकृष्टत्वेन परत्वस्य व्यापनात् परत्वाधारस्यान्यत्र गमने विप्रकर्षाभावात्, परत्वनिवृत्ति-

(१) सप्तधा विनाशं दर्शयितुं सप्त कारणान्याह अपेक्षाबुद्धिविनाशादित्यादिना।

(२) व्याकुलमिति। तथा चात्ममनःसंयोगनाशाददृष्टादिविनाशे मृतत्वापत्तिः स्यादिति भावः।

रावश्यकी। न च तदा नाशकान्तरमस्तीत्यन्यथाऽनुपपत्त्या संयोगनाश एव नाशकः कल्प्यते, संस्कारादृष्टादेः कार्य्यस्य स्मृतिसुखादेश्चिरेणापि दर्शनान्न तन्नाशकल्पना। उपलक्षणञ्चैतत् अवधेर्द्रष्टुश्च तद्देशसंयोगनाशादपि परत्वापरत्वे विनश्यतः युक्तेस्तुल्यत्वात्।

समवायिकारणनाशादपि क्वचित् परत्वनाशः। तथाहि–यदा पिण्डावयवे समुत्पन्नेन कर्मणाऽवयवान्तराद्विभागस्तदैवापेक्षाबुद्धिः, विभागात् पिण्डारम्भकसंयोगनाशः परत्वोत्पत्तिः, अग्रिमक्षणे संयोगनाशाद् द्रव्यनाशः परत्वसामान्यज्ञानं, द्रव्यनाशात् परत्वनाशोऽपेक्षाबुद्धिनाशश्च सामान्यज्ञानात्। तथाच यौगपद्यान्नापेक्षाबुद्धिनाशात् परत्वनाश इति।

क्वचिद् द्रव्यनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः। तद्यथा–पिण्डावयवे कर्मापेक्षाबुद्धेरुत्पादस्ततोऽवयवान्तरविभागः परत्वोत्पत्तिश्च तत आरम्भकसंयोगनाशसामान्यज्ञाने ततो द्रव्यनाशापेक्षाबुद्धिनाशौ ततश्च परत्वनाशः।

क्वचिद् द्रव्यस्य संयोगस्य च नाशाभ्यां परत्वनाशः, तद् यथा–यदा द्रव्यावयवविभागस्तदैव पिण्डकर्मापेक्षाबुद्ध्योरुत्पादस्तदनन्तरमवयवसंयोगनाशदिक्पिण्डविभागपरत्वोत्पत्तयः ततो द्रव्यनाशदिक्पिण्डसंयोगनाशपरत्वसामान्यबुद्धयः ततो द्रव्यनाशादिक्पिण्डसंयोगनाशाभ्यां परत्वनाशः सामान्यबुद्धेरपेक्षाबुद्धिनाश इति।

क्वचित् संयोगनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः, तद्यथा–परत्वोत्पत्तिपिण्डकर्मणी सामान्यज्ञानविभागौ अपेक्षाबुद्धिनाशदिक्पिण्डसंयोगनाशौ ततः परत्वनाशः।

क्वचित् समवाय्यसमवायिनिमित्तनाशेभ्यः, तद्यथा–परत्वोत्पत्तिपिण्डावयवविभागपिण्डकर्माणि युगपत्, तदनन्तरं परत्वसामान्यज्ञानावयवसंयोगनाशदिक्पिण्डविभागाः तदनन्तरमपेक्षाबुद्धिनाशद्रव्यनाशदिक्पिण्डसंयोगनाशेभ्यो युगपदुत्पन्नेभ्यः परत्वस्यापरत्वस्य वा दैशिकस्य नाशः।

कालकृतयोस्तु परत्वापरत्वयोरसमवायिकारणनाशाधीनो नाशो नास्ति, दैशिकयोर्दिक्पिण्डसंयोगनाशे सन्निकर्षविप्रकर्षनाशो यथा न तथा कालिकयोरिति, तयोः समवायिकारणनाशादपेक्षाबुद्धिनाशात्-द्वाभ्याञ्चेति त्रयः पक्षाः पूर्ववदूहनीयाः॥ २१॥

कालिकपरत्वापरत्वे प्रति विशेषमाह—

कारणपरत्वात् कारणापरत्वाच्च ॥ २२ ॥

परत्वापरत्वयोः कारणं कालस्तस्य परत्वापरत्वे परत्वासमवायिकारणकालसंयोगोऽपरत्वासमवायिकारणकालसंयोगश्च लक्षणयोक्तः, अन्यथाऽनन्वयापत्तेः, न हि परत्वापरत्वाभ्यामेव परत्वापरत्वे उत्पद्येते तस्मात् परत्वापरत्वपदयोस्तदुत्पादककालसंयोगावर्थौ लक्षणया ॥ २२ ॥

ननु परत्वेऽपि परत्वमपरत्वेऽप्यपरत्वं किं न स्यादित्यत आह—

परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ २३ ॥

कर्मभिः कर्माणि ॥ २४ ॥

गुणैर्गुणाः ॥ २५ ॥

एतानि सूत्राणि पूर्वमेव व्याकृतकल्पानि नेह व्याक्रियन्ते ॥२३॥ ॥ २४ ॥ २५ ॥

परत्वापरत्वादीनां मूर्त्तमात्रसमवेतत्वमुक्तं ज्ञानसुखादीनाञ्चात्मसमवेतत्वं तत्र समवाय एव क इति शिष्यजिज्ञासामनुरुध्य बुद्धेरुद्देशक्रमप्राप्ताया अपि लङ्घनात् समवायपरीक्षामाह—

इहेदमिति यतः कार्यकारणयोः स समवायः ॥ २६ ॥

कार्यकारणयोरित्युपलक्षणम्, अकार्यकारणयोरित्यपि द्रष्टव्यम्। तदुक्तं पदार्थप्रदेशाख्ये (१)प्रकरणे— "अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहेतिप्रत्ययहेतुः स समवायः" इति। असम्बद्धयोरविद्यमानत्व(२)मयुतसिद्धिः, इह कुण्डे दधि इह कुण्डे बदराणीतिवत् इह तन्तुषु पट इह वीरणेषु कट इह द्रव्ये गुणकर्माणि इह गवि गोत्वम् इहाऽऽत्मनि ज्ञानम् इहाऽऽकाशे शब्द इतीहबुद्धिरु-

(१) प्रकरण इति। प्रशस्तपादभाष्यस्येति शेषः।

(२) अयुतसिद्धिरिति। विभुनोस्सा यथा न, तन्निरूपितं युतसिद्ध्यभावादिति सूत्रे।

पुरुषस्तु पुष्करपलाशवन्निर्लेपः प्रतिबिम्बते परं बुद्धाविति"— यन्मन्यन्ते तदनेन पर्य्यायाभिधानसूचितप्रमाणेन निराक्रियते । तथाहि-बुद्धिशब्दो यदि बुध्यतेऽनयेति करणव्युत्पन्नस्तदा मन एव तत्पर्य्यवस्यति । न च मनः प्रत्यक्षम्, बुद्धिस्त्वहं बुध्ये इति प्रत्यक्ष-वेद्यैव । न चान्तःकरणस्य ज्ञानादयो धर्माः, कर्तृधर्मत्वेनैव तेषां सिद्धेः, भवति हि अहं जाने अहं प्रत्येमि अहमुपलभे इत्यहन्त्वसा-मानाधिकरण्येन प्रतिभासः । अभिमानोऽसाविति चेत् तात्त्विकत्वे बाधकाभावात् । पुरुषस्यागन्तुकधर्मानाधारत्वं कूटस्थत्वं तदेव वा-धकमिति चेन्नागन्तुकधर्माधारत्वेऽपि नित्यत्वसम्भवात्, न हि धर्मी धर्मश्चेत्येकं तत्त्वं येन धर्मोत्पादविनाशावेव धर्म्युत्पादविनाशौ स्याताम् । तथाच य एव चेतयते स एव बुध्यते जानात्युपलभते प्रत्येति चेति नार्थान्तरकल्पना युक्तेति दिक् ॥ १ ॥

तच्च ज्ञानं द्विविधं-विद्या (१)चाविद्या च । विद्या चतुर्विधा प्र-त्यक्षलैङ्गिकस्मृत्यार्षलक्षणा । अविद्याऽपि चतुर्विधा संशयविपर्य्य-यस्वप्नानध्यवसायलक्षणा । तत्र यल्लैङ्गिकं तदनिन्द्रि(२)यजम्, कुत एतदित्याह—

तत्रात्मा मनश्चाप्रत्यक्षे ॥ २ ॥

आत्माऽ(३)त्र परमात्मा स्वात्मा वा, स्वात्मनि मानसस्य क-श्चित्काहम्प्रत्ययस्याहं गौरः कृशो महाबाहुरित्यादिप्रत्ययतिरस्कृ-तत्वात् स्वात्मनोऽप्यप्रत्यक्षतोक्ता । चकारादाकाशकालदिशां वायोः परमाणूनाञ्च द्रव्याणामुपग्रहः ।

(४)इन्द्रियजमपि द्विविधं-सर्वज्ञीयमसर्वज्ञीयञ्च । सर्वज्ञीयं— यो-

---

(१) विद्येति । तत्र विशेष्यावृत्त्यप्रकारकं ज्ञानं विद्या । मिथ्याज्ञानमविद्या । प्रत्यक्षेति । सं-स्कारयोगजधर्मासहकृतेन्द्रियसन्निकर्षजन्यज्ञानमित्यर्थः तेन नार्षप्रत्यभिज्ञानसंग्रहः । स्मृतीति । संस्का-रमात्रजन्यं ज्ञानमित्यर्थः तेन प्रत्यभिज्ञाया अनुपग्रहः । आर्षेति । योगजसान्निकर्षजन्यज्ञानार्थकम् ।

(२) अनिन्द्रियजमिति । प्रत्यभिज्ञारूपसंस्कारजन्यज्ञानस्येन्द्रियजतया संस्कारजन्यज्ञानत्वाव-च्छेदेन नानिन्द्रियजत्वं लैङ्गिकन्त्वनिन्द्रियजमेवेति भावः । एवं चेदृक्सङ्गतिप्रदर्शनायैव प्रत्यक्षादिप्र-दर्शनमत्रेति भावः ।

(३) अत्रेति । सूत्र इत्यर्थः । तत्र ज्ञानविषय आत्मा मनश्चाप्रत्यक्षे लैङ्गिक इति सूत्रार्थः । आत्मपदस्य परात्मपरत्वे लक्षणा स्यादत आह स्वात्मेति ।

(४) इन्द्रियजमिति । प्रत्यक्षमित्यर्थः ।

गजधर्मलक्षणया प्रत्यासत्त्या तत्तत्पदार्थसार्थज्ञानं, तथाहि परमाणवः (१)प्रसक्ताः प्रमेयत्वादभिधेयत्वात् सत्त्वात् । (२)सामग्रीविरहात् कथमेवं महत्त्वस्यापि प्रत्यक्षं प्रति कारणत्वात् न च परमाणवो महान्तः, रूपवत्त्वस्यापि चाक्षुषप्रत्यक्षकारणत्वात्, न च दिगादयो रूपवन्त इति चेन्न (३)योगजधर्मसहकारिणा मनसैव तत्सम्भवात्, तदुपग्रहाच्चक्षुरादिना वा, अचिन्त्यप्रभावो हि योगजो धर्मो न सहकार्यान्तरमपेक्षते । "विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वादहमिवेत्यादि(४) तु" प्राभाकरो न मीमांसाभिज्ञः पुरुषत्वादहमिवेत्यादिवद्विपक्षबाधकतर्कशून्यत्वादप्रयोजकम् ।

अस्सर्वज्ञीयश्च प्रत्यक्षं द्विविधं-सविकल्पकं निर्विकल्पकञ्च ।

सविकल्पकं ज्ञानं न प्रमाणमिति (५)कीर्त्तिदिङ्नागादयः । तथाहि-अभिलापसंसर्गयोग्यप्रतिभासं हि तत्, न ह्यभिलापेन नाम्ना सम्भवत्यर्थस्य सम्बन्धो येन घट इति पट इति वा नामानुरञ्जितः प्रत्ययः स्यात् । न च जात्यादि परमार्थसत्, येन तद्वैशिष्ट्यं विषयेषु इन्द्रियेण गृह्येत । न च सतः स्वलक्षणस्यासता सम्बन्धः सम्भवति, न चासत् इन्द्रियगोचरः, तस्मादिन्द्रियेणालोचनं जन्यते आलोचनमहिम्ना च सविकल्पकमुत्पद्यमानं तत्रार्थे प्रवर्त्तयत् प्रत्यक्षमिति चोच्यते इति ।

---

(१) प्रसक्ता इति । संयोगवन्तः इति आर्षप्रत्यक्षाकारः । तत्पुरुषीययोगजधर्मकालीनप्रमेयत्वादिकं तत्पुरुषीयप्रत्यक्षे संनिकर्ष इत्याह प्रमेयत्वादिति ।

(२) परमाण्वादीनामुक्तप्रत्यक्षाविषयत्वे शङ्कते सामग्रीविरहादिति ।

(३) समाधत्ते । योगजेति । तदुपग्रहात् योगजधर्मघटितसन्निकर्षात्तथाविधमनःसम्बन्धाद्वा ।

(४) इत्यादि त्विति । अनुमानमिति शेषः ।

(५) कीर्तिदिङ्नागादय इति । जैनसूरय इत्यर्थः । तेषां—

कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम् ।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः ॥

इति प्रत्यक्षलक्षणम् । कल्पनापोढं कल्पनारहितम् । सविकल्पकं निराकरोति विकल्प इति । वस्तुनिर्भासात् वस्तुप्रकाशादसम्वादादसम्बद्धविषयकत्वाद्विकल्पो सविकल्पकं प्रत्यक्षं उपप्लवो भ्रम इति कारिकार्थः । इदमेव विवृणोति तथाहीत्यादिना । यस्मिन् ज्ञाने वस्तुनः संज्ञासम्बधः तदर्थसम्बन्धो वा प्रकारः तदभिलापसंसर्गयोग्यं स्यात् यथा घट इति सविकल्पकं ज्ञानं । तत्राद्यं दूषयति नहीति । द्वितीयं दूषयति नचेति ।

(१)तच्चैतदनुपपन्नमभिलापसंसर्गयोग्यप्रतिभासश्च भवेत् प्रमाणञ्चेन्द्रियार्थसन्निकर्षजन्यं स्यादिति सन्दिग्धव्यतिरेकित्वम् । (२)नामवैशिष्ट्यञ्च चाक्षुषज्ञाने सम्भवत्येव, सुरभिचन्दनामितिवदुपनीतभानसम्भवात् । यद्वा संज्ञावैशिष्ट्यं प्रत्यक्षज्ञाने न भासते संज्ञायाः स्मरणमात्रम्, स्मृतैव सा अर्थव्यावर्त्तिका, अभावज्ञाने प्रतियोगिस्मरणवत् । जात्यादिकञ्च वस्तुभूतं साधितमेवातः सविकल्पकमपीन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षम् । ननु निर्विकल्पकं न व्यवहारप्रवर्तकं न वा व्यवहारविषय इति किन्तत्र प्रमाणमिति चेत्, सविकल्पकमेव । तद्धि विशिष्टज्ञानम्, न च विशेषणज्ञानमन्तरेण तदुत्पद्यते, विशिष्टज्ञाने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य कारणत्वावधारणात् ॥ २ ॥

यत्र यथा ज्ञानं यत्कारणकञ्च तद्विशदयितुमाह—

ज्ञाननिर्देशे ज्ञाननिष्पत्तिविधिरुक्तः ॥ ३ ॥

ज्ञानान्तरान्निर्देष्टव्यं यत्प्रकारकं यद्विषयकं यद्धर्मकं तत्र ज्ञाननिर्देशे कर्त्तव्ये ज्ञानस्य निष्पत्तिविधिरुत्पत्तिप्रकार उक्तः उच्यते इत्यर्थः । आदिकर्मणि क्तविधानात् ॥ ३ ॥

कीदृशो निष्पत्तिविधिस्तमाह—

गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम् ॥४॥

गुणेषु रूपादिषु कर्मसु चोत्क्षेपणादिषु यज्ज्ञानं निष्पद्यते तत्र द्रव्यं कारणं योग्यद्रव्यनिष्ठमेव तदुभयं गृह्यत इति द्रव्ययोग्यतैव तत्र तन्त्रम्, सन्निकर्षश्च तेषां द्रव्यघटित एव, संयुक्तसमवायेन तेषां ग्रहणात् । यद्यपि विषक्तचम्पकावयवकर्पूरभागानामयोग्यानां गन्धो गृह्यते तथापि सन्निकर्षघटकं तत्रायोग्यमपि द्रव्यमेव । यद्यपि शब्दग्रहे द्रव्ययोग्यता न तन्त्रं तथापि तत्रैव समवेतः शब्दो गृह्यत

---

(१) निराकरोति । तच्चैतदिति । संदिग्धव्यतिरेकित्वमिति । सविकल्पकमेवाभिलापसंसर्गयोग्याप्रतिभासं सदपि इन्द्रियार्थसन्निकर्षजन्यतया प्रमाणं स्यादिति तत्र बौद्धोक्ताप्रामाण्यमेकत्र प्रामाण्यसहचरितेनेन्द्रियसन्निकर्षजन्यत्वेन सन्दिह्यते इत्यर्थः, तथाच तत्र नाप्रामाण्यनिश्चय इति भावः ।

(२) बाधकमपि निराकरोति नामेति । नन्वेवं नामाज्ञानदशायां सत्यपीन्द्रियसंनिकर्षे प्रत्यक्षं न स्यादत आह यद्वेति । प्रतियोगिस्मरणवदिति । पदज्ञानादर्थस्मृतिरिवार्थज्ञानात्पदस्मृतिरित्यत्र दृष्टान्तोऽयम् ।

इति तदेव तन्त्रम्। नन्वदृष्टसन्निकर्षकल्पना कुतः क्रियते इति चेन्न ज्ञाननिष्पत्तेः, कार्य्येण हि कारणमवश्यं कल्पनीयमिति भावः ॥ ४ ॥

अपरं ज्ञाननिष्पत्तिविधिमाह—

सामान्यविशेषेषु सामान्यविशेषाभावात्तत एव ज्ञानम् ॥ ५

सामान्यं सत्ता तस्य विशेषा द्रव्यत्वगुणत्वकर्मत्वानि एवमेतेषामपि सामान्यानां विशेषाः पृथिवीत्वादिरूपत्वाद्युत्क्षेपणत्वादीनि। तत्र द्रव्यगतानां सामान्यानां तत एव योग्याश्रयविशेषादेव तन्निबन्धनाच्च संयुक्तसमवायात् गुणकर्मगतानामपि सामान्यानां तत एव योग्याश्रयादेव तन्निबन्धनाच्च संयुक्तसमवेतसमवायात् समवेतसमवायाच्च सार्वेन्द्रियं ज्ञानम्,–(१)गुणत्वे च संयुक्तसमवेतसमवायात्, शब्दत्वकत्वादौ समवेतसमवायात्। सत्तायाः संयुक्तसमवायात् संयुक्तसमवेतसमवायात् समवेतसमवायाच्च सार्वेन्द्रियं ज्ञानम्। गुणत्वे च संयुक्तसमवायः समवायश्च न प्रत्यासत्तिरिति। ननु तत एव स्वाश्रयसन्निकर्षादेवेत्यवधारणानुपपत्तिः यतः सामान्ये विशेषेषु च पृथिवीत्वादिषु सामान्यविशेषान्तरमस्त्येव तत्सन्निकर्षोऽपि कारणमेवात आह—सामान्यविशेषाभावादिति। न हि सामान्यविशेषेषु सामान्यविशेषा वर्तन्ते, अनवस्थाप्रसङ्गात् तेषां परस्परं भेदप्रतीतिः स्वरूपत एव, गवेतरावृत्तित्वे सति सकलगोवृत्तित्वलक्षणोपाधिसम्भेदाद्वा। एवं घटत्वादावपीति ॥ ५ ॥

ननु सामान्यविशेषेषु सामान्यविशेषाभावाद्यथा तन्निरपेक्षमेव ज्ञानं तथा द्रव्यगुणकर्मस्वपि किं तन्निरपेक्षमेव? नेत्याह—

सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु ॥ ६

ज्ञानमुत्पद्यते इति प्रकृतम्। द्रव्यगुणकर्मसु द्रव्यत्वगुणत्वकर्मत्वविशिष्टबुद्धिस्तावदस्ति, विशिष्टज्ञानञ्च विशेष्यविशेषणेन्द्रियसन्निकर्षादुत्पद्यते इति सामान्यविशेषापेक्षा ज्ञानावश्यकी। भवति हि द्रव्यमिदं गुणोऽयं कर्मेदमिति विशिष्टज्ञानमिति भावः ॥ ६ ॥

(१) उक्तं संयुक्तसमवेतसमवायादिकमेव विवृणोति गुणत्वेति।

तत् किं द्रव्येऽपि सामान्यविशेषमात्रापेक्षमेव ज्ञानम् ? अत आह—

द्रव्ये द्रव्यगुणकर्मापेक्षम् ॥ ७ ॥

ज्ञानमुत्पद्यते इति प्रकृतम् । घण्टावान् शुक्लो गौर्गच्छतीति ज्ञानम् । तत्र द्रव्यं घण्टा विशेषणम्, शुक्ल इति गुणः, गच्छतीति कर्म । तथाच नागृहीतविशेषणा विशिष्टप्रतीतिर्न वा विशेषणसम्बन्धमन्तरेणेति भवति द्रव्यगुणकर्मापेक्षेति भावः ॥ ७ ॥

तत् किं गुणकर्मणोरपि गुणकर्मापेक्षा ? नेत्याह—

गुणकर्मसु गुणकर्माभावाद्गुणकर्मापेक्षं न विद्यते ॥८॥

ज्ञानमिति शेषः । गुणे गुणविशिष्टबुद्धेः कर्मसु कर्मविशिष्टबुद्धेरभावात् गुणकर्मापेक्षा न तत्तद्बुद्धिः । न हि गुणे गुणो, न वा कर्मसु कर्म, येन तत्र विशेषणत्वेन भासेतेति भावः ॥ ८ ॥

ननु गुणकर्मणोः स्फुरणाद्गुणबुद्धौ कर्मबुद्धौ च कथं न गुणकर्मापेक्षेत्याशङ्क्य प्रकरणान्तरमारभते—

समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्य्यकारणभूते ॥ ९ ॥

समवायिन इत्यभिधानात् सम्बन्धस्य कारणतामाह, तथाच गुणे गुणसमवायाभावात् कर्मसु कर्मसमवायाभावाच्च न तत्तज्ज्ञाने गुणकर्मापेक्षा विशेषणत्वेन, विशेष्यत्वेन त्वस्त्येव । एवञ्च श्वेतः शङ्ख इत्यादिप्रतीतौ श्वैत्यसमवायस्य श्वैत्यगुणस्य श्वैत्यविशेषणज्ञानस्य च कारणत्वमित्युक्तम्, तथाच विशेषणसम्बन्धविशेषणतज्ज्ञानानां विशिष्टप्रत्यक्षप्रमां प्रति कारणत्वमिति, तेन पूर्वोक्तं सर्वं सिध्यति ॥ ९ ॥

ननु यथा घण्टावानित्यत्र द्रव्यापेक्षं द्रव्यज्ञानम्, तथाऽयं स्तम्भोऽयं कुम्भ इत्यादावपि द्रव्याविशेषणकबुद्धौ द्रव्यबुद्धिः कारणं तथाच क्वापि प्रथमतो द्रव्यबुद्धिर्न स्यादित्यत आह—

द्रव्येष्वनितरेतरकारणाः ॥ १० ॥

बुद्धय इति शेषः । स्तम्भज्ञानानन्तरकालीनमपि कुम्भज्ञानं न स्तम्भज्ञानकार्य्यं स्तम्भस्य कुम्भं प्रति विशेषणत्वायोगात् ॥ १० ॥

ननु घटपटादिबुद्धीनां क्रमो दृश्यते, क्रमश्च कार्य्यकारणभावघटित एवेत्यत आह—

कारणायौगपद्यात् कारणक्रमाच्च घटपटादिबुद्धीनां क्रमो न हेतुफलभावात् ॥ ११ ॥

कारणक्रमाधीनो घटपटादिबुद्धीनां क्रमो, न हेतुफलभावाधीनः। कारणक्रम एव कथमत आह—कारणायौगपद्यादिति। बुद्धीनां यौगपद्यं प्रतिषिद्धमतो नानाबुद्धिकारणानामपि न यौगपद्यम्, यदि तु कारणयौगपद्यं भवेत्तदा कार्य्ययौगपद्यमप्यापद्येत, तथाच युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति बहुभज्येतेति भावः॥ ११॥

इति श्रीशाङ्करे वैशेषिकसूत्रोपस्कारेऽष्टमाध्यायस्य प्रथममाह्निकम्।

अष्टमाध्याये द्वितीयाह्निकम् ।

प्रात्यक्षिकस्य सविकल्पकस्य निर्विकल्पकस्य च ज्ञानस्य नि-
ष्पत्तिविधिमभिधायेदानीं विशिष्टवैशिष्ट्यप्रत्यक्षमभिधातुमेकदे-
शमाह—

अयमेष त्वया कृतं भोजयैनमिति बुद्ध्यपेक्षम् ॥ १ ॥

सन्निकृष्टे वस्तुनि तावदयमिति बुद्धिरुत्पद्यते, विप्रकृष्टे च
वस्तुन्येष इति । (१)क्रियायां स्वतन्त्रोऽयमिति बुद्धिमपेक्ष्य त्वये-
ति कर्तृत्वोपरक्ता बुद्धिः । कारणव्यापारविषयत्वबुद्धिमपेक्ष्य कृत-
मिति कर्मबुद्धिः । अयं भुजिक्रियायां कर्ता प्रयोजकश्चायमिति बु-
द्धिमपेक्ष्य भोजयेति । नियोज्यनियोक्तृव्यापारस्य विषयोऽयमिति
(२)बुद्ध्यपेक्षमेनमिति । एवमन्यदपि बुद्ध्यपेक्षमूहनीयम् ॥ १ ॥

अन्वयव्यतिरेकपरिच्छेद्यमेवैतदित्याह—

दृष्टेषु भावाददृष्टेष्वभावात् ॥ २ ॥

यदाऽयमितिबुद्धेः सन्निकृष्टो विषयः एष इति बुद्धेर्विप्रकृष्टोऽपि
बुद्ध्यारूढो विषयः त्वयेतिबुद्धेः सन्निकृष्टः कर्ता विषयः कृतमिति
बुद्धेः कर्म विषयः भोजयेतिबुद्धेर्नियोज्यनियोक्तारौ विषयौ एनमिति-
बुद्धेस्तदुभयव्यापारो विषयः सन्निकृष्टो भवति तदैतादृशी बुद्धि-
रुत्पद्यते, अदृष्टेषु तु विषयेषु नैता बुद्धयः प्रादुर्भवन्तीत्यन्वयव्यति-
रेकगम्यमेवैतदित्यर्थः ॥ २ ॥

इदानीं प्रकरणान्तरमारभते—

अर्थ इति द्रव्यगुणकर्मसु ॥ ३ ॥

एतेषां द्रव्यगुणकर्मणामर्थ्यमानत्वं(३) तेन तेन विधिनोक्तम्, तेन
तेषु त्रिषु वैशेषिकाणामर्थ इति परिभाषा अर्थपदेन त्रयाणामुपस्थि-
तेः । तदुक्तं-प्रशस्तदेवाचार्यैः "त्रयाणामर्थशब्दाभिधेयत्वञ्च" इति ॥३॥

---

(१) क्रियायामिति । क्रियायां साध्यायां कारके प्रधानभूतो योऽर्थः स स्वतन्त्रः तज्ज्ञानं क-
र्तृत्वज्ञानहेतुः स्वतन्त्रः कर्तेत्यनुशासनादित्यर्थः ।

(२) बुद्ध्यपेक्षमिति । विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे विशेषणज्ञानं विशेष्यज्ञानं च कारणमि-
ति तत्तद्बुद्ध्युपपादनमिति भावः ।

(३) अर्थ्यमानत्वमिति । अर्थशब्दाभिधेयत्वमित्यर्थः ।

प्रकरणान्तरमवतारयति—

द्रव्येषु पञ्चात्मकत्वं प्रतिषिद्धम् ॥ ४ ॥

द्रव्येष्विति द्रव्यपदार्थनिरूपणप्रकरणमुपलक्षयति। प्रत्यक्षाप्रत्यक्षाणामित्यादिसूत्रेण शरीरादीनां पञ्चात्मकत्वं पञ्चभूतात्मकत्वं प्रतिषिद्धं निराकृतम्। यथा शरीरस्य न नानाप्रकृतिकत्वं तथा वक्ष्यमाणानां घ्राणादीनामिन्द्रियाणामपि। तेन तेषां प्रतिनियतगुणग्राहकत्वं सिध्यतीति भावः ॥ ४ ॥

यदर्थमिदमारब्धं तदाह—

भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः॥५॥

गन्धो ज्ञायतेऽनेनेति गन्धज्ञानं घ्राणन्तत्र पृथिवी पृथिवीमात्रं प्रकृतिः उपादानकारणम्। कुत एतदित्यत आह-गन्धवत्त्वात्। न हि गन्धवत् निर्गन्धेनारभ्यते इत्युक्तम्। गन्धवत्त्वञ्च बहिरिन्द्रियाणां ग्राह्यजातीयगुणवत्त्वनियमात् सिद्धम्। तर्हि पार्थिवत्वाविशेषेऽपि शरीरावयवान्तराणां न गन्धव्यञ्जकत्वं किन्तु घ्राणस्यैवेति कुतो नियम इत्यत आह-भूयस्त्वादिति। इतरद्रव्यानभिभूतैः पार्थिवावयवैरारब्धत्वमेव भूयस्त्वम्। पारिभाषिकञ्चैतद्भूयस्त्वं समानतन्त्रेऽपि ॥ ५ ॥

इन्द्रियान्तरेऽप्येतदतिदिशति—

तथापस्तेजोवायुश्च रसरूपस्पर्शाविशेषात् ॥ ६ ॥

रसनचक्षुस्त्वगिन्द्रियाणां प्रकृतिरिति शेषः। तेन यथासंख्यं रसनादीनामबादयः प्रकृतयः, तत्तत्प्रतिनियतार्थग्राहकत्वात्। अत्रापि नियमे भूयस्त्वमेव तन्त्रम्। रसादिमत्त्वे च रसनादीनां ग्राह्यजातीयविशेषगुणवत्त्वनियम एव प्रमाणमित्युक्तम्।(१)एवञ्च विशिष्टादृष्टोपगृहीतकर्णशष्कुल्यवच्छिन्नो नभोदेश एव श्रोत्रम् ॥ ६ ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारेऽष्टमाध्यायस्य
द्वितीयमाह्निकम्।

समाप्तश्चायमष्टमोऽध्यायः।

---

(१) ननु सूत्रे शब्दग्रहणं कुतो न कृतमत आह एवञ्चेति। श्रोत्रस्येन्द्रियरूपत्वेपि नित्यत्वादप्रकृतिकत्वेन तत्परित्याग इत्यर्थः।

नवमाध्याये प्रथमाह्निकम् ।

संयोगसमवायान्यतरसन्निकर्षजलौकिकप्रत्यक्षनिरूपणानन्तरं (१)तदितरप्रत्यासत्तिजन्यलौकिकप्रत्यक्षव्युत्पादनफलकं नवमाध्यायमाह—

क्रियागुणव्यपदेशाभावात् प्रागसत् ॥ १ ॥

कार्य्यमिति शेषः । प्रागिति । कार्य्योत्पत्तेः प्राक् कार्य्यं घटपटादि असत् तत्कालीनस्वजनकाभावप्रतियोगीत्यर्थः । अत्र हेतुः-क्रियागुणव्यपदेशाभावात् । यदि तदानीमपि कार्य्यं घटादि सदेव स्यात् तदा क्रियावत्त्वेन गुणवत्त्वेन च व्यपदिश्येत, यथोत्पन्ने घटे घटस्तिष्ठति घटश्चलति रूपवानयं दृश्यते घट इत्यादिप्रकारेण व्यपदिश्यते न तथोत्पत्तेः प्रागपि व्यपदेशोऽस्ति तेन गम्यते तदानीमसन्निति । स च व्यूह्यमानेषु (२)वीरणेषु योज्यमानेषु तन्तुषु चक्रारूढायां मृदि कुलालादिव्यापारेषु अनुवर्त्तमानेषु भविष्यत्यत्र कटः पटो घटो वेति सार्वलौकिकी प्रत्यक्षप्रतीतिः, चक्षुर्विस्फारणानन्तरं जायमानत्वात् । (३)न च संयोगसमवायान्यतरघटिता प्रत्यासत्तिरत्र प्रभवति, तस्मादिन्द्रियसम्बद्धविशेषणता प्रत्यासत्तिरत्र तन्त्रम् । ननु चान्योन्याश्रयः सत्यां विशेषणतायां तत्प्रतीतिः प्रतीतौ च विशेषणतेति चेन्न विशेषणता हि तदुभयस्वरूपमेव (४)उपश्लिष्टप्रत्ययजननयोग्यम् । तच्च प्रतीतेः पूर्वमपि सदेव, तदुक्तं न्यायवार्त्तिके—“समवायेऽभावे च विशेषणविशेष्यभावः” इति । स चायं प्रागभावः प्रतियोगिजनकः, न हि घटे जाते स एव घटस्तदानीमेवोत्पद्यते तत्र कारणान्तरसत्त्वेऽपि कारणवैकल्यमनुस्रियमाणं स्वप्रागभाववैकल्यमेवानुसर्त्तुमर्हति । तद्घटोत्पत्तौ स एव घटः प्रतिबन्धक इति चेत्तर्हि प्रतिबन्धकाभावत्वेन तस्य कार-

---

(१) महर्षिकणादमतेऽभावपदार्थो नास्तीति अपसिद्धान्तनिरासाय तन्निरूपकसूत्रव्याख्यानायारभते तदितरेति । विशेष्यविशेषणभावाख्यप्रत्यासत्त्याऽभावप्रत्यक्षमिति तात्पर्यम् ।

(२) वीरणेष्विति । वीरणम् तृणविशेषो कटोपयोगीत्यर्थः ।

(३) नचेति । घटो भविष्यति घटाभाववद्भूतलमित्यादौ चक्षुःसंयुक्ते भूतले घटाभावस्य संयोगाद्यभावादित्यर्थः ।

(४) उपश्लिष्टेति । उपश्लिष्टप्रत्ययश्चोक्ताविशिष्टसंबद्धप्रतीतिरिति भावः ।

णत्वमवर्जनीयम् । ननु यदि घट एव तस्या(१)भावस्तदा घटे नष्टे तदुन्मज्जनापत्तिरिति चेन्न घटनाशस्यापि तद्विरोधित्वात् न हि विरोधिसत्त्वकालेऽपि विरोध्यन्तरप्रादुर्भाव इति । न ह्यनयोर्देशकृतो विरोधो येन गोत्वाश्वत्ववत् समानकालीनत्वं स्यात् । किं तर्हि ? कालकृतस्तथाच कथमेककालावस्थायित्वसम्भवेत् ॥ १ ॥

(२)अभावान्तरं प्रतीतिबलसिद्धमाह—

सदसत् ॥ २ ॥

यथा कारणव्यापारात् पूर्वं प्रत्यक्षानुमानाभ्यां कार्य्यस्यासत्त्वं प्रमीयते तथा विनाशकस्य मुद्गरादेर्व्यापारानन्तरं सदेव कार्य्यं घटादि इदानीमसदिति प्रत्यक्षानुमानाभ्यामेव प्रमीयते । स चायममाभावो ध्वंस इति गीयते । भवति हि घटो नष्टो ध्वस्त इदानीं श्रुतपूर्वो गकारो नास्तीत्यादिधीरिति भावः ॥ २ ॥

ननु घट एवावस्थाविशेषे ध्वंसव्यवहारं करोति न तु घटादन्यस्तस्य ध्वंस इत्यत आह—

असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् ॥ ३ ॥

सदिति सूत्रशेषः । असतः सत् अर्थान्तरम् । कुत इत्यत आह-क्रियागुणव्यपदेशाभावादिति । न हि प्रध्वंसकालेऽपि वर्त्तते घटः-अस्ति घटः-इदानीं रूपवान् घटः-घटमानयेत्यादिव्यपदेशस्तदितो वैधर्म्यादसतः सदर्थान्तरमिति ॥ ३ ॥

प्रागभावप्रध्वंसौ साधयित्वाऽन्योन्याभावं साधयितुमाह—

सच्चासत् ॥ ४ ॥

यत्र सदेव घटादि असदिति व्यवह्रियते तत्र तादात्म्याभावः प्रतीयते । भवति हि असन्नश्वो गवात्मना-असन् गौरश्वात्मना-असन् पटो घटात्मना-अघटः पटः-अनश्वो गौः-अगौरश्व इत्यादिप्रतीतिः । तदस्यामश्वान्याभाववान् गौः पटान्योन्याभाववान् घट इत्यन्योन्याभाव एव (३)तादात्म्याभावापरनामा भासते । तदत्र

(१) तस्य प्रागभावस्य ।
(२) अभावान्तरमिति । ध्वंसमित्यर्थः ।
(३) तादात्म्याभावेति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः ।

तादात्म्यं (१)प्रतियोगितावच्छेदकम्। प्रतियोगिसमानाधिकरणश्चा-
यमभावः, भवति हि घटो न भूतलमिति प्रतीतिः। नित्यश्च, कदा-
चिदपि घटपटयोस्तादात्म्यासम्भवात् ॥ ४ ॥

इदानीं चतुर्थमभावमत्यन्ताभावाख्यमाह—

यच्चान्यदसदतस्तदसत् ॥ ५ ॥

अतः पूर्वोक्तादभावत्रयात्, यदन्यदसत् तदसत् तदन्यन्तास-
त्वम्। असदित्युभयत्र भावप्रधानो निर्देशः। तत्रैकमसदुद्देश्यम-
परमसद्विधेयम्, तथाचोक्ताभावत्रयभिन्नो योऽभावः सोऽत्यन्ता-
भाव इति पर्य्यवसन्नोऽर्थः। तत्र प्रागभावस्य उत्तरावधिकत्वम्,
प्रध्वंसस्य पूर्वावधिकत्वम्, अन्योन्याभावस्य प्रतियोगिसमाना-
धिकरणत्वमत्यन्ताभावस्य तु त्रितयवैधर्म्यमतश्चतुर्थोऽयमभावः॥५॥

इदानीं प्रकरणान्तरमारभते, तत्र प्रध्वंसे तावत् प्रत्यक्षसाम-
ग्रीमाह—

**असदिति भूतप्रत्यक्षाभावात् भूतस्मृतेर्विरोधि-
प्रत्यक्षवत् ॥ ६ ॥**

असदितीतिकारेण प्रत्यक्षाकारं ज्ञानमाह, तेनासन् घटः—नष्टो
घटः—ध्वस्त इदानीं घट—इति प्रत्यक्षप्रतीतिरस्ति। तत्र दृष्टान्तो—वि
रोधिप्रत्यक्षवदिति। विरोधिनो घटादेर्यथा स्पष्टं प्रत्यक्षं तथा तत्प्र-
ध्वंसस्यापि। तत्र कारणमाह—भूतप्रत्यक्षाभावादिति। भूतस्य उत्प-
द्य विनष्टस्य घटादेः प्रत्यक्षाभावात्। एतेन (२)योग्यानुपलब्धि-
माह। तत्र चायं तर्कः सहकारी—यद्यत्र घटोऽभविष्यत् भूतलमिवा-
द्रक्ष्यत न च दृश्यते तस्मान्नास्तीति। सहकार्य्यन्तरमाह—भूतस्मृ-
तेरिति। भूतस्य प्रतियोगिनो घटादेः स्मृतेरिति प्रतियोगि-
(३)स्मरणमुक्तम् ॥ ६ ॥

---

(१) प्रतियोगितावच्छेदकमिति। प्रतियोगितावच्छेदकसम्बन्ध इत्यर्थः।

(२) योग्यानुपलब्धिमिति। सा चाभावप्रत्यक्षे हेतुरित्यर्थः। योग्यत्वमनुपलब्धौ विशेष-
णम्। योग्यता च प्रतियोगिसत्त्वप्रसञ्जनप्रतियोगिकत्वरूपा ग्राह्या।

(३) स्मरणमिति। इदमपि कारणकथनम्। अभावप्रत्यक्षे प्रतियोगिज्ञानं कारणमित्यर्थः।
स्मरणपदं सम्भवाभिप्रायकम्।

प्रागभावे प्रध्वंसप्रत्यक्षताकारमतिदिशन्नाह—

तथाऽभावे भावप्रत्यक्षत्वाच्च ॥ ७ ॥

सामान्यवाच्यप्ययमभावशब्दः प्रकरणात् प्रागभावपरः । य-
था प्रध्वंसे प्रत्यक्षज्ञानं तथा प्रागभावेऽपि । कुतः? भावप्रत्यक्षत्वात् ।
भावस्य व्यूह्यमानवीरणादेः प्रत्यक्षत्वात् प्रत्यक्षेण विषयीक्रियमा-
णत्वात् ।

यद्वा भावस्याधिकरणस्य प्रतियोगिनश्च प्रत्यक्षत्वात् यो-
ग्यत्वादित्यर्थः । संसर्गाभावग्रहेऽधिकरणयोग्यतायाः प्रतियोगियो-
ग्यतायाश्च तन्त्रत्वात् । चकारात् प्रतियोगिस्मरणमुक्तञ्च तर्कं स-
मुच्चिनोति । अनादेरपि प्रागभावस्यानन्तस्यापि प्रध्वंसस्याविशे-
षमात्र प्रत्यक्षत्वम् ॥ ७ ॥

अन्योन्याभावस्य प्रत्यक्षतामाह—

एतेनाघटोऽगौरधर्मश्च व्याख्यातः ॥ ८ ॥

एतेनेति प्रतियोगिस्मरणाधिकरणग्रहणप्रागुक्ततर्कानतिदिश-
ति । योग्यानुपलम्भः सर्वत्र समानः । चकार उक्तसमुच्चयार्थः ।
अधर्म इत्यतीन्द्रियस्यापि धर्मस्य सुखज्ञानादावधिकरणेऽन्योन्या-
भावस्य प्रत्यक्षतां वदन् अन्योन्याभावग्रहे प्रतियोगियोग्यता न
तन्त्रं किन्त्वधिकरणयोग्यतामात्रं तन्त्रमित्युपदर्शयति । कथमन्यथा
स्तम्भः पिशाचो न भवतीति पिशाचान्योन्याभावः स्तम्भे गृह्ये-
त स्तम्भात्मतया पिशाचानुपलम्भस्य तदन्योन्याभावग्राहकत्वा-
त्, तस्याप्यनुपलम्भस्य प्रतियोगिसत्त्वविरोधित्वात् स्तम्भे पि-
शाचतादात्म्ये सत्यनुपलम्भानुपपत्तेः । (१)ननु पिशाचतादात्म्यमिह
न प्रतियोगि, किन्तर्हि ? पिशाचः, स च स्तम्भे वर्त्तमानोऽपि गुरु-
त्ववन्नोपलभ्यते इति तदनुपलम्भः प्रतियोगिसत्त्वविरोधी न भव-
तीति चेन्न प्रतियोग्यनुपलम्भवत् (२)प्रतियोगितावच्छेदकानुप-
लम्भस्याप्यभावग्रहकारणत्वात् । ननु प्रतियोगित्वग्रहाधीनोऽन्यो-

---

(१) पिशाचतादात्म्यानुपलम्भः प्रतियोग्यनुपलब्धिरूपः पिशाचानुपलब्धिस्तु न पिशाच-
सत्त्वं विरुणद्धि तथासति प्रतियोग्यविरोधिन्यपि अनुपलब्धिरभावं ग्राहयेदित्याशयेनाशङ्कते नन्विति ।

(२) उत्तरमाह प्रतियोगीति । प्रतियोगितावच्छेदकानुपलम्भस्य प्रतियोगितावच्छेदकसम्ब-
न्धानुपलम्भस्येत्यर्थः ।

न्याभावग्रहः,प्रतियोगित्वञ्चा(१)न्योन्याभावविरहात्मत्वं ततश्चान्योन्याभावग्रहाधीन एवान्योन्याभावग्रह इति चेन्नाधिकरणावृत्तित्वेन ज्ञायमानो धर्म एव प्रतियोगितावच्छेदको न तु प्रतियोगितावच्छेदकत्वेनापि तद्ग्रहस्तन्त्रमित्युक्तत्वात् ॥ ८ ॥

अथेदानीमत्यन्ताभावप्रत्यक्षतामाह—

अभूतं नास्तीत्यनर्थान्तरम् ॥ ९ ॥

भूतमिदानीं नास्तीतिप्रतीतिर्ध्वंसमालम्बते भूतत्वं नोल्लिखति किन्त्विदं नास्तीतिमात्रोल्लेखिनी प्रत्यक्षप्रतीतिरत्यन्ताभावमालम्बते अभूतमित्युत्पादविनाशालम्बनत्वं द्योतयति, अनर्थान्तरत्वमपि (२)तदाभप्रायकमेव यथा जले पृथिवीत्वं नास्ति पृथिव्यां न जलत्वमिति। यदि हि जलावयविनि पृथिवीत्वं स्यात् उपलभ्येत न चोपलभ्यते तस्मान्नास्तीति-तर्कपुरस्कारोऽत्रापि द्रष्टव्यः। एवञ्च यद्वस्तु यत्र न कदाऽपि भविष्यति न च कदाचिद्भूतं तस्य वस्तुनस्तत्रात्यन्ताभावो मन्तव्यः। भूतभविष्यतोश्च तत्र प्रध्वंसप्रागभावालम्बन एव तत्राधिकरणे नास्तीतिप्रत्ययः। अतएवायमात्यन्तिकस्त्रैकालिक इत्यभिधीयते ॥ ९ ॥

ननु गेहे घटाभावो नात्यन्ताभावः कदाचित्तत्र घटसत्त्वात्; नापि प्रागभावप्रध्वंसौ तयोः समवायिकारणमात्रवृत्तित्वात्, नाप्युत्पादविनाशशीलोऽत्यन्ताभाव एव आत्यन्तिकश्चोत्पादविनाशशीलश्चेति विरोधात्, नापि चतुर्थ एवायं संसर्गाभावः तस्य त्रैविध्यविभागव्याघातादित्यत आह—

---

(१) अन्योन्याभावविरहात्मत्वमिति। अभावविरहात्मत्वं वस्तुनः प्रतियोगितेत्युक्तेः।

(२) तदभिप्रायकमेवेति। उत्पादविनाशाश्रयातिरिक्ताभावान्तरविषयकत्वमेवेत्यर्थः। अत्र 'भूतमिदानीं नास्तीति' प्रतीतिर्ध्वंसमवलम्बते। अभूतमिति अभविष्यत उपलक्षकम् तथाच यदत्र न भूतं नापि भविष्यत् तदत्र नास्तीति प्रत्यक्षप्रतीतिर्भवति तत्प्रत्यक्षमनर्थान्तरम्। अनर्थान्तरमित्यस्य नास्ति विषयतयाऽर्थान्तरमत्यन्ताभावभिन्नं यस्येत्यर्थः। यथाऽवयविन्यां पृथिव्यां जलत्वं नास्तीत्यादिप्रत्यक्षं न ध्वंसप्रागभावविषयत्वेनोपपद्यतेऽतोऽत्यन्ताभाव एव तस्य विषयो तत्प्रत्यक्ष एवेन्द्रियसंयुक्तविशेषणतासंनिकर्षतर्कसहकृतः प्रतियोग्युपलम्भाभावः प्रतियोगिज्ञानं च कारणमिति अस्मद्गुरुचरणाः।

नास्ति घटो गेहे इति(१) सतो घटस्य गेहसंसर्गप्रतिषेधः ॥ १० ॥

गेहे घटस्य यः संसर्गः संयोगस्तस्य प्रतिषेधः, स च यदि कदाचिदपि न घटस्तदात्यन्ताभाव एव, (२)भविष्यतः प्रागभावो भूतस्य प्रध्वंसाभावः। तर्हि घटसंसर्गो गेहे नास्तीति—प्रतीत्या भवितव्यमिति चेत् प्रतीत्या भवितव्यमिति कोऽर्थः ? यदि (३)तद्विषयया प्रतीत्या भवितव्यमित्यापादनार्थस्तदेष्टापत्तिः। अथ तदुल्लेखिन्येति, (४)तदा गेहे इत्यधिकरणोल्लेखस्यैव संसर्गोल्लेखपर्य्यवसानमाधारत्वस्यैव धर्मसम्बन्धाकारत्वात्। तत् (५)किं घटस्तत्रास्त्येव। (६)अस्त्येवेति कोऽर्थस्तत्र समवेतः संयुक्तो वा ? नाद्यः समवेतघटस्य तत्राभावात्। न द्वितीयः संयोगस्य निषेधात्। नन्वेवं घटादीनां केवलान्वयित्वप्रसङ्गः, तत्संयोगसमवायान्तरस्यैव सर्वत्र निषेधादिति चेन्न तदुभयनिषेधस्यैव (७)घटनिषेधात्मकत्वात्। (८)तत् किं घटस्तत्संयोगश्चेत्येकं तत्त्वं, येन घटसंयोगनिषेधो घटनिषेधः स्यात्, (९)तत किं घटस्तत्संयोगसमवायावेकं तत्त्वं, येन तद्विधरेव घटविधिः स्यात्, न हि तौ यत्र निषिध्येते तत्र घटान्वयो येन केवलान्वयित्वं तस्य स्यात्, तथाच यस्य यो विधिस्तन्निषेध एव त-

---

(१) सत इति। असत्ख्यात्यभ्युपगममते गगनपुष्पाभाववदत्यन्तासतोऽभाव एवात्यन्ताभाव इति भ्रमो माभूदतः सत इति सूत्रे घटस्य विशेषणम्।

(२) भविष्यत इति। संयोगस्येति शेषः।

(३) तद्विषययेति। प्रत्यक्षरूपयेत्यर्थः। तदुल्लेखिन्येति। शाब्दरूपयेत्यर्थः।

(४) प्रथमे इष्टापत्तिमुक्त्वाऽन्यत्र दोषमाह तदेति। तथा च गेहे घटो नास्तीत्यत्र अधिकरणार्थया सप्तम्या संसर्गरूपयैव गृहवृत्तिघटसंयोगाभावः प्रतीयते गेहे घटसंसर्गो नास्तीति प्रतीत्या तु घटसंसर्गनिष्ठसंसर्गाभाव इति न कश्चिद्दोष इति भावः।.

(५) उक्तप्रतीतेः संसर्गनिषेधपरत्वे शङ्कते किन्तत्रेति।

(६) विकल्प्य समाधत्ते अस्त्येवेतीति।

(७) घटनिषेधात्मकत्वादिति। समनियताभावैक्यादिति भावः।

(८) शङ्कते तदिति।

(९) प्रतिबन्धुत्तरमाह तत्किमिति-घटविधिः स्यादित्यन्तम्। ननु सम्बन्धसत्तानियतसत्ताकत्वं सम्बन्धिन इति नियमेन घटतत्सम्बन्धयोरेकतत्त्वताविरहेपि न क्षतिरिति चेत्प्रकृतेपि समानमित्यभिप्रायः।

निषेध इति । (१)यद्वा घटस्य समवायितया गेहेऽत्यन्ताभाव एव, स एव गेहे घटो नास्तीति प्रतीतिविषयः, कपाले संयोगितयेव । (२)एवं सति केवलान्वय्यत्यन्ताभावप्रतियोगितया घटोऽसन् स्यादिति चेत् (३)भवेदेवं यदि संयोगित्वसमवायित्वाभ्यां सर्वत्रासन् स्यादिति भावः ॥ १० ॥

तदेवं भावाभावविषयकं लौकिकप्रत्यक्षं निरूप्य योगिप्रत्यक्षं निरूपयितुं प्रकरणान्तरमारभते—

आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् ॥ ११ ॥

ज्ञानमुत्पद्यते इति शेषः । द्विविधास्तावद्योगिनः समाहितान्तःकरणा ये युक्ता इत्यभिधीयन्ते, असमाहितान्तःकरणाश्च ये वियुक्ता इत्यभिधीयन्ते । तत्र युक्ताः—साक्षात्कर्त्तव्ये वस्तुन्यादरेण मनो निधाय निदिध्यासनवन्तः, तेषामात्मनि स्वात्मनि परमात्मनि च ज्ञानमुत्पद्यते । आत्मप्रत्यक्षमिति । आत्मा प्रत्यक्षः साक्षात्कारविषयो यत्र ज्ञाने तत्तथा । यद्यप्यस्मदादीनामपि कदाचिदात्मज्ञानमस्ति तथाप्यविद्यातिरस्कृतत्वात् तदसत्कल्पमित्युक्तमात्ममनसोः सन्निकर्षविशेषादिति । योगजधर्मानुग्रह आत्ममनसोः सन्निकर्षे विशेषस्तस्मादित्यर्थः ॥ ११ ॥

तत् किमात्मन्येव युक्तानां ज्ञानं तत् कुतः सार्वज्ञ्यमित्यत आह—

तथा द्रव्यान्तरेषु प्रत्यक्षम् ॥ १२ ॥

ज्ञानमुत्पद्यत इति प्रकरणायातम् । तथेति योगजधर्मानुगृहीतेनैव मनसा, द्रव्यान्तरेषु चतुर्ष्वणुषु मनसि वायुदिक्कालाकाशेषु, द्रव्यपदेन तद्गतगुणकर्मसामान्यानां विशेषपदार्थस्य समवायस्य प्रत्यक्षगतस्यापि गुरुत्वस्थितिस्थापकादेरात्मगतस्यापि जीवनयोनियत्नानिर्वि-

---

(१) असत्त्व्यात्यनभ्युपगमे गेहवृत्तिघटसंयोगाभावः प्रतियोगिनः सिद्ध्यसिद्धिभ्यां व्याहत इत्यतः कल्पान्तरमाह यद्वेति । घटस्येति । तथाच सूत्रे गेहसंसर्गप्रतिषेध इत्यस्य संसर्गेण समवायेन प्रतिषेधः गेहे संसर्गप्रतिषेधः गेहसंसर्गप्रतिषेध इति समासोऽभिप्रेत इत्यर्थः ।

(२) सत्पदस्य व्यर्थतामाविष्कर्तुं शङ्कते एवमिति । असन् अवृत्तिः गगनवदिति भावः ।

(३) उत्तरयति भवेदेवमिति । एवं=केवलान्वय्यत्यन्ताभावप्रतियोगिहेतुकासत्त्वम् । केवलान्वय्यत्यन्ताभावप्रतियोगित्वमसत्त्वव्यभिचारीति भावः । एकेन सम्बन्धेन वृत्तिमत्यपि गुणादौ संयोगादिरूपसम्बन्धान्तरावच्छिन्नप्रतियोगिताककेवलान्वय्यत्यन्ताभावप्रतियोगित्वादित्याशयः ।

कल्पकभावनाधर्माधर्मादेः सङ्ग्रहः सामग्र्या योगजधर्मोपग्रहस्य तुल्यत्वात् अन्यथा सार्वज्ञ्यमुक्तं न भवेत् ॥ १२ ॥

युक्तानां प्रत्यक्षं ज्ञानमभिधायेदानीं वियुक्तानामाह—

असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषाञ्च ॥ १३ ॥

असमाहितान्तःकरणा इत्यस्यैव व्याख्यानमुपसंहृतसमाधय इति । यद्वा कथमसमाहितान्तःकरणा इत्यत आह-उपसंहृतसमाधय इति । उपसंहृतो दूरीकृतः समाधिर्निदिध्यासनात्मको यैस्ते तथा । ते हि समाधिप्रभावाद्विकरण(१)धर्माः अणिमाद्याः शरीरसिद्धीर्दूरश्रवणाद्याश्चेन्द्रियसिद्धीरासवन्तः समाधावप्यलंप्रत्ययमासादयन्तः "तावदेवास्य चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य" इत्यादि श्रुतिसमधिगतकृत्यान्तराभावाः भोगमात्रस्य कर्त्तव्यतामाकलय्य तेषु तेषु प्रदेशेषु द्वीपोपद्वीपादिषु तेन तेन जन्मना तुरङ्गमातङ्गविहङ्गभुजङ्गादिना (यावदेव चिरं यावत्) देवर्षिमानुषभावेन च पूर्वोपात्तान् कर्माशयानुपभुञ्ज्महे तावत् प्राप्तैव निरपाया भूमिरित्याकलयन्तः सकलमर्थजातं योगजधर्मबलोपबृंहितेन्द्रियशक्तयो व्यवहितं विप्रकृष्टञ्च प्रत्यक्षीकुर्वन्ति ॥ १३ ॥

ननु न तावत्तेषु मानसं ज्ञानं मनसो बहिरस्वातन्त्र्यात्, नापि बहिरिन्द्रियजन्यम् तेषां सम्बद्धवर्त्तमानार्थग्राहित्वात् यथायोगं रूपोद्भवादिसापेक्षत्वात् आलोकादिसव्यपेक्षत्वाच्चेत्याशङ्क्य केषुचित् पदार्थेषु प्रत्यासत्तिमुपपादयन्नाह—

तत्समवायात् कर्मगुणेषु ॥ १४ ॥

प्रत्यक्षज्ञानं जायते इति शेषः । भौतिकानीन्द्रियाणि यदि सन्निकर्षमपेक्षन्ते तदा परमाण्वाकाशादिकालसमवेतेषु स्वमनःसंयोगिसमवायात् इतरद्रव्येषु च कायव्यूहोपभोगार्थोपगृहीतनानापण्डमनःसंयोगात् तत्संयुक्तसमवायात् तत्तद्द्रव्यगुणादिषु ज्ञानमुत्पद्यते । एतच्चोपपत्तिसौकर्यमनुरुध्योक्तम् ।

वस्तुतो बाह्येन्द्रियेषु मनसि च योगज एव धर्मः प्रत्यासत्तिस्तत एव सर्वानुपपत्तिशान्तेः, अगस्त्यसमुद्रपानं दण्डकारण्यनिर्माणञ्चेति दृष्टान्तः ॥ १४ ॥

---

(१) विकरणधर्मा इति । इन्द्रियव्यापाररहिता इत्यर्थः ।

तत् किं स्वकीयबुद्ध्यादिष्वपि मनसो द्रव्यान्तरसंयुक्तसमवाय एव प्रत्यासत्तिः, नेत्याह—

आत्मसमवायादात्मगुणेषु ॥ १५ ॥

योगिनां प्रत्यक्षं ज्ञानमुत्पद्यते इति प्रकृतम्। आत्मसमवेतानान्तु बुद्ध्यादीनां संयुक्तसमवायादेव प्रत्यक्षं ज्ञानमुत्पद्यतेऽस्मदादीनामिवेति न तत्र सन्निकर्षान्तरापेक्षेत्यर्थः। तत्रेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानं लौकिकालौकिकप्रत्यक्षम्, अर्थजं वा। साक्षात्त्वयोगिज्ञानं प्रत्यक्षमिति लौकिकालौकिकसाधारणम् ॥ १५ ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे नवमाध्यायस्य प्रथममाह्निकम्।

नवमाध्याये द्वितीयाह्निकम् ।

तदेवं पूर्वाह्निके योगिप्रत्यक्षमयोगिप्रत्यक्षञ्च कारणतः स्वरूपतो लक्षणतश्च निरूपितम् । प्रमाणं द्विविधं प्रत्यक्षं लैङ्गिकञ्चेति विभक्तं तत्र लैङ्गिकमिदानीं निरूपयितुमुपक्रमते—

अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम् ॥ १ ॥

ज्ञानमिति प्रकृतम् । लिङ्गाज्जातं लैङ्गिकं व्याप्तिविशिष्टः पक्षधर्मो लिङ्गम् । तत्र व्याप्तिरुक्ता(१), (२)यत्सिषाधयिषाविरहविशिष्टसिद्ध्यभावो यत्र स तं प्रति पक्षः । तादृशं प्रमाणं साधकं बाधकञ्च, तदुभयाभाववतः पक्षत्वात् । (३)न हि साधके बाधके वा प्रमाणे सति कस्यचित् संशयः सिषाधयिषा वा । अत एव (४)सन्दिग्धसाध्यधर्मा धर्मी सिषाधयिषितसाध्यधर्मा धर्मी वा पक्ष इति प्राञ्चः ।

(५)उत्पाद्यसाध्यवत्तानिर्णयानिवर्त्यसंशयोत्पत्तिप्रतिबन्धकमान-

---

(१) उक्तेति । प्रसिद्धिपूर्वकत्वादपदेशस्येति सूत्रे इत्यर्थः ।

(२) सिषाधयिषेति । प्रकृतपक्षविशेष्यकसाध्यप्रकारकनिश्चयेच्छानुत्पादप्रयोजकेति विरोध्यन्तार्थः । प्रमाणेति । प्रात्यक्षिकनिश्चयाव्यवहितप्राक्क्षणवृत्तितत्समानाधिकरणज्ञानेत्यर्थः । तथा च यत्पुरुषीययत्पक्षसाध्यकनिश्चयेच्छानुत्पादप्रयोजकं तत्पुरुषीयप्रत्यक्षाव्यवहितप्राक्क्षणवृत्तित्वे सति तत्समानाधिकरणं यज्ज्ञानं तस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभाववान् यः स तत्पुरुषीयानुमितौ पक्ष इति भावः । परम्परया निश्चयनिष्ठा या प्रतियोगितावच्छेदकता तन्निरूपकविशेष्यत्वसम्बन्धावच्छिन्नावच्छेदकत्वसम्बन्धेन तदभाववत्त्वमत्र बोध्यम् ।

(३) नहीति । सिषाधयिषायां प्रकृतपक्षविशेष्यकसाध्यनिश्चयरूपासिद्धिज्ञानस्य प्रतिबन्धकत्वम् , साधकप्रमाणं हि सिद्धिमुत्पादयत् सिषाधयिषायाः सिद्ध्यभावरूपकारणविघटनद्वाराऽनुत्पादप्रयोजकम्, एवं बाधकमपि प्रमाणं सिद्धिधर्मिकेष्टसाधनताज्ञानात्मकं सिषाधयिषायाः कारणान्तरं बाधनिश्चयद्वारा प्रतिबध्नदनुत्पादप्रयोजकं भवतीति । बाधनिश्चयस्य सिद्धाविव तद्विषयकेष्टसाधनताज्ञानेऽपि प्रतिबन्धकत्वस्य प्राचीनैः स्वीकारात् तद्विषयविषयकस्य तद्विषयकत्वनियमेनोक्तेष्टसाधनताज्ञानस्यापि पक्षसाध्यविषयकत्वात् एवञ्चोक्तसाधकबाधकसत्त्वे न पक्षतेति गूढाभिप्रायः ।

(४) सन्दिग्धेति । तथाचैतन्मते साध्यानिश्चयनिवर्त्यसंशयरूपा पक्षता तस्याश्च विशेष्यतासम्बन्धेन पर्वतादिवृत्तित्वम् । सिषाधयिषितेति । इदं प्रशस्तपादाचार्यमतम् अस्मिन्मते सिषाधयिषारूपपक्षतायाः विषयतासम्बन्धेन पक्षनिष्ठत्वमिति भावः ।

(५) उत्पाद्येति । प्रकृतपक्षकप्रकृतसाध्यकाप्रामाण्यज्ञानानास्कन्दितानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयोत्पत्तिप्रतिबन्धकप्रमाणाभाव इत्यर्थः । व्यापककोटावनाहा-

तत् किं स्वकीयबुद्ध्यादिष्वपि मनसो द्रव्यान्तरसंयुक्तसमवाय एव प्रत्यासत्तिः, नेत्याह—

आत्मसमवायादात्मगुणेषु ॥ १५ ॥

योगिनां प्रत्यक्षं ज्ञानमुत्पद्यते इति प्रकृतम्। आत्मसमवेतानान्तु बुद्ध्यादीनां सयुक्तसमवायादेव प्रत्यक्षं ज्ञानमुत्पद्यतेऽस्मदादीनामिवेति न तत्र सन्निकर्षान्तरापेक्षेत्यर्थः। तत्रेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानं लौकिकालौकिकप्रत्यक्षम्, अर्थजं वा। साक्षात्त्वयोगिज्ञानं प्रत्यक्षमिति लौकिकालौकिकसाधारणम् ॥ १५ ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे नवमाध्यायस्य प्रथमाह्निकम्।

नवमाध्याये द्वितीयाह्निकम् ।

तदेवं पूर्वाह्निके योगिप्रत्यक्षमयोगिप्रत्यक्षञ्च कारणतः स्वरूपतो लक्षणतश्च निरूपितम् । प्रमाणं द्विविधं प्रत्यक्षं लैङ्गिकञ्चेति यद्विभक्तं तत्र लैङ्गिकमिदानीं निरूपयितुमुपक्रमते—

अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम् ॥ १ ॥

ज्ञानमिति प्रकृतम् । लिङ्गाज्जातं लैङ्गिकं व्याप्तिविशिष्टः पक्षधर्मो लिङ्गम् । तत्र व्याप्तिरुक्ता(१), (२)यत्सिषाधयिषाविरोधिप्रमाणाभावो यत्र स तं प्रति पक्षः । तादृशं प्रमाणं साधकं बाधकञ्च, तदुभयाभाववतः पक्षत्वात् । (३)न हि साधके बाधके वा प्रमाणे सति कस्यचित् संशयः सिषाधयिषा वा । अत एव (४)सन्दिग्धसाध्यधर्मा धर्मी सिषाधयिषितसाध्यधर्मा धर्मी वा पक्ष इति प्राञ्चः ।

(५)उत्पाद्यसाध्यवत्तानिर्णयनिवर्त्यसंशयोत्पत्तिप्रतिबन्धकमान-

---

(१) उक्तेति । प्रसिद्धिपूर्वकत्वादपदेशस्येति सूत्रे इत्यर्थः ।

(२) सिषाधयिषेति । प्रकृतपक्षविशेष्यकसाध्यप्रकारकनिश्चयेच्छानुत्पादप्रयोजकेति विरोध्यन्तार्थः । प्रमाणेति । प्रात्यक्षिकनिश्चयाव्यवहितप्राक्क्षणवृत्तितत्समानाधिकरणज्ञानेत्यर्थः । तथा च यत्पुरुषीययत्पक्षसाध्यकनिश्चयेच्छानुत्पादप्रयोजकं तत्पुरुषीयप्रत्यक्षाव्यवहितप्राक्क्षणवृत्तित्वे सति तत्समानाधिकरणं यज्ज्ञानं तस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभाववान् यः स तत्पुरुषीयानुमितौ पक्ष इति भावः । परम्परया निश्चयनिष्ठा या प्रतियोगितावच्छेदकता तन्निरूपकविशेष्यत्वसम्बन्धावच्छिन्नावच्छेदकत्वसम्बन्धेन तदभाववत्त्वमत्र बोध्यम् ।

(३) नहीति । सिषाधयिषायां प्रकृतपक्षविशेष्यकसाध्यनिश्चयरूपासिद्धिज्ञानस्य प्रतिबन्धकत्वम् , साधकप्रमाणं हि सिद्धिमुत्पादयत् सिषाधयिषायाः सिद्ध्यभावरूपकरणविघटनद्वाराऽनुत्पादप्रयोजकम्, एवं बाधकमपि प्रमाणं सिद्धिधर्मिकेष्टसाधनताज्ञानात्मकं सिषाधयिषायाः कारणान्तरं बाधनिश्चयद्वारा प्रतिबध्नदनुत्पादप्रयोजकं भवतीति । बाधनिश्चयस्य सिद्धाविव तद्विषयकेष्टसाधनताज्ञानेऽपि प्रतिबन्धकत्वस्य प्राचीनैः स्वीकारात् तद्विषयाविषयकस्य तद्विषयकत्वनियमेनोक्तेष्टसाधनताज्ञानस्यापि पक्षसाध्यविषयकत्वात् एवञ्चोक्तसाधकबाधकसत्त्वे न पक्षतेति गूढाभिप्रायः ।

(४) सन्दिग्धेति । तथाचैतन्मते साध्यानिश्चयनिवर्त्यसंशयरूपा पक्षता तस्याश्च विशेष्यतासम्बन्धेन पर्वतादिवृत्तित्वम् । सिषाधयिषितेति । इदं प्रशस्तपादाचार्यमतम् अस्मिन्मते सिषाधयिषारूपपक्षतायाः विषयतासम्बन्धेन पक्षनिष्ठत्वमिति भावः ।

(५) उत्पाद्येति । प्रकृतपक्षकप्रकृतसाध्यकाप्रामाण्यज्ञानानास्कन्दितानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयोत्पत्तिप्रतिबन्धकप्रमाणाभाव इत्यर्थः । व्यापककोटावनाहा-

स्त्वावच्छिन्नाभावो यत्र स पक्ष इति जीवनाथमिश्राः। (१)सिषाधयिषाविरहसहकृतसाधकमानाभावो यत्र स पक्ष इति केचित्। (२)एतन्मते तु बाधस्थलेऽपि पक्षता। तदेतदनुमानमयूखे द्रष्टव्यम्। तदेतस्य (३)पक्षस्य धर्मो लिङ्गमित्युक्तं भवति। लिङ्गञ्च दृष्टमनुमितं श्रुतं वा यदनुभवरूपं ज्ञानं जनयति तल्लैङ्गिकम्। (४)तदुक्तम्—

अनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते।
तदभावे तु नास्त्येव तल्लिङ्गमनुमापकम्॥ इति।

एतेन लिङ्गमेवानुमितिकरणं न तु तस्य परामर्शः तस्य निर्व्यापारत्वेनाकरणत्वात्, लिङ्गस्य तु स एव व्यापारः। यत्र धूमादेरतीतत्वमनागतत्वं वा तत्र कथमनुमितिरिति चेन्न साध्यस्याप्यतीतानागतत्वयोस्तत्रानुमानात्, (५)तत्रैव प्रतिबन्धात्। अतीतत्वमनागतत्वं वर्त्तमानत्वञ्च धूमादेर्यत्र न निश्चितं तत्र कथमनुमितिरिति चेत्, न कथ(६)ञ्चित् तत्र साध्यस्यापि सन्देहात्। पू-

---

र्यत्वप्रवेशानिबन्धनगौरवव्युदासायोत्पाद्येति निर्णयविशेषणमनुमितिलाभाय। पर्वतो वह्निमान् घटो रूपवान्नवेतिसमूहालम्बनसंशयव्युदासाय निवर्त्यान्तं संशयविशेषणम्। एवं च तादृशसंशयप्रतिबन्धकपरं यन्मानं मितिः सिद्धिबाधनिश्चययोरन्यतरत् तत्सामान्याभावो यत्र स पक्षस्तथा च न सिद्धिबाधनिश्चयोत्तरकाले पक्षतेति भावः।

(१) चिन्तामणिकारमतमाह सिषाधयिषेति। तथा च सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एवैतन्मते पक्षता सा च स्वप्रतियोगिविशेष्यत्वसम्बन्धेन पर्वतादिवृत्तिः, अनुमितिहेतुता तु तस्याः आत्मनिष्ठप्रत्यासत्त्येति ध्येयम्।

(२) दूषयति एतन्मते इति। तदनुयायिनस्तु अनुमितिहेतुभूतपक्षताया निर्वचनपरो मणिकारग्रन्थः नतु पक्षपदशक्यतावच्छेदकपरो येन बाधनिश्चयविशेषस्य पक्षपदव्यवहारापत्तिरिति, पक्षपदशक्यतावच्छेदकन्त्वनुमित्युद्देश्यत्वमिति वदन्ति।

(३) पक्षस्य धर्म इति। व्याप्तिविशिष्ट इति शेषः। ज्ञायमानलिङ्गजन्यानुभवो लैङ्गिकमनुमितिश्चेत्याख्यायते। सन्निकर्षस्य ज्ञायमानत्वेपि क्वचित् लिङ्गत्वेपि वा न तेन रूपेण तस्य प्रत्यक्षं प्रति कारणतेति नातिव्याप्तिः। स्मरणविशेषे उद्बोधकादिशा ज्ञायमानलिङ्गस्य कारणत्वात्तत्रातिव्याप्तिवारणायानुभवपदम्।

(४) लिङ्गजज्ञानस्यानुमितिकारणत्वे प्राचां संवादं दर्शयति तदुक्तमिति। सम्बद्धान्तेन पक्षवृत्तित्वं तदन्विते इत्यन्तेन सपक्षसत्वं नास्त्येवेत्यनेन विपक्षावृत्तित्वं चेति त्रयं लिङ्गस्यानुमापकत्वे हेतुरित्यर्थः।

(५) तत्रैवेति। यत्र धूमोऽतीतो ध्वस्तस्तत्र वह्निवर्तमानत्वं नानुमीयते किन्तु अतीत एव वह्निस्तथाचातीतहेतुस्थले तत्रैवातीतसाध्य एव प्रतिबन्धात् व्याप्तेरिति अक्षरार्थः।

(६) न कथञ्चिदिति। ध्वंसादिरूपव्याप्यसन्देहात्साध्यसंदेह एव नानुमितिरित्यर्थः।

र्वापरदिनयोः सत्त्वनिश्चये मध्यन्दिने तु सन्देहे कथमनुमितिरिति चेत् (१)तद्दिनावच्छिन्नधूमादिना तद्दिनावच्छिन्नवह्न्यादेरनुमानात्, तथैव व्याप्तेः कारणत्वावधारणात् । धूलीपटलात् कथं धूमभ्रमादनुमितिरिति चेत् (२)व्याप्तत्वेन ज्ञातस्यैव लिङ्गत्वात् ज्ञानस्य च याथार्थ्यायाथार्थ्याभ्यामनुमितेस्ताद्रूप्यात्, अन्यथा तवापि कथं तत्र परामर्शः करणं स्यात् । अतीन्द्रियलिङ्गस्थले परामर्शस्य तदजन्यतया कथं तद्व्यापारत्वमिति चेत् (३)तत्सत्तानिर्वाहकत्वरूपक्षैमिकसाधनतायास्तत्र व्यापारत्वघटकत्वात् अन्यथा समवायस्य श्रवणादेर्व्यापारत्वानुपपत्तेरिति । कार्य्याल्लिङ्गात् धूमालोकादेरग्न्याद्यनुमानम् । कारणादपि यथा वधिरस्य भेरीदण्डसंयोगविशेषात् शब्दानुमानम्, यथा वा धार्मिकस्य यथाविधियागस्नानाद्यनुष्ठानाद्धर्मस्वर्गाद्यनुमानम्, यथाविधि कारीर्य्याद्यनुष्ठानाद्वा वर्षानुमानम्, पयःपूर्णनद्यादौ खन्यमानप्रवाहाद्वा जलनिःसरणानुमानम्, उपरिवृष्टिदर्शनाद्वा नदीवृद्ध्यनुमानम् । स चायं कार्य्यकारणभावलक्षण एकसम्बन्धः (४)प्रकारद्वयेनोक्तः । संयोगिनः शरीरस्य दर्शनात्त्वगिन्द्रियानुमानम् । विरोधिनो विस्फूर्जतोऽहेर्दर्शनाज्झाटाद्यन्तरितनकुलानुमानम् । समवायिना जलौष्ण्येन तत्सम्बद्धतेजोऽनुमानम् ॥ १ ॥

नन्वव्यापकमिदं परिसङ्ख्यानम् । न हि चन्द्रोदयेन समुद्रजलवृद्धेः–जलप्रसादेनागस्त्योदयस्य–कुमुदप्रकाशेन चन्द्रोदयस्य–चतुर्दशनक्षत्रोदयेनापरचतुर्दशनक्षत्रास्तमयस्य–रसेन रूपस्य–रूप-

---

(१) तद्दिनेति । तथाच यत्र तद्दिनावच्छिन्नो धूमस्तत्र तत्पूर्वमुत्तरं वा वह्निरिति तत्स्थलीयकालविशेषघ[illegible]प्तिग्रहादेवातीतवह्न्याद्यनुमानमिति न कापि क्षतिः ।

(२) व्या[illegible]मेति । तथा च न ब्रूमो धूमः करणमिति, अपि तु व्याप्यत्वेन परामृश्यमानमेव करणमिति उक्तस्थले धूलीपटलमेव तद्रूप्येण परामृश्यमानमिति न दोषः ।

(३) तत्सत्तेति । सत्ता सम्बन्धः । विषयिणो ज्ञानस्य विषयाधीनस्वरूपतया विषय्यधीनसम्बन्धस्यापि विषयाधीनत्वादिति भावः । एवं चाचार्यमते न कोऽपि दोषः । चिन्तामणिकारास्त्वेवमपि लिङ्गस्य करणत्वे भेत्रपराभृश्यमाणाल्लिङ्गाच्चैत्रस्यानुमित्त्यापत्तिर्दुर्वारैव । तत्पुरुषीयत्वनिवेशे च लिङ्गज्ञानकारणत्वापेक्षया महागौरवमिति प्राहुः ।

(४) प्रकारद्वयेनेति । कार्यत्वेन कारणत्वेन चेत्यर्थः । एतेन सम्बन्धचातुर्विध्यं वैशेषिकोक्तं न व्याहतमिति प्रदर्शितम् ।

विशेषेण वा रसविशेषस्यानुमानमनेन (१)संगृह्यते इत्यत आह—

अस्येदं कार्य्यकारणसम्बन्धश्चावयवाद्भवति ॥ २ ॥

अस्येदमित्येतावदेव प्रयोजकं भवतीति, अस्य साधनस्य धूमादेरिदं साध्यं वह्न्यादि। यद्वाऽस्य वह्न्यादेरिदं व्याप्यं धूमादि। तथाच व्याप्यत्वग्रहमात्रं तन्त्रं न तु कार्य्यकारणभावादिरपि। ननु पूर्वसूत्रे तर्हि परिसङ्ख्यानमतन्त्रमत आह—कार्य्यकारणसम्बन्ध इति। अनेन चोक्तं सम्बन्धान्तरमप्युपलक्षयति। सम्बन्धपदे च विषयिलक्षणा, तेन सम्बन्ध इति सम्बन्धोपन्यास इत्यर्थः। कुतस्तदुपन्यास इत्यत आह-अवयवात् एकदेशात् उदाहरणमात्रात् ल्यब्लोपे पञ्चमी। तेनोदाहरणमनुरुध्य कार्य्यकारणभावादेः सम्बन्धस्योपन्यास इह दर्शने (२)साङ्ख्यादिदर्शने च भवतीत्यर्थः।

एवञ्च स्वाभाविकसम्बन्धशालित्वं व्याप्यत्वम्। स्वाभाविकत्वञ्चानौपाधिकत्वम्। तच्च (३)प्रत्यक्षाणां केषाञ्चित् साध्याव्यापकत्वनिश्चयात्, केषाञ्चित् साधनव्यापकत्वनिश्चयादेवानुपाधित्वं ज्ञेयम्। अतीन्द्रियाणाञ्च प्रमाणसिद्धानां केषाञ्चिदुभयव्यापकत्वम् उभयाव्यापकत्वं साधनमात्रव्यापकत्वं साध्यमात्राव्यापकत्वं वा। तत्राद्ये साधनव्यापकत्वात् द्वितीये साध्याव्यापकत्वात् चतुर्थेऽपि साधनव्यापकत्वादेवानुपाधित्वं निश्चेयम्। तृतीयेऽपि व्यापकस्य तन्मात्रव्यापकत्वानुपपत्तिरितरस्य तु कथं तन्मात्रव्यापकत्वमित्यत्र तर्कोऽनुसन्धेय इति तुल्ययोगक्षेमत्वादिनाऽनुपाधित्वमध्यवसेयम्। भविष्यति कश्चिदत्रोपाधिरिति-शङ्कापिशाची सकलविधिनिषेध-

---

(१) संगृह्यत इति। तथा चोक्तचतुर्विधसम्बन्धेषूक्तस्थले कस्याप्यभावात् कथमनुमानमिति भावः।

(२) साङ्ख्यादिदर्शन इति। एवं च वैशेषिकदर्शने उक्तसम्बन्धचातुर्विध्यम्। सांख्यमते च—
"मात्रानिमित्तसंयोगिविरोधिसहचारिभिः। स्वस्वामिवध्यघाताद्यैः सांख्यानां सप्तधाऽनुमा ॥"
इत्युक्तसम्बन्धसाप्तविध्यं चोदाहरणमात्रं नतु परिगणनामिति भावः।

(३) प्रत्यक्षाणां केषाञ्चिदिति। पर्वतो वह्निमान् धूमादित्यादौ अयःपिण्डादीनामित्यर्थः। साधनव्यापकत्वनिश्चयादिति। रूपवान् रसादित्यादौ स्नेहादीनां साध्यव्यापकत्वेऽपि साधनाव्यापकत्वाभावादनौपाधिकत्वमित्यर्थः। अतीन्द्रियाणामिति। उक्तस्थलेषु प्रमाणसिद्धानां गुरुत्वादीनामुपाधीनामपि चतुर्ष्वपि कल्पेषु अनौपाधिकत्वमेव, किन्तु साधनमात्रव्यापकत्वरूपतृतीयपक्षे यद्ययमितरव्यापकः स्यात्कथं साधनमात्रव्यापकः स्यात् व्याप्यस्तु कथं तन्मात्रस्य व्यापक इति तर्कसहकारेण योगक्षेमयोरुभयत्र समानतयाऽनुपाधित्वमिति भावः।

व्यवहारानास्कन्दतीत्यनादेयेत्यनौपाधिकत्वनिश्चयसम्भवात् । उपाधिलक्षणं व्याप्तिलक्षणञ्चोक्तम् ।

तच्चानुमानं द्विविधं—स्वार्थं परार्थञ्च । तत्र स्वार्थं स्वयमेव व्याप्तिपक्षधर्मतयोरनुसन्धानात् । परार्थञ्च परोदीरितन्यायजन्यव्याप्तिपक्षधर्मताज्ञानात् । न्यायश्च (१)तृतीयलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यम् । तदवयवाश्च पञ्च । तत्रावयवत्वं(२) तृतीयलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् । तानि च वाक्यानि प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि ।

तत्र प्रतिज्ञा- (३)उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं न्यायावयववाक्यम् । (४)हेतुश्च प्रकृतसाधनगतप-

---

(१) तृतीयलिङ्गपरामर्शेति । प्रथमं हेतुस्वरूपलिङ्गदर्शनं, तस्य लिङ्गनिश्चयरूपत्वेन लिङ्गपरामर्शत्वेपि न विवक्षा किन्तु ततो व्याप्तिस्मरणं ततश्च यो लिङ्गपरामर्शस्तृतीयक्षणे स एव तृतीयलिङ्गपरामर्श इत्युच्यते स च व्याप्तिपक्षधर्मताविशिष्टहेतुनिश्चयरूपो ग्राह्यः तज्जनकशाब्दबोधजनकवाक्यत्वं न्यायत्वमित्यर्थः। अत्र वाक्यपदं तादृशशाब्दज्ञाननिष्ठकार्यतानिरूपितकारणताया विषयविधया अवच्छेदकत्वपर्याप्त्यधिकरणतालाभायाऽन्यथा न्यायैकदेशेऽतिव्याप्तिः स्यात् । उपनयादिजन्यशाब्दज्ञानस्यान्यदीयपरामर्शं प्रति न शाब्दत्वेन कारणता किन्तु विशेषणज्ञानत्वादिना, तादृशपरामर्शं तु न्यायजन्यशाब्दत्वेनैव हेतुताऽन्वयव्यतिरेकानुविधानादिति भावः । यथाश्रुते उपनयवाक्यादावतिव्याप्तिस्तद्वारणाय प्रयोजकान्तम् प्रतिज्ञाद्यखिलावयवार्थबोधपरिचायकमात्रम् नतु लक्षणनिविष्टम् । एवं च तादृशयत्किञ्चिच्छाब्दबोधनिरूपिता शब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं न्यायत्वमिति नव्याः ।

(२) अवयवत्वमिति । जनकान्तं शाब्दज्ञानविशेषणम् । द्वितीयशाब्दज्ञानजनकपदानुपादाने न्यायेऽतिव्याप्तिः । न्यायजन्यशाब्दबोधं प्रत्यवान्तरवाक्यार्थज्ञानस्य हेतुत्वेन तज्ज्ञानस्य च प्रतिज्ञादिरूपन्यायावान्तरवाक्यजन्यतया च प्रतिज्ञादिषु प्रत्येकं लक्षणसमन्वयः । न्यायजन्यशाब्दबोधे प्रतिज्ञाद्येकैकावयवजन्यशाब्दबोधस्य शाब्दत्वेन जनकता तथाऽन्वयव्यतिरेकानुविधानात्, प्रतिज्ञाद्येकदेशार्थज्ञानस्य तु अवयवार्थज्ञानजननक्रमेण प्रयोजकत्वं नतु साक्षाज्जनकतेति तद्व्युदासः । अत्रापि वाक्यपदं पूर्ववत् एकैकावयवजन्यशाब्दज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकतापर्याप्त्यधिकरणतालाभाय बोध्यम् । नव्यास्तु तत्तच्छाब्दबुद्धित्वावच्छिन्नजन्यतान्यतमनिरूपितजनकतावच्छेदकीभूतयत्किञ्चिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वमवयवत्वमित्याहुः । अधिकन्त्ववयवग्रन्थे द्रष्टव्यम् ।

(३) उद्देश्येति । प्रकृतपक्षकप्रकृतसाध्यकानुमित्यन्यूनेत्यर्थः । पर्वतो वह्निमानिति प्रतिज्ञावाक्यजन्यबोधस्य प्रकृतपक्षसाध्यकानुमितिसमानाकारकत्वमिति लक्षणसंगतिः । हेतुघटितपक्षसा- [illegible] नुमित्य [illegible] कविषयकबोधजनके हेत्ववयवेऽतिव्याप्तिनिरासायान्यूनेति । निगमने तद्वारणा- [illegible] प- [illegible] सीनेऽतिव्याप्तिवारणाय न्यायावयवेति विशेष्यदलम् ।

[illegible] । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुप्रकारकस्वार्थविशेष्यबोधजनकपञ्चमीव-

विशेषेण वा रसविशेषस्यानुमानमनेन (१)संगृह्यते इत्यत आह—

अस्येदं कार्य्यकारणसम्बन्धश्चावयवाद्भवति ॥ २ ॥

अस्येदमित्येतावदेव प्रयोजकं भवतीति, अस्य साधनस्य धूमादेरिदं साध्यं वह्न्यादि। यद्वाऽस्य वह्न्यादेरिदं व्याप्यं धूमादि। तथाच व्याप्यत्वग्रहमात्रं तन्त्रं न तु कार्य्यकारणभावादिरपि। ननु पूर्वसूत्रे तर्हि परिसङ्ख्यानमतन्त्रमत आह—कार्य्यकारणसम्बन्ध इति। अनेन चोक्तं सम्बन्धान्तरमप्युपलक्षयति। सम्बन्धपदे च विषयिलक्षणा, तेन सम्बन्ध इति सम्बन्धोपन्यास इत्यर्थः। कुतस्तदुपन्यास इत्यत आह-अवयवात् एकदेशात् उदाहरणमात्राद् ल्यब्लोपे पञ्चमी। तेनोदाहरणमनुरुध्य कार्य्यकारणभावादेः सम्बन्धस्योपन्यास इह दर्शने (२)साङ्ख्यादिदर्शने च भवतीत्यर्थः।

एवञ्च स्वाभाविकसम्बन्धशालित्वं व्याप्यत्वम्। स्वाभाविकत्वञ्चानौपाधिकत्वम्। तच्च (३)प्रत्यक्षाणां केषाञ्चित् साध्याव्यापकत्वनिश्चयात्, केषाञ्चित् साधनव्यापकत्वनिश्चयादेवानुपाधित्वं ज्ञेयम्। अतीन्द्रियाणाञ्च प्रमाणसिद्धानां केषाञ्चिदुभयव्यापकत्वम् उभयाव्यापकत्वं साधनमात्रव्यापकत्वं साध्यमात्राव्यापकत्वं वा। तत्राद्ये साधनव्यापकत्वात् द्वितीये साध्याव्यापकत्वात् चतुर्थेऽपि साधनव्यापकत्वादेवानुपाधित्वं निश्चेयम्। तृतीयेऽपि व्यापकस्य तन्मात्रव्यापकत्वानुपपत्तिरितरस्य तु कथं तन्मात्रव्यापकत्वमित्यत्र तर्कोऽनुसन्धेय इति तुल्ययोगक्षेमत्वादिनाऽनुपाधित्वमध्यवसेयम्। भविष्यति कश्चिदत्रोपाधिरिति-शङ्कापिशाची सकलविधिनिषेध-

---

(१)संगृह्यत इति। तथा चोक्तचतुर्विधसम्बन्धेषूक्तस्थले कस्याप्यभावात्कथमनुमानमिति भावः।

(२) साङ्ख्यादिदर्शन इति। एवं च वैशेषिकदर्शने उक्तसम्बन्धचातुर्विध्यम्। सांख्यमते च—
"मात्रानिमित्तसंयोगिविरोधिसहचारिभिः। स्वस्वामिवध्यघाताद्यैः सांख्यानां सप्तधाऽनुमा॥"
इत्युक्तसम्बन्धसान्निध्यं चोदाहरणमात्रं नतु परिगणनामिति भावः।

(३) प्रत्यक्षाणां केषाञ्चिदिति। पर्वतो वह्निमान् धूमादित्यादौ अयःपिण्डादीनामित्यर्थः। साधनव्यापकत्वनिश्चयादिति। रूपवान् रसादित्यादौ स्नेहादीनां साध्यव्यापकत्वेऽपि साधनाव्यापकत्वाभावादनौपाधिकत्वमित्यर्थः। अतीन्द्रियाणामिति। उक्तस्थलेषु प्रमाणसिद्धानां गुरुत्वादीनामुपाधीनामपि चतुर्ष्वपि कल्पेषु अनौपाधिकत्वमेव, किन्तु साधनमात्रव्यापकत्वरूपतृतीयपक्षे यद्यमितरव्यापकः स्यात्कथं साधनमात्रव्यापकः स्यात् व्याप्यस्तु कथं तन्मात्रस्य व्यापक इति तर्कसहकारेण योगक्षेमयोरुभयत्र समानतयाऽनुपाधित्वमिति भावः।

व्यवहारानास्कन्दतीत्यनादेयेत्यनौपाधिकत्वनिश्चयसम्भवात् । उ-पाधिलक्षणं व्याप्तिलक्षणञ्चोक्तम् ।

तच्चानुमानं द्विविधं—स्वार्थं परार्थञ्च । तत्र स्वार्थं स्वयमेव व्याप्तिपक्षधर्मतयोरनुसन्धानात् । परार्थञ्च परोदीरितन्यायजन्यव्याप्तिपक्षधर्मताज्ञानात् । न्यायश्च (१)तृतीयलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यम् । तदवयवाश्च पञ्च । तत्रावयवत्वं(२) तृतीयलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् । तानि च वाक्यानि प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि ।

तत्र प्रतिज्ञा- (३)उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं न्यायावयववाक्यम् । (४)हेतुश्च प्रकृतसाधनगतप-

---

(१) तृतीयलिङ्गपरामर्शेति । प्रथमं हेतुस्वरूपलिङ्गदर्शनं, तस्य लिङ्गनिश्चयरूपत्वेन लिङ्गपरामर्शत्वेपि न विवक्षा किन्तु ततो व्याप्तिस्मरणं ततश्च यो लिङ्गपरामर्शस्तृतीयक्षणे स एव तृतीयलिङ्गपरामर्श इत्युच्यते स च व्याप्तिपक्षधर्मताविशिष्टहेतुनिश्चयरूपो ग्राह्यः तज्जनकशाब्दबोधजनकवाक्यत्वं न्यायत्वमित्यर्थः । अत्र वाक्यपदं तादृशशाब्दज्ञाननिष्ठकार्यतानिरूपितकारणताया विषयविधया अवच्छेदकत्वपर्याप्त्यधिकरणतालाभायाऽन्यथा न्यायैकदेशेऽतिव्याप्तिः स्यात् । उपनयादिजन्यशाब्दज्ञानस्यान्यदीयपरामर्शं प्रति न शाब्दत्वेन कारणता किन्तु विशेषणज्ञानत्वादिना, तादृशपरामर्शे तु न्यायजन्यशाब्दत्वेनैव हेतुताऽन्वयव्यतिरेकानुविधानादिति भावः । यथाश्रुते उपनयवाक्यादावतिव्याप्तिस्तद्वारणाय प्रयोजकान्तम् प्रतिज्ञाद्यखिलावयवार्थबोधपरिचायकमात्रम् नतु लक्षणनिविष्टम् । एवं च तादृशयत्किञ्चिच्छाब्दबोधनिरूपिता शब्दज्ञाननिष्ठा या या कारणता तत्तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं न्यायत्वमिति नव्याः ।

(२) अवयवत्वमिति । जनकान्तं शाब्दज्ञानविशेषणम् । द्वितीयशाब्दज्ञानजनकपदानुपादाने न्यायेऽतिव्याप्तिः । न्यायजन्यशाब्दबोधं प्रत्यवान्तरवाक्यार्थज्ञानस्य हेतुत्वेन तज्ज्ञानस्य च प्रतिज्ञादिरूपन्यायावान्तरवाक्यजन्यतया च प्रतिज्ञादिषु प्रत्येकं लक्षणसमन्वयः । न्यायजन्यशाब्दबोधे प्रतिज्ञाद्येकैकावयवजन्यशाब्दबोधस्य शाब्दत्वेन जनकता तथाऽन्वयव्यतिरेकानुविधानात्, प्रतिज्ञाद्येकदेशार्थज्ञानस्य तु अवयवार्थज्ञानजननक्रमेण प्रयोजकत्वं नतु साक्षाज्जनकतेति तद्व्युदासः । अत्रापि वाक्यपदं पूर्ववत् एकैकावयवजन्यशाब्दज्ञाननिष्ठकार्यतानिरूपितकारणतावच्छेदकतापर्याप्त्यधिकरणतालाभाय बोध्यम् । नव्यास्तु तत्तच्छाब्दबुद्धित्वावच्छिन्नजन्यतान्यतमनिरूपितजनकतावच्छेदकीभूतयत्किञ्चिज्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वमवयवत्वमित्याहुः । अधिकन्त्ववयवग्रन्थे द्रष्टव्यम् ।

(३) उद्देश्येति । प्रकृतपक्षकप्रकृतसाध्यकानुमित्यन्यूनेत्यर्थः । पर्वतो वह्निमानिति प्रतिज्ञावाक्यजन्यबोधस्य प्रकृतपक्षसाध्यकानुमितिसमानाकारकत्वमिति लक्षणसंगतिः । हेतुघटितपक्षसा- ... नुमित्य ... कविषयकबोधजनके हेत्ववयवेऽतिव्याप्तिनिरासायान्यूनेति । निगमने तद्वारणा- ... सीनेऽतिव्याप्तिवारणाय न्यायावयवेति विशेष्यदलम् ।

... । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुप्रकारकस्वार्थविशेष्यबोधजनकपञ्चमीव-

श्रम्यन्तो न्यायावयवः । उदाहरणन्तु (१)प्रकृतसाध्यसाधनाविनाभावप्रतिपादको न्यायावयवः । उपनयश्चाविनाभाव(२)विशिष्टस्य हेतोः पक्षवैशिष्ट्यप्रतिपादको न्यायावयवः । (३)निगमनन्तु पक्षे प्रकृतसाध्यवैशिष्ट्यप्रतिपादको न्यायावयवः । एवञ्च प्रवर्त्तते न्यायः-शब्दोऽनित्यः कृतकत्वात्, यद् यत् कृतकं तदनित्यम्, अनित्यत्वव्याप्यकृतकत्ववांश्चायम्, तस्मादनित्यः ।

एतेषामेव प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नाया इत्यन्वर्था वैशेषिकाणां संज्ञाः । (४)अत्र च वादजल्पवितण्डानां प्रवृत्तिप्रकारश्छलजातिनिग्रहस्थानलक्षणानि च वादिविनोदेऽन्वेष्टव्यानि ॥ २ ॥

प्रमाणान्तराणि लैङ्गिकेऽन्तर्भावयितुं प्रकरणान्तरमारभते—

एतेन शाब्दं व्याख्यातम् ॥ ३ ॥

शाब्दं शब्दकरणकं ज्ञानमिदमिति यन्नैयायिकादीनामभिमतं तदप्येतेन लैङ्गिकत्वेन लिङ्गप्रभवत्वेनैव व्याख्यातम् । यथा व्याप्तिपक्षधर्मताप्रतिसन्धानापेक्षं लैङ्गिकं तथा शाब्दमपि । तथाहि (५)एते पदार्थाः मिथः संसर्गवन्तः आकाङ्क्षादिमद्भिः स्मारितत्वात् गामभ्याजेति पदार्थसार्थवत् । तत्र हि आकाङ्क्षादिमत्पद-

---

न्यायावयवत्वमित्यर्थः । अवयववत्ता च स्वाश्रयत्वस्वाश्रयवृत्तिध्वंसाप्रतियोगिपञ्चमीवत्त्वोभयसम्बन्धेन । वह्निर्धूमादित्यादिप्रतिज्ञायां धूमादित्यादिसाध्यनिर्देशेऽतिव्याप्तिवारणाय हेतुतावच्छेदकावच्छिन्नहेतुप्रकारकेति बोधविशेषणम् । विस्तरस्तु दीधितिरहस्ये द्रष्टव्यः ।

(१) प्रकृतसाध्येति । प्रकृतसाध्यतावच्छिदकावच्छिन्ननिरूपितहेतुतावच्छेदकावच्छिन्नहेतुनिष्ठव्याप्तिबोधको न्यायावयव उदाहरणमित्यर्थः ।

(२) अविनाभावेति । प्रकृतहेतुकप्रकृतसाध्यकानुमित्यौपयिकव्याप्तिविशिष्टहेतुमत्तया पक्षप्रतिपादको न्यायावयव उपनय इत्यर्थः । न चैवं निगमनेऽतिव्याप्तिः प्रतिपादकपदस्य तत्प्रतिपादनेच्छया प्रयुक्तेत्यर्थकत्वात् निगमनस्य चाबाधितादिसाध्यप्रतिपादनेच्छया प्रयुक्तत्वात् ।

(३) निगमनमिति । पक्षतावच्छेदकावच्छिन्नेऽबाधितसाध्यतावच्छेदकावच्छिन्नप्रकारकबोधजनकन्यायावयवत्वं निगमनत्वमित्यर्थः ।

(४) अत्रेति । परार्थानुमानस्थल इत्यर्थः । वीतरागकथा वादः । विजिगीषुकथा वितण्डा । वक्तृतात्पर्याविषयकल्पनया दूषणाभिधानं छलं । स्वव्याघातकमुत्तरं जातिः । प्रतिज्ञाहान्याद्यन्यतमत्वं निग्रहस्थानत्वम् । वादिविनोद इति । तदाख्यस्वकृतग्रन्थे इत्यर्थः ।

(५) एत इति । इदं रजतं पश्यामीत्यादौ इदन्त्वाश्रयरजतादय इत्यर्थः । आकांक्षादीति । रजतपदाकांक्षादिमत्पदस्मारितत्वादित्यर्थः । योग्यता आदिपदग्राह्या । अत्र स्मारितत्वमात्रं घटव्यापटयोरपीति रजतपदयोग्यतावत्पदस्मारितत्वमुक्तम् ।

कदम्बस्मारितत्वं पदार्थानां मिथः संसर्गवत्त्वव्याप्यं गृहीत्वैव संसर्गवत्त्वमनुमिनोति किं कल्पनीयप्रमाणभावेन शब्देन। ननु नदीतीरे पञ्च फलानि सन्तीत्यनाप्तवाक्ये व्यभिचारान्नेदमनुमानमिति चेन्न आप्तोक्तत्वेनापि विशेषणात्, आप्तत्वं हि प्रकृतवाक्यार्थगोचरयथार्थवाक्यार्थज्ञानवत्त्वं न त्वप्रतारकत्वमात्रं तच्च वाक्यार्थप्रतीतेः पूर्वं दुर्ग्रहमिति चेन्न शब्दप्रामाण्यवादिभिरपि व्यभिचारिशब्दव्यावर्त्तकस्याप्तोक्तत्वस्य ग्राह्यत्वेनाभिमतत्वात्। (१)तेषां प्रामाण्यग्रहणार्थं तदपेक्षा, शाब्दन्तु ज्ञानं तद्ग्रहमन्तरेणाप्युपपद्यते तव तु यादृशं लिङ्गं तादृशग्रहणमावश्यकम् व्याप्यन्त्वाप्तोक्तत्वविशिष्टमिति चेन्न अयमत्राभ्रान्त इति सामान्यतो ग्रहणसम्भवात्। नन्वत्रेति प्रकृतसंसर्गे इत्येव पर्य्यवस्यति तथाच पूर्वमशक्यमेव (२)तद्ग्रहणमिति चेन्न (३)प्रकरणसमभिव्याहारादिमाहात्म्यात् सामान्यत आप्तत्वनिश्चयसम्भवेन लिङ्गनिश्चयसम्भवात्, कदाचित्तत्र विसंवादेऽपि वाष्पादौ धूमधर्मेणेवानुमानप्रवृत्तेः।

नन्वेते पदार्थाः संसृष्टा एवेति वा साध्यम् सम्भावितसंसर्गा इति वा? नाद्यः अनाप्तोक्ते व्यभिचारात्, न द्वितीयः योग्यतामात्रसिद्धावपि संसर्गानिश्चयान्निष्कम्पप्रवृत्त्यनुपपत्तेः, (४)योग्यतायाश्च पूर्वमेव हेतुविशेषणत्वेन ज्ञातत्वात् किमनुमानेनेति चेन्न नियमस्यैव साध्यत्वात् आप्तोक्तत्वेन विशेषणाच्च न व्यभिचार इत्युक्तत्वात्।

नन्वाकाङ्क्षा (५)श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः स च

---

(१) शब्दप्रामाण्यवादे आप्तोक्तत्वस्य ग्राह्यत्वेपि शाब्दज्ञाने तस्यानपेक्षितत्वान्न दोष इत्याशयेनाशङ्कते तेषामिति। शब्दानामित्यर्थः।

(२) तदिति। वाक्यार्थप्र[illegible]प्रकृतसंसर्गे मम चाभ्रान्त इति ग्रहणमित्यर्थः।

(३) प्रकरणेति। गमनभोजनादिप्रकरणपूर्वापरोच्चरितवाक्यमाहात्म्यादित्यर्थः। आदिपदाच्चेष्टापरिग्रहः। सामान्यत इति सामान्यतोदृष्टानुमानेनेत्यर्थः। तत्प्रकारश्च पूर्वं यत् यज्ज्ञानजन्यवाक्यं तत् तद्भ्रमादिविशिष्टज्ञानान्यतरजन्यं घटमानयेतिवाक्यवदिति व्याप्तिं गृहीत्वा ततो यस्तादृशवाक्यप्रयोक्ता स तद्धर्मविशेष्यकतत्प्रकारकज्ञानवान् गच्छामीति वाक्यप्रयोक्तृगन्तृपुरुषवत् इति सामान्यतो व्याप्तिं गृह्णाति तत्प्रयोक्तुर्गमनरूपप्रकरणज्ञानाच्च सामान्यव्याप्त्या वाक्यार्थयथार्थज्ञानसिद्धिरिति भावः। कदाचिदिति। उक्तलिङ्गभ्रमदशायामित्यर्थः। विसम्वादेऽपि–आप्तत्वभ्रमेपि संसर्गानुमापकहेतुभागेपि।

(४) ननु सामान्यतः संसर्गनिश्चयादेव प्रवृत्तिः स्यादत आह योग्यतायाश्चेति।

(५) जिज्ञासायोग्यतारूपाकाङ्क्षाया मणिकारोक्तमर्थमाह श्रोतरि तदुत्पाद्येति। तथाच श्रो-

स्वरूपसन्नेव हेतुस्तज्ज्ञाने च संसर्गज्ञानस्य पूर्वमेव भावादनुमान-
वैयर्थ्यमिति चेन्न न हि संसर्गावगमप्रागभावमात्रमाकाङ्क्षां ब्रूमः।
किं तर्हि ? स्मारिततदाक्षिप्ताविनाभावविशिष्टम्, तथा च (१)विशे-
षणांशज्ञानादेवाकाङ्क्षाया ज्ञानात्। तर्हि तावदेवाकाङ्क्षाऽस्त्विति चेन्न
विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्रापि नदीकच्छयोरवि-
नाभावसत्त्वेनान्वयबोधापत्तेः नीलमुत्पलमित्यत्र नीलोत्पलयोरवि-
नाभावाभावेऽपि तदाक्षिप्तयो(२)र्द्रव्यगुणयोरविनाभावसम्भवात्।

(३)यद्वा पदस्मारितगोचरा जिज्ञासैवाकाङ्क्षा (४)अभिधानापर्य-
वसानं वा। तथापि तज्ज्ञानमावश्यकं ज्ञायमानकारणे ज्ञानो-
पयुक्तव्यभिचारिवैलक्षण्यात् (५)व्याप्तिवत्। अत एवा(६)नन्वयनि-

---

वृनिष्ठतद्वाक्यज्ञानजन्यतादृशशाब्दबोधप्रागभावस्तद्वाक्यज्ञानजन्यतादृशशाब्दबोधे आकांक्षेत्यर्थः।
एकस्य तादृशप्रागभावेपि अन्यस्य तादृशशाब्दबोधानुदयात्समवायेन शाब्दबोधं अति स्वरूपेणाका-
ङ्क्षायाः कारणत्वलाभाय श्रोतृनिष्ठेति प्रागभावविशेषणम्। घटः कर्मत्वमित्यादौ घटवत्कर्मत्वमिति
भेदान्वयबुद्ध्यभावसम्पत्तये तद्वाक्यज्ञानजन्येति।

(१) विशेषणांशज्ञानदेवेति। तथाचोक्ताविनाभावरूपविशेषणज्ञानस्यानुमानेनैव सम्भवान्न
तद्वैयर्थ्यमिति भावः।

(२) द्रव्यगुणयोरिति। नीलत्वावच्छेदेनोत्पलत्वस्योत्पलत्वावच्छेदेन नीलत्वस्याभावेपि नील-
वृत्तिनो गुणत्वस्योत्पलवृत्तिद्रव्यत्वेनाविनाभावो वर्तत एव गुणाभाववति द्रव्यभेदादिति भावः।

(३) उक्ताविनाभावविशिष्टप्रागभावविशेषस्याकाङ्क्षात्वे गौरवादाह यद्वेति। पदस्मारितेति।
समभिव्याहृतपदस्मारितपदार्थजिज्ञासेत्यर्थः। चक्षुषादिना संस्कारवशादुपस्थिते घटादौ तथो-
पस्थितनीलादेः शाब्दबोधेच्छायामपि नीलो घट इति वाक्यात् घटादौ नीलाद्यन्वयबोधवारणाय पद-
स्मारितेति न दोषः।

(४) ननु तथापि घटः कर्मत्वमानयनं कृतिरित्यादौ जिज्ञासितस्यानयनादेराकाङ्क्षितत्वापत्ति-
रत आह अभिधानेति। तथाच यत्पदनिष्ठयत्पदव्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावस्तत्पदस्य त-
त्पदवत्त्वं तादृशबोधेऽभिधानापर्यवसानमित्यर्थः। प्रयुक्तत्वं च [illegible]रणाभावात्कार्याभाव इति प्रती-
तिसाक्षिकः स्वरूपसम्बन्धविशेषः भवति चाव्यवहितपूर्ववर्तितारूपसमभिव्याहारसम्बन्धेन घटपद-
निष्ठानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत्कर्मत्वमिति भेदान्वयबोधाभाव इति तादृशबोधेऽनुस्वार-
पदवत्त्वं घटपदस्याकाङ्क्षेति।

(५) व्याप्तिवदिति। उक्तानुमानेनाकाङ्क्षादौ ज्ञानोपयोगित्वसाधनादित्यर्थः।

(६) योग्यतामाहानन्वयेति। तद्धर्मेऽन्वयितावच्छेदकसम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिता-
काभावप्रकारकनिश्चयस्य विशेष्यतावच्छेदकत्वाभावो तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नस्य योग्यतेत्यर्थः।
नन्वेवं वह्निना सिंचतीत्यत्र शाब्दभ्रमानुपपत्तिरत आह बाधकेति। तत्र तत्संसर्गाभावप्रमाविशेष्यत्वाभा-
वस्तत्र तद्योग्यतेत्यर्थः एतज्ज्ञानं शाब्दबोधे हेतुरिति न शाब्दभ्रमानुपपत्तिः। बाधनिश्चयदशायां नैत-
ज्ज्ञानसम्भव इति न तत्काले शाब्दबोधातिप्रसङ्ग इति। ननु तथाप्यन्यनिष्ठं यद्वाह्न[illegible]रणकत्वादिसंसर्गा-

श्रयविरहो वा, बाधकप्रमाणाभावो वा, सजातीये दर्शनं वा; इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावाप्रतियोगित्वप्रमाविशेष्यत्वं वा योग्यताऽस्तु, तज्ज्ञानमावश्यकम् । आसत्तेरप्यव्यवधानेन स्मरणरूपाया ज्ञानं तन्त्रम् । संसर्गे च संसृज्यमानविशेषादेव विशेष इति नानभिमतविशेषसिद्धिः ।

यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बत्वात् गामभ्याजेतिपदकदम्बवदित्यनुमानात् ज्ञानावच्छेदकतयाऽभि(१)मतविशेषसिद्धिः ।

यत्तु एतानि पदानि स्मारितार्थसंसर्गवन्तीति साध्यम्, तत् पदानां पदार्थसंसर्गवत्त्वं बाधितमित्युपेक्षणीयम् । न च लिङ्गतया संसर्गज्ञापकत्वमेव पदानां संसर्गवत्त्वम्, तस्यानुमानात् पूर्वमसिद्धत्वेन व्याप्तेरग्रहात् ।

केचिच्चेष्टा प्रमाणान्तरमिति वदन्ति ।

तत्रोच्यते-चेष्टा द्विविधा (२)कृतसमयाऽकृतसमया च । तत्र कृतसमया अभिप्रायस्थं शब्दं स्मारयति न तु संसर्गप्रमामपि

भावप्रमाविशेष्यत्वं तदभावस्य सेकादौ सत्त्वादयोग्येपि वह्निना सिंचतीत्यादौ योग्यतापत्तिरत आह सजातीय इति । तत्सजातीये तत्सजातीयस्यान्वयदर्शनं संसर्गनिश्चयस्तत्र योग्यतेति भावः । पयसा सिञ्चतीत्यादौ प्रकृतसेकसजातीये पयोन्तरकरणकसेके प्रकृतपयःकरणकत्वसजायतीस्य पयोन्तरकरणकत्वस्य संसर्गनिश्चय इति तत्र शाब्दबोधः। वह्निना सिञ्चतीत्यादौ तु सेकसजातीये क्वापि सेके वह्निकरणकत्वसजातीयस्य कस्यपि वह्निकरणकत्वस्य संसर्गनिश्चयो नास्तीति न योग्यता इति तात्पर्यम् नतु येन केनचिद्रूपेण साजात्यमव्यावर्तकं, पदार्थतावच्छेदकरूपेण च तदश्व जातः पयः पिबतीत्याद्यसंग्राहकमत आह इतरेति । इतरत्वमपरत्वञ्चात्राविवक्षितम् तद्बुद्धेरहेतुत्वात्किन्तु तदीयान्वयितावच्छेदकसम्बन्धे तन्निष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावस्तत्र तद्योग्यतेत्यर्थः। वन्हिना सिञ्चतीत्यादौ वन्हिनिष्ठक[illegible]निरूपकत्वरूपान्वयितावच्छेदकसम्बन्धे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारक[illegible]विशेष्यत्वस्य सत्त्वान्नातिव्याप्तिः । पयसा सिञ्चतीत्यत्र पयोनिष्ठकरणताया[illegible]सम्बन्धे सेकनिष्ठात्यन्ताभावप्रतियोगित्वभ्रमविशेष्यत्वसत्त्वादसम्भववारणाय प्रमापदम् ।

(१) अभिमतविशेषेति । संसर्ग इत्यर्थः । न हि संसर्गाप्रतीत्या वाक्यरचना सम्भवति । न च वक्तृज्ञानं संसर्गाविषयमनुमीयमानं संसर्गमविषयीकृत्य भवति न च संसर्गे संसृज्यमानादन्यो विशेष· किन्तु पूर्वानुमाने साक्षात्संसर्गासिद्धिः उत्तरत्र वक्तृज्ञानावच्छेदकतयेति भावः।

(२) कृतसमयेति । एकाङ्गुल्या ककारः अङ्गुलिद्वयेन खकार इति शब्दबोधाय कृतसङ्केता कृतसमया तदन्याऽकृतसमयेत्यर्थः । अकृतसमया द्विविधा—कृत्यन्वयिनी ज्ञप्त्यन्वयिनी च । तत्राद्या ज्ञानविषयककृतिविषयकशाब्दज्ञानप्रयोज्या, ज्ञानविषयकशाब्दबोधप्रयोज्या चान्येति । अन्यत्सुगमम् ।

जनयति लिपिवत्, स्मृत्यारूढः शब्द एव तत्र प्रमाणं शब्दस्य च लिङ्गत्वमुक्तम् । न च शब्दस्मरणं चेष्टाया अवान्तरव्यापारः, चेष्टामन्तरेणापि शब्दादर्थप्रत्ययात् व्यापारत्वं तु चेष्टानैयत्यापत्तेः । नन्वेवं कथमेडमूकस्य चेष्टाधीनो व्यवहारस्तस्य तत्र समयग्रहाभावादिति चेन्न तस्य चेष्टातः कथमर्थेऽपि संप्रत्यय इति चिन्तनीयत्वात् तस्यार्थेऽपि सङ्गतिग्रहाभावात् । व्यवहारस्तु तस्याविनाभावग्रहात् करितुरगयोरिव कशाङ्कुशाभिघातात्तद्व्यवहारपाटवोपपत्तेः ।

अकृतसमया तु या कृत्यान्वयिनी सा प्रयोजकाभिप्रायं स्मारयन्ती प्रयोज्यं प्रवर्त्तयति, न तु कुत्रचित् प्रमां जनयति । यथा शङ्खध्वनौ त्वया गन्तव्यमिति श्रुतशङ्खध्वनिः प्रतिष्ठते, तथा यदा मया तर्जन्यूर्द्ध्वीक्रियते तदा त्वयाऽसौ ताड़नीय इति तदा ताडयति, न तु किञ्चित् प्रमिणोति । ज्ञप्त्यन्वयिनी त्वकृतसमया यथा-दशानामङ्गुलीनामूर्द्धकरणेन दश सङ्ख्या मुद्राणां पुराणानां वा त्वया ज्ञातव्येति-कारकप्रधाना । हस्ताकुञ्चनदर्शनात्त्वया समागन्तव्यमिति क्रियाप्रधाना । तथाचानया चेष्टया पदार्था एव स्वतन्त्राः परं स्मार्य्यन्ते न तु तेषां परस्परमन्वयोऽपि बोध्यते, तद्बोधककर्तृकर्मादिविभक्तिवत् प्रकृते चेष्टैकदेशानां नियतानामभावात् । तर्हि संसर्गबोधमन्तरेण चेष्टातः कथं प्रवृत्तिनिवृत्ती इति चेत् संशयप्रतिभयोरन्यतरस्मादिति गृहाण । तस्मान्न चेष्टाऽपि प्रमाणमिति ॥ ३ ॥

ननु शब्दः कथं लिङ्गं शब्दस्यापदेशस्वभावत्वेन(१) लिङ्गभिन्नत्वादित्याशङ्क्याह—

हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् ॥४॥

अपदिश्यते कथ्यतेऽनेनार्थ इत्यपदेशः (२)शब्दः, स च हेतुलिङ्गपर्य्याय एव प्रमाणमिति । लिङ्गविधया प्रमाकरणमित्यर्थः ।

---

(१) अपदेशस्वभावत्वेनेति । स्वरूपाच्छादकरूपतयेत्यर्थः ।

(२) शब्द इति । तथाचेदृशव्युत्पत्त्या शब्देऽप्यपदेशशब्दो वर्तते, स च लिङ्गविधया लैङ्गिकज्ञान एव हेतुरिति, अनुमितिप्रमितिकरणं च शब्दोपि, एवं लिङ्गविधया करणत्वमपि शब्दे वर्तते तथाच हेतुरपदेशो लिङ्गं प्रमाणं करणमिति पर्याया इति सूत्रार्थः ।

एवं करणशब्दोऽपि लैङ्गिकज्ञानकरणे लिङ्ग एव वर्त्तते । द्वयी हि करणगतिः, किञ्चित् सन्निकर्षाधीनप्रवृत्ति किञ्चिच्चाविनाभावबलप्रवृत्ति । शब्दस्य तु अर्थेन न सन्निकर्षो नाप्यविनाभाव इति कथमर्थं गमयेत । सङ्केताद्गमयतीति चेत् सङ्केतो हि पदार्थे न तु तत्संसर्गे । तत्रापि सङ्केत इति चेन्न तस्यानेकविधत्वेन सङ्केतविषयभावानुपपत्तेः । पदार्थसङ्केतबलादेव (१)वाक्यार्थोऽपि भासते इति चेन्न (२)अन्यसङ्केतेनान्योपस्थितावतिप्रसङ्गात् । शब्दस्मारितसंसर्गत्वेन नियम इति चेत् (३)तथाचैतन्नियमबलेनानुमानस्यैव लब्धावसरत्वात् । सङ्केतस्यापि इच्छामात्रत्वेनातिप्रसक्तत्वात् । (४)ईश्वरेच्छा नातिप्रसक्तेति चेन्न तदिच्छामन्तरेणापि गङ्गादिपदात्तीराद्युपस्थितेरित्यलं नैयायिकेषु धृष्टतयेति ॥ ४ ॥

उपमानादीनामपि पराभिमतानाम् अविनाभावबलप्रवृत्तिकानां लैङ्गिक एवान्तर्भाव इति प्रतिपादयितुमाह—

अस्येदमिति बुद्ध्यपेक्षितत्वात् ॥ ५ ॥

उपमानार्थापत्तिसम्भवा(५)भावानामिति शेषः । अस्य व्यापकस्य इदं व्याप्यमित्याकारा या बुद्धिः सा जनकत्वेनापेक्षिता येषां ते तदपेक्षितास्तस्य भावस्तदपेक्षितत्वं तस्मादित्यर्थः । आहिताग्निपाठात् क्तान्तेन बहुव्रीहिः, (६)तारकादिपाठादितो वा ।

तत्रोपमानं तावदनुमानमेव (७)शब्दद्वारा । तथाहि-

---

(१) वाक्यार्थ इति । एकपदार्थनिरूपितसंसर्गवदपरपदार्थरूप इत्यर्थः ।

(२) वैशेषिको दूषयति अन्येति । वाक्यार्थपदार्थयोर्भेदादिति पूरणीयम् । अतिप्रसङ्गादिति । घटपदार्थसङ्केतात्पटपदार्थोपस्थितिः स्यादन्यत्वाविशेषादित्यर्थः ।

(३) यो हि यदर्थनिष्ठः स[illegible]तदर्थसंसर्गोपस्थितिहेतुरिति नियमस्वीकारेणातिप्रसङ्गवारणेपि वैशेषिकाभिमत[illegible]रत्याशयेनाह तथाचेति । त्वदुक्तव्याप्तिबलेन संसर्गोपस्थितिजनकत्वानुमाने[illegible]संसर्गस्यापि विषयत्वात् संसर्गबोधमात्रजनकतया शब्दस्य प्रमाणान्तरत्वं भवदुक्त[illegible]तामत्या[illegible]शयः । दोषान्तरमाह संकेतस्यापीति । इच्छामात्रं ईश्वरेच्छा वा सङ्केत इति विकल्प्याद्ये दोषमाहातिप्रसक्तत्वादिति । भ्रान्तस्य घटशब्दात्पटो बोद्धव्य इतीच्छया पटबोधः स्यादिति भावः ।

(४) द्वितीयमनूद्य दूषयति ईश्वरेच्छेति ।

(५) अत्र सम्भवपदं ऐतिह्यस्याप्युपलक्षकम् ।

(६) तारकादीति । अस्येदमिति बुद्धेर्याऽपेक्षा सा संजाता येषामिति विग्रहादितच्प्रत्यय इत्यर्थः ।

(७) शब्दद्वारेति । शब्देनैव तत्र संज्ञासंज्ञिपरिच्छेदात् शब्दस्य चानुमानान्तर्भूतत्वादिति भावः ।

गोसदृशो गवय इति वाक्यन्तावत् आरण्यकेन कीदृक् गवय इति नागरिकजिज्ञासायामभिधीयते तत्र यो गोसदृशः स गवयशब्दवाच्य इति सामानाधिकरण्यबलात् अतिदेशवाक्यश्रवणानन्तरमेव परिच्छिनत्ति, वनं गतस्तु तादृशं पिण्डमुपलभ्यायमसौ गवयशब्दवाच्य इति प्रतिसन्धत्ते । अतिदेशवाक्यश्रवणसमये गवयत्वं प्रवृत्तिनिमित्तं (१)न ज्ञातमतः कथं संज्ञापरिच्छेद इति चेत् लक्षणया तत्प्रतीतिसम्भवात् । गोसदृशो गवय इति वाक्येऽन्वयानुपपत्तिविरहात् कथं लक्षणेति चेत् (२)तात्पर्यानुपपत्तेः सत्त्वात्, न हि व्युत्पित्सुं प्रति गोसादृश्यस्य सखण्डस्य प्रवृत्तिनिमित्तत्वेनोपदर्शनमनुचितं तस्मादखण्डजातिविशेषे तात्पर्यमस्येति लक्षणासम्भवात् ।

(३)यद्वा गवयशब्दो गवयवाचकः असति वृत्त्यन्तरे शिष्टैस्तत्र प्रयुज्यमानत्वात्, असति वृत्त्यन्तरे यः शब्दो यत्र शिष्टैः प्रयुज्यते स तस्य वाचको यथा गोशब्दो गोरित्यनुमानादेव गवयसंज्ञां परिच्छिनत्ति। (४)तर्कश्च यस्त्वयोपमानसहकारी वाच्यः स वरमनुमाने क्लृप्तप्रमाणभावेऽस्तु किं कल्पनीयप्रमा[illegible]त्वेनोपमानेनेति, अनुमानमयूखे विस्तरोऽत्रान्वेष्टव्यः ।

अर्थापत्तिरप्यनुमानमेव तथाहि दृष्टार्थापत्तिस्तावज्जीवतश्चैत्रस्य गृहासत्त्वेन दृढतरप्रमाणावधृतेन बहिःसत्त्वं कल्पयति । तत्रोपपाद्योपपादकयोर्व्याप्यव्यापकभावावधारणाधीनैव बहिःसत्त्वप्रतीतिः, भवति हि जीवतो गृहासत्त्वं बहिःसत्त्वेन सहचरितं, बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपप-

(१) न ज्ञातमिति । नोपस्थितमित्यर्थः । गव[illegible]प्रवृत्तिनिमित्तेन गवयपदवाच्योऽयं पिण्ड इति प्रमात्वप्रमितिः सा च न वाक्यमात्रजन्या तदानीं तस्यानुपस्थितेः [illegible] शक्यतावच्छेदकप्रकारेण शक्तिनिश्चय इति शङ्कार्थः ।

(२) तात्पर्यानुपपत्तेरिति । सैव च लक्षणाबीजमन्यथा यष्टीः प्रवेशयेत्यादावनुपपत्त्य[illegible]भावाल्लक्षणा न स्यात् इति सैव लक्षणाबीजमिति भावः । तां प्रकृते प्रदर्शयन्नाह नहीति । सखण्डगोसादृश्यापेक्षयाऽखण्डगवयत्वजातिरूपे तात्पर्यस्य लाघवेनौचित्यादिति तात्पर्यम् ।

(३) ननु यत्र प्रवृत्तिनिमित्तविशेषबोधे न तात्पर्यं किन्तु यो गोसदृशः स गवयपदवाच्य इति स्वरूपाख्यानमात्रम् तत्राप्युक्तसामग्रीतः प्रवृत्तिनिमित्तविशेषबोधो भवत्येव तत्र तात्पर्याभावाल्लक्षणा कथं स्यादत आह यद्वेति । एतदनुमाने पिण्डमात्रे सिद्धसाधनं प्रवृत्तिनिमित्ते चासिद्धिर्दोषो द्रष्टव्यः ।

(४) तर्कश्चेति । गोसादृश्यापेक्षया गवयत्वरूपाखण्डजातौ तात्पर्यमिति लाघवरूपस्तर्क इत्यर्थः ।

ऽनुमिति वा ज्ञानम् । तत्राद्येऽन्वयव्याप्तिरेवान्त्ये तु व्यतिरेकव्याप्तेरेव ग्रह इति । व्याप्तिरस्ति न तस्य ग्रहणमिहोपयुज्यत इति चेत् (१)व्याप्तिग्रहमन्तरेणार्थापत्त्याभासानवकाशात्, स्वरूपसत्या व्याप्त्या वस्तुतो यदुपपादकं तस्यैव कल्पना स्यादिति दिक् । (२)संशयकरणिकाया विरोधकरणिकायाश्चानुमानान्तर्भाव ऊहनीयः । विरोधस्यापि सहानवस्थाननियमलक्षणस्य व्याप्तिघटितत्वात् । (३)श्रुतार्थापत्तिरप्यनुमितानुमानं–पीनो देवदत्तो दिवा न भुङ्क्ते इत्यनेन वाक्येन पीनत्वमनुमितं तेन च पीनत्वेन रात्रिभोजनानुमानम्–,देवदत्तो रात्रौ भुङ्क्ते दिवाऽभोजित्वे सति पीनत्वासम्भवादिति ।

(४)सम्भवोऽप्यनुमानमेव, तदुदाहरणं हि—सम्भवति खार्यां द्रोणः सम्भवति द्रोणे आढकम् सम्भवति सहस्रे शतमित्यादि । तत्रेयं खारी द्रोणवती तद्घटितत्वात् यद्येन घटितं तत्तेन तद्वत् यथाऽवयववान् घटः । एवमन्यदप्यूह्यम् । यत्तु सम्भवति ब्राह्मणे विद्या–सम्भवति क्षत्रिये शौर्य्यमित्यादि, तत्प्रमाणमेव न भवति अ[illegible]यकत्वात् ।

---

(१) स्वरूपसत्त्या व्याप्तेर्भ्रमविषयावृत्तित्वादित्याह व्याप्तिग्रहमिति ।

(२) संशयकरणिकाया इति । अर्थापत्तेरिति शेषः । देवदत्तस्य शतवर्षजीवित्वगृहवृत्तित्वनियमनिश्चयानन्तरं कथंचित् गृहावृत्तित्वे निश्चिते जीवित्वनिश्चयगृहान्यावृत्तित्वनिश्चययोः प्रामाण्याप्रामाण्यनिश्चयविरहेण जीवति देवदत्तो न वेति संशयस्ततस्तदपनोदार्थं बहिस्सत्त्वकल्पनमर्थापत्तिरिति एकं मतम् । प्रमाणयोर्विरोधनिश्चयजनितप्रमाणद्वयनिष्ठाप्रामाण्यद्वारकतद्विरोधोपपादकज्ञानमर्थापत्तिरत्र च प्रमाणयोर्विरोधनिश्चयः करणम् तथाहि देवदत्ते शतवर्षजीवित्वगृहान्यावृत्तित्वरूपप्रमाणयोः शतवर्षमध्ये गृहा[illegible]विरुद्धार्थविषयकत्वनिश्चयो जातस्तेन प्रमाणयोरप्रामाण्यसंशयस्तत एकप्र[illegible] बलवत्ताप्रतिसन्धानेन बहिःसत्त्वकल्पनम् , तेन दुर्बलबलीयसोः प्रमाणयो[illegible]आदितो भवति अर्थापत्त्येति च मतान्तरम् । अनुमानान्तर्भाव इति । गृहमात्रवृत्ति[illegible]भावव्याप्यवर्षजीवित्ववानयं देवदत्त इति विरोधनिश्चयात्मकपरामर्शाद्बहिःसत्त्वसिद्धिरनुमानमेवाति भावः ।

(३) अर्थान्वयिन्या दृष्टार्थापत्तेरनुमानान्तर्भावं प्रदर्श्य शब्दान्वयिन्या श्रुतार्थापत्तेस्तदाह श्रुतार्थापत्तिरिति । अत्र शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यत इति न्यायाद्रात्रौ भुंक्त इति शब्दकल्पना श्रुतार्थापत्तिरिति भावः । तस्या अनुमानेऽन्तर्भावं प्रदर्शयन्नाहानुमितानुमानमित्यादिना ।

(४) व्याप्तिनिरपेक्षं सम्भवज्ञानं प्रमाणान्तरमिति सम्भवप्रामाण्यवादिनः । व्याप्तिसापेक्षतया सम्भवोऽप्यनुमानमिति वैशेषिकाः ।

(१)अभावोऽपि न मानान्तरं कार्य्येण कारणानुमानवत् कार्य्याभावेन कारणाभावानुमानस्य व्याप्तिमूलकत्वेनानुमान एवान्तर्भावात्।

(२)भट्टमते तु भूतलादावभावग्राहकं प्रमाणमनुपलम्भाख्यम्। तत् कचित् प्रत्यक्षे क्वचिच्चानुमानेऽन्तर्भूतं चक्षुरादिनैवाभावग्रहात्। न चेन्द्रियमधिकरणग्रह एवोपक्षीणम्, अभावग्रहपर्य्यन्तं तद्व्यापारसत्त्वात्।

ऐतिह्यमविज्ञातप्रवक्तृकं प्रवादपारम्पर्य्यम्। इति हेति निपातसमुदायः पुरावृत्ते वर्त्तते, तस्य भाव ऐतिह्यम्। तत् यदि बाधितार्थं न भवति तदा शब्दान्तर्निवेशादनुमानम्। यदिह वटे यक्षो मधूकतरौ गौरीत्यादि,तद् यद्याप्तोक्तं तदा पूर्ववत्(३)। नाप्तोक्तञ्चेत्तदा न प्रमाणम्। तदेवं प्रत्यक्षमनुमानञ्चेति सिद्धं द्वयमेव प्रमाणमिति ॥ ५॥

लैङ्गिकं व्याख्याय इदानीं प्रकरणान्तरमारभते—

आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः॥६॥

उत्पद्यत इति शेषः। संयोगविशेषः प्रणिधानादिसन्निधानम्। एतस्मादसमवायिकारणादात्मनि समवायिनि स्मृ[illegible]ाविशेष उत्पद्यते। निमित्तकारणमाह–संस्कारादिति। चकारेण [illegible]री पूर्वानुभवः समुच्चीयते। अनुभवयाथार्थ्यायाथार्थ्यमियमनुविधत्ते, रज्जुं भुजङ्गतयोपलभ्य पलायितस्य (४)तथैव स्मृतेः। न च सततं स्मृतिप्रसङ्गः, संस्कारोद्बोधाधीनत्वात्, तदुक्तं प्रशस्तदेवपादैः- "लिङ्गदर्शनेच्छानुस्मरणा(५)द्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेषु शेषानुव्यवसायस्मरणेच्छाद्वेषहेतुरतीत[illegible] स्मृतिः" इति।

आर्षं ज्ञानं सूत्रकृता पृथङ् न लक्षितं [illegible]क्षान्तर्भावितम्।

---

(१) भावनिष्ठव्याप्तेरेवानुमानाङ्गत्वामिति अभावप्रामाण्यवादिनामाशयः। भा[illegible]वत् अभावनिष्ठाप्यनुमानाङ्गमविशेषादिति आचार्याशयः।

(२) भट्टमतमिति। अधिकरणप्रत्यक्षेणैवेन्द्रियव्यापारे विरते कथमभावग्रहः, किञ्चालीकस्वभावस्याभावस्येन्द्रियसम्बन्धाभावादप्रत्यक्षतया, शब्दाद्यनुच्चारणदशायामपि अभावज्ञानेन च तद्ग्राहकमनुपलम्भाख्यं प्रमाणमङ्गीकार्यमिति भट्टमताभिप्रायः।

(३) पूर्ववदिति। शब्देऽन्तर्भाव इत्यर्थः।

(४) तथैवेति। अयथार्थेत्यर्थः।

(५) स्मरणादीति। प्रणिधानादिरादिपदार्थः।

पदार्थप्रदेशाख्ये तु प्रकरणे तदुक्तं तद्यथा–"आम्नायविधातॄणामृषीणामतीतनागतवर्त्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेषु लिङ्गाद्यनपेक्षादात्ममनसोः संयोगाद्धर्मविशेषाच्च(१) प्रातिभं ज्ञानं यदुत्पद्यते तदार्षम्" इति । तच्च कदाचिल्लौकिकानामपि भवति यथा 'कन्यका वदति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति' ॥ ६ ॥

तदेवं चतुर्विधां विद्यां व्युत्पाद्य इदानीमविद्यां व्युत्पादयितुमर्हति । तत्र (२)संशयविपर्य्ययौ प्रसङ्गात् पूर्वमेव निरूपितौ, स्वप्नं निरूपयितुमाह—

तथा स्वप्नः ॥ ७ ॥

यथाऽऽत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिस्तथा स्वप्नज्ञानमपीत्यर्थः । उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्य इन्द्रियद्वारेण यदनुभवनं मानसम्, तत् स्वप्नज्ञानम् ।

तच्च त्रिविधम् । किञ्चित् संस्कारपाटवात् कामी क्रुद्धो वा यमर्थमादृतश्चिन्तयन् स्वपिति तस्य तस्यामवस्थायां प्रत्यक्षाकार[illegible]ज्ञानं पुराणादिश्रवणजनितसंस्कारवशाज्जायते कर्ण[illegible]थ युद्धमिदमित्याकारम् । किञ्चिद्धातूनां वातपित्तश्लेष्मणां दोषात् । तत्र वातदोषादाकाशगमन–वसुन्धरापर्य्यटन–व्याघ्रादिभयपलायनादीनि पश्यति । पित्तोपचयदोषमहिम्ना वह्निप्रवेश–वह्निज्वालालिङ्गन–कनकपर्वत–विद्युल्लताविस्फुरण–दिग्दाहादिकं पश्यति । श्लेष्मदोषप्राबल्यात्तु समुद्रसन्तरण–नदीमज्जन–धारासारवर्षण–रजतपर्वतादि पश्यति । अदृष्टवशादपि तज्जन्मानुभूतेषु जन्मान्तरानुभूते वा सिद्धोपप्लुतान्तःकरणस्य यज्ज्ञानमुत्पद्यते[illegible] शुभावेदकं धर्मात् गजारोहण–पर्वतारोहण–छत्रलाभ[illegible]सभक्षण–राजसन्दर्शनादिविषयकम् । अधर्मात्तु तैला[illegible]न्धकूपपतनोष्ट्रारोहण–पङ्कमज्जन–स्वविवाहदर्शनादिविषयकं.

---

(१) धर्मविशेषात् इति कारणनिर्देशः । सच विद्यातपःसमाधिजो प्रकृष्टधर्मः ।

(२) संशयविपर्ययाविति । संशयानध्यवसायावित्यर्थः । निरूपिताविति । साक्षात्प्रकारान्तरेण [illegible]णाय [illegible]थिताविथ्यर्थः । साधारणधर्मवद्धर्मिज्ञानस्य संशयकारणतयोल्लेखात् साक्षात्, असाधारणधर्म[illegible]नस्य तत्कारणतयाऽनुल्लेखात् तस्यानध्यावसायकारणत्वेन सूचनमिति परम्परया चैतौ [illegible]रथ[illegible]विति भावः ।

स्वप्नज्ञानमुत्पद्यते । (१)त्रयाणां मिलितानामेवात्र कारणत्वं गुणप्रधानभावमाश्रित्यायं विभागो द्रष्टव्यः ॥ ७ ॥

ननु यज्ज्ञानं स्वप्नमध्ये स्वप्नज्ञानानुभूतस्यैवार्थस्य स्मृतिरूपं जायते तत्र स्वप्नत्वं न वर्त्तते स्वप्नस्यानुभवरूपत्वात् तथा च कस्मात् कारणात्तदुत्पत्तिरित्यत आह—

स्वप्नान्तिकम् ॥ ८ ॥

तथेति पूर्वसूत्रादनुवर्त्तते । तेनात्ममनसोः संयोगविशेषात् संस्काराच्च यथा स्वप्नस्तथा स्वप्नान्तिकमपीत्यर्थः । एतावानेव विशेषो यत् स्वप्नज्ञानं पूर्वानुभवजनितात् संस्कारात्, स्वप्नान्तिकन्तु तत्कालोत्पन्नानुभवजनितसंस्कारादेव । तदुक्तं प्रशस्तदेवाचार्यैः—(२)"अतीतज्ञानप्रत्यवेक्षणात् स्मृतिरेव" इति । उक्तञ्च वृत्तिकारैः—"अनुभूतवस्तुस्फुरणार्थतया न स्मरणादर्थान्तरं स्वप्नज्ञानम्" इति ।

स्वप्नमध्ये प्रमाभूतं यज्ज्ञानं तत् स्वप्नान्तिकमिति केचित् । यथा शय्यायां शयानोऽस्मीत्यादि ॥ ८ ॥

स्वप्नस्वप्नान्तिकयोः कारणं समुच्चिनोति—

धर्माच्च ॥ ९ ॥

अधर्मसमुच्चयार्थश्चकारः । (३)कृतव्याख्यानमेतत् ॥ ९ ॥

इदानीं (४)पर्य्यायमधिकृत्याह—

इन्द्रियदोषात् संस्कारदोषाच्चाविद्या ॥ १० ॥

अविद्येति सामान्यद[illegible] विपर्य्यये वर्त्तते प्रकरणात् संशयस्वप्नानध्यवसायानामुक्तत्वात् । तत्रेन्द्रिय[illegible] वातपित्ताद्यभिभवकृतमपाटवम् । संस्कारदोषो विशेषादर्शनसाहित[illegible]तं हि मिथ्याज्ञानं जायते ॥ १० ॥

---

(१) त्रयाणामिति । संस्कारपाटवधातुदोषादृष्टानामित्यर्थः ।

(२) अतीतेति । स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति तथापीत्यादिः । तथा चाविद्या चतुर्विधैवेति भावः ।

(३) कृतव्याख्यानमिति । सप्तमसूत्रे इत्यर्थः ।

(४) पर्यायमिति । साक्षाद्विपर्ययमविद्यामाहेत्यर्थः ।

अविद्यासामान्यलक्षणमाह—

तद्दुष्टज्ञानम् ॥ ११ ॥

तदित्यव्ययपदं सर्वनामसमानार्थकमविद्यां परामृशति । साऽविद्या दुष्टज्ञानं—व्यभिचारिज्ञानमतस्मिंस्तदिति ज्ञानं—व्यधिकरणप्रकारावच्छिन्नं—विशेष्यावृत्तिप्रकारकमिति यावत् । दोषश्च ज्ञानस्यानिश्चयरूपत्वमपि । तेनैककोटिकत्वेऽपि संशयो दुष्ट एवानवधारणात्मकत्वात् । तदनेन संशयविपर्य्ययस्वप्नानध्यवसायानाश्चतुर्णामप्युपग्रहः ॥ ११ ॥

अदुष्टं विद्या ॥ १२ ॥

ज्ञानमित्यनुवर्त्तते । अदुष्टमदुष्टेन्द्रियजन्यं यत्र यदस्ति तत्र तदनुभवो वा (१)समानाधिकरणप्रकारानुभवो वा विशेष्यावृत्त्यप्रकारकानुभवो वा विद्येत्यर्थः । तच्चाध्यक्षं लैङ्गिकञ्च द्वयमेव ॥ १२ ॥

नन्वार्षमपि ज्ञानं समानाधिकरणप्रकारकमेव तच्च नेन्द्रियजन्यमसन्निकृष्टार्थगोचरत्वात् । न लैङ्गिकं लिङ्गानुसन्धानमन्तरेण जायमा[illegible]त् । तथा चैतत्करणं तृतीयं प्रमाणमायातमत आह—

आर्षं सिद्धदर्शनञ्च धर्मेभ्यः ॥ १३ ॥

ऋषीणां गालवप्रभृतीनां यदतीतानागतविषयकं ज्ञानं तदार्षम् । यच्च सिद्धानां मन्त्रौषधिगुटिकाञ्जनादिना व्यवहितविप्रकृष्टार्थगोचरज्ञानं प्रतिसिद्धिगतानां यद्दर्शनं तदुभयं धर्मेभ्यो यथार्थसाक्षात्कारि ज्ञानं जायते । तद्योगिप्रत्यक्षेऽन्तर्भावान्न विद्यान्तरमिति वृत्तिकृतः । आर्षं [illegible] (२)विद्यैव, सा च ऋषीणां लौकिकानाञ्च भ[illegible] । तच्च मानसं प्रत्यक्षमेव उत्प्रेक्षासहकृतेन मनसा [illegible] नियमसन्दर्शनादि–लिङ्गजनितं वा । प्राग्भवी[illegible]स्तद्यनैवात्र व्याप्तिधीः, स्तनपानेष्टसाधनताव्याप्तिग्रहवत् । प्रशस्ताचार्य्यास्तु सिद्धदर्शनं न ज्ञानान्तरमित्याहुः । तथा हि

(१) समानाधिकरणेति । तद्वति तत्प्रकारकज्ञानमित्यर्थः । स्मृतिकरणस्य प्रमाणत्ववारणायानुभवपदम् । विशेष्येति । निर्विकल्पकज्ञानस्य प्रमात्वरक्षार्थमन्त्यकल्पानुसरणम् ।

(२) विद्यैवेति । तथाचार्षमपि भाष्यकारश्चतुर्थी विद्यार्थान्तरमित्याह । तद्दूषयति साचेति । [illegible]थ चोपस्कारमते द्विविधैव विद्येत्यभिप्रायः ।

यदि सिद्धानां गुटिकाञ्जनादिसिद्धिनिमित्तप्रभवं व्यवहितविप्रकृष्टविषयं तदुच्यते तदा प्रत्यक्षमेव । यदि तु दिव्यान्तरीक्षभौमानां ग्रहनक्षत्रसञ्चारादिनिमित्ताधीनं तदा तल्लैङ्गिकमेव तथा सहचारदर्शनेन व्याप्तिपरिच्छेदादिति ॥ १३ ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे नवमाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं नवमोऽध्यायः ।



दशमाध्याये प्रथमाह्निकम् ।

आत्मगुणानां कारणतो भेदव्युत्पादनं दशमाध्यायार्थः । तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" अ०१ आ०१ सू०९ इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह—

इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ॥ १ ॥

सुखदुःखयोर्मिथः परस्परमर्थान्तरभावो भेदो वैजात्यमिति यावत् । कुत इत्यत आह-इष्टानिष्टकारणविशेषात् इष्टं इष्यमाणं स्रक्चन्दनवनितादि अनिष्टमनिष्यमाणमहिकण्टकादि तद्रूपं यत् कारणं तस्य विशेषाद्भेदात्, कारणवैजात्याधीनं कार्य्यवैजात्यमावश्यकं युक्तं। भेदकान्तरमाह—विरोधात् सहानवस्थानलक्षणात् न [illegible]न्नात्मन्येकदा सुखदुःखयोरनुभवः । चकारादनयोः [illegible]र्य्यभेदे भेदकं समुच्चिनोति । तथाहि—अनुग्रहाभिष्वङ्गनयनप्रसादादि सुखस्य, दैन्यमुखमालिन्यादि दुःखस्य कार्य्यमिति ततोऽप्यनयोर्भेदः । तदुक्तं प्रशस्ताचार्य्यैः-"अनुग्रहलक्षणं सुखं स्रगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोत्पन्नधीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगाद् यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत् सुखम्" इति । तदिदमतीतेषु स्रक्चन्दनादिषु स्मृतिजमनागतेषु सङ्कल्पज[illegible] (१)गौतमीय सूत्रे सुखापरिगणनं वैराग्याय सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति ॥ १ ॥

[illegible]स्तां सुखदुःखे परस्परं भिन्ने ज्ञानादभिन्ने स्यातां स्मृत्यनुभववदित्यत आह—

संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः ॥२॥

सुखदुःखयोर्ज्ञानान्तरत्वे ज्ञानभिन्नत्वे संशयनिर्णयाभ्यन्तर-

---

(१) ननु तर्हि गौतमीयोक्तसूत्रपरिगणितप्रमेये सुखं कुतो नोक्तमत आह गौतमीय इति ।

यदि सिद्धानां गुटिकाञ्जनादिसिद्धिनिमित्तप्रभवं व्यवहितविप्रकृष्टविषयं तदुच्यते तदा प्रत्यक्षमेव । यदि तु दिव्यान्तरीक्षभौमानां ग्रहनक्षत्रसञ्चारादिनिमित्ताधीनं तदा तल्लैङ्गिकमेव तथा सहचार-दर्शनेन व्याप्तिपरिच्छेदादिति ॥ १३ ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे नवमाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं नवमोऽध्यायः ।



दशमाध्याये प्रथमाह्निकम् ।

आत्मगुणानां कारणतो भेदव्युत्पादनं दशमाध्यायार्थः । तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गा-स्तु प्रमेयम्" अ०१ आ०१ सू०९ इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुख-दुःखयोरेव प्रथमं भेदमाह—

इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुः-खयोरर्थान्तरभावः ॥ १ ॥

सुखदुःखयोर्मिथः परस्परमर्थान्तरभावो भेदो वैजात्यमिति यावत् । कुत इत्यत आह-इष्टानिष्टकारणविशेषात् इष्टं इष्यमाणं स्रक्चन्दनवनितादि अनिष्टमनिष्यमाणमहिकण्टकादि तद्रूपं यत् कारणं तस्य विशेषाद्भेदात्, कारणवैजात्याधीनं कार्य्यवैजात्यमा-वश्यकं यत[illegible]भेदकान्तरमाह—विरोधात् सहानवस्थानलक्षणात् न [illegible]आत्मन्येकदा सुखदुःखयोरनुभवः । चकारादनयोः [illegible]भेदे भेदकं समुच्चिनोति । तथाहि—अनुग्रहाभिष्वङ्गनयनप्र-सादादि सुखस्य, दैन्यमुखमालिन्यादि दुःखस्य कार्य्यमिति ततो-ऽप्यनयोर्भेदः । तदुक्तं प्रशस्ताचार्य्यैः-"अनुग्रहलक्षणं सुखं स्रगा-द्यभिप्रेतविषयसान्निध्ये सति इष्टोत्पन्नधीन्द्रियार्थसन्निकर्षाद्धर्माद्यपे-क्षादात्ममनसोः संयोगाद् यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनक-मुत्पद्यते तत् सुखम्" इति । तदिदमतीतेषु स्रक्चन्दनादिषु स्मृति-जमनागतेषु सङ्कल्प[illegible](१)गौतमीये सूत्रे सुखापरिगणनं वैराग्या-य सुखमपि[illegible]त्वेन भावयतो वैराग्यं स्यादेतदर्थमिति ॥ १ ॥

[illegible]स्तां सुखदुःखे परस्परं भिन्ने ज्ञानादभिन्ने स्यातां स्मृत्य-नुभववदित्यत आह—

संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः ॥२॥

सुखदुःखयोर्ज्ञानान्तरत्वे ज्ञानभिन्नत्वे संशयनिर्णयाभ्यन्तर-

---

(१) ननु तर्हि गौतमीयोक्तसूत्रपरिगणितप्रमेये सुखं कुतो नोक्तमत आह गौतमीय इति ।

त्वाभावो हेतुर्लिङ्गमित्यर्थः । तदयमर्थः—सुखं दुःखं वा ज्ञानं भवत् संशयरूपं वा स्यात् निर्णयरूपं वा ? नाद्यः कोटिद्वयानुल्लेखित्वात् । न द्वितीयः एककोट्यनुल्लेखित्वात् । तथा च यावद्विशेषबाधात् सामान्यबाधः । द्वावेव हि ज्ञानस्य विशेषौ संशयत्वं निर्णयत्वञ्च, तदुभयञ्च सुखे दुःखे च बाधितमिति ज्ञानत्वमपि तत्र बाधितम् । चकारादनुभवबाधं समुच्चिनोति । सुखदुःखयोरहं सुखी दुःखीति मानसोऽनुभवो न त्वहं जाने सन्देह्मि निश्चिनोमीत्याकारोऽनुभव इति ॥ २ ॥

भेदकान्तरमाह—

तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम् ॥ ३ ॥

तयोः संशयनिर्णययोर्निष्पत्तिरुत्पत्तिः प्रत्यक्षाल्लिङ्गाच्च सुखं दुःखं वा न प्रत्यक्षसामग्रीजन्यं न वा लिङ्गजन्यम् । चतुर्विधं हि सुखं–वैषयिकं मानोरथिकम् आभिमानिकमाभ्यासिकञ्च । तत्र त्रयाणामिन्द्रियसन्निकर्षप्रभवत्वं नास्त्येव । प्रथममिन्द्रियार्थसन्निकर्षजत्वात् ज्ञानं स्यादिति चेन्न सामग्र्येकदेशस्य [illegible]स्य साजात्यानापादकत्वात् अन्यथा दिक्कालसाधारण्येन [illegible]का-र्यैकजात्यापत्तेः । किञ्च इन्द्रियार्थसन्निकर्षादुत्पद्यमानं सुखं [illegible] विकल्पकं वा स्यात् सविकल्पकं वा ? नाद्यः अतीन्द्रियत्वप्रसङ्गात् । न द्वितीयः विशेष्यविशेषणभावेन द्वयोरनाकलनरूपत्वात् । किञ्च सुखदुःखयोरवश्यसंवेद्यत्वात् ज्ञानस्यावश्यसंवेद्यत्वेऽनवस्थाप्रसङ्गात् । लैङ्गिकमिति (१)लिङ्गमेव वैषयिकवत् ।

वृत्तिकृतस्तु तयोर्ज्ञानसुखयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां प्रत्यक्षलैङ्गिकज्ञानव्याख्यानाभ्यां व्याख्याता । [illegible] ज्ञानमिन्द्रियजम्, लैङ्गिकन्तु लिङ्गजम्, सुखादिकन्तु नैतादृशमिति व्या[illegible] ॥ ३ ॥

लैङ्गिकज्ञानात् सुखादेः प्रकारभेदाधीनं भेदमाह—

अभूदित्यपि ॥ ४ ॥

इतिशब्दः प्रकारे । अपिशब्दो भविष्यतीत्याकारान्तरसमुच्चये । तथा च पर्वते वन्हिरभूद्भविष्यति वेति लैङ्गिके ज्ञानेऽती-

(१) लिङ्गमेवेति । स्वार्थे कप्रत्यय इत्यर्थः ।

तादिः प्रकारो दृश्यते न चैवंप्रकारं सुखं दुःखं वोत्पद्यमानमुपलब्धम् ॥ ४ ॥

भेदकान्तरं समुच्चिनोति—

सति च कार्य्यादर्शनात् ॥ ५ ॥

सति इन्द्रियार्थसन्निकर्षे सति च व्याप्तिपक्षधर्मतादिप्रतिसन्धाने कार्य्यस्य सुखस्य दुःखस्य वाऽदर्शनात् न प्रत्यक्षमात्रं सुखं दुःखं वा, न लैङ्गिकमात्रं वा । तदयमर्थः—ज्ञानसामान्यं तावत् सुखदुःखे न भवत (१)इत्युक्तम् । ज्ञानविशेषः प्रत्यक्षज्ञानं वा भवेदनुमितिरूपं वा ? इन्द्रियार्थसन्निकर्षे स्रक्चन्दनादिप्रत्यक्षे सुखत्वानुभवाभावात् । न द्वितीयः चन्दनाद्यनुमितौ वन्ह्याद्यनुमितौ वा सुखत्वदुःखत्वान्यतराननुभवात् । एवं प्रत्यक्षविशेषेऽनुमितिविशेषे वा सुखदुःखयोरननुभवान्न तद्विशेषोऽपीति ॥ ५ ॥

भेदकान्तरमाह—

एकार्थसमवायिकारणान्तरेषु दृष्टत्वात् ॥ ६ ॥

[illegible]दो[illegible]खयोरिति शेषः । सुखं प्रति एकार्थसमवेतानि असाधारणकारणानि—धर्मः सुखे रागः सुखकारणेच्छा तदुपादानयत्नः स्रक्चन्दनादिज्ञानम् । दुःखं प्रति तु—अधर्मः अनिष्टकण्टकादिज्ञानम्, एषु एकार्थसमवायिषु कारणेषु दृष्टत्वादित्यर्थः । ज्ञानन्तु निर्विकल्पकमेकार्थसमवेतमसाधारणकारणं नापेक्षत एव । सविकल्पकन्त्वपेक्षते विशेषणज्ञानं तत्तु कारणान्तरं स्वविजातीयकारणं न भवति, मनःसंयोगस्तु साधारणत्वादविवक्षितः । यद्यपि स्मृतिः संस्[illegible]साधारणमपेक्षते तथापि तद्भेदः स्फुटसिद्ध एवे[illegible]भवमादाय भेदचिन्तनात् । लैङ्गिके यद्यपि व्याप्ति-[illegible]धर्मतादिज्ञानापेक्षा तथाप्यन्तरशब्देनैव तद्व्युदासः । तदयं प्रमाणार्थः-सुखदुःखे अनुभवभिन्ने स्वसमानाधिकरणस्वजातीयासाधारणकारणजन्यत्वात् स्मृतिवदाद्यशब्दवच्च ॥ ६ ॥

ननु यदि कारणभेदाधीनो ज्ञानात् सुखदुःखयोः सुखाच्च दुःखस्य स्तम्भकुम्भादिवदेव परस्परं भेदः, तदा शरीरस्य तदवय-

(१) इत्युक्तमिति । तयोरिति तृतीयसूत्र इत्यर्थः ।

वानाञ्च शिरःपादपृष्ठोदरादीनां न परस्परं भेदः स्यात्, तत्र हि
परमाणुद्व्यणुकादीनां लोहितरेतसोर्वा कारणानामविशेषादित्यत
आह—

एकदेशे इत्येकस्मिन् शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ॥ ७ ॥

एकदेश इति । अवयवे इत्यर्थः । एकस्मिन्निति । शरीरे
इत्यर्थः । शिर इत्येकदेशः उदरं पृष्ठं मर्माणि च स्नायुप्रभृतीनि
तेषां विशेषो वैजात्यम्, तद्विशेषेभ्यस्तत्कारणविशेषेभ्यः । तत्रा-
पि कारणवैजात्यादेव वैजात्यं न हि यज्जातीयं शिरःसमवायिका-
रणं तज्जातीयमेवोदरपृष्ठादेरपि, तन्तुकपालाद्युपादानवैजात्यात्
पटघटादौ वैजात्यवत् तत्रापि वैजात्यसम्भवात् । तन्तुकपालादेरपि
अंशु(१)शर्करादिवैजात्यात् । एवं तत्र तत्राप्यन्वेष्टव्यम् । परमाणूनां
साधारण्येऽपि स्वस्वोपादानवैजात्यस्य सर्वत्र वैजात्यप्रयोजक-
त्वात् । द्रव्यत्वेन तूपादानसाजात्यं न वैजात्यप्रयोजकमिति दिक् ॥७॥

र्थस्य स

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे दशमाध्यायस्य
प्रथममाह्निकम् ॥

त्पत्तिः प्रत्यय

मीन्द्र

॥

---

(१) अंशुशर्करादीति । अंशवस्तन्त्ववयवाः शर्करा कपालावयवा इत्यर्थः ॥

दशमाध्याये द्वितीयाह्निकम् ।

इदानीं प्रसङ्गतस्त्रयाणां कारणानां विशेषविवेचनमारभते—

कारणमिति द्रव्ये कार्य्यसमवायात् ॥ १ ॥

कारणं समवायिकारणमिदमिति-प्रतीतिप्रयोगौ द्रव्ये (१)द्रष्टव्यौ। कुत एवमत आह-कार्य्यसमवायात् । कार्य्याणि द्रव्यगुणकर्माणि तत्रैव समवेयन्ति यतः ॥ १ ॥

तत् किं समवायिकारणत्वमात्रं द्रव्याणामत आह—

संयोगाद्वा ॥ २ ॥

पटोत्पत्तौ तन्तूनां समवायिकारणत्ववत् निमित्तकारणत्वमपि तुरीतन्तुसंयोगस्यापि पटकारणत्वात्, तत्संयोगद्वारा तुर्य्यास्तन्तोश्च पटनिमित्तकारणत्वमपि । वाकारः समुच्चये तुरीतन्तुसंयोगं प्रति तन्तोः समवायिकारणत्वेऽपि पटं प्रति तद्द्वारा निमित्तकारणत्वात् ॥ २ ॥

कर्मणि [illegible]कारणत्वं तदाह—

[illegible] कारणे समवायात् कर्माणि ॥ ३ ॥

असमवायिकारणानीति शेषः । असमवायिकारणत्वञ्च (२)कार्य्यकारणभावसम्बन्ध्येकार्थसमवेतकारणत्वम् । तच्च कार्य्यैकार्थसमवायात् कारणैकार्थसमवायाद्वा । तत्राद्या लघ्वी द्वितीया महतीति वैशेषिकपरिभाषा । तत्र कया प्रत्यासत्त्या संयोगविभागसंस्कारान् प्रति कर्मणामसमवायिकारणत्वमित्यत आह—कारणे समवायात् । कारणे संयोगादिसमवायि[illegible] समवायात्, तथाच कार्य्यैकार्थसमवायल[illegible] लघ्व्या प्रत्यासत्त्या संयोगादौ कर्मणोऽसमवायि[illegible]णत्वमित्यर्थः ॥ ३ ॥

---

(१) द्र[illegible]याविति । अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं कारणत्वमिति कारणसामान्यलक्षणम् । तत् त्रिविधं समवाय्यसमवायिनिमित्तभेदात् । तत्र समवायसम्बन्धेन तत्कार्याश्रयत्वं तत्समवायिकारणत्वम्, समवायेन कार्याश्रितत्वं तु सामान्यतः समवायिकारणत्वम् तच्च द्रव्य एव नान्यत्रेत्यर्थः ।

(२) कार्यकारणभावेति । तथा च समवायस्वसमवायिसमवायान्यतरसम्बन्धेन समवायिकारणप्रत्यासन्नत्वे सति कारणत्वमसमवायिकारणत्वमित्यर्थः । तत्र संयोगादीनामसमवायिकारणे कर्मणि समवायेन तत्समवायिकारणप्रत्यासन्नत्वादसमवायिकारणत्वव्यवहार इति भावः ।

रूपादीनां गुणानामवयववर्त्तिनामवयविगुणादिषु कीदृशी का-
रणतेत्यपेक्षायामाह—

तथा रूपे कारणैकार्थसमवायाच्च ॥ ४ ॥

रूप इति । रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वगुरुत्वद्रव-
त्वस्नेहाद्युपलक्षयति । तथेत्यसमवायिकारणत्वमतिदिशति । का-
रणैकार्थसमवायादिति । अवयविरूपादीनां समवायिकारणं यदव-
यवि तेन सहैकार्थसमवायेन महत्या प्रत्यासत्त्याऽवयविरूपादिक-
मारभते, तद् यथा कपालरूपादि घटे रूपादिकमारभते इति सर्वत्र
द्रष्टव्यम् । चकारादमीषां क्वचिन्निमित्तत्वमपि समुच्चिनोति ॥ ४ ॥

द्रव्यारम्भे संयोगस्यासमवायिकारणस्य लघ्वीं प्रत्यासत्तिमाह—

कारणसमवायात् संयोगः पटस्य ॥ ५ ॥

कारणे समवायिकारणे समवायात् (१)संयोगोऽपि पटादौ
कार्य्ये कार्य्यैकार्थसमवायलक्षणया प्रत्यासत्त्याऽसमवायिकारण-
मित्यर्थः । पटपदेन कार्य्यद्रव्यमात्रमुपलक्षयति । यदि त्ववयवाव-
यवसंयोगोऽपि पटादेरसमवायिकारणं तदा का[illegible]र्थसमवायो-
ऽपीति कश्चित् ॥ ५ ॥

संयोगस्य क्वचित् महत्या प्रत्यासत्त्या कारणत्वमित्याह—

कारणकारणसमवायाच्च ॥ ६ ॥

तूलपिण्डावयवे वर्त्तमानः प्रचयाख्यः संयोगस्तूलकपिण्डे मह-
त्त्वमारभते तत्र कारणैकार्थसमवायः प्रत्यासत्तिरित्यर्थः ॥ ६ ॥

एवं समवायिनिरूपितां कारणतां निरूप्य निमित्तकारणतां
निरूपयितुं प्रकरणान्तरमारभते—

संयुक्तसमवायादग्नेर्वैशेषिक[illegible] ॥ ७ ॥

अग्नेर्वैशेषिकं विशेषगुणमौष्ण्यं संयुक्तसमवाय[illegible]केषु
(२)निमित्तकारणम् । उपलक्षणञ्चैतत् ज्ञानं प्रति सर्वेषा[illegible]नाम्
कारणत्वं, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्त-
कारणत्वमेव । सुखादीनां भेदप्रतिपादनाय प्रपञ्चोऽयं द्रष्टव्यः ॥ ७ ॥

---

(१) संयोगोपीति । तन्तुसंयोगोपि समवायिकारणे तन्तौ साक्षात्सम्बन्धेनैव वर्तत इति भावः ।

(२) निमित्तकारणमिति । समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमिति सामान्यलक्षण-
मित्यर्थः ।

इदानीमाम्नायप्रामाण्यं द्रढयितुमुक्तमेवार्थमाह--

दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ॥ ८ ॥

दृष्टानां-प्रमाणत उपलब्धानां कर्मणां यागदानस्नानादीनां, दृष्टप्रयोजनानां-दृष्टमुपदिष्टं प्रयोजनं येषां, तथाहि "स्वर्गकामो यजेत" "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादौ (१)विधिसमभिव्याहृतमेव फलम्, क्वचिदार्थवादिकं यथा "य एता रात्रीरधीयीत तस्य पितरो, घृतकुल्या मधुकुल्याः क्षरन्ति" इत्यादौ, क्वचिच्चौपादानिकम् यथा "विश्वजिता यजेत" इत्यादौ, अत्र हि न विधिसमभिव्याहृतं नार्थवादोपस्थितमित्यौपादानिकं—काल्पनिकं स्वर्गस्यैव स्वतःसुन्दरस्य फलस्य कल्पनीयत्वात्, तथाचाशुतरविनाशिनामेतेषां कर्मणां चिरभाविने फलाय कारणत्वमनुपपद्यमानमत एतेषां प्रयोगोऽनुष्ठानमभ्युदयायापूर्वायेत्यर्थः । ननु श्रुतिप्रामाण्ये सति स्यादेवं तदेव तु दुर्लभं न हि मीमांसकानामिव नित्यनिर्दो[illegible]श्रुतिप्रामाण्यं त्वयेष्यते पौरुषेयत्वेनाभ्युपगमात्, पुरु[illegible]च भ्रमप्रमादविप्रलिप्सादिसम्भवादत आह-दृष्टाभाव इति । [illegible]ष्ट पुरुषान्तरेऽस्मदादौ भ्रमप्रमाद(२)विप्रलिप्सादिकं पुरुषदूषणं तदभावे सतीत्यर्थः। क्षितिकर्तृत्वेन वेदवक्तृत्वेन वाऽनुमितस्य पुरुषधौरेयस्य निर्दोषत्वेनैवोपस्थितेः। तथाच तद्वचसां न निरभिधेयता न विपरीताभिधेयता न निष्प्रयोजनाभिधेयता, भूतेन्द्रियमनसां दोषात् भ्रमप्रमादकरणापाटवादिप्रयुक्ता एव वचसामविशुद्धयः सम्भाव्यन्ते । न चेश्वरवचसि [illegible]वः, तदुक्तम्—

रा[illegible]नादिभिर्वक्ता ग्रस्तत्वादनृतं वदेत् ।
[illegible]श्चेश्वरे न विद्यन्ते स ब्रूयात् कथमन्यथा ॥ इति [illegible]

(१) विधिसमभिव्याहृतमिति । विधिवाक्यप्रतिपादितमित्यर्थः ।

(२) विप्रलिप्सादीति । करणापाटवादि-आदिपदग्राह्यम् । वेदस्य [illegible]ण्यं किन्त्वीश्वरोक्तत्वेनेति वैशेषिकाशयः ।

अनेनोपस्कारविषमस्थलविवेचनेन श्रीभगवानुम[illegible]

नतु तेनेश्वरेण वेदः प्रणीत इत्यत्रैव विप्रतिपत्तिरत आह—

तद्वचनादाम्नायस्य प्रामाण्यमिति ॥ ९ ॥

इति शास्त्रपरिसमाप्तौ। तद्वचनात्तेनेश्वरेण वचनात् प्रणयनादाम्नायस्य वेदस्य प्रामाण्यम्। तथाहि वेदास्तावत् पौरुषेया वाक्यत्वादिति साधितं न चास्मदादयस्तेषां सहस्रशाखावच्छिन्नानां वक्तारः सम्भाव्यन्ते अतीन्द्रियार्थत्वात्, न चातीन्द्रियार्थदर्शिनोऽस्मदादयः। किञ्चाप्तोक्ता वेदा महाजनपरिगृहीतत्वात्, यन्नाप्तोक्तं न तन्महाजनपरिगृहीतं महाजनपरिगृहीतश्चेदं तस्मादाप्तोक्तम्। स्वतन्त्रपुरुषप्रणीतत्वञ्चाप्तोक्तत्वम्। महाजनपरिगृहीतत्वञ्च सर्वदर्शनान्तःपातिपुरुषानुष्ठीयमानार्थत्वम्। क्वचित् फलाभावः कर्मकर्तृसाधनवैगुण्यादित्युक्तम्। कर्तृस्मरणाभावान्नैवमिति चेन्न कर्तृस्मरणस्य पूर्वमेव साधितत्वात्। तत्प्रणीतत्वञ्च स्वतन्त्रपुरुषप्रणीतत्वादेव सिद्धम्, न त्वस्मदादीनां सहस्रशाखवेदप्रणयने स्वातन्त्र्यं सम्भवतीत्युक्तत्वात्। किञ्च प्रमाया गुणजन्यत्वेन वैदिकप्रमाया अपि गुणजन्यत्वमावश्यकम्। तत्र च ... यथार्थवाक्यार्थज्ञानमेव वाच्यस्तथाच तादृश एव वेदे वक्ता, ...र्वादिविषयकसाक्षात्कारवान्, तादृशश्च नेश्वरान्य इति सुष्ठु ॥ ९ ॥

अकृत भवानीतनयो भवनाथसुतो भवार्चने निरतः।
एतं कणादसूत्रोपस्कारं शङ्करः श्रीमान् ॥
हलाचास्पदं यद्यपि नेतरेषामियं कृतिः स्यादुपहासयोग्या।
तथापि शिष्यैर्गुरुगौरवेण परःसहस्रैः समुपासनीया ॥

इतिश्रीशाङ्करे वैशेषिकसूत्रोपस्कारे दशमाध्यायस्य द्वितीयमाह्निकम्।

समाप्तश्चायं दशमाध्यायः।

समाप्तश्चेदं शास्त्रम्।